नं. ५२६५

नाम. साम वेदस्य संहिता भाष्यं
साम वेदार्थ प्रकाश:

कर्ता. श्री सायण:

पत्र. २१४   सम्व: १९२२

विषय   संहिता ब्राह्मण भाग:

© Dharmartha Trust J&K. Digitized by eGangotri

सामवेदसंहिता उत्तरकभाष्य पत्रे २२८
श्लोकसंख्या ७००

© Dharmartha Trust J&K. Digitized by eGangotri

॥श्रीगणेशाय नमः॥ ॐ श्रीसायणाचार्येभ्यो नमः॥ श्री[illegible]पतये॥ ॐ वागीशाद्याः सु
मनसः सर्वार्थानामुपक्रमे॥ यं नत्वा कृतकृत्याः [illegible]मि गजाननं॥ यस्य निश्वसि
तं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वन्दे विद्यातीर्थ[illegible]हेश्वरं। तत्कटाक्षेण तद्रूपं दधद्
बुक्कमहीपतिः। आदिशत्सायणाचार्यं वेदार्थस्य प्रकाश[illegible]॥ ये पूर्वोत्तरमीमांसे ते व्याख्या
यातिसंग्रहात्। कृपालुः सायणाचार्यो वेदार्थं वक्तुम[illegible]तः॥ व्याख्यातावृग्यजुर्वेदौ सामवे
देपि संहिता। छंदोभिधा भूद्व्याख्याता व्याख्यास्यत्युत्तराभिधां॥ छंदस्येकैकशोधीता ऋ
चः साम्नामाश्रया हि। स्तोत्रनिष्पत्तये सूक्तान्युत्तरायामधीयते॥ स्तोमशब्देन ज्योतिष्टोमा
दिषु सोमयागेषु प्रयुज्यमानास्त्रिवृत्पंचदशाद्योऽभिधीयंते। अत एव तैत्तिरीयकाः प्रश्नो
त्तराभ्यामित्थमामनंति। तदाहुः कतमानि वा वतानि ज्योतींषि य एतस्य सोमा इति त्रिवृत्पंचदशाः
सप्तदशा एकविंशा एतानि वा वतानि ज्योतींषि य एतस्य स्तोमा इत्यथैर्बहुधा समामनंति। ते च ब
हुभिरवान्तरभेदैरुपेताः समाम्नाताः स्तोमा नवसंख्याकाः तेषु पूर्वोक्तास्त्रिवृदादयश्चत्वारः त्रि
णवस्त्रयस्त्रिंशो त्रिनवसंख्योपेतः स्तोमस्त्रिणव इत्युच्यते। छंदोमनामकाः स्तोमास्त्रयस्तेषु
चतुर्विंशाख्यस्तोमः प्रथमः गायत्री छंदसा चतुर्विंशत्यक्षरोपेतेन मीयत इति छंदोमः। चतुश्च
त्वारिंशाख्यो द्वितीयः। स च त्रिष्टुप्छंदसा मीयते। अष्टाचत्वारिंशाख्यस्तृतीयः। सोपि जगतीछं

© Dharmartha Trust J&K. Digitized by eGangotri

दसामीयते। नन्वध्यायद्वयाम्नातलक्षणोपेतेभ्यस्त्रिवृदादिको ऽष्टादशनवदशादिनामका
बहवः स्तोमा विद्यंते। तथा च तैत्तिरीयकाः केषुचिदिष्टकोपधानमंत्रेषु देवतावत्रूपेष्टकात्वभि
ष्टयानाम्नां स्तोमानामनंति। आशुस्त्रिवृद्भान्तः पंचदशो व्योम सप्तदशः प्रतूर्त्तिरष्टादश
स्तपो नवदशोऽभिवर्त्तः सविंशो धरुण एकविंशो वर्चो द्वाविंशः संभरणस्त्रयोविंशो योनिः
चतुर्विंशो गर्भाः पंचविंश ओजस्त्रिणवः क्रतुरेकविंशो ब्रध्नस्य विष्टपं चतुस्त्रिंशो नाकः ष
ट्त्रिंशो विवर्त्तोऽष्टाचत्वारिंश इति। एवं तर्हि संत्येव बहूनि स्तोमांतराणि तेषां लक्षणं त्रिवृद्ब्रा
ह्मणांतरानुसारेण सूत्रकारैर्व्याख्यातानि ते च स्तोमास्सर्वेऽप्याज्यपृष्ठादिस्तोत्रेषूपयुक्ताः
पंचदशान्याज्यानि सप्तदशानि पृष्ठानीत्यादिश्रुतिभ्यः स्तोत्रविषयास्तन्निष्पादकसामवि
षयाश्च सर्वेऽपि विचारा अस्माभिः छंदोव्याख्यातानां गीतावलायामेव जैमिनीयान्यधिकरणा
न्युदाहृत्य प्रदर्शिताः। किं बहुना एकं साम तृचे क्रियते स्तोत्रमित्यादिवचनैः स्तोत्रनिष्पादकस्य
साम्नस्तृचप्रगाथादिरूपाणि सूक्तान्याश्रयत्वेनोत्तरार्चिकसंहिताग्रंथे समाम्नातानि स च ग्रं
थ एकविंशतिसंख्याकैरध्यायैरूपेतस्तत्र प्रथ[illegible]खंडे प्रथमसूक्ते प्रत्येकमृ
क्प्रथमा सैवमाम्नायते। ॥छ॥ उपास्मै गायता नरः पवमानायेंदवे। अभि देवाँ इयक्षत इति।
हे नरो नेतारो यज्ञस्य देवानिंद्रा[illegible]ते अभिमुखं [illegible]मिच्छते। पवमानाय क्षरते।

© Dharmartha Trust J&K. Digitized by eGangotri

अस्मा अभिष्वूयमाणायेंदवे सोमायोपगायतोपगानं [damaged] ॥छ॥ अथ द्वितीया॥ अभिते
मधुनापयोऽथर्वाणो अशिश्रयुः। देवं देवाय देवयु इति [damaged] तव देवं देवनशीलं देवयुं दे
वयुं देवकामं रसं देवाय देवनशीलायेंद्राय मधुनापयोग[damaged]नप[damaged]सोऽथर्वाण ऋषयोऽभ्यशि
श्रयुः अभ्यश्रीणन् समस्कुर्वन्नित्यर्थः॥छ॥ अथ तृ[damaged]या॥ सनः पवस्व शं गवे शं जनाय श
मर्वते। शं राजन्नोषधीभ्य इति। हे राजन् दीप्यमानसो[damaged]प्रसिद्धस्त्वं नो अस्माकं गवे शं सुखं प
वस्व क्षरो जनाय सुखाय पवशं पवस्व। अर्वते अश्वाय शं पवस्व। ओषधीभ्यश्च शं पवस्व॥छ॥
अथ द्वितीयतृचे प्रथमा॥ दविद्युतत्या रुचा परिष्टोभंत्या कृपा। सोमाः शुक्रा गवाशिर इति। शु दू
क्रा उज्ज्वला दविद्युतत्या द्योतमानया रुचा दीप्त्या परिष्टोभंत्या परितः शब्दायमानया कृपा
धारया च शुक्राः सोमाः गवाशिरो भवंति। गव्येन पयसा मिश्रिता भवंतीत्यर्थः॥छ॥ अथ द्वि
तीया॥ हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत्। सीदंतो वनुषो यथा॥ वाजी बलवान् सो
मो हेतृभिः प्रेरकैः स्तोतृभिर्हिन्वानः स्तोत्रैः प्रेर्यमाणो हितोऽभीष्टकारी सन् वाजं यागाख्यं यु
द्धमाक्रमीत् आक्रमति। तत्र दृष्टांतः। यथा वनुषो हंतारो भटाः सीदंतो युद्धं प्रविशंतः आक्रमंति
तद्वदित्यर्थः॥छ॥ अथ तृतीया॥ ऋधक् सोम स्वस्तये संजग्मानो दिवा कवे। पवस्व सूर्यो दृशे
इति॥ हे सोम [blot] कवे क्रांतदर्शिन् सूर्यः सुवीर्यस्त्वं ऋधक् ऋध्नुवन्। तथा च यास्कः। ऋधगिति पृथक्
२

© Dharmartha Trust J&K. Digitized by eGangotri

भावस्यानुप्रवचनं भवस्यथाष्टमो सर्पेद्यपन्न इति। संजग्मानः संगच्छमानः स्वस्तये देवोऽस्मीना
पञ्चदिशाभिर्व्विः विभक्तिव्यत्ययः। पवस्व सूर दिवाकवे दिवाकविरिति पाठौ॥७॥ तृतीयतृचे प्रथमा॥
पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत। अर्वन्तो न श्रवस्यव इति॥ मार्जनप्रसंगमाह। हे कवे क्रां
तप्रज्ञ हे वाजिन्नन्नवन् सोम पवमानस्य दशापवित्रेण पूयमानस्य ते तव सर्गाः सृज्यंत इति। स
र्गाः धाराः कीदृश्यः श्रवस्यवः छंदसि परेच्छायां क्यच्। यद्वा श्रवणमन्नं कामयमानाः त्वरीया धारा
असृक्षत विसृजंति निर्गच्छंतीः स्यर्थः॥ तत्र दृष्टांतः। अर्वंतो वा अश्वधारा बाहुल्यं॥८॥ अथ द्वितीया
॥अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये। अवावशंत धीतय इति॥ धारानिर्गमनप्रसंगादभि
धीयते। मधुश्चुतं मधुररसस्य च्यावयितारं क्षारयितारं कोशं द्रोणकलशमच्छाभिलक्ष्य अ
व्यये अविस्वभूवे वारे वाले दशापवित्रे असृग्रं सोमा ऋ[illegible]भिः सृज्यंते सृजेः कर्मणि तिङं
त्तिङ्गे भवंतीति रुरमादेशाः किंच। धीतयः अंगुलिना मैत[illegible]धयंति पिबंत्याभिरिति। अस्मदीया
अंगुलयः अवावशंत। तान् सोमान् पुनः पुनर्मार्जनार्थं का[illegible]यंते॥९॥ अथ तृतीया॥ अच्छा स
मुद्रमिंदवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा[illegible]सी[illegible]तः सोमाः समुद्रं सोमानामेक
त्रैव संगमनस्थानं द्रोणकलशमच्छाभिगच्छंति। तत्र दृष्टांत[illegible]जग्माने[illegible]पयः प्रदानेन जनानां प्राणयि
त्र्यो नवप्रसूतिका गावः अस्तं गृहं[illegible]प्रतीतद्वत्। किं[illegible]भवन्[illegible]यात्र ऋतस्य सत्यभूतस्य यज्ञस्य ये

© Dharmartha Trust J&K. Digitized by eGangotri

निःस्थानमगमन्। आभिमुख्येन[illegible]छति। गमने लुठि सिचो[illegible]धालोपः॥७॥ इतिश्रीसाम
वेदार्थप्रकाशे उत्तराग्रंथस्य प्रथमस्याध्यायस्य प्रथमः खं[illegible]॥ ॥ अथ द्वितीयखंडे प्रथमतृ
चे प्रथमा॥ अग्न आयाहि वीतये गृणानो हव्य[illegible]ये। नि हो[illegible]बर्हिषीति॥ हे अग्ने अंगना
दिगुणविशिष्टत्वं आयाहि अस्मद्यज्ञं प्रत्यागच्छ किमर्थं [illegible]ये। हविषां च रू पुरोडाशादीनां भ
3 क्षणाय। कीदृशः। स गृणानः अस्माभिः स्तूयमानः [illegible]नकर्म्मणि कर्त्तव्ये सति यः पुनश्च कि
मर्थं हव्यदातये देवेभ्यो हविः प्रदानाय। आगत्य च होता [illegible]वा[illegible]माद्धाना सन बर्हिषि आस्तीर्णे
दर्भे निषत्सि निषीद सेरेः छांदसः शपो लुक्॥७॥ अथ द्वितीया॥ तं त्वा समिद्भिरंगिरो घृतेन वर्द्ध
यामसि। बृहच्छोचा यविष्ठ्येति॥ हे अंगिरः अंगनादिगुणयुक्त अंगारस्वरूप वा अंगिरसः पुत्र
वाग्ने तं पूर्वोक्तगुणं त्वा त्वां समिद्भिः समिंधनहेतुभिर्दा[illegible]रुभिर्घृतेनाज्येन च वर्द्धयामसि वर्द्धयामः
॥ अतो हे यविष्ठ युवतमाग्ने बृहत् महत् असंतं शोच दीप्यस्व॥७॥ अथ तृतीया॥ स नः पृथु श्रवा
य्यमच्छा देव विवाससि। बृहदग्ने सुवीर्यमिति॥ हे देव द्योतमानाग्ने स पूर्वोक्तगुणस्त्वं पृथु विस्तीर्णं श्रवा
य्यं श्रवणीयं प्रशस्यं बृहत् महत् सुवीर्यं शोभनवीर्योपेतं धनं नो अस्मान् अच्छ विवाससि अभिगमय॥
अत्र वाजसनेयकं। अच्छा देव विवासकं सीति तन्नो गमयेत्येवैतदाहेति॥७॥ द्वितीयतृचे प्रथमा॥ आ
नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं। मध्वा रजांसि सुक्रतू इति॥ सुक्रतू शोभनकर्म्माणौ हे मित्रावरुणौ

© Dharmartha Trust J&K. Digitized by eGangotri

नो॰ अस्माकं गव्यूतिं गवां मार्गगोनिवासस्थानं घृतैः क्षरणसाधनैः पयोभिः उदकैः आउक्षतं सम
न्तात् सिंचतमस्मभ्यं देयप्रीः गाः प्रयच्छतमित्यर्थः। किंच मध्वमधुरेण सुखरसेन रजांसि पार
लौकिकान्यस्मदावासस्थानानि सिंचतं॥१६॥ अथ द्वितीया॥ उरुशंसा नमोवृधा मह्ना दक्षस्य
राजथः। द्राघिष्ठाभिः शुचिव्रतेति॥ शुचिव्रता परिशुद्धकर्माणौ हे मित्रावरुणौ उरुशंसा उरुभिर्ब
हुभिः शंसनीयौ। यद्वा उरु बहुच्छंसः शासनं ययोस्तौ। नमोवृधा नमसा हविर्लक्षणेनान्नेन स्तोत्रे
ण वा वर्द्धमानौ। द्राघिष्ठाभिः अत्यंतदीर्घस्तुतिलक्षणाभिर्वाग्भिर्युक्तौ युवां दक्षस्य दक्षतेस
मर्थीभवत्यनेनेति दक्षं दधं बलं वा तस्य मह्ना महत्वेन राजथः ईशाथे॥१७॥ अथ तृतीया॥ गृणा
ना जमदग्निना योनावृतस्य सीदतं। पातं सोमम् ऋतावृधेति॥ हे मित्रावरुणौ जमदग्निना एतन्नाम
केन महर्षिणा यद्वा जमदग्निना प्रज्वलिताग्निना विश्वा[illegible]ण गृणाना स्तूयमानौ सुवां ऋतस्य प
क्षस्य योनौ देवयजनाख्ये देशे सीदतं उपविशतं। ऋतावृ[illegible] ऋतस्य कर्मफलस्य वर्द्धयितारौ युवां
सोमं पातम् अस्माभिषुतं सोमं पिबतं॥१८॥ अथ तृतीयतृ[illegible]प्रथमा॥ आ याहि सुषुमा हि त इंद्र सो
मं पिबा इमं। एदं बर्हिः सदो ममेति॥ हे इंद्र त्वमायाहि [illegible] वेतदर्थे [illegible] गच्छ। वयं ते तदर्थं सुषुम हि सो
मम् अभिषुतवंतः खलु [illegible]मिममभिषुतं सोमं त्वं पिब तदर्थं म[illegible]मिदं बर्हिर्वेद्यामास्तीर्णं दर्भमास
दः आसीद अभिनिषीद॥१९॥ [illegible] द्वितीया॥ आ त्वा ब्रह्मयु[illegible]तामिंद्र केशिना उप ब्रह्माणि

© Dharmartha Trust J&K. Digitized by eGangotri

नः शृण्विति। हे इंद्र ब्रह्मयुजा ब्रह्मणा मंत्रेण युज्यमानौ केशिनौ [damaged] केशवंतौ हरी हरणशीलाव
श्वौ लालामावहतां अभिप्रापयतां। त्वं चास्मद्यज्ञमुपेत्य नः [damaged] लाणि स्तोत्राणि शृणु सम्य
क् चित्ते धारय॥७॥ अथ तृतीया॥ ब्रह्माणस्त्वा युजा वयं हे [damaged] पा इंद्र सोमिनः। सुतावंतो हवा तो ३
महे इति॥ हे इंद्र ब्रह्माणो ब्राह्मणा वयं त्वा त्वां युजा योग्येन स्तोत्रेण हवामहे आह्वयामहे। कथंभूतं
सोमपां सोमस्य पातारं इंद्र त्वां वयं सोमिनः सोमयुक्ताः सुतवंतः अभिषुतेन सोमेन उपेताः ब्रह्मा
णस्त्वा युजा वयं ब्रह्माणस्त्वा युजेति च शाठी॥७॥ चतुर्थे तृचे प्रथमा॥ इंद्राग्नी आगतं सुतं गीर्भिर्न
भो वरेण्यं। अस्य पातं धियेषितेति॥ इंद्रश्चाग्निश्च इंद्राग्नी। हे इंद्राग्नी देवौ सुतमभिषवादिभिः संस्का
रैः संस्कृतं। अत एव वरेण्यं वरणीयं संभजनीयमिमं सोमं प्रति गीर्भिरस्मदीयाभिर्वाग्भिराहूतौ
सन्तौ नभः नभसः स्वर्गाख्यात् स्थानादागतमागच्छतं। आगत्य च धिया अस्माभिः क्रियमाणेन क
र्मणा इषिता इषितौ प्रेरितौ युवामस्येमं सोमं पानं पिबतं। यद्वा धिया अस्मदीयया धिया बुद्ध्या इषि
तौ प्राप्तौ अस्मन्स्तुत्या प्रेरितौ युवामिमं सोमं पिबतं॥७॥ अथ द्वितीया॥ इंद्राग्नी जरितुः सचा यज्ञो
जिगाति चेतनः। अया पातमिमं सुतमिति॥ हे इंद्राग्नी जरितुः स्तोतुः सचा स्वर्गादिलक्षणफलप्रा
प्तौ सहायभूतः यज्ञः ज्योतिष्टोमादियज्ञसाधनभूतं चेतनः इंद्रियाणां चेतयिता आप्यायनकारी
सन् सो सोमः जिगाति। युवामभिगच्छति। अया अस्मदीयया स्तुतिलक्षणया अनया वाचा आहूतौ संतौ यु

© Dharmartha Trust J&K. Digitized by eGangotri

यां सुतमभिषवादिसंस्कारोपेतमिमं सोमं पातं पिबतं ॥७॥ अथ तृतीया ॥ इंद्रमग्निं कविछदा यज्ञस्य
जूत्या वृणे । ता सोमस्येह तृंपतामिति ॥ यज्ञस्य यज्ञसाधनभूतस्य सोमस्य जूत्या जूतिः प्रेरणं । सोम
स्त्वां यजमानं प्रेरयत्विति । साधनमुपलभ्यतस्याध्येकतो यजमानः प्रवर्त्तत इति हितस्य प्रेरकत्वं । तया
प्रेरणरूपया जूत्या प्रेरितोऽहं स्तोता कविछदा कवीनां स्तोतॄणां मुचितफलप्रदानेनोपछेदकौ इंद्रम
ग्निं च युवां वृणे संभजे ता । आगतौ च तावेंद्राग्नी इह अस्मदीयेऽस्मिन् कर्म्मणि सोमस्य सोमेन सोमपा
नेन तृंपतां तृप्यतां ॥७॥ इति श्रीसामवेदार्थप्रकाशे उत्तराग्रेयस्य प्रथमस्याध्यायस्य द्वितीयः खंडः
॥७॥ ॥ अथ तृतीयखंडस्य प्रथमतृचे प्रथमा ॥ उच्चाते जातमंधसो दिवि सद्भूम्याददे उग्रं शर्म्मम
हिश्रवइति ॥ हे सोम ते तव संबंधिनोऽंधसोरसस्य उच्चा उपरि जातं जन्म । अपि च दिवि द्युलोके सतः
नं स्तव संबंधि उग्रं उद्गूर्णं शर्म्म सुखं महि महत् श्रावान्न ... भूमिष्ठे यजमाने राददे आदीयते । दि
वि सद्दिविषदिति पाठो ॥७॥ अथ द्वितीया ॥ स न इंद्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परिस्रवे
ति ॥ हे सोम वरिवोवित् धनस्य लंभकः पवमानः नोऽस्माकं यज्यवे ... इंद्राय वरुणाय मरुद्भ्यश्च प
रिस्रव धारया क्षर ॥७॥ अथ तृतीया ॥ एना विश्वा ... उः ... मानुषाणां । सिषासंतो वनाम
हइति ॥ मानुषाणां मनुष्याणां लब्धव्यानि एना एनानि विश्वानि ... सर्वाणि कर्म्माणि यज्ञसाधनानि धु २
धनानि हे सोम त्वत्सकाशात् ... अभिमुख्येन अर्यो भिगच्छति लब्धुमिच्छासंतः संसक्ता मिछं न वयं च वना

महे। त्वां संभजामहे॥ ७॥ द्वितीये सूक्तरूपे प्रगाथे प्रथमा॥ [illegible] सोमधारया अपो वसानो अ

र्षसि। आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः॥ [illegible] पुनानः पूयमानः। त्वं अपः

उदकानि वसतीवर्याख्यानि वसानः आच्छादयन् धारया [illegible] गच्छति। ततः रत्नधाः रत्नानां

रमणीयानां दाता त्वं ऋतस्य सत्यभूतस्य यज्ञस्य योनिं स्था[illegible]मासादयति। कीदृशस्त्वं उत्सः प्रस्रवणशी

लः देवो द्योतमानः हिरण्ययो हिरण्मयः सुवर्णमयः सत्ति स्व[illegible] निरपर्दः॥ उत्सो देवः उत्सो देवेति पाठे॥ ॥

॥ ८॥ अथ द्वितीया॥ दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं [illegible] सधस्थमासदत्। आपृच्छ्यं धरुणं वाज्यर्षसि

नृभिर्धौतो विचक्षणः इति॥ मधु मदकरं प्रियं प्रीणनकारि दिव्यं दिविभवं ऊधः सोमवल्लीलक्षणं दु

हानः पवमानः सोमो देवः प्रत्नं पुरातनं सधस्थं सह तिष्ठन्त्यत्रेति सधस्थं स्थानमन्तरिक्षमासदत्

आसीददिति। स [illegible] दृश्यमानरूपं तदनन्तरं आपृच्छ्यं कर्मण्या प्रष्टव्यं धरुणं कर्मणां धारयितारं यजमानं

वाजी अन्नवान् हे सोम त्वं अर्षसि तस्मै अन्नं दातुमभिगच्छसि। कीदृशः नृभिः कर्मनेतृभिर्ऋत्विग्भि

र्धौतः अशाम्ययहे परिशोधितः नैरेनं चतुरा धूनोति। पंचकृत्वः सप्तकृत्वो वेत्यापस्तंबेन सूत्रितं विचक्ष

णः सर्वस्य विद्रष्टा नृभिर्धौतो नृभिर्धूत इति पाठे॥ ९॥ तृतीये तृचे प्रथमा॥ प्र तु द्रव परि कोशं नि षीद नृ

भिः पुनानो अभि वाजमर्ष। अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्हीरशनाभिर्नयन्तीति॥

हे सोम नु क्षिप्रं प्र द्रव अस्मद्यज्ञं प्रकर्षेण गच्छ। गत्वा च कोशं द्रोणकलशं परि नि षीद निषण्णो भव। नृभिर्न

© Dharmartha Trust J&K. Digitized by eGangotri

नृभिः पुनानः पूयमानः सन् वाजमन्नं त्वं वीरूपं त्वं अभ्यर्ष अभिगच्छ वाजिनं बलवंतं अश्वन्न अश्वमि
वतं यथा मार्जयंति। तद्वद् वाजिनं त्वां मर्जयंतः शोधयंतः अध्वर्युप्रमुखा ऋत्विजः बर्हिरच्छ अस्मदी
यं यज्ञं प्रतिरशनाभिः रशनावदायताभिरंगुलीभिर्नयंति॥१॥ अथ द्वितीया॥ स्वायुधः पवते
देव इंदुरशस्तिहा वृजना रक्षमाणः। पिता देवानां जनिता सुदक्षो विष्टंभो दिवो धरुणः पृथिव्या इति॥
स्वायुधः शोभनायुधः इंदुः सोमो देवः पवते स च देवः अशस्तिहा रक्षोहा वृजनानि उपद्रवाणि परिह
रतिशेषः रक्षमाणः पिता पालको देवानां तथा जनिता उत्पादकः सुदक्षः शोभनबलः दिवो विष्टं
भः विशेषेण स्तंभयिता। पृथिव्याश्च धरुणो धारकः। एवं महानुभावः पवते वृजना वृजनमिति पा
ठे॥२॥ अथ तृतीया॥ ऋषिर्विप्रः पुरएता जनानाम[illegible]र्धीर उशना काव्येन। स चिद्विवेद निहितं य
दासामपीच्यं गुह्यं नाम गोनामिति॥ ऋषिरतींद्रियद्र[illegible] विप्रो मेधावी पुरएता पुरतो गंता जना
नां मनुष्याणां ऋभुरुरु भासमानः। धीरो धीमान् उशना[illegible]नामक ऋषिः यः स वित् स एव काव्येन
स्तोत्रेण विवेद लभते। किमिति उच्यते। आसां गोनां गवां संबं[illegible] यत् अपीच्यं। अंतर्हितनाम एतन्नाम अं
तर्हितं नाम। नामकमुदकं पयोलक्षणं। कीदृशं गुह्यं [illegible] यत् [illegible] ते प्रथमस्याध्यायस्य तृतीयः खं
डः॥३॥ अथ चतुर्थखंडे प्रथमसूक्ते प्रथमा॥ अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशानमस्य ज
गतः स्वर्दृशमीशानमिंद्र तस्थुषः प्रकेषु। हे शूर विक्रांत इंद्र त्वा [illegible] कलेन्नमः वयं [illegible]मभिष्टुमस्तत्र

© Dharmartha Trust J&K. Digitized by eGangotri

दृष्टांतः। अदुग्धा इव धेनवः। अर्कुतदोहा गावः। आ ईशानं[illegible]नति हं भारवं कुर्वंति। नद्धत्वयं
स्तुमः इत्यर्थः। कीदृशं। अस्य जगतो जंगमस्य ईशानमीश्वरं[illegible]ः स्थावरस्य ईशानं। स्वर्दृशं स
र्व्वदृशं सर्वस्य द्रष्टारमित्यर्थः॥ ७॥ अथ द्वितीया॥ न त्वावां अन्यो[illegible] न पार्थिवो न जातो न जनिष्यते। अ
श्वायन्तो मघवन्निंद्र वाजिनो गव्यं तस्त्वा हवामहे इति॥ हे म[illegible]वन्निंद्र दिव्यो दिवि भवस्त्वावान् त्वत्स
दृशोऽन्यो न जायते। पार्थिवः पृथिव्यां भवोपि त्वावानन्यो[illegible]यते। दिव्यः पार्थिवो वा त्वावानन्यो न जा
तः। न च जनिष्यते नोत्पत्स्यते लोकद्वयेपि त्रिष्वपि कालेषु त्वत्सदृशः कश्चिन्नास्ति त्वमेव समर्थो भव
सीत्यर्थः। अश्वायंतः अश्वानिच्छंतो वाजिनो वाजमन्नमिच्छंतः। इच्छायामिनिप्रत्ययः। हविष्मंतो वाग
गो व्यंतो गा इच्छंतश्च वयं हे इंद्र त्वा त्वां हवामहे आव्हयामः॥ ७॥ द्वितीयतृचे प्रथमा॥ कया नश्चित्र आभु
वदूती सदावृधः सखा। कया शचिष्ठया वृता॥ सदावृधः सर्वदावर्द्धमानः श्चित्रश्चायनीयः पूजनीयः
सखा मित्रभूत इंद्रः कया ऊती ऊत्या तर्प्पणेन नोस्माकमाभुवत्। आभिमुख्येन भवेत्। शचिष्ठया प्रज्ञाव
त्तमया प्रज्ञासहितमनुष्ठीयमानेन कया वृता केन वर्त्तनेन कर्म्मणा चाभिमुखो भवेत्॥ ७॥ अथ द्वितीया
॥ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदंधसः। दृढा चिदारुजे वसु॥ मंहिष्ठः पूजनीयः सत्यः सत्यभूतः मदा
नां मादयितॄणां मध्ये को मदकरः अंधसः सोमलक्षणस्यान्नस्य रसः दृढा चित् दृढमपि सुशत्रुसंबंधि
गवाश्विकं धनं आरुजे आसमंतात् भंक्तुं हे इंद्र त्वा त्वां मत्सत् मादयेत्॥ ७॥ अथ तृतीया॥ अभीषुणः सः।

६

© Dharmartha Trust J&K. Digitized by eGangotri

सखीनामविताजरितॄणाम्। शतं भवास्यूतय इति॥ हे इंद्र सखीनां समानख्यातीनां जरितॄणां स्तोतॄणा
मवितारक्षिता त्वं नोस्माकं शतसंख्याकायै जनतये रक्षायै सुष्ठु अभिभवासि अभिमुखो भव। शतं भवा
स्यूतये। शतं भवास्यूतिभिरिति पाठो॥ ७॥ अथ प्रगाथरूपे तृतीयसूक्ते प्रथमा॥ तं वो दस्ममृतीषहं व
सोर्मंदानमंधसः। अभि वत्सं न स्वसरेषु धेनव इंद्रं गीर्भिर्नवामह इति॥ नोधा नाम ऋषिरिंद्रं स्तौ
ति। हे ऋत्विग्यजमानाः दस्मं दर्शनीयं ऋतीषहं ऋतनयो बाधकाः शत्रवः तेषामभिभवितारं पुनः
कीदृशं वसोर्वासयितुर्दुःखस्य विवासयितुर्निवारयितुर्यद्वा वसोः पात्रे निवसतः स्थितस्य तादृशा
स्यांधसः सोमलक्षणस्यान्नस्य पानेन मंदानं मंदमानं मोहमानं वः यष्टव्यत्वेन युष्मत्संबंधिनं तं तादृ
शमिंद्रं गीर्भिः स्तुतिलक्षणाभिर्वाग्भिरभिनवामहे। स्तवनेनुशाद्वा अभिष्टुमः॥ कुत्रेति। स्वस
रेषु। अत्र यास्कः। स्वसराण्यहानि भवंति स्वयं सारीणि अपि वा स्वरादित्यो भवति स एनानि सा
रयतीति। सूर्यनेतृकेषु दिवसेष्वयमभिष्टुमः। अभितः शब्दयामः तत्र दृष्टांतः। वत्सं न। यथा धेन
वो नवप्रसूतिका गावः स्वसरेषु सुष्ठु अस्पंते। प्रयंति गावो ति स्वसराणि गोष्ठानि तेषु वत्समभिल
क्ष्य शब्दयंति तद्वत्॥ ७॥ अथ द्वितीया॥ द्युक्षं सुदानुं तविषी॥ मं॰ गिरिं न पुरुभोजसं। क्षुमंतं वा
जं शतिनं सहस्रिणं मक्षू गोमंतमीमह इति॥ द्युक्षं दीप्तीनां निस्वरस गनं अतिशयितदीप्तिमित्यर्थः॥
यद्वा द्युक्षं दिवि द्युलोके क्षियंतं निवसंतं सुदानुं शोभनदानं। तविषी॥ ७॥ लैरावृतमाच्छादितं आवरणे

© Dharmartha Trust J&K. Digitized by eGangotri

7

दृष्टांतः। गिरिं न। तविषीभिर्बलैः पुरुकर्म्मं धियारतं पर्वतमिव॥ [illegible] नः कीदृशं पुरुभोजसं सोमा॰
दिहविःप्रदानेन बहुभिर्यजमानैर्भोजयितव्यं। यद्वा बहूनां [illegible] रं इंद्रं हुमहे। हुमहे। आह्वयं
तं अनेन पुत्रादिकं लभ्यते। स्तोत्राणि कुर्वाणः शतिनं स[illegible]णं शतसहस्रसंख्याकधनयुक्तं गो
मंतं गवादिकयुक्तं वाजमन्नं मक्षु शीघ्रं ईमहे याचामहे। यद्वा पूर्वार्द्धे वाजे विशेषणत्वेन योजनीयः
प्रदीप्तं शोभनदानयोग्यं बलादियुक्तं बहुभिः पुत्रमित्रादिभिर्भक्तिमत्प्रशस्त्यादियुक्तमन्नमिंद्रं याचाम
हइति॥७॥ चतुर्थे प्रगाथे प्रथमा॥ तरोभिर्वो विदद्वसुमिंद्रं सबाधऊतये। बृहद्गायंतः सुतसो॰
मे अध्वरे हुवे भरन्न कारिणमिति॥ हे ऋत्विजो वो [illegible]तरोभिर्वेगैरश्वैरुपेतं वेगैर्वा। विदद्वसुं वे
यद्वसुं धनावेदकमिंद्रं। सबाधो बाधासहिताः ऊतये रक्षणाय। बृहद्गायंतः बृहत्संज्ञकं सामगा
यंतः संतः परिचरंते इति शेषः। किं कुर्वन्निति तदुच्यते। सुतसोमे अभिषुतसोमके अध्वरे यज्ञे सोमया
गे अहं वः स्तोता युष्मदर्थं हुवे आह्वयामि। कमिव भरं न भरं भर्त्तारं कुटुंबपोषकं कारिणं स्वहितक
करणशीलं यथा स्वहितकरणायाह्वयंति। पुत्रादयस्तद्वत्। तथाभूतमिंद्रं हुवइति॥८॥ अथ द्वि
तीया॥ न यं दुध्रा वरंते न स्थिरा मुरो मदे सुशिप्रमंधसः। य आदृत्या शशमानाय सुन्वते दाता जरित्र
उक्थ्यमिति॥ सुशिप्रं शोभनहनुं शोभननासिकं वा शिप्रे हनू नासिके वेति यास्कः॥ यमिंद्रं दुध्रा दुर्द्ध
राः असुरादयो न वरंते संग्रामे न वारयंति। तथा स्थिरा देवा न वरंते [illegible] किंच। मुरो मरणशीला मनुष्याः न

© Dharmartha Trust J&K. Digitized by eGangotri

वरंते। यश्चेंद्र अंधसः सोमलक्षणं सुन्वते अभिषवं कुर्वस्ते तेजरित्रे स्तोत्रे च दाता भवति। किंउच्छं
सुसधन। तं हुव इति पूर्वेण संबंधः। मरुत्सु शिप्रं मरुत्सु शिप्रमिति। षकारसकारौ पाठौ॥८॥ प्रथमस्या
ध्यायस्य चतुर्थः खंडः॥८॥ ॥अथ पंचमखंडे प्रथमत्र्चे प्रथमा॥ स्वादिष्ठया मदिष्ठया पवस्व
सोम धारया। इंद्राय पातवे सुत इति॥ हे सोम इंद्राय पातवे पातुं सुतो भिषुतस्त्वं स्वादिष्ठया स्वा
दुतमया मदिष्ठया अतिशयेन मादयित्र्या धारया पवस्व क्षर॥८॥ अथ द्वितीया॥ रक्षोहा रक्षसां
हंता विश्वचर्षणिः॥ विश्वस्य द्रष्टा सोमः आयाहते अयो अयसा हिरण्येन हतं। तथा च श्रूयते।
हिरण्यपाणिरभिषुणोतीति। द्रोणे द्रोणकलशेन अधिषवणफलकाभ्यां वा सधस्थं सहस्थानं
योनिं अभिषवस्थानं अभ्यासदत्। आभिमुख्येन सीदति। अयोहते अयोहन द्रोणे हुणे तिव पा
ठौ॥ अथ तृतीया॥८॥ वरिवोधातमो भुवो मंहिष्ठो वृत्रहंतमः। पर्षि राधो मघोनामिति॥ हे सोम त्वं व
रिवोधातमः अतिशयेन धनानां दाता भुवो भव। वरिवः वरिवइति धननामसु पाठात्। मंहिष्ठो दातृतमश्च
भव। सर्वदातृत्वमत्रोच्यत इत्यपुनरुक्तिः। वृत्रहंतमः अतिशयेन शत्रूणां हंता च भव। किंच मघोनां
धनवतां शत्रूणां राधो धनं च पर्षि अस्मभ्यं प्रयच्छ। आ भुवो भ आदरार्थौ॥८॥ प्रगाथरूपे तृतीयसूक्ते प्र
थमा॥ पवस्व मधुमत्तम इंद्राय सोम क्रतुवित्तमो मदः। महि नू ना[illegible] मद इति॥ हे सोम मधुमत्तमः अ
तिशयेन माधुर्योपेतस्त्वं इंद्राय [illegible] मदकरः सन् पवस्व क्षर। [illegible]ः क्रतुवित्तमः असंतं प्रज्ञायाः

© Dharmartha Trust J&K. Digitized by eGangotri

कर्म्मणोवालंभकः। महिमहान् महनीयोवाधृक्षस्तमः अ[illegible]ः मदोमदहेतुः॥८॥ अथद्वि
तीया॥ यस्यतेपीत्वावृषभोवृषायतेऽस्यपीत्वास्वर्विदः। स[illegible]अभ्यक्रमीदिषोछावाजंन्नैत
शइति॥ वृषभकामानांवर्षकःसइंद्रःहेसोमयस्यत्वांतेत्वांपी[illegible]वृषायतेवृषभइवाचरति। किंचस्व
र्विदःसन्सर्वंजानतः। अस्यतवपीत्वापानेसतिसुप्रकेतःशोभनप्रज्ञः सइंद्रःवृषःशत्रूणामन्ना
न्यभ्यक्रमीत् अभिक्रामति। तत्रदृष्टांतः॥ नेतशः[illegible]नैताशइवयथाश्वोवाजंसंग्राममभि
96 गति। तद्धस्वर्विदःस्वर्दृशइतिपाठौ॥८॥ तृचात्मकेतृतीयसूक्तेप्रथमा॥ इंद्रमच्छसुताइमेवृषणं
यंत्वहरयः। श्रुष्टेजातासइंदवःस्वर्विदइति॥ श्रुष्टेश्रुष्टीतिक्षिप्रनाम। क्षिप्रंजातासोजाताइंदवःपात्रे
सुक्षरंतः स्वर्विदः सर्वज्ञाः हरितोहरितवर्णाः सुताअभिषुताइमेसोमावृषणंकामानांसेक्तारमिं
द्रंअच्छयंत्वभिगच्छंतु। श्रुष्टेश्रुष्टीतिपाठौ॥८॥ अथद्वितीया॥ अयंभरायसानसिरिंद्राय
पवतेसुतः। सोमोजैत्रस्यचेततियथाविदइति॥ अयंभरायसंग्रामायसानसिर्भजनीयःसुतो
भिषुतःऽयंसोमइंद्रायेंद्रार्थंपवतेक्षरति। ग्रहादिषुक्षरति। ततःसोमःजैत्रस्यक्रियाग्रहणंकर्त
व्यमितिकर्म्मणःसंप्रदानसंज्ञा। चतुर्थ्यर्थेबहुलमितिषष्ठीजयशीलमिंद्रंचेततिजानाति। यथाइं
द्रोविदेऽलोकैर्ज्ञायतेतथाजानाति॥८॥ अथतृतीया॥ अस्येदिंद्रोमदेष्वाग्राभंगृभ्णातिसानसिं। वज्रं
चवृषणंभरत्समप्सुजिदिति॥ आ अनंतरमिंद्रः अस्येत् अस्यसोमस्यैवमदेषुसंजातेषुसानसिं स

© Dharmartha Trust J&K. Digitized by eGangotri

वैः संभजनीयं ग्राभं ग्रहीतव्यं। धेनुर्गृभ्णाति गृह्णाति। हृग्रहोर्भश्छंदसीति भत्वं। किंच। अप्सुजित्
। उदकार्थं रत्नस्य जेता। यद्वा अप्स्वंतरिक्षनाम। अंतरिक्षे अहिनानकस्य जेता। इंद्रः वृषणं व
र्षितारं वज्रं च स्वकीयमायुधं भरत् संबिभर्त्तु बिभर्त्तिर्लिङ्घेऽणमः। गृभ्णाति गृह्णातीति पाठौ॥
॥७॥ अथ चतुर्थसूक्ते प्रथमा॥ सुरोजितीवो अंधसः सुताय मादयिष्णवे। अपश्वानं श्नथिष्ट
न सखायो दीर्घजिह्व्यमिति॥ हे सखायः सखिभूताः समानख्याना वा हे स्तोतारः वो यूयं पुरोजिती
षष्ठ्याः पूर्वसवर्णदीर्घः। पुरस्थितजयस्य अंधसो अदनीयस्य सोमस्य स्वभूताय सुताय अभिषु
ताय मादयिष्णवे असंतं मत्कराय रसाय दीर्घजि[...] दीर्घजिह्वाय स्य सः दीर्घजिह्वी च छंदसीति ङी
षंतत्वेन निपातितः। तादृशं श्वानं अपश्नाधिष्ठान अ[...] नथत अपबाधध्वं यथा असुरा राक्षसा वा सु
तं सोमं न लिहंति तथा कुरुत इत्यर्थः॥७॥ अथ द्वितीया॥ यो धारया पावकया परिप्रस्यंदते सुतः॥
इंदुरश्वो न कृत्व्य इति॥ सुतो अभिषुतः कृत्व्यः। कृत्वीति क[र्म]नाम। कर्म्मणि साधुर्य इंदुः सोमः पाव
कया पापानां शोधयित्र्या धारया परिप्रस्यंदते परितः क्षरति। कथमिव। अश्वो न। अश्वो यथा वेगेन
प्रगच्छति तद्वत्॥७॥ ॥अथ तृतीया॥ तं दुरोषमभी नरः सो[...]ीजय[...]ा धिया यज्ञाय संत्वद्रय इति॥
नरः कर्म्मनेतार ऋत्विजः दुरोषं। रोषतेर्हिंसार्थस्य रेफलोप[...] स्वरितं द्रोम[...]र्दुरुषितद्दीहार्थस्य वा खलि रूपमि
ति संदेहादनवग्रहः। तं दुर्वधं दुर्द[...] सोमं अभिलक्ष्य विश्वा[...]स्य सोम[...]मातं वित्र्या कामान् प्रापयित्र्या

© Dharmartha Trust J&K. Digitized by eGangotri

धियाबुद्ध्यायज्ञाययज्ञार्थंअदृप्यसंस्तुआदरणयुक्ताभवंतुम[illegible]सेलद्रयोयज्ञंहिन्वंत्यद्रिभिरि
तिपाठो॥६७॥ ॥अथपंचमसूक्तेप्रथमा॥ अभिप्रियाणि[illegible]हितोनामानियह्वोअधियेषु
वर्द्धते। आसूर्यस्यबृहतोबृहन्नधिरथंविष्वंचमरुहद्विच[illegible]ण इति। चनोहितः। चनइत्यन्ननाम॥
चायतेरन्नेनुन्निचनइत्यौणादिकसूत्रेणनिपातितः। चनसे[illegible]अन्नायहितः। यद्वाहितान्नःसोमःप्रि
याणिजगतःप्रीणयितॄणिनामानिनमनशीलानिता[illegible]दकानिअभिपवतेअभितःकरोति। ये
ष्वंतरिक्षस्थितेषूदकेषु यह्वोमहानयंसोमोऽधिवर्द्ध[illegible]अधिकंप्रवृद्धोभवति। अपांमध्येसोमोवस
तिखलु। ततोबृहन्महान्सोमःबृहतोमहतःप[illegible]स्यसूर्यस्यविष्वंचंविष्वग्गमनमधिरथमुपरि
रथंविचक्षणःसर्वस्यविद्रष्टासन्अरुहत्। आरोहति। अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठत
इति॥६८॥ ॥अथद्वितीया॥ ऋतस्यजिह्वापवतेमधुप्रियंवक्तापतिर्धियोअस्याअदाभ्यः। दधाति
पुत्रःपित्रोरपीच्यंनामतृतीयमधिरोचनंदिवइति। ऋतस्यसत्यभूतस्ययज्ञस्यजिह्वामुख्यत्वेन
जिह्वास्थानीयःसोमःप्रियंप्रियकरंमधुमदकरंरसंपवतेक्षरति। कीदृशःवक्ताशब्दकृत्। यद्वास्तो
तृभिःक्रियमाणाःस्तुतयःसाधीयस्यइतिप्रतिश्रवणस्यकर्त्ताअस्याधियः। एतस्यकर्मणःप
तिःपालयिताअदाभ्योरक्षोभिर्हिंसितुमशक्यः। पुत्रोयजमानःपित्रोर्मात्तापित्रोःअपीच्यंअंतर्हि
तंयन्नामतोनजानीतोनामकरणवेलायांतस्मात्तयोरपरिज्ञायमानंदिवोद्युलोकस्यरोचनंदीप्य

© Dharmartha Trust J&K. Digitized by eGangotri

मानंतृतीयंनामसोमेभिषूयमाणेहिरण्मयेति॥ अधिरुध्यति॥ अलंतंधारयति। नक्षत्रव्यावहा
रिकनाम्नीप्रभाष्यसोमयाजीतितृतीयमस्यनामेति। भगवताबौधायनेनोक्तं। अधिरोचनंअ
धिरोचनेइतिपाठो॥ ८॥ अथतृतीया॥ ॥ अवघ्नतानः कलशां॥ अचिक्रदन्नभिषूयमाणः को
श॥ आहिरण्यये॥ अभीऋतस्यदोहना॥ अनूषताधित्रिपृष्ठउषसोविराजसीति॥ घ्नतानः घ्नती
दीप्यमानः नभिः कर्मनेतृभिऋत्विग्भिर्हिरण्मयेहिरण्मयकोशे॥ अधिषवण्चर्म्मणितस्य
हिरण्मयत्वंहिरण्यपाणिरभिषुणोतीतिहिरण्यसंबंधात्॥ आकोशेयमानः छांदसेकर्म्मणि
लिट्कानत्वरूपं। नियम्यमानः सोमः कलशान्[illegible]भिधानात्। प्रति॥ अवाचिक्रदत्। अवक्रं
दतिशब्दायते। ततः ऋतस्यसत्यभूतस्ययज्ञस्यदो[illegible]ति॥ [illegible]नादोग्धारः ऋत्विजइमंसोममभ्यनूषत
अभिष्टुवंतिग्रावाणेवसाऋत्विजोदुहंतीतितेत्रि[illegible]यकब्राह्मणेएषांदोग्धृत्वमभिहितं।
त्रीणिसवनानितान्येवपृष्ठानियस्यसतथोक्तः त्रि[illegible]वसवनेषुसोमस्यविद्यमानत्वात्त्रि
चक्रादित्वादुत्तरपदांतोदात्तत्वं। हेसोमताद्दृशस्त्वंउषसोधि॥ याग[illegible]नि विराजसि॥ अधिश्री
उ॥ स्त्वासामितिद्वितीया। तेषुहस्सुविशेषेणदीप्य॥ असी[illegible]र्नो॥ जिरंतसीतएषर्थः। अहानिप्र
काशायसियेमाणः यमानइति॥ अभीऋतस्य॥ अभीमनृ[illegible]नः पि[illegible]राजसीविरोजतीतिपाठः॥ ७॥
॥ इतिप्रथमाध्यायेपंचमः खंडः॥ ८॥ ॥ अथषष्ठेखंडेप्र[illegible]सायमानेवगार्य्येप्रथमा॥ ७॥ यज्ञा

© Dharmartha Trust J&K. Digitized by eGangotri

यज्ञावो अग्नये गिरा गिरा च दक्षसे। प्र प्र वयममृतं जातवे[illegible]मित्रं न शंसिषमिति। हे स्तो-
तारो वो यूयं यज्ञाय यज्ञाय यज्ञे यज्ञे सर्वेषु यागेषु दक्षसे प्र[illegible]नये गिरा गिरा स्तुतिरूपया वा-
चा वा वाक्स्तोत्रं कुरुतेति शेषः। चशब्दो भिन्नक्रमो वक्ष्य[illegible]सेरा द्रष्टव्यः। यूयं च स्तोत्रं कुरु-
त। वयमपि तमग्निं प्र प्र शंसिषं। प्रसमुपोदः पादपूरण इति प्रशब्दस्य द्विरुक्तिः पादपूरणा-
र्था। व्यत्ययेनैकवचनं छान्दसो लुङ्। प्रशंसाम कीदृशम् [illegible]तं मरणरहितं। जातवेदसं जातानां
वेदितारं। जातप्रज्ञं जातधनं वा। मित्रं न सखिभूतमि[illegible]प्रियमनुकूलं। यद्वा व्यत्ययेन त्वमिसस्य
वसादेशः। अग्नय इति च कर्मणि चतुर्थी क्रि[illegible]ग्रहणमपि कर्त्तव्यमिति कर्मणः संप्रदान-
त्वाच्च शब्दश्च वाणेति निपातस्यार्थे वर्त्तते। दक्षसे इति च दक्षतेर्वृद्धिकर्म्मणोऽन्तर्भावितण्यर्था-
त्तङि रूपं चवायोगात् निपातैर्यद्यदिहन्तेति निघा[त]प्रतिषेधः। तत्रायमर्थः। हे स्तोतः त्वं या-
ज्ञेऽस्मिन्नग्निं गिरा गिरा स्तुत्या स्तुत्या च दक्षसे च वर्द्धयसि च त्वं वयमपि अमृतत्वादिगुणकं तं प्र-
शंसाम ॥७॥ ॥ अथ द्वितीया ॥ ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये। भुवद्वाजेष्व-
विता भुवद्वृध उत त्राता तनूनामिति। ऊर्ज्जोऽन्नस्य बलस्य वा नपातं पुत्रं प्रशंसिषमित्यनुषंगा-
त्प्रशंसेमेत्यर्थः। हिनेति निपातद्वयसमुदायो हीत्यस्यार्थे। स खल्वयमग्निः अस्मयुरस्मान्का-
मयमानो भवति। वयं च हव्यदातये हव्यानां हविषां दात्रे तस्मा अग्नये दाशेम हवींषि दद्याम।

© Dharmartha Trust J&K. Digitized by eGangotri

सत्वाग्निर्वजिषु संग्रामेषु अविता अस्माकं रक्षिता भुवत् भवतु वृधे वर्द्धकश्चास्माकं भुवत् भवतु। उत।
पि तनूनां तनयानां अस्मत्सुत्राणां त्राता रक्षिता भवतु ॥७॥ ॥ अथ तत्त्वात्मके द्वितीयसू
क्ते प्रथमा ॥ एस्वृषु ब्रवाणि ते ग्न इच्छेतरा गिरः। एभिर्वर्द्धास इंदुभिरिति ॥ हे अग्ने एहि आगच्छ ते
तुभ्यं च तत्संग्गिरः स्तुतीः इच्छा इच्छमनेन प्रकारेण सुष्ठु ब्रवाणि स्याशास्पते। ताः स्तुतीः अपि कि त
र्थं अन्यास्ते न सूरकः। इतराः असुरैः कृताः स्तुतीः अपि विशेषः। तथा च ब्राह्मणं अग्निरिच्छेतरागि
र इत्यसुर्या हि वा इतरा गिर इति। अपि च आगत स्त्वं एभिरेतैरिंदुभिस्सोमैर्वर्द्धसि वर्द्धस्व ॥७॥
॥ ॥ अथ द्वितीया ॥ यत्र क्व च ते मनो दक्षं दधस उत्तरं। तत्रा योनिं कृणवस इति। हे अग्ने ते तव म
नः अनुग्रहात्मकमंतःकरणं यत्र यस्मिन् देशे क्व इति स्मिं यजमाने वर्त्तते तत्रास्मिन् यजमाने उत्त
मुत्कृततरं श्रेष्ठं दक्षं बलकरमन्नं वा दधसे धारयसि तत्र योनिं स्थानं च कृणवसे तस्मिन् यज
माने करोषि तत्र योनिं तत्रासद इति पाठः ॥७॥ अथ तृतीया ॥ नहि ते पूर्त्तमक्षिपद्भुवन्नेमानां
पते। अथा दुवो वनवस इति ॥ हे अग्ने ते त्वदीयं पूर्त्त पूरकं तेजः अक्षिपत् अस्मत्तोः पातकं विना
शकं। नहि भुवन्न भवतु। सर्वदास्माकं दर्शन सामर्थ्यकरो वा नेमानां पत नेमशब्दो अप्यवाची म
नुष्याणां मध्ये कतिपयानां यजमानानां य ते पालक। अ सिस्व… कारणा दुवः दुवस्पतिः परिचर
णकर्म्मा। अस्माभिर्यजमानैः कृतं परिचरणं वनवसे संभजते तत्… ॥ ॥ अथ तृतीयसूक्ते प्रथम

© Dharmartha Trust J&K. Digitized by eGangotri

पमा॥ वयमुत्वामपूर्व्यस्थूरन्नकच्चिद्भरंतोवस्यवः।वज्रिन्[illegible]ामहइति॥हेअपूर्व्यविद्युस
वनेषुप्रादुर्भूतत्वादभिनवहेवज्रिन्वज्रवन्निंद्र।भरंतः[illegible]क्षणैरन्नैस्त्वांपोषयंतोवयंचि
त्रंचायनीयंविविधरूपंचत्वांत्वामेवअवस्यवोर।क्षणंमा[illegible]निनइछंतः संतः हवामहेआह्वयामः
तत्रदृष्टांतः।स्थूरंनयथाभरंतःवीह्यादिभिर्गृहंपूरयंतोजनाःस्थूरंस्थूलंगुणाधिकंकच्चित्
कंचित्सूरूपंयथाह्वयंतितद्वत्।वज्रिन्वाजइतिपाठः॥७॥ ॥अथद्वितीया॥उपत्वाकर्म्मन्नू
तयेसनोयुवोग्रश्चक्रामयोधृषत्॥ ॥त्वामिद्ध्य[illegible]तारंववृमहेसखायइंद्रसानसिमिति॥प्र
थमपादःप्रत्यक्षकृतः।हेइंद्रकर्म्मन्नूअग्नि[illegible]स्मिकर्मणिजनतयेरक्षणायत्वांत्वामुपगच्छा
मः।द्वितीयःपादःपरोक्षकृतः।यइंद्रःधृषत्धृष्णोतिशत्रूनभिभवति।जिधृषाप्रागल्भ्येब
हुलंछंदसीतिशप्रत्ययः।युवातरुणःउग्रःउद्गूर्णःसइंद्रःनोस्मान्प्रतिचक्रामआगच्छ
तु।यद्वाचक्राम।अस्मानुत्साहयुक्तान्करोतु।क्रमतेःक्रमतेःसर्गुर्लोपश्चत्सयेनपरस्मै
पदं।परोक्षोर्द्धःप्रत्यक्षःकृतः।सखायःसमानख्यानांबंधुभूतावावयंसानसिंनवषणसंभ
क्तोसंभजनीयंअविनारंसर्वस्यरक्षितारंत्वामित्त्वामेववववृमहेवृणीमहेसंभजामहे।हिः
प्रसिद्धौ।हियोगादनिघातः॥८॥ ॥अथचतुर्थस्यप्रथमा॥अधाहींद्रगिर्वण।उपत्वाकामई
महेससृग्महे।ससृग्महे।उदेवग्मंतउदभिः।रिति॥हेगिर्वणोगीर्भिर्वननीयेंद्रअधाहि।संप्रति

© Dharmartha Trust J&K. Digitized by eGangotri

हिलात्वांकामेकाममभिलषितमर्थमीमहे। यद्वाकामेकामान्कमनीयान्स्तोमानुपससृग्महे
उपसृजामस्त्वांप्रापयामइत्यर्थः। ततस्त्वंप्रतनमोहे। उद्देवयथोक्तेनगमंतो। गच्छंतःपुरुषाउद
भिरंजलिनोक्षिप्याोद्देकैः समीपस्थान्पुरुषान्कोऽर्थसंसृजंतितद्दिरित्यर्थः। कामईमिहे
ससृग्महेकामान्महःससृग्महइतिचपाठः। उद्देवगमंतउद्देवयंतइतिवापाठौ॥७॥ ॥अ
थद्वितीया॥ वार्ण्वायथ्याभिर्वर्द्धंतिशूरब्रह्माणि। वावृधांसंचिदद्रिवोदिवेदिवइति॥ हे अ
द्रिवोवज्रिन्शूरेंद्रवार्ण्ययथोदकस्थानंयथ्याभिर्नदीभिः। अवनयःपथ्याइतिनदीनामसुपा
ठात्। वर्द्धंतिवर्द्धयंति। तथाब्रह्माणिस्तोत्राणिवावृ[illegible]संचित्। यथानिरुदकंदेशंनदीभिःतथान
। किंतुप्रवृद्धमेवत्वांतांदिवेदिवेअन्वहंवर्द्धयं[illegible]तारोवर्द्धयंति॥७॥ ॥अथतृतीया॥ युं
जंतिहरीइषिरस्यगाथयोरौरथउरुयुगेवचोयुजा। इ[illegible]वाहास्वर्विदेति॥ इषिरस्यगमनशीलस्ये
द्रस्यउरुयुगेमहायुगेउरौमहतिरथेइंद्रवाहाइंद्रस्यवा[illegible]भूतौवचोयुजावचनमात्रेणैवयुज्य
मानौस्वर्विदास्वर्गरश्मिमिंद्रस्यस्थानंजानंतौहरीएतन्नामकावश्वौ[illegible]थयास्तोत्रेणस्तोतारो
युंजंतियोजयंति। उरुयुगेवचोयुजाइंद्रवाहास्वर्विदाइमेववचोयुजेतिचपाठः॥७॥ ॥
इतिप्रथमस्यषष्ठःखंडः॥७॥ ॥वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेया
द्विद्यातीर्थमहेश्वरः॥७॥ ॥इतिश्रीमहाराजाधिराजप[illegible]गीभिदिकमार्गप्रवर्त्तकश्रीवीरबु

© Dharmartha Trust J&K. Digitized by eGangotri

क्कभूपालसाम्राज्यधुरंधरेणसायणाचार्यविरचितेमाधवीये [illegible] वेदार्थप्रकाशेउत्तरार्चिकेप्रथमो
ऽध्यायः संपूर्णः॥७॥ ॥यस्यनिश्वसितंवेदायोवेदेभ्यो[illegible]जगत्।निर्ममेतमहंवन्देविद्या
तीर्थमहेश्वरं॥७॥ ॥अथद्वितीयाध्यायआरभ्यते॥तत्रपातमावइतिप्रथमेखंडेत्तृचात्मके
प्रथमसूक्तेप्रथमा॥पांतमावोअंधसइंद्रमभिप्रगायत।विश्वासाहंशतक्रतुंमंहिष्ठंचर्षणीना
मिति॥हेऋत्विजःवोयुष्मदीयंअंधसःसोमलक्षणस्या[illegible]न्नस्यपांतंआभिमुख्येनपिबतं।पाप
नेष्ठांदसःशपोलुक्।सर्वविधयःछंदसिविकल्प्यं[illegible]इतिनलोकाव्ययेतिषष्ठीप्रतिषेधाभावः।त
तोंधसइंद्रस्यकर्तृकर्म्मणोरितिषष्ठीसोमम[illegible]मुख्येनपिबंतंएतादृशमिंद्रमभिप्रगायतप्र
कर्षेणाभिष्टुत।कीदृशं।विश्वासाहंसर्वेषांशत्रूणामभिभवितारंसर्वेषांभूतजातानांवा।अतए
वशतक्रतुंबहुविधप्रज्ञानंबहुविधकर्म्माणंवाचर्षणीनांमनुष्याणांमंहिष्ठंधनस्यदातृतमंप
द्वायजमानानांयष्टव्यत्वेनपूजनीयमिंद्रंप्रगायतेत्यर्थः॥७॥ ॥अथद्वितीया॥पुरुहूतंपुरुष्टु
तंगाथान्यंसनश्रुतं।इंद्रइतिब्रवीतनेति॥हेऋत्विग्यजमानाःपुरुहूतंयज्ञेषुबहुभिराहूतंपुरु
ष्टुतंबहुभिःस्तोत्रशस्त्रादिभिःस्तुतं।अतएवगाथान्यंगानयोग्यंगातव्यं।सनश्रुतंसनातनतयाप्रसि
द्धंएवंविधंदेवंइंद्रइतिपूर्यंब्रवीतनब्रूधीध्वंब्रूञ्व्यक्तायांवाचिइत्यस्यलिटिव्यत्ययेनध्वमस्तनवादे
देशःअतएवगुणः॥७॥अथतृतीया॥इंद्रइन्नोमहोनांदातावाजानांनृतुः।महांअभिज्ञ्वाय

© Dharmartha Trust J&K. Digitized by eGangotri

मदिति॥ इंद्र इत्थं पूर्वोक्तलक्षण इंद्र १ वनोऽस्मभ्यं महोनां मघोन्यनां धनवतां पश्वादिलक्षणधन
युक्तानां वाजानां अन्नानां दाता भवतु। कीदृशं नृतुः नृतिम्लओः कृरिति कूपप्रत्ययः। हृस्वश्छांद
सः। सर्वस्य नर्त्तयिता। यद्वा नृनयेत् [illegible] एणाष्किनु प्रत्ययः। धातोर्ह्रस्वश्छांदसः। स्तोतृभ्यो गवादीनि
ताभ्यनत एव महान्स इंद्रः अभिष्टु अभिगत जामुकं अस्मभ्यं आयमत आयच्छतु ददातु।
यद्वा स इंद्रः अभिष्टु अस्मदभिमुखमागच्छत् धनं स्वहस्तयोः परिगृह्य अस्मान्नयत्तु धनं ग
हीत्वा अस्मभ्यं ददात्वित्यर्थः। मघोनां महोनामिति पाठो॥७॥ द्वितीये तत्वे प्रथमा॥ प्र व इंद्राय
मादनं हर्यश्वाय गायत। सखायः सोमपाव्न [illegible]॥ सखायः स्तोतारः वो यूयं हर्यश्वाय हरि
मकाश्वोयेताय सोमपाव्ने सोमानां पात्रे मादनं मदकं म[illegible]र्षकरं स्तोत्रं प्रगायत॥७॥ अथ द्वितीया
॥शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः। चकृमा सत्यराधसे इति। मुताप्विच हे स्तोतः सुदानवे शो
भनदानाय सत्यराधसे सत्यधनायेंद्राय उक्थं स्तोमं यथा नरोऽन्ये स्तोतारः द्युक्षं दीप्तं तः साधन
भूतं स्तोत्रं शंसंति। तद्वत्त्वमपि शंस उच्चारय। इत्थितिपूरणः। वयमपि चकृम स्तोत्रं करवाम॥७॥
अथ तृतीया॥ त्वं न इंद्र वाजयुः त्वं गव्युः शतक्रतो॥ त्वं हिरण्ययुर्वसो इति॥ हे इंद्र त्वं नोऽस्माकं वाज
युरन्नकामो भव। हे शतक्रतो बहुविधकर्म्मवन्निंद्र त्वं नोऽस्मभ्यं गव्युः गोकामो भव हे वसो वासयित
रिंद्र त्वं हिरण्ययुः हिरण्यकामोऽपि भव। छंदसि परेच्छायामपि दाता वा स्यजितिक्यच्॥७॥ अथ च

© Dharmartha Trust J&K. Digitized by eGangotri

13

तीयस्यैवैते प्रथमा।।वयमु त्वा तदिदर्था इंद्र त्वायंतः सखायः। का[...]क्थेभिर्जरंत इति।।हे इंद्र त्वायंत
स्त्वामात्मन इच्छंतः। सखायः समानख्याना वयं तदिदर्था[...]द्विषयं स्तोत्रं तदित्तदेवार्थः। प्र
योजनं येषां। तादृशाः संतः त्वा त्वां जरामहे स्तुमहे। उ[...]रताः। कण्वाः कण्वगोत्रोत्पन्ना अ
स्मदीयाः पुत्रादयश्च उक्थेभिः उक्थैः शस्त्रैः जरंते त्वां स्तुवंति।।७।। ।।अथ द्वितीया।।नेघे
मन्यदापपन वज्रिन्नपसो नविष्टौ। तवेदु स्तोमं चिकेत इति।।हे वज्रिन् वज्रवन्निंद्र अपसः
अपस्विनः कर्मवतः स्तवसंबंधिनि नविष्टौ अभि[...] यागे वर्त्तमानो हं अन्यत्त्वद्विषयात्स्त
तः स्तोत्रं न घेनेव आपपन अभिष्टोमि। पनतेः स्तुतिकर्म्मण उत्तमे णलि रूपं। अपितु तवेदु
तवैव स्तोमं स्तोत्रं चिकेत अभिजानामि। त्वामेव सर्वदा स्तौमीत्यर्थः।।७।। अथ तृतीया।। ।।
इच्छंति देवाः सुन्वंतं न स्वप्नाय स्पृहयंति। यंति प्रमादमतंद्रा इति।।सुन्वंतं सोमाभिषवं कुर्वंतं
यजमानं देवा इंद्रादयः सर्वे इच्छंति रक्षितुं। स्वप्नाय न स्पृहयंति। स्वप्नावस्थां तस्य सुन्वतो ने
च्छंति। सर्वदा प्रबुद्धमेव कुर्वंतीत्यर्थः।।स्पृहेरीप्सित इति कर्म्मणि चतुर्थी। स्पृह ईप्सायां चुरा
दिरदंतः। यत एवमतः कारणादतंद्रा अनलसा देवाः प्रमादं प्रकर्षेण मदकवंतं तदीयं सोमं यं
ति शीघ्रं प्राप्नुवंति।।७।। ।।अथ चतुर्थस्यैव प्रथमा।।इंद्राय मद्वने सुतं परि ष्टोभंतु नो गिरः।
अर्कमर्चंतु कारव इति।।मद्वने माद्यतेः क्वनिप् मदनशीलायेंद्राय नदर्थं सुतमभिषुतं सोमं नो

© Dharmartha Trust J&K. Digitized by eGangotri

स्मदीया गिरः स्तुतिलक्षणा वाचः परिष्टोभंतु। स्तोभतिः स्तुतिकर्मा परितः सोमं स्तुवंतु। ततः
कारवः स्तुतिकारिणः स्तोतारश्च अर्च्चाः सर्वैरर्च्चनीयं सोममर्च्चंतु पूजयंतु॥७॥ अथ द्वितीया
॥ ॥यस्मिन्विश्वा अधि श्रियो रणंति सप्त संसदः। इंद्रं सुते हवामह इति॥ यस्मिन्निंद्रे विश्वाः स
र्वाः श्रियः कांतयः अधि अधिकं भवंति। अतिशयेन तेजस्वीत्यर्थः। किंच सप्त सप्तसंख्याकाः
संसदः सम्यग्यज्ञेषु कर्मकरणार्थं सीदंतीति संसदो होत्रकाः सप्त होत्रकाः यस्मिन्नू रणंति
सोमप्रदानार्थं रमंते। यद्वा यं शब्दयंति स्तुवंति। पूर्वोक्तलक्षणमिंद्रं सुते सति हवामहे वयं सो
मपानायाह्वयामः॥७॥ अथ तृतीया॥ त्रिक[illegible]षु चेतनं देवासो यज्ञमत्नत। तमिद्वर्द्धंतु
नो गिर इति॥ देवासो देवा इंद्रादयः त्रिकद्रुकेषु अभि[illegible]विकषडहस्य ज्योतिर्गौरायुरिति त्रिकद्रु
काः तेषु चेतनं चिती संज्ञाने चेतंति जानंति अनेन स्वग[illegible]कमिति चेतनो ज्ञानसाधनो यज्ञः तं अ
त्नत अतन्वत तन्वत स्वैः स्वैः कर्मभिः पालनैश्च विस्तारितवंतः तनु विस्तारे लङि बहुलं छंदसी
ति विकरणस्य लुक्। तनिपत्योः छंदसीति उपधालोपः निमित्तमेव यदिंद्रो नोस्माकं स्तुतिलक्षणा
वाचो वर्द्धंतु। वर्द्धयंतु॥७॥ ॥अथ द्वितीयस्याध्यायस्य [illegible]मः खंडः॥७॥ ॥अथ द्वितीयखं
डस्य प्रथमतृचे प्रथमा॥ अयं त इंद्र सोमो निपूतो अधिब[illegible] एहीमस्य द्रवा पिबेति॥ हे इंद्र ते तु
भ्यं त्वदर्थं अयं सोमो बर्हिष्यधि वेद्यामास्तीर्णे दर्भे निपूतो [illegible]ायं दशा[illegible] पवित्रेण शोधितः। अभिषवा

© Dharmartha Trust J&K. Digitized by eGangotri

दिसंस्कारैः संस्कृत इत्यर्थः। इदानीं अस्येमं सोमं प्रतिप[illegible]णीहि। आगत्य च यत्र रसात्म
कः सोमो हूयते तं देशं परिद्रवणी प्रगच्छ। तदनंतरं तं सोमं [illegible]स्व॥ ॥अथ द्वितीया॥ शचि
गोशचिपूजनार्चारण्यायते सुतः। आखंडल प्रहूयसे श[illegible]हे शचिगो शचयः शक्ता गावो
५४ यस्यासौ शचिगुः। यद्वा शचिर्व्यक्तायां वाचि। अस्मादौणादिक इःनू [illegible]यः। शचयः व्यक्ताः
प्रख्याख्याना गावो रश्मयो गाव एव वा यस्य तादृशो हे शचि[illegible]पूजन पूज्यते ऽनेनेति पूजनं स्तोत्रा
दि प्रख्यातपूजन तेतव रण्णाय रमणाय सुखजननाय अयं सोमः सुतो ऽभिषुतः अतः कार
णाद्धे आखंडल शत्रूणामाखंडयितरिंद्र प्रहूयसे [illegible]शाभिस्तुतिभिराहूयसे। इत आगत्य इ
मं सोमं पिबेत्यर्थः॥६॥ ॥अथ तृतीया॥ यस्ते शृंगवृषो णपात्प्रणपात्कुंडपाय्यः। न्यस्मिन्
दध्र आमनइति। हे शृंगवृषो णपात् शृंगवृष इति नामा कश्चिदृषिस्तस्यैवेंद्रः स्वयमेव पुत्रतया
जज्ञ इत्याख्यायिकात्र नपादित्यपत्यनाम। हे शृंगवृषः पुत्र। यद्वा शृंगं ति हिंसंतीति शृंगाणि र
श्मयः तैर्वर्षतीति शृंगवृट् आदित्यस्तस्य न पातयितः। स्वकीयेव स्थानेव स्थापयितः। सुबामंत्रित
इति षष्ठ्यंतस्य परांगवत्स्वरेणामंत्रितानुप्रवेशात्समुदायस्माष्टमिकं सर्वानुदात्तत्वं इद्ग्राहे इं
द्र ते तव संबंधिप्रणपात् प्रकर्षेण न पातयिता। रक्षिता कुंडपाय्यः। कुंडैः पीयते ऽस्मिन्सोम इति
कुंडपाय्यः क्रतुविशेषः। क्रतौ कुंडपाय्यसंचाय्याविति पिबतेरधिकरणे यत्प्रत्ययो युगागमश्च

© Dharmartha Trust J&K. Digitized by eGangotri

निपातनेन। एतत् संज्ञोयः ऋभुरस्ति। अस्मिन् कुं उपाप्येकतो मनः स्वांतं आ निदधे। असितो
वर्त्तमानाः कुं उपाप्यिनामानऋषयः पुरा निदधिरे। सम्यक् देवसंकृतु मनुष्यिनं वंतद्रत्स्पर्धः। द
धाते लिटि ईरयोरद्र्तरेभावः॥७॥ ॥अथ द्वितीयत्त्वे प्रथमा॥ आकृनइंद्र कुमंतं चित्रं ग्रा
भं संगृभाय। महाहस्तीदक्षिणेनेति॥ हे इंद्र त्वं महाहस्ती महाहस्तवान्। नदानी ॥मवनो
पृ५ ऽस्मत्स्पर्धं हि गुमंतं ग्राबवंतं स्तुत्यमिति स्पर्धः। चित्रं चायनीयं ग्राभं ग्राहकं ग्रहणार्हं वा धनं दक्षिणेन
हस्तेन तु क्षिप्रं आसंगृभाय आभिमुख्येन संगृहाण॥८॥ ॥अथ द्वितीया॥ विद्मा हि त्वा तुविकू
र्मिं तुविदेष्णं तुवीमघं। तुविमात्रमवोभिरिति॥ [illegible]त्वा त्वां विद्म हि जानीमः। खलु कीदृशमिति
तुविकूर्मिं बहुकर्म्माणं तुविदेष्णं बहुप्रदेयं तुविम[illegible]हुधनं तुविमात्रं बहुप्रमाणं अवोभिः रक्ष
णैर्युक्तं॥९॥ अथ तृतीया॥६॥ नहि त्वा शूर देवा ना[illegible]र्तासो दित्संतं। भीमं न गां वारयंत इति॥ हे
शूर इंद्र दित्संतं दातुमिच्छंतं त्वां देवा न हि वारयंते न निवारयंति। खलु। तथा मर्त्तासो मनुष्या अ
पि न वारयंते। भीमं न गां भयजनकं दृप्तवृषभं यवसे प्रवृत्तमिव तं यथा वारयितुं न शक्नुवंति तद्व
त्॥१०॥ ॥अथ तृतीयत्त्वे प्रथमा॥ अभि त्वा वृषभा सुते[illegible]सृजामि पीतये। तृंपा व्यश्नुही म
दमिति॥ हे वृषभ हे इंद्र त्वा त्वां सुते सोमे अभिषुते सति सुतं अ[illegible]पाय्य[illegible]तं सोमं पीतये पानाय अभिसृ
जामि। तृंप तृप्य मदं मदकरं सोमं व्यश्नु हि च॥११॥ अथ[illegible]धिक[illegible]त्वा मूरा अविष्यवो मोपह

© Dharmartha Trust J&K. Digitized by eGangotri

15

स्वान आरभन्। मां कीब्रह्मद्विषं वन इति॥ हे इन्द्र त्वां मूरा मूरवी[illegible]मनुष्याणां अविष्यवः पालनम
कामा मा आरभन्नु मा हिंसन्तु। उपहस्वानः उपहसनपराश्च माभं[illegible]ब्रह्मद्विषं ब्राह्मणानां द्वेष्टारं माकीं व,
नः। मा भजेथाः। ब्रह्मद्विषं ब्रह्मद्विष इति पाठौ॥ ७॥ ॥अथ तृतीया॥ इह त्वा गोपरीणसं महे मन्दन्तु राध
से। सरो गौरो यथा पिबेति॥ इन्द्र त्वा त्वां इह अस्मिन् यज्ञे गोपरीणसं गव्येन प[य]सा संमिश्रितं सोमं महे
महते राधसे धनाय मन्दन्तु। मनुष्या मादयन्तु त्वं च त्वं तं सो[मं] यथा गौरो मृगः सरः पिबति तथा पिब।
परीणसं परिणसेति पाठौ॥ ७॥ ॥अथ चतुर्थ्यन्त्वेव प्र[illegible]मा॥ इदं वसो सुतमन्धः पिबा सुपूर्णमुदरं। अ
नाभयिन् ररिमा न इति॥ हे वसो वासयितरिन्द्र इदं [illegible]र्तमानं सुतमभिषुतमन्धोऽन्नं सोमलक्षणं,
पिब। यथा उदरं त्वदीयं जठरं सुपूर्णं आतिशयेन संपूर्णं भवति। तथेत्यर्थः। हे अनाभयिन् आ समं
नाद्बिभेतीत्याभयी बिभेतेरौणादिक इनिः। न आभयी अनाभयी तादृशा इन्द्र ते तुभ्यं त्वदर्थं ररिम उत्कल
क्षणं सोमं दद्मः॥ रातने छान्दसो लिट्॥ ७॥ ॥अथ द्वितीया॥ नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपू
तः। अश्वो न निक्तो नदीषु इति॥ नृभिरध्वरस्थानेनृभिर्धूतो लिभिर्धूतैः तृणाद्यपनयनशोधितं। यद्वा धौ
तो। धूतः आधूतः अदाभ्यः ग्रहे आधूननेन संस्कृतः तदनंतरं अश्नैरश्मभिः ग्रावभिः करणभूतैः सुतः
अध्वर्युभिरभिषुतः। ततः अव्यः वारैः अविर्मेषः तत्संबंधिभिर्वालैः परिपूतः शोधितः दशापवित्रस्यना
भिभूतया वालतर्ण्या सुकृपा हि सोमः परिपूयते। तदुक्तं भगवता आपस्तंबेन शुक्लापूर्णां सुकां यजमानाय

© Dharmartha Trust J&K. Digitized by eGangotri

प्रयच्छति। तां शाकटे कीले दशापवित्रस्य नाभिं कुरुते। सुतं बलक्ष्याः पवित्रमभीतं भवतीति नदीप्सु नस्त्वा
स्वप्सु। अश्वोन अश्व इव निक्तः निर्णिक्तः शोधितः। यथाप्सु स्नातोऽश्वः अपगतमलः सन् दीप्तो भवति
। एवं वसतीवर्याख्याभिरद्भिरभिष्णुतः सोमो दीप्तो भवतीत्यर्थः। ईदृशो यः सोमः तं ते यवमित्यत्र यथा संबं
धः। धोता धूत इति पाठे॥७॥ अथ तृतीया॥ तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः। इंद्र त्वास्मिन्त्स
धमाद इति॥ तं पूर्वोक्तं गुणं सोमं हे इंद्र ते त्वदर्थं यथा यवमयं सवनीयपुरोडाशमिव गोभिः गविभवैः क्षी
रादिभिः श्रयणद्रव्यैः श्रीणन्तः मिश्रीकुर्वन्तः स्वादुं रसवन्तं नास्वादनीयमकर्म अकार्ष्म करोतेर्लुङि मंत्रे
घसेति च्लेर्लुक्। यस्मादेवं तस्माद्धे इंद्र त्वा त्वां तादृशं सोमं पातुमस्मिन्वर्त्तमाने सधमादे सह मदने यज्ञे आ
ह्वयामीति शेषः॥७॥ ॥इति द्वितीयस्याध्यायस्य ... खंडः॥७॥ ॥अथ तृतीयखंडे प्रथमत्वे प्रथ
मा॥ इंद्र त्वोजसा सुतं राधानां पते। पिबा त्वा३स्य गिर्वण इति॥ हे राधानां पते धनानां स्वामिन् गिर्वणः गी
१ र्भिः स्तुतिभिर्वननीय हे इंद्र ओजसा बलेनावहितस्त्वं इंद्र मनु आनोनुक्रमेण ३ इंद्रमानुक्रमेणेत्यर्थः। सुतमभि
षुतं अस्य इमं सोमं तुष्टिम् प्रपिब हि॥७॥ ॥अथ द्वितीया॥ यस्ते अनु स्वधामसत् सुते नियच्छ तन्वं। स त्वा ममत्तु
सोम्येति॥ हे इंद्र ते त्वदर्थं यः सोमः स्वधामन्नमनु सत्स्य ग्रावभिरभिषुतोऽसत् भवेत्। असत्ते लेट्यडागमः। यद्वृ
त्तयोगान्निघातः। आगमस्यानुदात्तत्वे धातुस्वरः। सुते तस्मिन्नलैः पात्वं स्वकीयं शरीरं नियच्छ प्रेरय। स सो
मः हे सोम्य सोमार्ह त्वा त्वां ममत्तु मादयतु॥७॥ ॥अथ तृतीया॥ प्र ते अश्नोतु कुक्ष्योः प्रेंद्र ब्रह्मणा शिरः। प्र बा

© Dharmartha Trust J&K. Digitized by eGangotri

हूर्यस्य राधसेति ॥ हे इंद्र ससोमः ते तव कुक्ष्योः कुक्षेरुभयोः पार्श्व[illegible]नोतु प्रकर्षेण व्याप्नोतु । अस्य व्यापना
विसस्य लोहित्यस्येयेन परस्मै पदं । निघातः । तथा ब्रह्मणा स्तोत्रे[illegible]हितः ससोमः शिरः शरीरं । अवयव
वा विना अवयवी लक्ष्यते । त्वच्छरीरं प्राप्नोतु । हे शूर विक्रांतेंद्र राधसा धनेन निमित्तेन तव बाहू अपि प्राप्नोतु ।
राधसा राधसेति पाठो ॥ ७ ॥ ॥ अथ द्वितीयतृचे प्रथमा ॥ आ त्वेता निषीदतेंद्रमभि प्रगायत । सखायः स्तो
मवाहस इति । तु अरं क्षिप्रार्थो निपातः । द्वाभ्यामाङ्भ्यामन्वि[illegible]मितशब्दोऽभ्यसनीयः । हे सखायः ऋत्विजः ।
क्षिप्रमस्मिन्कर्म्मण्यागच्छतागच्छत । आदराधिभ्यासः [illegible]गस्य च निषीदत उपविशत । उपविश्य चेंद्रमभि
प्रगायत सर्वतः प्रकर्षेण स्तुत । कीदृशाः सखायः स्तो[illegible]हसः । नित्य संवत्सरादि स्तोमानस्मिन्कर्म्मणि व
हंति प्रापयंतीति । अत्तिस्तुसुहुसृधृक्षुभाया परियम्लि[illegible]भ्यो मन्निति स्तौतेर्मन्प्रत्ययांतः स्तोमशब्दो निता
द्युदात्तः । स्तोमं वहंतीति स्तोमवाहसः । वहि हाधाञ्भ्यः छंदसीत्यसुन्प्रत्ययः तत्र णिदित्यनुवृत्तेरत उपधाया
इत्युपधाया वृद्धिः । कृदुत्तरपदप्रकृतिस्वरत्वे मा[illegible]गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यौणादिकसू
त्रात् समासे आद्युदात्तः ॥ ८ ॥ ॥ अथ द्वितीया ॥ पुरूतमं पुरूणामीशानं वार्याणां । इंद्रं सोमे सचा सुते इ
ति ॥ सखायो अभि प्रगायतेति पदद्वयमत्रानुवर्त्तते । हे सखाय ऋत्विजः सचा यूयं सर्वे सह । यद्वा सचा परस्परस
मवायेन सुते अभिषुते सोमे प्रवृत्ते सतींद्रमभि प्रगायत । कीदृशमिंद्रं पुरूतमं पुरून् बहून् शत्रून् तामयति ग्लाप
यतीति पुरूतमः । तमु ग्लान इति धातोः [illegible]र्व्वतावप्यबाध चिकित्वादंतोदात्तेपि कृदुत्तरपदप्रकृतिस्वरं बाधित्वा स्वरा

16

© Dharmartha Trust J&K. Digitized by eGangotri

टिः। छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। पुरूणां बहूनां वार्याणां। हूनां वार्याणां वरणीयानां धनानामी
शानं स्वामिनं॥७॥ ॥ अथ तृतीया॥ स घा नो योग आ भुवत्स राये स पुरंध्यां। गमद्वाजेभिरा स नः इति
घशब्दोवधारणार्थो निपातः। सर्वैस्तच्छब्दैः संबध्यते। स घ स एवेंद्रः पूर्वमंत्रोक्तगुणविशिष्टो नोस्मा
कं योगे पूर्वमप्राप्तस्य पुरुषार्थस्य संबंधे आ भुवत् आभिमुख्येन भवतु। पुरुषार्थं साधयत्वित्यर्थः
भवतेराशीर्लिङि परतो लिङ्याशिष्यङ् इति अङ्प्रत्ययः। तस्य ङित्त्वेन गुणाभावादुवङादेशः। किदाशि
षीति यासुट् न भवति। अनिसमागमशासनमिति क्वचन्न। तिङ्ङतिङः इति निघातः। स एव राये धना
र्थं आ भुवद्भवतु। स एव पुरंध्यां योषिति आ भुवत्। बहुविधायां बुद्धौ वा भुवत्। पुरंधिर्बहुधीरिति
यास्कः। स एव वाजेभिर्वाजैरन्नैः सह नोस्मानागमत् आगच्छतु। गमेर्लेट्। इतश्च लोपः परस्मैप
देष्विति इकारलोपः। बहुलं छंदसीति शपो लुक्। लेटोऽडाटावित्यडागमः। आगमा अनुदात्ता इति तस्यानुदा
त्तत्वे धातुस्वर एव शिष्यते॥७॥ ॥ अथ तृतीयस्य प्रथमा॥ योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखा
य इंद्रमूतय इति॥ योगेयोगे प्रवेशे तत्तत्कर्मप्रक्रामे। युजिर्योगे हलश्च इति घञ्। चजोः कु घिण्ण्यतोरिति कु
त्वं घञो ञित्वादाद्युदात्तत्वं। नित्यवीप्सयोरिति वीप्सायां द्विर्भावे सति आम्रेडितानुदात्तत्वं। वाजेवाजे कर्म
विघातिनि तस्मिंस्तस्मिन्संग्रामे तवस्तरं अतिशयेन बलिनं पुरुतूनाय रक्षार्थं सखायः सखिवत्।
प्रियाः वयं हवामहे आह्वयामः॥७॥ अथ द्वितीया॥ ॥ अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरं। यं ते पूर्वं

© Dharmartha Trust J&K. Digitized by eGangotri

पिता हुव इति॥ प्रत्नस्य पुरातनस्य उक्सः स्थानस्य स्वर्ग्गस्य [illegible] कात्स्नात्तु विप्रतिं बहून् यजमा
नान् प्रतिगंतारं। अत्र प्रतिशब्दो भीमसेनो भाम इतिवत् प्रति [illegible] ष्टः लक्षयित्वा तद्वारा तदर्थं लक्ष
यति। अतः प्रतिः प्रतिनिधिप्रतिदानयोरितिवत्। सत्वं वचनत्वनापि निपातत्वादनव्ययत्वेन पूर
णगुणे सादिनानषष्ठीसमासनिषेधः। नरं पुरुषमिंद्रं अनुहुवे अनुक्रमेण कर्म्मस्वाह्वयामि।
ह्वेञो लिटि बहुलं छंदसीति पूर्ववत् संप्रसारणपरपूर्वत्वे द्विर्वचनप्रकरणे छंदसि वेति वक्तव्य
मिति द्विर्वचनाभावः। यद्वृत्तायोगान्निघातः। यं ते त्वामिंद्रं पिता अस्मदीयो जनकः पूर्वं पुरा अस्मात्की
यानुष्ठानकाये हुवे आहूतवान्। तमाह्वयामीति शेषान्वयः॥१७॥ ॥अथ तृतीया॥ आ घा
गमद्यदि श्रवत् सहस्रिणीभिरूतिभिः। वाजेभिरुप नो हवमिति॥ यदि श्रवत्। यद्ययमिंद्रो नोऽस्म
दीयं हवमाह्वानं शृणुयात्। तदानीं स्वयमेव सहस्रिणीभिरूतिभिः बहुभिः पालनैर्वाजेभिरन्नै
श्च उपसमीपे आ घ अवश्यमागमत्। आगच्छतु॥१७॥ ॥अथ चतुर्थत्र्चे प्रथमा॥ इंद्र सुत इषु सो
मेषु क्रतुं पुनीष उक्थ्यं। विदे वृधस्य दक्षस्य महां हि ष इति॥ सोमेषु सुतेष्वभिषुतेषु सत्सु हे इंद्र त्वं ता
न् पीत्वा क्रतुं कर्म्मणां कर्त्तारं उक्थ्यं स्तोतारं च पुनीषे शोधयसि। यद्वा सोमेष्वभिषुतेषु उक्थ्यं स्तव्यं क्र
तुं यागं तैः सोमैः पुनीषे यजमानैः पूतं करयसि। किमर्थं वृधस्य वर्द्धकस्य दक्षस्य बलस्य विदे लाभा
य सत्ता हि त्वं महान् खलु॥ अत एवं कर्त्तुं शक्नोषीत्यर्थः। इंद्र सुतेषु इंद्र सुतेष्विति पुनीष पुनीतेति

© Dharmartha Trust J&K. Digitized by eGangotri

वरेण्यस्यमहंमहिषइतिरक्षसोमहान्तंहिषइतिचपाठो।।८।। ।।अथद्वितीया।।सप्रथमेव्योमनि
देवानांसदनेवृधः।सुपारःसुश्रवस्तमः[…]समप्सुजिदिति।।सइंद्रःप्रथमेप्रथितेविस्तीर्णेसुखे
वाव्योमनिविशेषेणरक्षकेवादेवानांस[…]सीदन्त्यस्मिन्नितिसदनंस्थानंस्वर्गाख्यंतत्रस्थितः
सन्वृधोयजमानानांवर्द्धयिताचभवति[…]तथासुपारःसुष्ठुपारयिताप्रारब्धस्यसम्यक्परिस
मापयिता।सुश्रवस्तमःअतिशयेनशोभनं[…]श्रवोऽन्नंयशोवायस्यसतथोक्तः।सम्यक्अप्सु
दकेषुसत्सुजित्तद्विघातिनोवृत्रादेर्जेता।यद्वाआप[…]सैंनरिक्षनामइयंनरिक्षेवर्त्तमानानाम
सुराणांजेता।।नमुहुवइत्यस्यतृतस्त्रसंबं[…]तृतीया।।नमुहुवेवाजसातयइंद्रभराय।
शुष्मिणं।भवानःसुम्नेअंतमःसखावृधइति।।त[…]पूर्वोक्तगुणमेषवशुष्मिणंबलंतमिंद्रंवाज
सातयेबलानामन्नानांवासातिर्लाभोयस्मिन्तादृशायभरायसंग्रामाय।यद्वाभ्रियंतेतस्मि
न्हवींषीतिभरोयज्ञःप्रायेणसंग्रामनामानियज्ञनामत्वेनचपठ्यंतेभराययज्ञार्थंहुवेआह्वया
मि।हेइंद्रत्वंसुम्नेसुखेधनेवालिप्सितेसतिनोऽस्माकमंतमःअन्तिकतमःसंनिकृष्टतमोभव।नेमे
नाद्यश्चेतिअन्तिकनामइष्टस्यनादिलोपः।तथावृधेवर्द्धनार्थंचस[…]समानख्यातोमित्रभूतोभवानमु
हुवेतमुद्धतइतिपाठो।।८।। ।।तृतीयःखंडः।।८।। ।।अथस्तु[…]स्य[…]ऽप्रगाथरूपेप्रथमसूक्तेप्रथमा
।।८।।एनावोअग्निंनमसोर्जोनपातमाहुवे।प्रियंचेतिष्ठम[…]स्तुतेशु[…]विश्वस्यदूतममृतमिति।।

© Dharmartha Trust J&K. Digitized by eGangotri

अ ऊर्जो बलस्य नपातं नपादित्यपत्यनाम । नपातं पुत्रं प्रियमस्य [illegible] ष्टमतिं न्यायेन ज्ञातारं प्रज्ञाप
कं वा अरतिं गंतारं स्वामिनं वा स्वध्वरं शोभनयज्ञं विश्वस्य स[illegible] यजमानस्य दूतं अमृतं नित्यमग्नि
मेनाएनेन नमसा स्तोत्रेण हे ऋत्विक् यजमाना वा युष्मदर्थं आहुवे आह्वयामि ॥७॥ ॥ अथ द्विती
या ॥ स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः । सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जना
नामिति ॥ सोग्निः अरुषा आरोचमानौ विश्वभोजसा विश्वस्य पालयितारावश्वौ योजते स्वकीयरथे पु
नन्तु यद्वा विश्वभोजसा विश्वस्य रसकेण अरुषा आरोचमानेन तेजसा योजते । अथ युक्तानन्तरं नेत
रं योग्निः स्वाहुतः स्तोत्रभिः सुष्ठ्वाहुतः सन् दुद्रवत् [illegible]तान् प्रति भृशं द्रवतु गच्छतु । कीदृशः सुब्रह्मा
शोभनस्तुतिकः शोभनान्नो वा यज्ञो यज्ञोपेतः सुशमी सुकर्मा शोभनकर्मा च भवति । ततः वसूनां वा
सकानां जनानां यजमानानां संबंधि राधः हविर्लक्षणं धनं देवं द्योतमानमग्निं प्रतिगच्छत्विति शेषः
॥८॥ ॥ अथ द्वितीयप्रगाथे प्रथमा ॥ प्रत्यु ष्य दृश्यायत्युच्छंती दुहिता दिवः । अपो मही वृणुते चक्षु
षा तमो ज्योतिष्कृणोति सूनरीति ॥ आयती आगच्छंती उच्छंती नमांसि विवासयंती वर्जयंती दिवः
द्युलोकस्य सूर्यस्य वा दुहिता पुत्री । एवंभूता उषाः प्रत्यदर्शि सर्वैः प्रतिदृश्यते । पुरस्तात् पूरकः । सेषा म
हि महत्तमो नैशमंधकारं चक्षुषा दर्शनेन अपउ इति निपातद्वयसमुदायः अपे सस्यार्थे । अपव
णुते निवारयति । एवं कृत्वा सूनरी जनानां सुष्ठु नेत्री उषाः ज्योतिः प्रकाशं कृणोति करोति । वृणुते चक्षु

© Dharmartha Trust J&K. Digitized by eGangotri

पाव्यय‍तिचक्षुः सइतिपाठे॥७॥ ॥अथद्वितीया॥ उदुस्त्रियाः सृजतेसूर्यः सचाउद्यंनक्षत्रमर्चि
वत्।तवेदुषोव्युषिसूर्यस्यचसंभक्तेन गमेमहीति॥ सूर्यः सर्वस्यप्रेरकआदित्यः उस्त्रियाः रश्मीन्
सचासहयुगपदेवउत्सृजतेउद्गमयति। तथाउद्यनुउद्गच्छन्प्रादुर्भवन्नक्षत्रंनभसिदृश्यमानंग्रह
नक्षत्रादिकं अर्चिवद्दीप्तिमत्करोतिसौरतेजसाहिनक्तंचंद्रप्रभृतीनिनक्षत्राणिभासंते। सुशुभः
सूर्यरश्मिश्चंद्रमागंधर्वइतिहिनिगमांतरं। एवंचसतिहेउषः उषोदेवतेतवसूर्यस्यचव्युषिविवा
सनेप्रकाशनेसतिभक्तेनान्नेनसंगमेमहि यंगच्छेमहि।इच्छंदःपूरकः॥७॥ ॥अथतृतीयप्र
गाथेप्रथमा॥७॥ इमाउवांदिविष्टयउस्राहवंतेअश्विना॥ अयंवामह्वेवसेशचीवसूविशंविशं
हिगच्छथः॥ इमाहिदिविष्टयोदिवमिच्छंत्यः प्रजा [illegible] पिउइतिचार्थेहेअश्विनाउस्राबासकौउस्रौ
वांहवंतेआह्वयंति। अयंस्तोतापिहेशचीवसूकर्मधनौवांयुवामवसेअस्मद्रक्षणाययुवमोस्त
र्पणायवाआह्वेआह्वयामि। किमर्थमेवंप्रजाअपिअयमपीत्याहरोस्तित्यितु। तत्राह। विशंविशं
हिगच्छथः सर्वास्तिनिकटेः प्रजाअपियुवांगच्छथः खलुतस्मादेवमुच्यतइति॥७॥ ॥अथद्विती
या॥ युवंचित्रंददथुर्भोजनंनरा चोदेथांसूनृतावते। अर्वाग्रथंसमनसानियच्छतंपिबतंसोम्यंमधु
इति॥ हेनराऽनेतारावश्विनौयुवंयुवांचित्रंचायनीयंभोजनं [illegible] पुष्पारयथ॥ तद्दत्तंसूनृतावतेस्तु
तिमतेस्तोत्रेचोदेथांप्रेरयतं। तदर्थंसिमानस्तासमानमनसौ [illegible] तेःप्र... [illegible] पूर्वयोः संबंधिनंअर्वागस्म

© Dharmartha Trust J&K. Digitized by eGangotri

दभिमुखं नियछंतं नियमंतं। तथा कृत्वा सोम्यं सोमसंबंधिनं [illegible] मधुररसं च पिबंतं॥७॥ इति द्वि
तीयस्याध्यायस्य चतुर्थः खंडः॥७॥ ॥अथ पंचमखंडे अस्य प्रत्नेति नवर्चसूक्ते प्रथमा॥ अस्य प्रत्ना
मनु द्युतं शुक्रं दुदुह्रे अह्रयः। पयः सहस्रसामृषिमिति॥ अस्य सोमस्य प्रत्नां पुरातनां द्युतं द्योत
मानां तनुमनु शुक्रं दीप्तं सहस्रसां अभिलषितस्यापरिमितस्य फलस्य दातारं ऋषिं अतींद्रियस्य
कर्मफलस्य द्रष्टारं पयः पातव्यं रसं अह्रयः कवयः दुदुह्रे दुहंति॥७॥ ॥अथ द्वितीया॥ अयं सूर्य इ
वोपदृगयं सरांसि धावति। सप्त प्रवत आदिवमिति॥ अयं सोमः सूर्य इव यथा सूर्यः सर्वस्य लो
कस्योपद्रष्टा तथा कर्मणामुपद्रष्टा उपद्रष्टा [illegible] अयं सोमः सरांसि त्रिंशदुक्थपात्राणीति
केचिद्वर्णयंति। अपरे तु त्रिंशदहोरात्राणि सरांसीति [illegible] निधावति। प्रतिगछति। तथा च यास्कः॥
तत्रैतद्याज्ञिका वेदयंते त्रिंशदुक्थपात्राणि माध्यंदिने सवन एकदेवतानि तान्येतस्मिन्काल एकेन
प्रतिधानेन पिबंति तान्यत्र सरांस्युच्यंते। त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येति नैरुक्ताः
यं इति। अपि वायं सोमः दिवमधिकृत्य सप्त प्रवतः सप्त नदीरातिष्ठति॥७॥ अथ तृतीया॥७॥ ॥
अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्य इति॥ पुनानः पूयमानोयं सोमः विश्वा
नि सर्वाणि भुवना भुवनानि सर्वेषां भुवनानामुपरि तिष्ठति तत्र दृष्टांतमाह। देवो न सूर्यः यथा सूर्यो
देवः सर्वेषां भुवनानामुपरि तिष्ठति॥ तद्वदयं सोमोपीत्यर्थः॥७॥ ॥अथ चतुर्थी॥ एष प्रत्नेन जन्मना

© Dharmartha Trust J&K. Digitized by eGangotri

देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षतीति॥ हरिर्हरितवर्णः देवो द्योतमानः एष सोमः प्रत्नेन पुराणेन जन्म
ना जननेन देवेभ्यो देवार्थं सुतोऽभिषुतः सन् पवित्रे अर्षति। आरोचते॥७॥ ॥अथ पंचमी॥ एष
प्रत्नेन मन्मना देवो देवेभ्यः स्परि। कविर्विप्रेण वावृधे इति॥ प्रत्नेन पुराणेन मन्मना मननसाधनेन
स्तोत्रेण युक्त इति शेषः। देवो द्योतमानः एष सोमः देवेभ्यो देवार्थं कविर्मेधावी सन् विप्रेण मेधावि
ना यजमानेन ऋत्विजा वा यद्वा वावृधे परिवर्धते॥७॥ ॥अथ षष्ठी॥ ॥दुहानः प्रत्नमित्पयः पवित्रे
परिषिच्यसे। क्रंदन् देवां अजीजन इति॥ प्रत्नमित् पुराणमेव पयो रसं दुहानः हे सोम पवित्रे परिषि
च्यसे। हे सोम त्वं क्रंदन् शब्दं कुर्वन् देवानिंद्रादीन् अजीजनः स्वसमीपे जनयसि। यत्र सोमोऽभिषूय
ते तत्र देवा नियतं प्रादुर्भवंतीत्यर्थः। अजीजनः अ[illegible] इति पाठो॥७॥ ॥अथ सप्तमी॥ उप शि
क्षापतस्थुषो भियसमाधेहि शत्रवे। पवमान विदा रयिमिति॥ हे पवमान सोम उपशिक्ष त्वं समीपे
कुरु। कानिपतस्थुषः अपक्रम्य स्थितान् स्मदभिमतानित्यर्थः॥ शत्रवे अस्मद्द्रोहिणे भियसं भय
माधेहि। कुरु जनय। किंच। तेषां शत्रूणां रयिं धनं विदाः अस्मभ्यं विद्धि देहीत्यर्थः॥७॥ ॥अष्टमीन
वम्योर्ऋचोः प्रतीकमेवमाम्नातं। उपोषु जातमप्तुरं इति उपास्मै गायता नर इति च तत्राष्टमी प्रदेशां
तरे आम्नाता॥ उपोषु जातमप्तुरं गोभिर्भंगं परिष्कृतं। इंदुं देवा अयासिषुरिति॥ जातं सम्यक् प्रादु
र्भूतं अप्तुरं वसतीवरीभिरद्भिः परितं भंगं शत्रूणां भंजकं गोभिः॥७॥ ॥ गोभिः पयोभिः परिष्कृतमलंकृतं सं

© Dharmartha Trust J&K. Digitized by eGangotri

स्कृतमिंदुं सोमं देवाः इंद्रादयः उपप्रु इति निपातद्वयसमुदायः [illegible]यस्यार्थे वर्त्तते सुष्टु उपायासिषुः
उपागच्छंति ॥ ८ ॥ नवमी लेवमन्यत्राम्नाता ॥ उपास्मै गायता नरः पवमानायेंदवे । अभि देवां इयक्षत
इति ॥ हे नरो नेतारो यज्ञस्य देवान् निंद्रादीन भीयक्षते अभिमुख्येन यष्टुमिच्छते यजमानाय क्षरते ।
अस्मा अभिषूयमाणायेंदवे सोमायोपगायत उपगानं कुरुत ॥ ८ ॥ ॥ इति द्वितीयस्य पंचमः खं
20 डः ॥ ८ ॥ ॥ षष्ठे खंडे प्रथमतृचे प्रथमा ॥ प्र सोमासो विपश्चितोपो नयंत ऊर्म्मयः । वनानि महिषा
इवेति ॥ विपश्चितो मेधाविनः ऊर्म्मयः प्रवृद्धाः सोमासः सोमाः अपः वसतीवर्य्यरिथ्याः प्रणयंते
प्राप्नुवंति । अत्र दृष्टांतः । वनानि महिषा इव यथा [illegible]गाः वनानि प्राप्नुवंति । तद्वत् । अपोनयं
त अपां नयंतीति पाठो ॥ ८ ॥ अथ द्वितीया ॥ ॥ अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया । वाजं गोमं
तमक्षरन्निति ॥ अभि सरंतीति शेषः । उपसर्गश्रुते रुचितक्रियाध्याहारः । किं प्रति द्रोणानि द्रोणकलशा
न्यपि द्रोणकलश एक एव तथापि तत्प्राधान्याद् इतराण्यपि पात्राणि द्रोणानीत्युच्यंते ॥ अथ वैक
स्मिन्नेव पूजार्थं बहुवचनं । के बभ्रवो बभ्रुवर्णाः सोमाः शुक्राः दीप्ताः केन प्रकारेण धारया धाराकारे
ण कस्मै प्रयोजनाय ऋतस्य यज्ञस्यार्थं । किं च । वाजमन्नं गोमंतं बहुगोयुक्तं अक्षरन् क्षरंत अस्माकं
यद्येकमेव वाक्यं । उक्तविधाः सोमाः यज्ञार्थं द्रोणानि प्रत्यक्षरन् धारया । किं कुर्वंतो गोमंतं वाजं प्रयच्छं
त इत्यर्थः ॥ ८ ॥ ॥ अथ तृतीया ॥ सुता इंद्राय वायवे वरुणाय मरुद्भ्यः । सोमा अर्षंतु विष्णवे इति ॥ सु

© Dharmartha Trust J&K. Digitized by eGangotri

ता अभिषुताः सोमाः इन्द्रादिदेवार्थं अर्षंतु गच्छंतु। अर्षंतु अर्षंतीति पाठे॥ ७॥ ॥अथ प्रगा
याल्मके द्वितीयसूक्ते प्रथमा॥ ॥प्र सोम देववीतये सिंधुर्न पिप्ये अर्णसा। अंशोः पयसा मदिरो
न जागृविरच्छा कोशं मधुश्चुतमिति॥ हे सोम त्वं देववीतये देवानां पानाय तदर्थं अर्णसा वसतीवर्य्या
ख्येनोदकेन प्रपिप्ये। आप्यायसे। तत्र दृष्टांतः। सिंधुर्न यथा सिंधुरुदकेन प्रपिप्ये आप्याय्यते तद्वत्।
प्यायते र्लिटि लिङ्युङोश्चेति पीभावः। ततः त्वं मदिरो न मदकरः सुरादिरिव। जागृविर्जागरण
शीलः। यद्वा नेति संप्रत्यर्थे। इदानीं मदकरो जागरणशीलस्त्वं अंशोः लतारूपस्य पयसा रसेन
मधुश्चुतं मधुररसस्य क्षारयितारं कोशं द्रोणकलशं अच्छा अभिगच्छसि॥ ७॥ अथ द्वितीया॥ ॥
आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न म[र्ज्यः।] तमीं हिन्वंत्यपसो यथा रथं नदीष्वा गभस्त्यो॰
रिति॥ हर्यतः स्पृहणीयः प्रियः प्रीणयिता। सूनुर्न सूनुरिव मर्ज्यो मार्जनीयः अर्जुनः श्वेतवर्णः॰
सोमः अत्के रूपे विविक्ते आव्यत आप्नोति। तमीमिनं सोमं अंगुलयः नदीषु नदनशीलासु वसती
वरीषु गभस्त्योर्बाह्वोराभिमुख्येन हिन्वंति प्रेरयंति। तत्र दृष्टांतः। अपसो यथा वेगवंतः आजना र
थं संग्रामेषु प्रेरयंति तद्वत्। अर्जुन अर्जुने इति पाठे॥ ८॥ ॥अथ तृतीयतृचे प्रथमा॥ ॥प्र सोमा॰
सो मदच्युतः श्रवसे नो मघोनां। सुता विदथे अक्रमुरिति॥ सोमासः सोमाः मदच्युतो मदस्राविणः॰
सुता अभिषुताः संतो विदथे यज्ञे मघोनां हविष्मतां नोऽस्माकं श्रवसे अन्नाय कीर्त्तये वा प्राक्रमुः प्रगच्छंति॥

© Dharmartha Trust J&K. Digitized by eGangotri

मघोनांमघोनइतिपाठौ॥७॥ ॥अथद्वितीया॥आदींहंसो[यथा]गणंविश्वस्यावीवशन्मतिं।अ
त्योनगोभिरज्यतइति॥आत्‌अपिचईमयंसोमोहंसोयथागणंजनसंघंस्वगतिविशेषेणस्वभे
नवाप्रविशतितद्वद्विश्वस्यसर्वस्यस्तोतृजनस्यमतिंबुद्धिंस्तुतिंवाअवावशत्वशंनयति।स्वसो
मोअत्योनाश्वइवगोभिर्गव्यैरुदकैर्वाअज्यतेसिच्यतेस्निग्धीक्रियते॥७॥अथतृतीया॥ ॥आदीं
त्रितस्ययोषणोहरिंहिन्वंत्यद्रिभिः।इंदुमिंद्रायपीतयइति॥आत्‌अपिचईंएनंहरिंहरितवर्णमिंदुं
सोमंत्रितस्यऋषेर्योषणोऽङ्गुलयोऽद्रिभिर्ग्रावभिर्हिन्वंति।किमर्थंइंद्रायेंद्रस्यपीतयेपानाय॥७॥
अथैकत्रिंशचतुर्थसूक्तेप्रथमा॥अयापवस्वदेवयु[रेभन्]पवित्रंपर्येषिविश्वतः।मधोर्धाराअसृक्षत
इति॥हेसोमत्वंदेवयुर्देवान्कामयमानस्त्वंअयाअनयाधारयापवस्वक्षर।ततःरेभन्शब्दायमा
नःपवित्रंविश्वतःपर्येषिसर्वतःपरिगच्छसि।अनंतरंमधोर्मदकरस्यतवधाराआलीनाअसृक्षत
सृज्यंते॥७॥ ॥अथद्वितीयतृतीयपादेव्यत्ययेनपाठौ॥अथैकत्रिंशपंचमेप्रथमा॥पवतेहर्यतोह
रिरतिह्वरांसिरंह्या।अभ्यर्षस्तोतृभ्योवीरवद्यशइति॥हर्यतःस्पृहणीयःहरिर्हरितवर्णःसोमः
रंह्यात्वरयाआकारःसाधुवेगेनह्वरांसिकुटिलानिअन्तहूनिपवित्राणिअतिपवते।अतीत्यग
च्छति।किंकुर्वन्स्तोतृभ्यःवीरवत्पुत्रयुक्तंयशःअभ्यर्षन्अभिगमयन्पवते॥७॥ ॥अथैकत्रिंशपं
चमेप्रथमा॥प्रसुन्वानायांधसोमर्त्तोनवष्टतद्वचः।अपश्वानमराधसंहतामखंनभृगवइति॥सुन्वा

© Dharmartha Trust J&K. Digitized by eGangotri

नायवत्तुथ्यर्थे षष्ठी। सुन्वानस्याभिषूयमाणस्य अंधसोऽन्नीरयस्य सोमस्य तत्त्वसिद्धं वचो वचनं घो
षं मर्तो मारकः कर्मविघ्नकारी श्वान प्रवष्टन भजतां नश्यतो चितियावत्। तथा हे स्तोतारः अराधसं
साधककर्मरहितं श्वानं अपहतनत्र घष्टांतः मखं न। यथापुरा अपराद्धं मखं एतन्नामानं भृगवो पह
तवंतः तथा अपहते सर्पः। प्रसुन्वानायसुन्वतो न स्येति वषट्वत इत्विवपाठो॥छ॥ इति द्वितीयस्याध्या
यस्य षष्ठः खंडः॥छ॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थम
हेश्वरः॥छ॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्य
धुरंधरेण सायणाचार्यविरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे द्वितीयोऽध्यायः संपूर्णः
॥छ॥ ॥यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जग[illegible]। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥छ॥ ॥
अथ तृतीयोध्याय आरभ्यते॥ तत्र पवस्ववाच इति पंचतृचात्मके प्रथमे खंडे प्रथमतृचे प्रथमा। पवस्व
वाचो अग्रियः सोम चित्राभिरूतिभिः। अभि विश्वानि काव्येति॥ हे सोम अग्रियो मुख्यस्त्वं चित्राभिः पू
जनीयैरूतिभिः रक्षणैः सह वाचो अस्मदीयाः स्तुतीः प्रति पवस्व। उत्तरार्धे उक्तमेवार्थं विशदयति। विश्वा
नि सर्वाणि काव्या काव्यानि स्तुत्यात्मकानि वाक्यानि अभि पवस्वेति॥छ॥ ॥अथ द्वितीया॥ त्वं समुद्रिया
अपो ग्रियो वाच ईरयन्। पवस्व विश्वचर्षण इति॥ हे विश्वचर्षणे सर्वस्य द्रष्टः सोम अग्रियः मुख्यस्त्वं वा
च ईरयन् प्रेरयन्। समुद्रिया अंतरिक्षाण्यपः उदकानि पवस्व धारया। विश्वचर्षणे विश्वमेजयेति छंदोग

© Dharmartha Trust J&K. Digitized by eGangotri

बह्वृचानांपाठो॥७॥ ॥अथतृतीया॥तुभ्येमाभुवनाकवेमहि[illegible]सोमतस्थिरे।तुभ्यंधावंतिधेनवइ
ति॥हेकवेक्रांतकर्म्मन्सोमतुभ्यतुभ्यंतवमहिम्नेइमाइमानिभुवनाभुवनानितस्थिरेतिष्ठंतित्वामेव
पुरस्कुर्वंतीत्यर्थः।किंचधेनवोनवप्रसूतिकाःदेवानांहविःप्रदानेनप्रीणयित्र्योगावस्तुभ्यंत्वदर्थमेवा
शिरंप्रयच्छामइतिधावंति।आगच्छंतिधावंतिधेनवइतिच्छंदोगाः॥अर्षंतिधेनवइतिबह्वृचाः॥७॥
॥अथद्वितीयत्र्यृचेप्रथमा॥पवस्वेंदोवृषासुतःकृधीनोयशसोजने।विश्वाअपद्विषोजहीति॥हेइं
दोसोमसुतोभिसुतःवृषाकामानांवर्षितापवस्वधारयाक्षरजनेजनपदेनोस्मान्यशसोयश
स्विनःकृधिकुरु।विश्वाविश्वान्सर्वान्द्विषोद्वेषिणःशत्रून्अपजहिमारयस्व॥७॥ ॥अथद्विती
या॥यस्यतेसख्येवयंसासह्यामपृतन्यतः।तवेंदोद्युम्नउत्तमइति॥हेइंदोसोमअस्मास्मिन्यागेवर्त्त
मानस्यतेतवसख्येसखित्वेसतिवयंस्तोतारःभवत्प्रदीयउत्तमेश्रेष्ठेद्युम्नेअन्नेतृप्तिं[illegible]ताः।तथाच
यास्कः।द्युम्नंद्योततेर्यशोवान्नंवेतिपृतन्यतःयुद्धमिच्छतःशत्रून्साह्यामअभिभवेमद्वितीयतृती
यपादौव्यत्ययेनपाठो॥७॥ ॥अथतृतीया॥यातेभीमान्यायुधातिग्मानिसंतिधूर्वणे।रक्षासमस्य
नोनिदइति॥हेसोमतेतवयायानिभीमानिशत्रूणांभयंकराणितिग्मानितीक्ष्णानिआयुधाआयु
धानिधूर्वणेशत्रुवधार्थंसंतितैरायुधैःसमस्यसर्वस्यशत्रोर्निदोनिंदयाःनोस्मान्रक्षपालय॥७॥॥
अथतृतीयत्र्यृचेप्रथमा॥वृषासोमद्युमांअसिवृषादेववृषव्रतः।वृषाधर्माणिदध्रिषइति॥हेसोमवृषा।

© Dharmartha Trust J&K. Digitized by eGangotri

कामानां वर्षिता त्वं द्युमान् दीप्तिमान् असि। अपि च हे देव द्योतमान सोम वृषा त्वं वृषव्रतो वर्षणशील
कर्मासि। किं च। हे सोम वृषा त्वं धर्माणि देवानां मनुष्याणां च हितानि कर्माणि दधिषे धारयसि। दध्रि
षे दधिष इति पाठे॥८॥ ॥अथ द्वितीया॥ वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा सुतः। स त्वं वृषन् वृषेद
सीति॥ हे वृषन् कामानां वर्षक सोम वृष्णो वर्षितुस्ते तव शवो बलं वृष्ण्यं वर्षणशीलं भवति। वनं वन
जनमपि वृषा वर्षणशीलं सुतः अभिषुतस्त्वं रसोऽपि वृषा वर्षणशीलः। स त्वं वृषेदसि वर्षणशील ए
वासि भवसि। स्तुतो मदइति स त्वं सत्समिति च पाठे॥८॥ ॥अथ तृतीया॥ अश्वो न चक्रदो वृषा सं गा
इन्दो समर्वतः। वि नो राये दुरो वृधीति॥ हे इन्दो सोम वृषा त्वं अश्वो नाश्व इव संचक्रदः संक्रन्दसे। अपि च
गाः आश्च नर्वतोऽश्वांश्चास्मभ्यं संप्रयच्छसीति शेषः। किं च नोऽस्माकं राये धनाय दुरो द्वाराणि विवृधि
२६ विवृतानि कुरु॥८॥ ॥अथ चतुर्थस्य प्रथमा॥ वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशं
इति। हे सोम त्वं वृषासि हि अभिमतफलानां वर्षिता भवसि। खलु तस्मात् हे पवमान पूयमान वासो
मस्वर्दृशं सर्वस्य सूर्यस्य वा द्रष्टारं स्वार्वैर्वैर्दृष्टव्यं वा भानुना तेजसा द्युमन्तं दीप्तिमन्तं अतिशयेन ते
जस्विनमित्यर्थः। स्तुतिमन्तं वा त्वां वयं हवामहे। यक्षेषा द्युयामहे॥८॥ ॥अथ द्वितीया॥ यदद्भिः प
रिषिच्यसे मर्मृज्यमान आयुभिः। द्रोणे सधस्थमश्नुषे इति॥ हे सोम त्वं आयुभिर्मनुष्यैर्ऋत्विग्भिर्मृ
ज्यमानः अतिशयेन शोध्यमानः सन् अद्भिर्वसतीवरीभिर्यदा वृषा परिषिच्यसे परितः सिच्यमानो

© Dharmartha Trust J&K. Digitized by eGangotri

मवसितः तानी द्रोणे द्रोणकलशेन गृह्यमाणः सन् सधस्थं स... तं सत्रेति सधस्थं स्थानं ग्रहत्वम
साद्रिकं अभ्यर्षेत्याप्नोषि। मर्मृज्यमान आयुभिर्मृज्यमानो गभस्त्योरिति द्रोणे द्रुण इति च पाठे।।
।।८।। ।।अथ तृतीया।। आपवस्व सुवीर्यं मंदमानः स्वायुध। इहो ष्विंदवागहीति।। हे स्वायुध यज्ञे
स्फ्यकपालादीनि स्वायुधानीत्यभिधीयंते। शोभनानि तानि यस्य स तथोक्तः। यद्वा धनुरादीन्या
युधानि यस्य सः तादृक्। हे सोम त्वं मंदमानः मोदमानः सन्। यद्वा अंतर्णीतण्यर्थः। देवान् स्वयं
मादयन् सुवीर्यं शोभनवीर्यमपि तं पुत्रादिकमस्माकं आपवस्व पवतिर्गत्यर्थः। आप्रापय। किं
च। हे इंदो ग्रहेषु चमसेषु स्वरणशालसोम इहो इतः अस्मदीये यज्ञे सु आगहि सुष्ठु आगच्छ।।८।।
।।अथ पंचमस्तत्वे प्रथमा।। पवमानस्य ते वयं पवित्रमभ्युंदतः। सखित्वमावृणीमह इति।। हे सोम
पवित्रमभ्युंदतः पवित्रमभिक्लेदयतः पवमानस्य क्षरतस्ते तव सखित्वं सख्यं वयं अमहीयव आं
गिरसाः स्तोतारः आवृणीमहे प्रार्थयामहे।।८।। ।।अथ द्वितीया।। ये ते पवित्रमूर्मयो अभिक्षरंति
धारया। तेभिर्नः सोम मृळयेति।। हे सोम ते तव ये ऊर्मयस्तरंगाः पवित्रं धारयाक्षरंति तेभिस्तै
रूर्मिभिर्नोस्मान्मृडय सुखय।।८।। ।।अथ तृतीया।। स नः पुनान आभर रयिं वीरवतीमिषं। ई
शानः सोम विश्वत इति।। हे सोम विश्वतः सर्वस्य जगत ईशान ईश्वरः सोभिषुतः पुनानः पूयमान
स्त्वं नोस्मभ्यं रयिं धनं वीरवतीं पुत्राद्युपेतां इषमन्नं वा आभराहर।।८।। इति तृतीयाध्याये प्रथमः खंडः।।८।।

© Dharmartha Trust J&K. Digitized by eGangotri

॥ अथ द्वितीयखंडे प्रथमसूक्ते प्रथमा ॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं । अस्य यज्ञस्य सु
क्रतुमिति ॥ अग्नेर्दूतत्वमेतन्मंत्रव्याख्याने तैत्तिरीयब्राह्मणे समाम्नातं । अग्निर्देवानां दूत आसी
दुशना काव्योऽसुराणामिति । तादृशं देवदूतमग्निं अस्मिन्कर्म्मणि वृणीमहे संभजामः । कीदृशं हो
तारं देवानामाह्वातारं विश्ववेदसं सर्वधनोपेतं बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । अ
स्य प्रवर्त्तमानस्य यज्ञस्य निष्पादकत्वेन सुक्रतुं शोभनकर्माणं शोभनप्रज्ञं वा ॥ १ ॥ अथ द्विती
या । अग्निमग्निं हवीमभिः सदा हवंत विश्पतिं । हव्यवाहं पुरुप्रियमिति ॥ यद्यप्यग्निः स्वरूपेणैक
एव तथापि प्रयोगभेदादाहवनीयादिस्थानभेदात्पावकादिविशेषणभेदाच्च बहुविधः । तमभिप्रेत्याग्
निमग्निमिति वीप्सा । तं हवीमभिराह्वानकरणैर्मंत्रैः सदा हवंत नित्यं तरमनुष्ठातार आह्वयंति ॥
कीदृशं विश्पतिं विशां प्रजानां होत्रादीनां पालकं हव्यवाहं यजमानसमर्पितस्य हविषो देवान्प्रति
वोढारं । अत एव पुरुप्रियं बहूनां देवानां प्रीतास्पदं । अग्निमग्निमिति नित्यवीप्सयोरिति वीप्सायां द्विर्भा
वः । तस्य परमाम्रेडितमित्युत्तरस्याम्रेडितसंज्ञायां अनुदात्तं चेत्यनुदात्तत्वं । हवीमभिः ह्वेञ् स्पर्द्धायां
शब्दे च । आह्वानकरणभूतेषु मंत्रेषु स्वव्यापारस्वातंत्र्यात्कर्तृत्वविवक्षया अन्येभ्योपि दृश्यंत इति म
न्निति मनिन् । तस्य छंदसि ईडागमः । बहुलं छंदसीति धातोः संप्रसारणं । परपूर्वत्वं गुणावादेशौ । नि
त्त्वादाद्युदात्तत्वं । सदा सर्वकान्येसाद्दिना सर्वत्रा दाप्रत्ययः । सर्वस्य सोऽन्यतरस्यां दीति सभावः । व्यत्य

© Dharmartha Trust J&K. Digitized by eGangotri

येनाद्युदात्तत्वं।हवंतद्धे ओलट्।हस्य अंतादेशः।टेरेत्वाभावः।[illegible]दसः।शपि बहुलं छंदसीति संप्रसा
रणं।तिङः तिङ इति निघातः।विश्पतिंपस्ता।वेश्वर्य इति पूर्वपदप्रकृतिस्वरे प्राप्ते परादिः छंदसि बहुलमि
त्युत्तरपदाद्युदात्तत्वं।हव्यवाहं वहप्रापणे वहश्चेति ण्विप्रत्ययः।कृदुत्तरपदप्रकृतिस्वरत्वं पुरुणं प्रियं
समासांतोदात्तत्वं॥७॥ ॥अथ तृतीया॥ अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे असि होता न ईड्य
इति॥हे अग्ने जज्ञानो अरण्योः उत्पन्नस्त्वं वृक्तबर्हिषे आस्तरणार्थं छिन्नबर्हिषे प्रयुक्ताय यतं यज
मानमनुग्रहीतुं।मिह कर्मणि हविर्भुजो देवानावह।नो अस्मदर्थं होता देवानामाह्वाता त्वं ईड्यो स्तुत्यो
भवसि॥७॥ ॥द्वितीयत्वे प्रथमा॥ मित्रं वयं हवामहे वरुणं सोमपीतये।या जाता पूतदक्षसेति॥वय
मनुष्ठातारः सोमपीतये सोमपानार्थं दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वं मित्रं वरुणं चोभाव
ह्वयामः।कीदृशावुभौ यौ जाता यौ जातौ संतौ प्रदेशं प्रादुर्भवितौ।पूतदक्षसा शुद्धबलौ पूतपवने निष्ठेति
क्तः श्यकः किनीतीट् प्रतिषेधः पूतं दक्षो ययोस्तौ।बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरत्वं।या जाता ज
ज्ञानेति पाठे॥७॥ ॥अथ द्वितीया॥ ॥ऋतेन याव् ऋतावृधावृतस्य ज्योतिषस्पती।ता मित्रावरुणा हुव इति
॥यौ मित्रावरुणौ ऋतेन सत्यवचनेन यजमानानुग्रहकारिणा ऋतावृधौ ऋतमवश्यंभावितया सत्यं क
र्मफलं तस्य वर्द्धकौ ऋतस्य सत्यस्य प्रशस्तस्य ज्योतिषः प्रकाशस्य पती पालकौ अस्मत्संतरे मित्रावरुणयो
रदितिपुत्रत्वेन भ्रातृत्वात् द्वद्ध्या।क्षिसेषं तर्भूतत्वेन ज्योतिषः पालकत्वं युक्तं अस्मत्संतरे च अष्टौ पुत्रासो अदिते

© Dharmartha Trust J&K. Digitized by eGangotri

रिस्क्रपक्रम्य मित्रस्य वरुणं चेत्यादिकमाम्नातं। तामित्रावरुणा तथाविधौ मित्रावरुणौ। सुपां सुलुगि
तिपूर्वसवर्णदीर्घ आकारः। हुवे आह्वयामि। ह्वेञ् आत्मनेपदे उत्तमपुरुषैकवचने संप्रसारणे पर
पूर्वत्वे बहुलं छंदसीति शपो लुक्। टेरेत्वं गुणे प्राप्ते क्ङिति चेति प्रतिषेधः। उवङादेशः। तिङ् ङतिङ
इति निघातः॥७॥ ॥अथ तृतीया॥ वरुणः प्राविता भुवन् मित्रो विश्वाभिरूतिभिः। करतां नः सुरा
धस इति॥ अयं वरुणो देवः अस्माकं प्राविता भुवत्। प्रकर्षेण रक्षको भवतु। मित्रश्च विश्वाभिरूति
भिः सर्वाभी रक्षाभिः प्राविता भुवत्। तावुभावपि नोस्मान् सुराधसः प्रभूतधनयुक्तान् करतां कु
रुतां। डुकृञ् करणे भौवादिकः। लोटस्तस् तस्य तां कर्त्तरि शप्। गुणो रपरत्वं। शपः पित्त्वादनुदात्तत्वं।
तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। इंद्रमिद्गाथिन इति। नवर्चं तृतीयं सूक्तं तत्र प्र
मा॥७॥ ॥इंद्रमिद्गाथिनो बृहदिंद्रमर्केभिरर्किणः। इंद्रं वाणीरनूषतेति॥ गाथिनो गीयमानसा
मयुक्ता उद्गातारः इंद्रमित् इंद्रमेव बृहत् त्वामिद्धि हवामह इत्यस्यामृच्युत्पन्नेन बृहन्नाम
केन साम्ना अनूषत अस्तुवन्। तथा अर्किणः अर्चनहेतुमंत्रोपेता होतारः अर्केभिर्ऋग्रूपैर्मंत्रैरिंद्रमनू
षत। येत्ववशिष्टा अध्वर्यवस्ते वाणीर्वाग्भिर्यजूरूपाभिरिंद्रमनूषत अस्तुवन्तः। णु स्तुतौ। ऐन इति
नवं। लुङि व्यत्ययेनात्मनेपदं। ह्रस्वस्य अ आदेशः। सिच इडभावः। उकारस्य दीर्घत्वं छांदसं धातोः कुटादि
त्वात् सिचो ङित्त्वेन गुणाभावः॥७॥ ॥अथ द्वितीया॥ इंद्र इद्धर्योः सचा संमिश्ल आ वचोयुजा। इंद्रो वज्री

हिरण्ययमिति॥ इंद्र इत् इंद्र एव हर्योः हरिनामकयोरश्वयोः सचा सह युगपत् संमिश्लः सर्वतः स
म्यक् मिश्रयिता। कीदृशयोर्हर्योः वचोयुजा। इंद्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरि
त्यर्थः। अयमिंद्रो वज्री वज्रयुक्तः हिरण्ययः हिरण्मयः सर्वाभरणभूषित इत्यर्थः॥छ॥ ॥अ
थ तृतीया॥ इंद्र वाजेषु नोऽव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिरिति॥ हे इंद्र उग्र शत्रुभिरप्रधृष्य
स्त्वं उग्राभिरप्रधृष्याभिरूतिभिरस्मद्विषयरक्षाभिर्वाजेषु युद्धेषु नोऽस्मानव रक्ष। तथा सहस्रप्रधने
षु च। सहस्रसंख्याकगजाश्वादिलाभयुक्तेषु महायुद्धेषु परिरक्ष॥छ॥ ॥अथ चतुर्थी॥ इंद्रो दीर्घा
य चक्षस आ सूर्यं रोहयद्दिवि। वि गोभिरद्रिमैरयदिति॥ अयमिंद्रो दीर्घाय प्रौढाय निरंतराय च
क्षसे दर्शनाय दिवि द्युलोके सूर्यमारोहयत्। पुरा वृत्रासुरेण गति यद्व्यापादितं तमस्तन्निवारणे
न प्राणिनां दृष्टिसिद्ध्यर्थं आदित्यं द्युलोके स्थापितवानित्यर्थः॥ स च सूर्यो गोभिः स्वकीयरश्मि
भिरद्रिं पर्वतप्रमुखं सर्वं जगत् व्यैरयत् विशेषेण दर्शनार्थं प्रेरितिवान् प्रकाशितवानित्यर्थः। अ
थवा इंद्र एव गोभिर्जलैर्निमित्तभूतैः अद्रिं मेघं ऐरयत् विशेषेण प्रेरितवान्। पंचदशसंख्याकेषु र
श्मिनामसु खेदयः किरणा गाव इति पठितं। त्रिंशत्संख्याकेषु मेघनामसु अद्रिः ग्रावेति पठितं॥छ॥
अथ तृचात्मके चतुर्थसूक्ते प्रथमा॥ इंद्रे अग्ना नमो बृहत् सुवृक्तिमेरयामहे। धिया धेना अवस्यव
इति॥ अवस्यवः रक्षणकामा वयं इंद्रे इंद्रे च अग्ना अग्नौ च बृहत् बृंहणं वर्द्धकं नमो हविर्लक्षणमन्नं

© Dharmartha Trust J&K. Digitized by eGangotri

सुवृक्तिं सुप्रवृक्तां स्तुतिं च आ ईरयामहे अभिप्रेरयामः। तया च धिया कर्मणा युक्ता धेनाः धौ गो॰ १
तुं नामैतत्। स्तुतिरूपा गा वच्च अभिप्रेरयामः॥७॥ ॥अथ द्वितीया॥ ता हि शश्वंत ईडत इत्था
विप्रास ऊतये। सबाधो वाजसातये इति॥ ता हि तौ खलु इंद्राग्नी शश्वंतः विप्रासो मेधाविनो जना
ऊतये रक्षणाय इच्छा इच्छमनेन प्रकारेण ईडते स्तुवंति। तथा सबाधः समानं परस्परं बाध्यमानाः
। जना वाजसातये अन्नसातये अन्नलाभाय ता वेवं इंद्राग्नी ईडते यद्वा वाजसातिरिति संग्राम
नाम संग्रामार्थं॥७॥ ॥अथ तृतीया॥ तां वां गीर्भिर्विपन्यवः प्रयस्वंतो हवामहे। मेधसाता स
निष्यव इति॥ विपन्यवः स्तोत्रमिच्छंतः प्रयस्वंतो हविर्लक्षणेनान्नेनोपेताः सनिष्यवः सनिं धन
मासन इच्छंतो वयं मेमेधसाता मेधानां यागानां साता संभजने निमित्तभूते सति हे इंद्राग्नी ता
तौ वां युवां गीर्भिः स्तुतिभिर्हवामहे आह्वयामहे। विपन्यवः विपन्यव इति पाठे॥७॥ ॥इति तृ
तीयेध्याये द्वितीयः खंडः॥७॥ ॥वृषा पवस्वेति तृतीय खंडे प्रथमं तृचे प्रथमा॥ वृषा पवस्व
धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसेति॥ हे सोम त्वं वृषा स्तोतृणां कामानां फलस्य वर्ष
कः सन् धारया त्वदीयया पवस्व द्रोणकलशं आगच्छ। पवतिर्गतिकर्मा। अपाः त्वं यदास्माभिरिं
द्राय दीयसे तदा मरुत्वते सहायाय मतो यस्मात् संततितस्मात् इंद्राय मत्सरो हर्षकरश्च भव। कीदृशः
। विश्वा विश्वानि सर्वाणि व्याप्तानि वा धनानि तुजमाना आ ... बलेन युक्तः सन् स्तोतृभ्यस्तानि

© Dharmartha Trust J&K. Digitized by eGangotri

दधानः प्रयच्छं स्त्वमादयिता भवतीति समन्वयः ॥ ८ ॥ ॥ अथ द्वितीया ॥ त्वं वा धर्त्तारमोण्योः पव
मानस्वर्दृशं ॥ हिन्वे वाजेषु वाजिनमिति ॥ हे पवमान पूयमान पुनान वा त्वमोण्योः द्यावापृथि
वीनामैतत् तयोर्द्धर्त्तारं धारकं अनन्यं स्वर्दृशं सर्वस्य द्रष्टारं सूर्यस्य वा द्रष्टारं सर्वं द्रष्टारं वा ॥ वाजिनं ब
लवंतं पूर्वोक्तगुणं प्रसिद्धं बलवंतं वाजेषु संग्रामेषु हिन्वे प्रेरयामि । यद्वा वाजेष्वन्नेषु विषये
षु प्रेरयामि । अन्नादिकं प्रयच्छ सर्पः ॥ ८ ॥ अथ तृतीया ॥ ॥ अया चित्तो विपानया हरिः पवस्व धा
रया ॥ युजं वाजेषु चोदयेति ॥ हे पवमान सोम अया । अयं पयगतो । पचाधच ॥ स्तनी ... आकारःक
26 मर्थिमितस्ततो गच्छतीभिः अनया विपा विप प्रेरणे हे वीष्यग्नो प्रेरयंतीति विपां गुलयः । एकव
चनं छांदसं प्रसेक ... वस्तया वा ॥ एताभिर्मदीया ॥ भिरंगुलिभिश्चित्तो ज्ञातः निर्ग्रतो भिषुता हरिः हरि
तवर्णः स्त्वं धारया संततया पवस्व । द्रोणकलशं ग्रहं वा आगच्छ त्वं । किंच युजं सखायमिंद्रं वाजेषु सं
ग्रामेषु चोदय प्रेरय । यद्वास्माभिरिंद्रार्थं सो ... दीयते तेन दानीमिंद्रस्तस्मानेन दृष्टाः ... शत्रून् हंती
सर्पः ॥ ८ ॥ ॥ अथ द्वितीयस्त्वेव प्रपमा ॥ वृषा शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्यां
॥ इंद्रस्येव वग्नुरा शृण्व आजौ प्रचोदयन्नर्षसि वाचमेनामिति ॥ शोणः शोणवर्णो वृषा ... वृषभः
गाः पश्यन्नभिलक्ष्य शब्दं करोति । एवं गाः स्तुतीः अभिकनिक्रदद् भिशब्दायमानः । तद्वत् नदयन् शब्द
शब्दमुत्पादयन् हे सोम त्वं पृथिवीमुत तापि च द्यां एतौ लोकौ एषि गच्छसि । किंच वग्नुः वाङ्नामैतत् तस्य वा

© Dharmartha Trust J&K. Digitized by eGangotri

कृसुधाध्यः आजौ संग्रामे इन्द्रस्येव इन्द्रशब्द इव शब्दः सर्वैः श्रूयते। ततः प्रबोधयन् अ[illegible]स्मानं सर्वे
षां प्रजापयन् इमां वाचं अर्षसि समन्तादागमयसि उच्चैः शब्दायमानस्त्वमर्षः॥७॥ अथ द्वितीया॥॥
रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुं। पवमान संतनिमेषि कृण्वन्निन्द्राय सोम परि
षिच्यमान इति॥ हे सोम रसाय्यः रसेरोणादिकः आय प्रत्ययः। आस्वाद्यः पयसा पिन्व[illegible]नः क्षरंस्त्वं ई
रयन् शब्दं प्रेरयन् मधुमन्तं माधुर्योपेतं अंशुं रसभावं एषि प्राप्नोषि। अंशुमेष्मा[illegible]वतीति। या
स्कः अनेन सोमसो ऽभिधीयते किं च हे सोम परिषिच्यमान अद्भिः परिषिक्तो भवंस्त्वं पवमानः पवि
त्रे पूयमानः सन् संतनिं तनु विस्तारे इ प्रत्ययः। संततां धारां कृण्वन् कुर्वन्निन्द्रायेन्द्रार्थं [illegible]षि गच्छ। सि॥
॥७॥ अथ तृतीया॥ ॥एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुं। परि वर्णं भरमाणो रुशन्तं
गव्युर्नो अर्ष परि सोम सिक्त इति॥ हे सोम मदिरो मदकरस्त्वं उदग्राभस्य क्रियाग्रहणं कर्त्तव्यमिति कर्म
णः संप्रदानसंज्ञा चतुर्थ्यर्थे बहुलमिति षष्ठी। उदग्राभं उदकग्राहिणं मेघं नमयन् वधस्नुं प्रह्वीकुर्वन् की
दृशं वधस्नुं वज्रवधेन प्रस्नवं तं मदाय मदार्थमेव पवस्व[illegible] एवं पात्रेषु क्षर। किं च [illegible]पा रोचमानं श्वे
तवर्णं परिभरमाणः परितो बिभ्रत् सिक्तः पवित्रे सिच्यमानस्त्वं गव्युः अस्म[illegible] इच्छन् पर्यार्ष परिग
च्छ। वधस्नुं वधस्नेरिति पाठे॥७॥ ॥इति तृतीयाध्याये तृतीयः खंडः॥७[illegible] अथ चतुर्थखंडे प्रगाथरूपे
प्रथमसूक्ते प्रथमा॥७॥ ॥त्वामिद्धि हवामहे सातौ वाजस्य का[illegible]वो वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठा

© Dharmartha Trust J&K. Digitized by eGangotri

स्वर्वतः सातौ॥ कारवः स्तोतारो वयं वाजस्यान्नस्य सातौ संभजने निमित्तभूते सति हे इंद्र त्वामिद्धि त्वा-
१२ मेव ह्वयामहे स्तुतिभिर्ह्वयामहे। हे इंद्र सत्पतिं सतां पालयितारं श्रेष्ठं त्वां न[illegible]न्येपि मनुष्याः स्तोत्रेष्वा
वरकेषु शत्रुषु सत्सु हवंते आह्वयंति। तत्र यार्थं मपि[illegible] अर्वतो अश्वस्य स[illegible]काष्ठासु यथा
श्वः कृत्वा तिष्ठति तासु काष्ठासु संग्रामेषु युद्धकामा त्वामेवाह्वयंति। अतो व[illegible] त्वामेवाह्वयाम
इत्यर्थः॥ सातौ सातेति पाठे॥ ७॥ ॥अथ द्वितीया॥ स त्वं नश्चित्र वज्रहस्त धृष्णुया महस्तवानो अ
द्रिवः। गामश्वं रथ्यमिंद्र सं किर सत्रा वाजं न जिग्युषे इति॥ हे चित्र चायनीय वज्र[हस्त] वज्रबाहो
अद्रिवः वज्रवत्। यद्वा पौत्रणाः सनेनेस उद्रिश्य निस्तद्वत्। एवंभूत हे इंद्र धृष्णुया धृष्णुः शत्रूणां
धर्षयिता महो महान् सतावा स्तवः स्तवानो स्माभिः स्तूयमानः सन् गां रथवाहनमश्वं च संकिर
सम्यक् प्रयच्छ। जिग्युषे जितवते पुरुषाय भोगार्थं सत्रा महत् प्रभूतं वाजं न अन्नमिव यथा शत्रून्
जितवते भोगार्थं बह्वन्नं प्रयच्छसि तद्वत्॥ ८॥ ॥अथ द्वितीयसूक्ते प्रगाथे प्रथमा॥ अभि प्र वः सु
राधसमिंद्रमर्च यथा विदे। यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षतीति॥ पुरूवसुः पश्वादि
बहुधनोपेत यद्वा बहुलात् बहुनिवासको वा मघवा धनवान् य इंद्रः जरितृभ्यः स्तोतृ[भ्यो] ऽस्मभ्यं
सहस्रेणेव सहस्रसंख्याकेन धनेनेव शिक्षति। शिक्षतिर्दानकर्मा। पश्वादि बहुधनं अस्मभ्यं प्रयच्छ
तीत्यर्थः। स इंद्रः यथा विदे यथास्माभिर्विज्ञायते तथा हे ऋत्विजो वो यूयं सुराधसं शोभनधनोपेतं इं

© Dharmartha Trust J&K. Digitized by eGangotri

इं परमैश्वर्ययुक्तं त्वं अभि आभिमुख्येन प्रार्च प्रकर्षेणार्चत॥८॥ ॥अथ द्वितीया॥शतानीकेव प्रजि
गाति धृष्णुया हंति वृत्राणि दाशुषे। गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः॥ धृष्णुया धृ
ष्णुर्धर्षणशीलः पुरुषः शतानीकेव यथा शतसंख्याकानि शत्रुसैन्यानि प्रजिगाति धृष्णुया प्रकर्षेण ग न३
च्छति। तद्वदिंद्रः दाशुषे यजमानार्थं वृत्राणि यज्ञविघातकान् शत्रून् प्रजिगाति। ततस्मै हंति। किंच
पुरुभोजसः बहुधनस्य अस्येंद्रस्य संबंधीनि दत्राणि दत्तानि धनानि प्रपिन्विरे यजमानार्थं प्रकर्षेण
प्रवर्तंते। तत्र दृष्टांतः। गिरेरिव यथा गिरेः सकाशात् रसा उदकानि प्रपिन्विरे प्रवर्तंते तद्वत्॥८॥
॥तृतीयप्रगाथे प्रथमा॥त्वामिदा ह्यो नरोपीप्यन्वज्रिन्भूर्णयः। स इंद्र स्तोमवाहसामिह श्रुध्युप स्व
सरमागहीति। हे वज्रिन् वज्रवन्निंद्र वयं त्वां भूर्णयो हविर्भरणशीला नरः कर्मणं नेतारो यजमा
नाः इदा अद्य ह्यश्चाप्याप्यन् सोममपाययन्॥ स त्वं स्तोमवाहस्त स्तोत्रवाहकस्य मम स्तोत्रं इह यज्ञे श्रु
धि शृणु। स त्वं स्वसरं गृहं त्वदुर्याः स्वसराणीति गृहनाम सुपाठात् उपागच्छ उपागच्छ। स्तोमवाहस इति छं
दोगाः स्तोमवाहसामिति बह्वृचाः॥८॥ ॥अथ द्वितीया॥ मत्स्वा सुशिप्रिन् हरिवस्तदीमहे त्वया
भूषंति वेधसः। तव श्रवांस्युपमान्युक्थ्या सुतेष्विंद्र गिर्वण इति। हे सुशिप्रिन् ...पः स... निहतो शोभनो
ष्णीषि वा स्वाहरिवो हरिनामकाश्वोपेत गिर्वणो गीर्भिर्वननीयेंद्र त्वे त बहु... वेधसः परिचारकाः आ
भूषंसा भवंति। मत्स्वा सामेन मदोस्या सानं किंच तत्त्वां वयमी... ...हे किं याचामि स त्वाह॥ सु

© Dharmartha Trust J&K. Digitized by eGangotri

तेषु सोमेषु अभिषुतेषु सत्सु तव अश्वांस्यन्नानि उपमानानि उपमानभूतानि हे उच्छ्य प्रशास्यतव प्र
सादात् संलिति। सुष्टिप्रिन सुशिप्रिन इति पाठे॥ ८॥ ॥ इति तृतीयेऽध्याये ... खंडः॥ ८॥ ॥ पंच
मखंडे प्रथमतृचे प्रथमा॥ ८॥ यस्ते मदो वरेण्यस्तेना ... चस्वांधसा। देवावी ... ॥ हे सोम
ते तव देवावीर्देवकामः अघशंस हा राक्षसानां हंता वरेण्यः सर्वैर्वरणीयो मदः ... दकरो योरसो
५ गे विघते तेन रसेनांधसा अन्नीयेन पवस्व स्वरस ॥ ८॥ ॥ अथ द्वितीया॥ जघ्निर्वृत्रममित्रियं स
स्निर्वाजं दिवे दिवे। गोषा तिरश्वसा असीति॥ हे सोम त्वं अमित्रियं अमित्र भवं वृ शत्रुं जघ्निर
सि हंता भवसि। किंच दिवे दिवे प्रतिदिनं वाजं संयामं सस्निः स्नं भक्तोसि। अपि च गोषातिः गवां ।
सातिर्दातासि। अश्वसाः अश्वानां दातासि। गोषा तिर्गोषाउ इति पाठे॥ ८॥ ॥ अथ तृतीया ठौ
॥ संमिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभिः। सीदं छ्येनो न योनिमेति॥ हे सोम ... सूपस्थातिः
शोभनोपस्थानाभिर्धेनुभिर्गोभिर्गोविकारैः पयोभिरित्यर्थः। संमिश्लः संमिश्रि ... श्येनो नय
पाश्येनः शीघ्रभाग सस्थानमासीदति। तद्वत्योनिं स्वकीयं स्थानमासीदन्नेति सं ... सर्पद्द
नीमरुषो भुव आरोचमानो भुव। भुवो भवद्गति पाठे॥ ८॥ ॥ अथ द्वितीयतृचे प्रथमा॥ अयं पू
षा रयिर्भगः सोमः पुनानो अर्षति। पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे इति॥ रषो पोषकः स
र्वेषां भगो भजनीयः रयिर्धनहेतुः अयं सोमः पुनानः पवित्रेण पूयमानः सन्नर्षतिक ... रामभि
© Dharmartha Trust J&K. Digitized by eGangotri

गच्छति।तथाविश्वस्यसर्वस्यभूमनोभूतजातस्यपतिःपालयितासोमउभेरोदसीद्या।पृथिव्यौ
व्यश्व्यत्स्वतेजसाप्रकाशयति।अनेनलोकद्वयवर्त्तित्वंसूचितं।७॥ ॥अथद्वितीया॥सुप्रियास्म
नूषतगावोमदायघृष्वयः।सोमासःकृण्वतेपथःपवमानासइंदवः॥प्रियाःप्रियतमाःघृष्वंतःअ
संतदीप्ताः।यद्वा अहंप्रथमतस्तौमि अहंपुरस्तात्स्तौमीतिपरस्परंस्पर्द्धमानागाव…तिलक्षणा
वाचोमदायसोमस्यमदार्थंसमनूषतसंस्तुवंति।उःप्रसिद्धौ।यद्वागावोधेनवःसोम…मदायशब्दा
यंते।ततःपवमानासःपूयमानाइंदवोदीप्ताःसोमासःसोमाःपथःमार्गान्कृण्वते।…रणार्थंकुर्वं
ति।७॥ ॥अथतृतीया॥यस्तुविजिष्टस्तमाभरपवमानश्रवाय्यं।यःपंचचर्षणीरभियंयेनवनाम
हइति॥हेपवमानपूयमानसोम।तुविजिष्टंतुजस्वितमोयःस्त्वदीयोरसोऽस्तितंश्रव…यंश्रवणीयंरस
माभरअस्मभ्यमाहर।किंच।योरसःपंचचर्षणीःपंचजनान्निषादपंचमान्चतुरोवर्णान्अभि
तिष्ठति।अपिच।येनरसेनवयंरयिंधनंचवनामहेसंभजामहे।यद्वायेनत्वांरयिंवामहेतमान
र।७। ॥अथतृतीयतृचेप्रथमा॥वृषामतीनां…पवतेविचक्षणःसोमोअन्हः…तोषसोदिवः।
प्राणासिंधूनांकलशाँअचिक्रददिंद्रस्यहार्द्याविशन्मनीषिभिरिति।…तचेअपवतेअभिषूय
ते।कीदृशः।सोमःमतीनांमतयस्तोतारः।तेषांवृषावर्षकःकामानां।विच…वद्रष्टाअन्हांउषसोदि
वोधश्चलोकस्यवादित्यस्यवाप्रतरीताप्रवर्द्धयिता।किंच।सिंधूनां…विचक्षणोविद्रष्टाअन्हांउष

© Dharmartha Trust J&K. Digitized by eGangotri

सां द्विवोघ्न लोकस्य वा दित्यस्य वा प्रतरीता प्रवर्द्धयिता ॥ किंच । सिंधूनां स्यंद [illegible]नां उदकानां प्राणा प्राण
यिता वेदयिता । अनितेः श्वान विच हुलं छंदसी ति विकरणस्य लुक् । सुपां [illegible] याकारः कलशान ।
विक्रदत् शब्दं करोति प्रवेषुं । किं कुर्वन् इंद्रस्य हार्दि हृदयं क्राविशन् प्रविशन् [illegible] स्तुत इतिशे
षः ॥ यद्वा व्यवहितमपि मनीषिभिरित्येतस्य वत इत्येनेन संबध्यते । मन्ना मन्द्र इ [illegible] मसा स्तुष स इति
प्राणो क्राणो त्तिच म चिक्रदद्वीवशा दितिच पाठः ॥ ७ ॥ ॥ अथ द्वितीया ॥ ॥ मनीषिभिः पवते पूर्व्यः कवि
र्न्नृभिर्यतः परिकोशां असिष्यदत् । त्रितस्य नाम जनयन्मधु क्षरन्निंद्रस्य वायुं सख्याय वर्द्धयन्निति ॥
अयं सोमो मनीषिभिर्मेधाविभिरध्वर्य्यादिभिः पवते पूयते । यद्वा अयं मनीषिभिर्म [illegible] षिणीभिर्द्धारा
भिः पवते क्षरति । कीदृशोयं पूर्व्यः पुराणः कविर्मेधावी नृभिर्न्नेतृभिरध्वर्य्यादिभिर्यतः स्न्कोशान् कल
शान् प्राप्तुं पर्यसिष्यदत् परितः स्यंदते स्रवतीति त्रितस्य त्रिषु स्थानेषु लोकेषु विस्त [illegible] इंद्रस्य यजमा
नस्य संबंधि नाम नामकमुदकं जनयन् उत्पादयन् मधु मधुरं रसं क्षरन् क्षरति । किं कु [illegible] इंद्रस्य सख्या
य सखित्वाय वायुं वर्द्धयन् प्रवर्द्धं कुर्वन्नत्यसिष्यदत् अचिक्रददिति पाठो । युवां वायो इति वर्द्धयन्
कर्त्तविद् इतिच ॥ ७ ॥ ॥ अथ तृतीया ॥ अयं पुनान उषसो अरोचयदयं सिंधुभ्यो अभवदु लोककृत् ॥
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सर इति ॥ अयं सोमः पुनानः पूयमान उषसः ।
अरोचयत् अदीपयत् । अयं सिंधुभ्यः स्यंदमानाभ्योद्भ्यो वसतीवरीभ्यो अभवत् समृद्धो भवति । उ इति पूरणः

© Dharmartha Trust J&K. Digitized by eGangotri

क्रीडयोऽयंलोककृत्लोकानांकर्त्तविषयकत्वादितोधारकत्वाच्चास्यलोककृत्वं।अयंसोमंत्रेः सप्तए
कविंशतिगाः कृत्विग्मुखेन अग्निरं इंद्र हानः इंद्र हानः दोहस्य प्रयोजकत्वात्क त्रीण्यक्षराः सर्वतो मस्करः
चारुरमणीयंपर्वतेस्वरति।किमर्थं हरिद्रे हरयायहर्यगमनाय अरोचयद्धिरोचयरिति पाठे॥८॥ ॥
तृतीयस्यपंचमः खंडः॥८॥ ॥एवाहीतिषष्ठे खंडेऽथमत्वेप्रथमा॥एवाह्यसिवीरयुरराजश्च उत्तस्थि
रः।एवातेराध्यंनमनसि॥हेइंद्रत्वंवीरयुवीरान्यच्छकर्म्मणिसमर्थान्शत्रून्हंतुंकामैः…एवासिन
वृसिखलु।हिः प्रसिद्धे।अतएवत्वंशूरःसामर्थ्यवानेवभवसि।उत अपिचस्थिरःसंग्रामेधैर्यवान्भ
वसि।एकत्रस्थित्वैवशत्रून्संप्रहरसीत्यर्थः।एवंसतितेतवमनोराध्यंस्तुतिभिराराधनीयमेवाय
तोऽनेनमनसात्वंशाश्वत्वंधंसंग्रामेधेयदिकिंकरोषीतितवमनएवसर्वैस्तुत्यमित्यर्थः॥८॥ ॥अथद्वि
तीया॥एवारातिस्तुवामघविश्वेभिर्धायिधातृभिः।अधाचिदिंद्रनःसचेति॥हेतुविरघतुविरितिबहु
नाम।बहुधनवन्निंद्रविश्वेभिःसर्वैर्धातृभिःकर्म…राकर्यद्वदेवानांहविर्दानेनपोषयितृभिःसर्वैर्य
जमानैस्त्वंरातिर्गवाश्वादिदानंधायितेर्धार्य्यतएवर…नुतेलुङिकर्म्मणिरूपं…वाध अथानंतर
मेवहेइंद्रएवंविधस्त्वंनोस्माकंयष्टृणामपिस्वाधनादिदानेनकमसिह…पुष्णा…इंद्रनःसचाइंद्रमसस्व
तिपाठे॥८॥ ॥अथतृतीया॥मोषुब्रह्मेवतंद्रयुर्भुवोवाजानांपते।मत्स्व…नामःप्र…ग्गोमतइति॥हेवाजा
नांयतेअन्नानांपतेबलानांवाहेइंद्रत्वंद्रयुःनिष्कारणंनिवृत्तक…स्ययुक्तःब्रह्मेवब्राह्मणइव।

© Dharmartha Trust J&K. Digitized by eGangotri

अथापि न इन्द्रस्येभाष्यत इति यास्कोक्तमनुसरत्स्वं तं प्रयुक्तमित्यर्थकं। अथवा [illegible]श्रौतादिकर्म्मपरित्यागेना
लस्यमिति न्नास्तिको ब्राह्मणः एवं मोषु भुवः सुषु मा भवः सर्वदा अस्म[illegible]मा भवेत्याशासनं। त
देवाह सुतस्याभिषुतस्य तत्तो गोमतो गव्येन क्षीरेण दध्ना आमिश्रणवतः सोम[illegible]स्य माघ ह
षो भव॥८॥ ॥द्वितीयत्वे प्रथमा॥ इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः। रथी[illegible] रथीनां वाजा
नां सत्पतिं पतिमिति॥ विश्वाः सर्वा गिरो ऽस्म[illegible]ः स्तुतय इन्द्रमवीवृधन् वर्द्धितवत्यः वृधेर्णिचि लुङि
उर्ऋदित्यनुवृत्तौ नित्यं छन्दसीति ऋकारस्य ऋकारविधानात् लघूपधगुणाभावः। नि[illegible]तस्वरः। कीदृ
शमिन्द्रं समुद्रव्यचसं समुद्रवद्व्याप्तवन्तं रथीनां रथयुक्तानां योद्धॄणां मध्ये रथीतमम[illegible]तिशयेन रथ
युक्तं वाजानामन्नानां पतिं स्वामिनं सत्पतिं सतां सन्मार्गवर्त्तिनां पालकं। पत्यावैश्वर्य इति पूर्वपदप्र
कृतिस्वरत्वं॥८॥ ॥अथ द्वितीया॥ सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते। त्वामभि प्रणोनुमो जेता गो ५
रमपराजितमिति॥ हे शवसस्पते बलस्य पालक इन्द्र ते तव सख्ये अनुग्रहप्रयुक्ते सति [illegible] वर्त्तमाना
वयं वाजिनो ऽन्नवन्तो भूत्वा मा भेम। शत्रुभ्यो भीतिं प्राप्ता मा भूम। अतस्त्वामभयहेतुं अ[illegible] प्रणोनुमः
सर्वतः प्रकर्षेण स्तुमः। णु स्तुतौ णो न इति नत्वं। यङो लुक्। प्रत्ययलक्षणेन सन्यङोरिति द्विर्भावगु
णो यङ्लुकोरभ्यासस्य गुणः प्रत्ययलक्षणेन धातुसंज्ञायां लट्मस्। अदादिवत्त्वाच्छपो लुक्
। कीदृशं त्वां जेतारं युद्धेषु जयशीलं अपराजितं क्वापि पराजयरहितं। प्रणोनुमः प्रणोनुम इति पाठे॥८॥ ॥

30

© Dharmartha Trust J&K. Digitized by eGangotri

॥अथत्रितीया॥ पूर्वीरिंद्रस्यरातयोनविदस्यंत्यूतयः। यदीवाजस्यगोमतःस्तोतृभ्योमंहतेमघ
मिति॥ इंद्रस्यसंबंधिन्योरातयोधनदानानिपूर्वीरः अनादिकालसिद्धाःप्रभूतावाअस्येंद्रायसर्वदाय
क्ष्म्योधनदानमेवस्वभावइत्यर्थः। एवंसतिइदानींतनोपियजमानस्तोतृभ्यऋत्विग्भ्यंगोभ्याःगोसहित
स्यवाजस्यान्नस्यपर्यायंमघंधनंयदामंहतेदक्षिणारूपेणददातितदानींऋत्वयोबहुधनस्यपूर्वकाणीं
द्रस्यास्मद्विषयाणिरक्षणानिनविदस्यंतिविशेषेणानोपक्षीयंते। यदायदीतिपाठे। मघंरेयइत्यादिषु
ष्टाविंशतिसंख्याकेषुधननामसुमघशब्दःपठितः। दातिदाशतीत्यादिषुदशसुदानकर्मसुमंहतइत्ये
तत्पठितं। पूर्वीःपुरुशब्दस्यवोतोगुणवचनादितिङीप्। आद्यस्योकारस्यदीर्घः छांदसः। जसिदी
र्घात्। जसिचेतिनिषेधंबाधित्वावाछांदसीतिपूर्वसवर्णदीर्घत्वं। ङीषःप्रत्ययस्वरेणोदात्तत्वं।
रातयः मंत्रेवृषेषुपंचमनुविदभूविशाउदात्तइतिक्तिन्नउदात्तत्वं। दस्यंतिदसुउपक्षयेदिवादिभ्यः
श्यन्निघातः ऊतयः। ऊतिपूर्तिसादिनाक्तिन्नुदात्तः। यदानिपातस्याद्युदात्तः। स्तोतृभ्यःणुभू।
स्तुतौ। धात्वादेषःसः। तृचश्चित्वादंतोदात्तत्वं। मंहतेमहिपूजायांइदित्वादनुदात्तत्वं। तिङःसार्वधातुक
स्वरेणतिङ्। तिङङितिनिघातोनभवतिनिपातैर्यद्यदिहंतिनिषेधात्। इतितृतीयस्याध्या
येषष्ठःखंडः॥ वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः
॥इतिश्रीमहाराजाधिराजवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्ये

© Dharmartha Trust J&K. Digitized by eGangotri

णविरचितेमाधवीसामवेदार्थप्रकाशे उत्तराग्रंथेतृतीयो ऽध्यायः समाप्तः ॥ यस्यनिश्वसितंवे
दायोवेदेभ्योखिलंजगत् । निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं ॥१॥ [illegible] अथचतुर्थोध्यायआ
रभ्यते । तत्रप्रथमेखंडेएतेअसृग्रमितिप्रथमऋचेप्रथमा ॥ एतेअसृग्रमि[illegible] पवित्रमा
शवः । विश्वान्यभिसौभगेति ॥ तिरः पवित्रंतिर्यग[illegible]तंदशापवित्रंप्रतिआशवः [illegible]घ्रगामिनः ए
तेपवमानाः इंदवःसोमाः विश्वानिसर्वाणि[illegible]भगासौभगानिधनान्यभिलक्ष्यअसृग्रंऋत्वि
ग्भिःसृज्यंते ॥ अथद्वितीया ॥ विघ्नंतोदुरितापुरुसुगातोकायवाजिनः । त्मनाकृण्वंतोअर्वतइति
॥ वाजिनोबलवंतःसोमाः पुरुबहुनिदुरितादुरितानिविघ्नंतोविशेषेणनाशयंतः [illegible]कायअस्मा
कंपुत्रायसुगानिसुखरूपाणिधनानिअर्वतोश्वांश्चत्मनाआत्मनास्वयमेवकृण्वंतः ददतइत्यर्थः ।
ऋत्विग्भिःसृज्यंतइतिपूर्वेणसंबंधः । आत्मनातनेनेतिपाठे । अर्वतोर्वइतिच ॥ अथतृ[illegible]या ॥ कृण्वंतो
वरिवोगवेभ्यर्षंतिसुष्टुतिं । इडामस्मभ्यंसंयतमिति ॥ सोमाः अस्माकंगवेअस्मभ्यं[illegible]यतंयदस्मा
नसंयच्छतितद्वरिवोधनंइडामन्नंचकृण्वंतः कुर्वंतः सुष्टुतिंअस्मदीयांशोभनांस्तुतिंअ[illegible]र्षंतिआ
भिमुख्येनगच्छंति ॥ अ॰द्वितीयऋचेप्रथमा ॥ राजामेधाभिरीयतेपवमानोमनावधि । अं[illegible]रिक्षेणया
तवइति ॥ मनोमनुष्येयागंकुर्वाणेसति । यद्वामनामवधिमनुमतिव्यायज्ञः तस्मिन्पवमानः पूयमानः
पुनानोवाराजाराजशब्देनसोमोभिधीयते । सोमंराजानमक्षीणन्नित्यादिषुदृष्टत्वात् । सरा[illegible] सोमःमे

© Dharmartha Trust J&K. Digitized by eGangotri

ईयते गच्छति। कुत्र अंतरिक्षे। आकाशमार्गेण द्रोणकलशं प्रतियातवे पातुं। द्रोणाभिगमकाले हि
स्तोतृभिः स्तूयते खलु॥७॥ ॥अथ द्वितीया॥ आनः सोम सहो जुवो रूपं न वर्चसे भर। सुष्वाणो देव
वीतय इति। हे सोम देववीतये देवानां पानाय देवानां कामाय वा सुष्वाणः अभिषूयमाणः अभिषुतो
वा त्वं सहः शत्रुभिभवनसमर्थं बलं जुवः जु इति गत्यर्थः। जवं नूनं प्रतिशीघ्रगमनं च। यद्वा द्रुतगमन
शीलं। किंच। नेनिवार्य वर्चसे वर्चदीप्तौ। दीप्त्यै सर्वत्र प्रकाशनाय रूपं च नो अस्मभ्यम् आभर आहर प्रयच्छ॥
॥७॥ अथ तृतीया॥ आनः इंदो शतग्विनं गवां पोषं स्वश्व्यं। वहा भगत्तिमूतय इति। हे इं पात्रेषु क्षरण
शील वा हे सोम शतग्विधनं शतसहस्र संख्याकाभिर्गोभिर्युक्तं। गवां पोषं गवादीनां पुष्टिं स्वश्व्यं।
शोभनाश्वसंघसहितं भगत्तिं भगदत्तिं भजनीयधनदानं च ऊतये रक्षणाय नोस्मान् आवह प्रापय।
गवादींश्च तेषां च वृद्धिं प्रयच्छेत्यर्थः॥७॥ ॥ तं त्वा नृम्णानीति पंचर्चं तृतीयं सूक्तं नवमा॥ तं त्वा नृम्णा
नि बिभ्रतं सधस्थेषु महो दिवः। चारुं सुकृत्ययेमह इति॥ महो दिवः महतो द्युलोकस्य सधस्थेषु सह
स्थानेषु स्थितं नृम्णानि धनानि बिभ्रतं अस्मदर्थं धारयंतं चारुं कल्याणं हे सोम त्वां तु॥ त्वमानलक्ष
णं तातां सुकृत्यया शोभनकृत्यया ईमहे धनानि याचामहे॥ ॥७॥ अथ निमिनावृक्तधृष्णुमुक्थ्यं म
हामहिव्रतं मदं। शतं पुरो रुरुक्षणिमिति॥ हे सोम संवृक्तधृष्णुं संवृक्ताः रंतधि ष्णवो धर्षणशीलाः
शत्रवो येनासौ संवृक्तधृष्णुस्तं। उक्थ्यं उक्थार्हं प्रशस्यं महामहिव्रतं महत्योऽहिंस्यकर्माणं। मदं मदकरं। शतं व

© Dharmartha Trust J&K. Digitized by eGangotri

हृनिपुरः शत्रूणांपुराणिदृढ़ाणिविनाशयंतंत्वांधनानीमहइतिस[...]धः ॥ ॥ अथतृतीया ॥ अत
स्तारयिरभ्यर्षत्राजानंसुक्रतोदिवः ॥ सुपर्णमव्यथीभरदिति ॥ हेसुक्रतो[...]कर्म्मनपवमानसो
मरयिमभिधनंप्रतिराजानंत्वांत्वां अतोदिवोऽमुष्मात्[...]लोकात् अव्यथीव्य[...]पर्णः श्येनः
भरदाहरत् ॥ तथाचश्रूयते ॥ आदायश्येनोऽभरत्सो[...]मिति अव्यथी ॥ अव्यथिरि[...]ति ॥ ८ ॥ ॥ अ
थचतुर्थी ॥ अधाहिन्वानइंद्रियंज्यायोमहित्व[...]निशे ॥ अभिष्टिकृद्विचर्षणिरिति ॥ अथविचर्षणिः
कर्म्मणांविद्रष्टा ॥ अभिष्टिकृत्यजमानानाम्अभीष्टफलस्यकर्त्तासोमः इंद्रियंस्वकीयंहिन्वानः प्र
रयन्ज्यायःप्रशस्यतरंमहित्वंमहत्त्वमानशेप्राप्नोति ॥ ८ ॥ ॥ अथपंचमी ॥ विश्वस्माइत्स्वर्दृशेसाधार
णंरजस्तुरं ॥ गोपामृतस्यविर्भरदिति ॥ रजस्तुरंउदकस्यप्रेरकंऋतस्ययज्ञस्यगोपांगोपितारंविश्व
स्मैसर्वस्मैस्वर्दृशेदेवायसाधारणमिन्द्रसमानमेवसंतंसोमंविःपक्षीश्येनोभरत्स्वर्गादाहरत् ॥ ८ ॥
॥ अथत्वालसकेचतुर्थसूक्तेप्रथमा ॥ इषेपवस्वधारयामृज्यमानोमनीषिभिः ॥ इंदोरु[...]गाइहीति ॥
हेइंदोसोममनीषिभिऋत्विग्भिःमृज्यमानःशोध्यमानःस्त्वंइषेअस्माकमन्नायधारयावस्वस्वरा ॥ रु
चारोचमानेनतेजसागाःपशून्अभिइहिअभिगच्छ ॥ ८ ॥ ॥ अथद्वितीया ॥ पुनानोवरिवस्कृ[...]धूर्जनायगि
र्वणः ॥ हरिःसृजानआशिरमिति ॥ हेगिर्वणः गीर्भिर्वननीयहरेहरितवर्णसोमआशिरंश्री[...]तिसृजानो
विसृज्यमानःपूयमानस्त्वंजनायजनार्थंवरिवोधनंमूर्जमन्नंचकृधिकुरु ॥ ८ ॥ ॥ अथतृतीया ॥ पुनानोदे

© Dharmartha Trust J&K. Digitized by eGangotri

वीतयइन्द्रस्ययाहिनिष्कृतं। घृतानोवाजिभिर्हितइति॥ हेसोमवाजिनः हविर्लक्षणान्नयुक्तै [illegible] र्यजमानैः
सह घृतानोदीप्यमानः स्ववीतयेयज्ञार्थंपुनानः पूयमानः हितः हितकरस्त्वंइन्द्रस्यनिष्कृतंस [illegible] नंयाहिग
छ। हितोयतइतिपाठे॥७॥ ॥इतिचतुर्थस्याध्यायस्यप्रथमः खंडः॥७॥ ॥द्वितीयखंडेप्र [illegible] मित्स्वेप्रथ
मा॥ अग्निनाग्निः समिध्यतेकविर्गृहपतिर्युवा। हव्यवाड्जुह्वास्यइति॥ अग्निराहवनी [illegible] यः स्वस्मि
न्नाहिप्यमाणेनाग्निनानिर्मथ्येन प्रणीतेनवासहसमिध्यतेसम्यग्दीप्यते। कीदृशोग्निः [illegible] धावीगृह
पतिर्यजमानगृहस्यपालकः युवानित्यतरुणः हव्यवाड् हविषांवोढावहतेर्वहश्चेति ण्विप्र [illegible] त्ययः। णित्वा
दुपधावृद्धिः। गतिकारकोपपदात्कृदितिकृत्तरपदप्रकृतिस्वरत्वं। जुह्वास्यः जुह्वरूपेणमुखे [illegible] युक्तः। हूय
तेऽनयेतिजुह्वाः। हुवः श्लुवच्चेतिक्विप् [illegible] नियोगाद्दीर्घश्च श्लुवद्भावात् द्विर्वचनं [illegible] वजस्त्वे। प्राति
पदिकस्वरेणांउतोदात्तः। जुहूरास्यंयस्यासौ [illegible] बहुव्रीहौ। पूर्वपदप्रकृतिस्वरत्वेनसएवशि [illegible] ष्यते। शेषनिपातः
यणादेशेउदात्तस्वरितयोर्यणस्वरितोनुदात्तस्येत्याकारस्वरितः॥७॥ ॥अपदि [illegible] ॥ यस्त्वामग्नेह
विष्पतिर्दूतंदेवसपर्यति। तस्यस्मप्राविताभवेति॥ [illegible] अग्नेदेवयोहविष्पतिर्य [illegible] दूतंत्वांस
पर्यतिपरिचरति। तस्ययजमानस्यप्राविताभवस्मअवश्यंरक्षकोभव। [illegible] सर्वैःशुचीसा
विनाइसिःप्रत्ययस्वरेणईकारउदात्तः हविषः पतिः हविष्पतिः नित्यंसमा [illegible] पदस्थस्येतिषत्वंप
त्यावैश्वर्यइतिपूर्वपदप्रकृतिस्वरत्वं। सपर्यति। सपरशब्दात्कंड्वादि [illegible] तियक्। धातुप्रकारणात्गु

© Dharmartha Trust J&K. Digitized by eGangotri

33

णप्रतिषेधाद्यर्थाधिकः किलान्नपरशब्दस्य धातुत्वात्तनोतो विहितस्य यक[illegible]धातुकत्वे सति अतो लो
प इति लोपः सनाद्यंताधातव इति धातुसंज्ञायां तिप् कर्त्तरि शप् तस्मि[illegible]णइति परपूर्वत्वंय
३. क: प्रत्ययस्वरेणोदात्तत्वं शपासह एकादेशस्य एकादेश उदात्तइत्युदात्तत्वं तिङ[illegible]तेनानभवति
यद्वृत्तान्नित्यमिति प्रतिषेधात्॥७॥ ॥अथ तृतीया॥ योऽग्निं देववीतये हवि[illegible]आविवासति।
तस्मै पावकमृडयेति॥ हविष्मान् हविर्युक्तो यज[illegible]मानो देववातये देवानां हविर्लक्षणे[illegible]तु यागार्थं अग्नि
माविवासति। अग्नेः समीपविशेषेण[illegible]सपर्यां करोति। हे पावकाग्ने तस्मै मृडयतं[illegible]यजमानं सुखय।
देववीतये। वीगतिप्रजननकांत्यसनखादनेषु अस्माद्भावार्थे क्तिन्। क्तिन् देवानां वीतिर्य[illegible]स्मिन्यागसो देव
वीतिः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। नञ्विषयस्यानिसंतस्येति पर्युदासाद्धविःशब्दोंते[illegible]दात्तः मतुपः स
र्वानुदात्तत्वात् स एव शिष्यते। आविवासति वा गतिगंधनयोः अस्मादंतर्भावितण्यर्थात्[illegible]सय्यिसुमिच्छ
तीत्यर्थे सन्। आङ्काले छापरिचर्यायां पर्यस्वपतीति विवासतिः शब्दः परिचर्याधिनिघंटौ प[illegible]ः द्विर्वचनम्
भ्यासस्य ह्रस्वः सन्यतः इतीत्वं। स्निसादिर्नित्यमित्याद्युदात्तत्वं तिङः तिङ इति निघातो न[illegible]नियद्वृत्तान्नि
त्यमिति प्रतिषेधात्। तिङन्तोदात्तवती साङ्गेनिघातः सहसुपेत्यत्र सहेति योगविभागात्[illegible]ति इनसहस
मासे समासांतोदात्तत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदांतोदात्तत्वं। तस्मै कया ग्रहण[illegible]कर्त्तव्यमिति
संप्रदानत्वाच्चतुर्थी॥७॥ ॥अथ द्वितीयत्वेऽप्रथमा॥७॥ ॥मित्रं हुवे पूतदक्षं वरुणं च रिशादसं। धियं घृताची

© Dharmartha Trust J&K. Digitized by eGangotri

साधंतेति॥ अहमस्मिन्कर्म्मणि हविः प्रदानाय पूतदक्षं पवित्रं बलं मित्रं हुवे आह्वयामि। ह्वयतेर्बहुलं
छंदसीति शपो लुकि सति ह्वः संप्रसारणमित्यनुवृत्तौ बहुलं छंदसीति संप्रसारणे उवङादेशः। तिङः ति
ङ इति निघातः। तथा रिशादसं। रिशानां हिंसकानां अदसं अत्तारं वरुणं च हुवे। कीदृशौ मि[illegible]वरुणौ घृ
ताचीं घृतमुदकं अंचति भूमिं प्रापयतीति या धीर्वर्षणकर्मणा तां घृताचीं धियं साधंता सा[illegible]तौ कुर्वंतौ।
राध साध संसिद्धौ। अस्माद्धेतुर्भावितण्यार्थलटः शत्रादेशो शपं बाधित्वा व्यत्ययेन श[illegible]तुय प्रदुप्रदेशत्वा
त् उपदेशात् अस्य यस्य लसार्वधातुकानुदात्तत्वं। द्वितीयाद्विवचनस्य शप आत्त्वानुदात्तौ सु[illegible]पिताविमनुदा
त्तत्वं। धातोरिति धातुस्वर एव शिष्यते। सुपां सुलुगित्यादिना विभक्तेराकारादेशः॥७॥ ॥ अथ द्वितीया
॥ ऋतेन मित्रावरुणा ऋतावृधावृतस्पृशा। क्रतुं बृहंतमाशाथे इति। हे मित्रावरुणौ मि[illegible]त्रश्च वरुणश्च मि
त्रावरुणौ देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः [illegible] युवां क्रतुं प्रवर्त्तमानमिमं सोमं यागं आशाथे आ
नशाथे व्याप्नवंतौ। छंदसि लुङ्लङ्लिट इति वर्त्तमाने लिट्। नुडभावः छांदसः। केन[illegible]न अवश्यंभा
वितया सत्येन फलेन अस्मभ्यं फलं दातुमित्यर्थः। कीदृशौ युवां। ऋतावृधौ ऋत[illegible]नामसत्यं
यज्ञं वेति यास्कः। पुरुकादीनामन्यतमस्य वर्द्धयितारौ। अत एव ऋतस्पृ[illegible]विभागादृ[illegible]तस्मै[illegible]नू स्पृशंतौ। कीदृशं
क्रतुं बृहंतं अंगैरुपांगैः ख्यातिप्रौढं॥ ॥ अथ तृतीया॥७॥ ॥ कवीनो मि[illegible]रुणा तुविजाता उरुक्षया
। दक्षं दधाते अपसमिति॥ मित्रावरुणावेतौ देवौ नो अस्माकं दक्षं [illegible] भूतदक्षं [illegible]कर्म विदधाते पोषयतः। कीदृशौ

© Dharmartha Trust J&K. Digitized by eGangotri

कवीमेधाविनौतुविजातौबाहूनामुपकारकतयासमुत्पन्नौउरु[illegible]निवासौमित्रावरुणौ
मित्रशब्दः प्रातिपदिकस्वरेणान्तोदात्तः वरुणशब्दो निःस्वरेण [illegible] जातौ बहूनामुप
कारकतथा तत्संबंधित्वेन जाताविति षष्ठीसमासे समासान्तोदात्तत्वे [illegible] से हि कृते च ति पूर्व
पूर्वपदप्रकृतिःस्वरः स्यात् उरूणां बहूनां क्षयाः उरुक्षयाः क्षि निवासगत्योरिति [illegible] क्षयं तस्मि
न्निति स्थयः इत्यधिकरणे एजरित्यच् प्रत्ययः अन्तस्य चितः इत्यन्तोदात्तत्वे प्राप्ते क्षयो निवास इत्याद्यु
दात्तत्वं विहितं। समासे तु समासस्यान्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेण प्राप्तमुत्तर
पदाद्युदात्तत्वं। यद्यपि थाथादिस्वरेणान्तोदात्तत्वेन बाध्यते। तथापि परादिश्छंदसि बहुल
मिति उत्तरपदाद्युदात्तत्वं द्रष्टव्यं। दक्षो दक्षते हसाह कर्म्मणो घञि लाद्याद्युदात्तः। आप्यते फलमने
नेत्यपः कर्म्म। आपः कर्म्माख्यायां ह्रस्वो नुट् च वेत्यसुनं तस्य अपसस्पारे इत्याद्युदा[illegible]त्वाद्युदात्त
स्यापपस इत्राद्वस्याद्यत्ययेन प्रत्ययाद्युदात्तत्वं॥८॥ ॥अथ तृतीयतृचे प्रथमा। [illegible]द्रेण संहि
दृक्षसे संजग्मानो अबिभ्युषा मं इत्समानवर्चसा॥ हे मरुद्गण त्वं इंद्रेण संजग्मानः संगच्छमानः
संदृक्षसे हि सम्यग्दृश्येथाः खलु॥ अवश्यमस्माभिर्दृश्यत्व इत्यर्थः। कीदृशेनेंद्रेण अबिभ्युषाभीति
रहितेन कीदृशा विद्रमरुद्गणो मंदू नित्यप्रमुदितौ समानवर्चसा तुल्यदीप्तीपुरा कदाचिद्वृत्रवधस्म
यां इंद्रस्य सखायः सर्वे देवाः वृत्रश्वासेन यत्नादितास्तदानीमिंद्रस्य वृत्रसंबंधिसकलदेवेनाजयार्थम्

34

38

© Dharmartha Trust J&K. Digitized by eGangotri

हन्तिः संगमोऽभूत्। सोऽयमर्थो वृत्रस्य त्वाष्ट्रस्य यथा दितिमंत्रे संगृहीतः। इंद्रो वै वृत्रं हनिष्यन्तीति त्वाष्ट्रस्य
लोमपं पवितश्च। इंद्रस्त्वाष्ट्रः परमैश्वर्यवंतं महदृणं चाभिधत्ते तदानीमिंद्रस्य संबोधनं ब[illegible]हिरेवाध्याह
र्तव्यं। तथा चेयमृक् प्रयास्के नैवं व्याख्याता। इंद्रेण हि संदृश्यसे संगच्छमानो बिभ्युषा गणेन मंदू समद्
न्सू युवां स्तोऽपि वा मंदुना तेनेति स्यात् समानवर्चसा त्वं तेनैव व्याख्यातमिति॥ संदृस[illegible] संपश्येथाः
। दृशेश्चेति वक्तव्यमित्यात्मनेपदं। दृशेर्लिङर्थे लेडिति प्रार्थनायां लेट्। थासः से लेटो[illegible]टावित्यग
गमः। सिब्बहुलं लेटीति सिप् संज्ञापूर्वको विधिरनित्य इति गुणाभावः। व्रश्चादिना षत्वं। षढोः कसि
ति कत्वं। आदेशप्रत्यययोरिति सिपः षत्वं। बहुलग्रहणान्न सिपः परस्तादड् बपि भवति। सिपाव्य
वधानात् पश्यादेशो न भवति। मूलपि त्वाद्यनुदात्तत्वं। उत्तरस्य लसार्वधातुकानुदात्तत्वं। धातुस्व
र एव शिष्यते। हि शाश्वद्योगात्तिङ् तिङ इति निघातो न भवति हि चेति प्रतिषेधात्। संजग्मानः गमेः सं
पूर्वाच्छंदसि लुङ् लङ् लिट इति वर्त्तमाने लिट्। समो गम्यृच्छीत्यात्मनेपदविधान[illegible] लिटः कानजा
देशः। द्विर्भावो हलादिशेषोऽभ्यासस्य चुत्वं गमहनेत्युपधालोपः। कानश्चि[illegible]त्वं। गति
मासे कृदुत्तरपदप्रकृतिस्वरत्वं। अविभ्युषा जिभीभये। पूर्ववल्लिट्। [illegible]रस्मैपदं। क्वसु
श्चेति लिटः क्वसुरादेशः। तस्य कित्वाद्गुणाभावः। द्विर्भावः। अभ्यास[illegible]धीपुरा[illegible]क्रादिनियमात् प्राप्त
इट् वस्वेकाजाद्घसामिति नियमान्निवर्त्तते नञ्समासे तत्तीये[illegible]संप्रसारणमिति

© Dharmartha Trust J&K. Digitized by eGangotri

वकारस्य उकारादेशः संप्रसारणं चेति पूर्वरूपत्वं। शासिवसिघ[illegible]नी[illegible]षत्वं। इयङादेशं बाधि
त्वा एरनेकाच इति यणादेशः। अव्ययपूर्वपदप्रकृतिस्वरत्वं पूर्वे[illegible]हं[illegible]सो कारस्य एङः पदां
तादतीति पररूपत्वे प्राप्ते प्रकृत्यांतः पादमव्यपरे इति प्रकृतिभावः। मंदमैर[illegible]दस्व प्रकृं
तिगतिषु। इदितो नुम् धातोरिति नुमागमः। कुरि[illegible]नुवत्तो रवरुरुशं कु यीयुनाल[illegible]ष्वि स्वत्वावि
भक्तिकतिर्दिशा दृते हिंगुरितिवद्वत्वं तरारा[illegible]करिस्कतं। प्रत्ययस्वरेणांतोदात्तः [illegible]वचने मे। प्र
35 थमयोः पूर्वसवर्णः त्रितीयेकवचने[illegible]वत् सुपां सुलुगित्यादिना पूर्वसवर्णदीर्घत्वं समानं वर्चीय
यो रितिवा यस्येति बहुव्रीहिः। द्विवचने सुपां सुलुगित्याकारः। समानपदस्य प्राप्ति परिकां तोदात्तत्वं
। बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण न स्वाव शिष्यते॥७॥ ॥अथ द्वितीया॥ आदहस्वधा मनु पुनर्ग
[illegible]मे रिरे दधाना नाम यज्ञियमिति॥ आ दिस्वयमानं तप्यायोर्निपातः। अहेत्स्व[illegible]रणार्थः। आ
दहवर्ष तैरिनं तरमेव स्वधामनु इतः परं जनिष्यमाणमत्तमुदकं वानुलस्य महतो द[illegible]त्वमीरिरे
मेघमध्ये जलस्य गर्भाकारं प्रेरितवंतः प्रतिसंवत्सरमेवं कुर्वंमिती तिदर्शयितुं पुनः श[illegible]ः प्रयुक्तः की
दृशा महतः यज्ञियं यज्ञार्हं नाम दधाना धारयंतः स मस्तु गणेषु मरुता मीढं वेसादीनि यज्ञयो
ग्यानि नामान्यन्यनीत्रास्त्वा तानि। अं धइत्यादि षष्टाविंशतिसंख्याके धन्नमामसु र्जकुरसः स्वधे
ति पठितं॥ मर्ल इत्यादि षेकशतशंख्याके पृदकनाम सुतेजः स्वधा अस्त रमिति पठितं। आत अह

© Dharmartha Trust J&K. Digitized by eGangotri

निपातनाद्वाद्युदात्तो स्वधा स्वं लोकं स्वधा तिपुष्णातीति स्वधा। आतोऽनुपसर्गे कः। कृदुत्तरपदप्रकृतिस्वरत्वं।
अनु पुनः शब्दो निपातनाद्वाद्युदात्तो गर्भस्य भावो गार्भत्वं प्रत्ययः स्वरः। एरिरे अंतर्भावितण्यर्थादीरग
तावि सस्मात्सुदात्तेतः परस्य लिटो रस्य रेच्। चित्वादंतोदात्तः सहमुपेत्य सुपेति योगविभागादाऽऽस
हतिः समासस्यैवांतोदात्तत्वं। इजादेश्च गुरुमतोऽनृच्छ इत्याम्। न भवति मंत्रत्वात्। अ[illegible]ह्योगान्नि
घाताभावः। तु पश्य पश्यता हेः पूजायामिति निषेधात् [illegible]नाः। ज्ञानवत्त्वादंतोदा[illegible]प्राप्ते अस्य
स्तानामादिरित्याद्युदात्तत्वं। यज्ञमर्हतीति यज्ञियं। यज्ञर्त्विग्भ्यां घखञाविति घप्रत्ययः। आयनेयीनीयि
यः फढखछघां प्रत्ययादीनामितीयादेशः। प्रत्ययस्वरेण इकार उदात्तः।।७।। ।।अथ तृतीया।। वीळु
चिदारुजत्नुभिर्गुहा चिदिंद्र वह्निभिः। अविंद उस्रिया अनु।। अस्ति किंचिदुपाख्यानं पणिभिर्देव
लोकाद्गावोऽपहृताः अंधकारे प्रक्षिप्तास्ता [illegible] मरुद्भिः सहाजयदिति। एतत्सर्वं बृहद्देवतानुक्रमणिकायां
सूचितं। पणिभिरसुरैर्निगूढा गा अन्वेष्टुं सरमा देवशुनींद्रेण प्रेषिता [illegible]भिः प[illegible]यं तः प्र
त्वरिति मंत्रांतरेऽपि दृष्टांतेन तया सूचितं। निरूह्य आपः पणिनेव गा [illegible] अभिप्रेत्यो
तो हे इंद्र वीळु चित् दृढमपि दुर्गमस्थानं आरुजत्नुभिर्भंजनशीलैर्वह्निभिः [illegible] समर्थैः म
रुद्भिः सहितस्त्वं गुहा चित् गुहायामपि स्थापिता स्थापिता उस्रिया व्याकेषन्नमा। अन्विष्य लब्धवानसि
उजिः पाजः इत्यादिषष्टाविंशतिसंख्याकेषु बलनामसु दृळ्हः वीळु [illegible] अत्र प्रतिपठितं। नवसंख्याकेषु गो

© Dharmartha Trust J&K. Digitized by eGangotri

नामस्विघ्नायाउस्त्राउस्त्रियेतियवितंवीठुम्नातिपरिकस्वरः विकृ[illegible]नि[illegible]तः॥अस्माह्वजन्तुभिःरु
जौभंगइत्यस्माद्दोणाऽस्किःकन्नुवृप्रत्यय्ूः किलाकुणभाव[illegible]हं[illegible]समासेकृदुत्तरप
दप्रत्ययः॥निलाराघ्कुरात्तः॥अविंरःअसुरीवौनामितिनुम[illegible]मः॥लुङ्लृ[illegible]तः॥वसूर्ली
तिउस्त्रियाः॥वसोःकर्त्तरियकुप्रत्ययःषत्वाभावश्चबाहुलकाद्द्रष्टनीयःउक्तंहि[illegible]र्य्यविशेष
समुच्छं प्रत्ययतः प्रकृतेश्चनद्र्ष्टमितिःकारःप्रत्ययस्वरेणोदात्तः॥७॥ ॥अ[illegible]वृत्युपत्न्वेप्रथ
मा॥ताहुवेययोरिदंपप्रेविश्वंपुराक[illegible]ःइन्द्राग्नीनमर्द्धतइति॥तानौताइन्द्रा विंद्राग्नीहुवेआह्वये॥य
योरिंद्राग्न्योःपुरापूर्वस्मिन्नुकालेकृतंविश्वंसर्वंइदं पूर्वास्त्रस्तुकीर्तितिंवीर्यपप्रेपन्यतेऋषिभिःस्तू
यतेतौविंद्राग्नीहुवइत्यन्वयः॥तौविंद्राग्नीनमर्द्धतःमर्द्धति हिंसाकर्म्मास्तौ॥दन्नहिंसूः॥अतोस्मानया
हूतौरक्षतामितिभावः॥७॥ ॥अथद्वितीया॥उग्राविघनिनामधंइन्द्राग्नीहवामहे॥[illegible]तोमृडातईदृशा
इति॥उग्राउग्रौउद्गूर्णबलौ॥अतएवमधःशत्रून्विघनिनाविघनिनौविशेषेणहन्तवंतौ[illegible]ाग्नीहवामहे
आह्वयामहे॥तौचेंद्राग्नीईदृशोऽस्मिन्संग्रामेनोस्माम्मृडातःसुखयतां॥यद्वामृडातिःउप[illegible]पाकर्म्मा॥नो॥
स्माकंमृडातःउपदयांकुरुतां॥७॥ ॥अथतृतीया॥हथोवृत्राण्यार्य्याहथोदासानिसत्पती॥हथोवि
श्वाअपद्विषइति॥हेइन्द्राग्नीआर्य्याआर्य्यैःकर्म्मानुष्ठातृभिःकृतानिवृत्राण्युपद्रवजातानिहथःहिं
स्थःतथासत्पतीसतांपालयितारौसंतौदासानिदासाःकर्म्महीनाःशत्रवःतैःकृतानिवोपद्रवजातानिह

३६

36

© Dharmartha Trust J&K. Digitized by eGangotri

थः।अपिचविश्वाःसर्वाद्विषःद्वेष्ट्रीःशत्रुभूताःप्रजाअस्मत्पथःविनाशययथः॥अतोऽस्माकमप्येव
मेवंकुरुतामितिभावः।हयोहतइतिपाठो॥७॥ ॥इतिचतुर्थेध्यायेद्वितीयःखंडः॥७॥ ॥अथतृतीय
खंडेप्रथमत्वेप्रथमा॥अभिसोमासआयवःपवंतेमद्यंमदं।समुद्रस्याधिविष्टपेमनीषिणोमत्स
रासोमदच्युतइति॥आयवःगमनशीलाःसोमासःसोमाःमद्यंमदकरंमदंआत्मीयंर[illegible]अभिपवंते।
अभितोनिर्गमयंति।कुत्रेत्यत्राह।समुद्रस्यअंतरिक्षस्यअधिविष्टपेअधिकंसमु[illegible]तपवित्रेय
द्वासमुद्रस्ययस्मात्समुद्रवंतिरसास्तस्यकलशस्यअधिउपरिविष्टपेस्थानेपवित्रेनिर्गमयंतिकीदृशा
मनीषिणःमनसईशितारोमत्सरासःमदकराःमदच्युतःमदस्राविणः।विष्टपेविष्टपीतिपाठो।मदच्यु
तस्वर्विदइतिच॥७॥ ॥अथद्वितीया॥तरत्समुद्रंपवमानऊर्मिणाराजादेवऋतंबृहत्।अर्षामित्र ३७
स्यवरुणस्यधर्म्मणाप्रहिन्वानऋतंबृहदिति॥पवमानःपूयमानः।देवद्योतमानःबृहत्असंतंऋतं
सत्यभूतःराजासोमासःसमुद्रमंतरिक्षंकलशंवा[illegible]ऊर्म्मिणाधारयातरतरतिहिन्वान[illegible]णःअ
बृहत्असंतंसत्यभूतःससोमःमित्रस्यवरुणस्यमित्रावरुणयोःधर्म्मणाधातेःउप[illegible]र्षप्रार्षति[illegible]
र्षेणगच्छति।अर्षाअर्षदितिपाठो॥७॥ ॥अथअध्यायस्य[illegible]तृतीया॥हयोदासा[illegible]हर्य्यविवस्वणः
राजादेवःसमुद्रः।इति॥नृभिःकर्म्मनेतृभिःऋत्विग्भिर्येमानो[illegible]तानिवत्राणपतिःस्पृहणीयः।विवस्व
तोविदत्स्वारदेवोदीव्यमानःसमुद्रःअंतरिक्षेभवःराजासोमःइंदुः[illegible]रात्रवःनेतंतथाषः।येमाणोयेमानइति

© Dharmartha Trust J&K. Digitized by eGangotri

पाठो॥ ७॥ ॥ अथद्वितीयत्वेप्रथमा॥ ७॥ ॥ तिस्रोवाचईरयति [illegible] तस्य धीतिं ब्रह्मणो म
नीषां॥ गावोयंतिगोपतिंपृच्छमानाः सोमंयंतिमतयोवावशाना [illegible] मानः तिस्रोवाचः
ऋग्यजुःसामात्मिकाःस्तुतीः प्रेरयति। तथा ऋतस्ययज्ञस्य धी [illegible] धारयित्रीं ब्रह्म [illegible] स्य सोम [illegible]
मनीषां मनसि ईशित्रीं कल्याणीं वाचंच प्रेरयति। किंच गोपतिं वृषभं यथा गावो भिग [illegible] गावो वा
मिनां सोमं गावः पृच्छमानाः पृच्छंसः स सोऽयं [illegible] स्वपयसा मिश्रयितुं अभिगच्छंति त [illegible] वावशानाः का
मयमाना मतयः स्तोतारश्च सोमं यं [illegible] स्तोतुम अभिगच्छंति॥ ७॥ ॥ अथद्वितीया॥ सोमंगावोधेनवोवा
वशानाः सोमं विप्रा मतिभिः पृच्छमानाः। सोमः सुत ऋच्यते पूयमानः सोमे अर्का स्त्रिष्टुभः संनवंत
इति। धेनवः प्रीणयित्र्यो गावः सोमं वावशानाः कामयमाना भवंति विप्रा मेधाविनः स्तोतारः मति
भिः स्तुतिभिः पृच्छमानाः पृच्छंतो भवंति। सुतोभिषुतः सोमः पूयमान ऋक्भिर्ऋच्यते [illegible] रति। तथा त्रि
ष्टुभः त्रिष्टुब्रूपाः अर्काः अस्माभिः क्रियमाणा एते मंत्राः सोमे संनवंते संगच्छंते। सो [illegible] सुत ऋच्यते
पूयमान इति छंदोगाः सोमः सुतः अज्यमान इति बह्वृचाः॥ ७॥ ॥ अथतृतीया॥ ए [illegible] नः सोमप
रिषिच्यमान आपवस्व पूयमानः स्वस्ति। इंद्रमाविश बृहता मदेन वर्धया वाचं जनया पुरंधिमिति॥ हे सो
मपरिषिच्यमानः परितः पात्रेषु सिच्यमानः पूयमानस्त्वं नोऽस्माकमेव स्वस्ति। अविनाशं आपव
स्वा प्रापय। किंच बृहता महता मदेन मत्करेण रसेन सह इंद्रमाविश प्रविश। तथा वर्धया वाचं स्तुतिल

37

© Dharmartha Trust J&K. Digitized by eGangotri

॥ राम ॥

स्यणां प्रसिद्धं कुरु। किंच पुरंधिं बहुधियं प्रज्ञानं जनय अस्मभ्यमुत्साहय। वाक्यभेदान्निघातः॥७॥
इति चतुर्थेऽध्याये तृतीयः खंडः॥७॥ ॥अथ चतुर्थखंडे प्रगाथरूपे प्रथमसूक्ते प्रथमा॥७॥ यद्याव
इंद्र ते शतं शतं भूमीरुत स्युः। न त्वा वज्रिन्सहस्रं सूर्या अनु न जातमष्ट रोदसी इति॥ हे इंद्र ते तव प्रति
मानार्थं द्यावा द्युलोकाः शतं स्युस्तथापि ताः स्युर्भवंति। उतापि च भूमीर्भूम्यः तेन तव मूर्त्ति[illegible]नते विंबायथा
तं स्युस्तथापि नाश्नुवंति। हे वज्रिन्त्वां सहस्रं सूर्याः अगणिता अपि सूर्याः नानु[illegible]तिन प्रका
शयंतीत्यर्थः। न तत्र सूर्यो भातीति श्रुतेः। किं बहुना जातं पूर्वमुत्पन्नं किं विस्तामनु नाष्ट नाश्नुते।
तथा रोदसी द्यावापृथिव्यौ नाश्नुवाते सर्वेभ्योतिरिच्यसइ किं विश्वस्येत्यर्थः। ज्यायान्पृथिव्या ज्याया
नंतरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्य इति श्रुतेः॥७॥ ॥अथ द्वितीया॥ आपप्राथ महि
ना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा। अस्मां अव मघवन्गोमति व्रजे वज्रिंचित्राभिरूतिभि
रिति॥ हे वृषन् अभिमतवर्षकेंद्र त्वं आपप्राथ आपूरयसि व्याप्नोषि। कानि विश्वा[illegible]भुतनि वृष
वर्षकाणि बलानि शम्भुसंबंधीनि केन साधनेन महिना महत्ता बलेन अस्मदीया॥ स[illegible]नि पूरय
सीत्यर्थः। अथ तथा कृत्वा अस्मान् गोमति बहुभिर्गोभिर्युक्ते व्रजे शत्रुजनया पुरं भिभित्ते सति अ
स्मान् अव रक्ष॥ हे वज्रिन्वज्रयुक्तेंद्र कैः साधानैः चित्राभिर्नानाप्रकारैस्वरक्षणैरिति॥७॥ ॥अ
थ द्वितीयसूक्ते प्रथमा॥ वयं घ त्वा सुतावंत आपो न वृक्तबर्हिषः। पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तो

© Dharmartha Trust J&K. Digitized by eGangotri

तास्त्वा सत इति॥ हे वृत्रहन्निंद्र त्वां वयं मघवंतं स्वल्पसुतवंतः [illegible] पूर्वप्रवणमभिगच्छा

मः। पवित्रस्य सोमानां प्रस्रवणेषु वृक्तबर्हिषः स्तीर्णबर्हिषः [illegible] पर्युपासते॥६॥ ॥

अथ द्वितीया॥ स्वरंति त्वा सुते नरो वसो निरेक उक्थिनः। [illegible] त्वा सुतं तत्पीतिं [illegible] इंद्र स्व

वयं स गइति॥ हे वसो वासयितरिंद्र त्वां सुते अभिषुते सोमे निरेके निर्गमे उक्थि [illegible] नेता

स्वरंति शब्दायंते। अपिबेंद्रः सुतं सोमं प्रमितत्वाणः तृष्यतु स्वर्णीवस्वभूतश [illegible] स

नीयगमनो वृषभः शाश्वं कुर्वन्नुकरातुकस्थानमागमत आगच्छतु॥६॥ ॥अथ तती

या॥ कण्वेभिर्धृष्णवाधृषद्वाजं दर्षि सहस्रिणं। पिशंगरूपं मघवन्विचर्षणे मक्षू गोमंत

मीमहे इति॥ हे धृष्णो धर्षक इंद्र कण्वेभिः कण्वा मेधाविनः स्तोतॄन्नु दिश्य विभक्ति व्यत्ययः।

सहस्रिणं सहस्रसंख्याकं वाजमा दर्षि प्रयच्छसि। हे मघवन् धनवन्विचर्षणे विद्वन्निंद्र

धृषत् धृष्टं पिशंगरूपं गोमंतं च वाजं मक्षु शीघ्रं ईमहे याचामहे त्वामिति शेषः॥ [illegible]॥ ॥अथ प्र

गाथरूपे तृतीयसूक्ते प्रथमा॥६॥ तरणिरित्सिषासति वाजं पुरंध्या युजा। आ [illegible] इंद्रं पुरुहू

तं नमे गिरा नेमिं तष्टेव सुद्र्वमिति॥ तरणिरित्तु त्वरितः कर्मणि त्वरित एव पुमान् पुरंध्या

महत्या धिया युजा सहायभूतया वाजमन्नं सिषासति संभजते। पुरुहूतं बहुभिराहूतं इंद्रं व

स्त्वां स्तुसा अहमानमो नेमिश्चक्रस्य वलयं सुद्रुवं शोभनदारुं तष्टेव यथा वर्द्धकिः दारु नेमिमान

३८

© Dharmartha Trust J&K. Digitized by eGangotri

मयंतेन द्विस्पर्धः ॥ ८ ॥ ॥ अथ द्वितीया ॥ न दुष्टुतिर्द्रविणोदेषु शस्यते न स्रेधन्तं रयिर्नशत्
। सुशक्तिरिन्मघवन् तुभ्यं मावते देष्णं यत्पार्ये दिवीति ॥ द्रविणोदेषु धनदातृषु पुरुषेषु दु
ष्टुतिरसमीचीना स्तुतिर्न शस्यते नाभिधीयते किंच स्रेधन्तं हिंसन्तं धनदातृविषयस्तुत्यादि
कर्म्माण्यकुर्वन्तमित्यर्थः । एवंभूतं जनं रयिर्द्धनं न नशत् न प्राप्नोति । तथा हे म[illegible]न् धनवन्निं
द्र पार्ये दिवि सोमसंबन्धिनि दिवसे मावते मत्सदृशाय स्तोत्रे देष्णं दातव्यं यद्धनमस्ति [illegible] तुभ्यं त्वत्तः स
काशात् सुशक्तिरित् शोभनस्तुतिक एव स्तोता लभत इति शेषः । न दुष्टुतिर्द्रविणोदेषु शस्य
त इति छन्दोगाः न दुष्टुती मर्त्यो विन्दते वसु इति बह्वृचाः ॥ ८ ॥ ॥ इति चतुर्थेऽध्याये चतुर्थः खंडः ॥ ८ ॥
॥ अथ पंचमे खंडे प्रथमतृचे प्रथमा ॥ तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्र
दत् ॥ तिस्रो वाचः ऋगादिभेदेन उदीरते [illegible]द्गमयंत्यृत्विजः । धेनवः प्रीणयित्र्यो गावः मिमंति ।
शब्दयंति दोहार्थं हरिर्हरितवर्णश्च सोमः कनिक्रदत् शब्दं कुर्वन् एति गच्छति । [illegible] ॥ इति [illegible]
॥ अथ द्वितीया ॥ अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः । मर्ज्जयंतीर्दि[illegible]पो [illegible]ति । ब्रह्मी
स्तण प्रेरिताः यह्वीर्महत्यः यह्वीरिति महन्नाम ऋतस्य [illegible]स्य [illegible]तय [illegible]स्तुतयः दिवः
द्युलोकस्य शिशुं शिशुस्थानीयं सोमं मर्जयंतीः पावयंतीः [illegible]जते पुरुह[illegible]वंति । दतीयस्या मि
नो दिविस्तोमः आसीदित्वा दिक्षन्तेः घ शिशुत्वं तस्य मर्जयं[illegible]तेष्वे[illegible]न इति पाठो ॥ ८ ॥ ॥ अथ

© Dharmartha Trust J&K. Digitized by eGangotri

तृतीया॥ रायः समुद्रांश्चतुरोऽस्मभ्यं सोम विश्वतः। आ पवस्व [illegible]
संबंधिनश्चतुरस्समुद्रान् मणिमुक्तादिधनपूर्णानित्यर्थः॥ [illegible]हं[illegible]मिति॥ रायो धनस्य
हे सोम विश्वतः सर्वतः आ पवस्व। तथा सहस्रिणोऽप[illegible]मतान् कीर्ति[illegible]तानस्मभ्यमर्पय
चतुस्समुद्रस्थधनविशेषप्राप्तेः तन्मध्यगतभूमिस्वामित्वमंतरेणासंभव[illegible]अप्रयच्छ
द्वितन्मध्यगतभूमंडलस्वामित्वमेवाशास्ते यजमानः॥६॥ ॥अथ द्वितीया॥ [illegible]
सुतासो मधुमत्तमाः सोमा इंद्राय मंदिनः। पवित्रवंतो अक्षरन् देवान् गच्छंतु वो मदा इति॥ मधु
मत्तमाः। अतिशयेन माधुर्योपेताः। अत एव मंदिनो मदकराः सुतासोऽभिषुताः सोमाः पवित्रवं
तः पवित्रे वर्त्तमानाः संतः इंद्रायेंद्रार्थं अक्षरन् पात्रेष्वक्षरन् पात्रेषु क्षरंति। अथ प्रत्यक्षकृतः। वो
युष्माकं मदा मदहेतवो रसाः देवानिंद्रादीन् गच्छंतु॥६॥ ॥अथ द्वितीया॥ इंदुरिंद्राय पवत इति
देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजस इति॥ इंदुः सोमः इंद्रायें[illegible]पवते कल
शे क्षरतीति देवासः स्तुतिकारिणः स्तोतारो अब्रुवन्। इदं इति यदा स्तोतार एवं ब्रूवंति [illegible]दानीं वाच
स्तुतेः पतिः पालयिता। यद्वा शब्दस्य स्वामी अस्तं शब्दायमान इत्यर्थः। तादृशः सोमः मखस्य
ते स्तुतिभिः पूजामिच्छति। लालसायां सुगागमः। कीदृशः ओजसो बलवतः विश्वस्य सर्वस्य ईशानः
प्रभुः। ओजसः उजसेति पाठो॥६॥ ॥अथ तृतीया॥ सहस्रधारः पवते समुद्रो वाचमीखयः। सो

© Dharmartha Trust J&K. Digitized by eGangotri

मस्मतीरयीणां सखेंद्रस्य दिवेदिवे इति ॥ सहस्रधारः बहुविधधारोयं नतः सोमः पवते क्षरति । कीदृ
शः समुद्रः यस्मात् समुद्रवंति रसाः रसस्थानीयः वाचमीङ्खयः ईङ्खते प्रेरयंति स्म स्तुपपदे खवग्र
मसयः स्तुतीनां प्रेरयिता रयीणां धनानां पतिः प्रभुः । यद्वा रयीणां हविषां दाहृणां यजमानानां प
तिः पालयिता दिवेदिवे प्रसहं इंद्रस्य सखा मित्रभूतः सोमः पवते सोमस्य पतिः सोम[illegible]तिरिति पाठो
॥७॥ ॥ अथ तृतीयत्वचे प्रथमा ॥ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः । अ
प्ततनूर्न तदामो अश्नुते श्रृतास इद्वहंतः सं तदाशते ॥ हे ब्रह्मणस्पते मंत्रस्य स्वामिन् सोम ते पवि
त्रं शोधकमंगं विततं सर्वत्र विस्तृतं स प्रभुः प्रभविता त्वं गात्राणि पातुरंगानि पर्येषि परिगच्छसि
विश्वतः सर्वतस्त्वत्तस्सवित्रं अतप्ततनूः पयोव्रतादिना असंतप्तगात्रः आमो परिपक्को नाश्नुते न
व्याप्नोति श्रृतास इत् श्रृता एव परिपक्का एव वहंतो यागं निर्वहंतः तत्पवित्रमा[illegible]तव्याप्नुवंति सं
तद्व्याप्नुवंति समाशतेति पाठो ॥७॥ ॥ अथ द्वितीया ॥ तपोष्पवित्रं विततं दिवस्पदे [illegible] तं
तवो व्यस्थिरन् । अवंत्यस्य पवितारमाशवो दिवः पृष्ठमधिरोहंति तेजसेति ॥ [illegible]रूणं तव
कस्य सोमस्य पवित्रं शोधकमंगं दिवस्पदे ऽद्युलोकस्योपरि स्थाने [illegible]ताः [illegible]तीयस्य ।
तो दिवि सोम आसीदिति ब्राह्मणं । अस्य तंतवो ग्रावाः अर्चंतो सो बलवतः [illegible]स्थिरन् विविधं तिष्ठंति
पृथिव्यां हविर्द्धाने वा । अस्य सोमस्य आशवः शीघ्रगामिनो रश्मयः पवितारं पावयितारं यजमानं अ

© Dharmartha Trust J&K. Digitized by eGangotri

वंतिरक्षंतिहोमद्यायापश्चाद्भुतादिर्वोधकलोकस्यपृष्टंपृष्टभागमुन्न[illegible]नि[illegible]सास्वप्रकाशेनसार्द्ध
रोहंति। आरोहणंकुर्वंति। अर्चंतःशोभंतइतिपाठो॥ अ[illegible]हं[illegible]रिरंतिचेनसेति
पाठो॥८॥ ॥अथतृतीया॥ अरूरुचदुषसःपृश्निरग्रिय[illegible]उक्षामिमेतिभुव[illegible]॥माया
विनोममिरेअस्यप्रतिबिंबउपस्तुतासोऽनयस्ति॥हेउपस्तुतास्तउपस्तोतारःपृ[illegible]
माययानृचक्षसःपितरोगर्भमादधुरिति। उषसःसंबंधीपृश्निरादित्यःपृश्निरा[illegible]नवर्ण। आ
श्नुतएनंवर्णइतिनिरुक्तं। अग्रियोमुख्यःसोयंसोममरूरुचत्रोचयति। सउक्षा जलस्यसेक्ता।
भुवनेषुभूतजातेषुमिमेतिमिनोतिउदकंप्रक्षिपतीत्यर्थः। वाजयुस्तेषामन्नमिच्छन् मायाविनो
मायाप्रज्ञानवंतोदेवाअस्यसोमस्यमाययाप्रज्ञयाममिरेनिर्मितवंतःसोमस्यैकैकांशपानब
ला। अग्म्याद्ध्यःस्वस्वव्यापारेणजगद्रंजंतीत्यर्थः। तथास्यमाययानृचक्षसोनृणांद्रष्टारःपितरः।
पालकादेवाअंगिरसःपितरोवागर्भमादधुः। धारयंतिउषधीषुच। अथवासूर्यात्मकःसोमःस्तूय
ते। सूर्यरश्म्यनुगमाधीनवर्द्धनाच्चंद्रस्य। अयमुषसःपृश्निःसविताअरूरुचत्रोचतेरोचयतिवा।
सर्वंशिष्टंसमानंतत्संबंधिनःनृचक्षसःनृणांद्रष्टारःपितरोजगद्रक्षकाःरश्मयोगर्भमादधुःर
श्म्यर्थंमिमेतिभुवनेषुविभक्तिर्भुवनानीतिपाठो॥८॥ ॥इतिचतुर्थेऽध्यायेपंचमःखंडः॥८॥ ॥
अथषष्ठेखंडेप्रथमसूक्तप्रगाथेप्रथमा॥प्रमंहिष्ठायगायतऋताव्नेबृहतेशुक्रशोचिषे।उपस्तुता

सोऽग्नयइति॥ हेउपस्तुतासःउपस्तोतारः यूयंमंहिष्ठायमहत्तमायऋताव्नेयक्षवतेवाव्रहतेम
हतेसुऋष्णोविषेदीप्ततेजसेऽग्नयेप्रगायतस्तोत्रंपठत॥७॥ ॥अथद्वितीया॥ आवंसतेमघ
वावीरवद्यशःसमिद्धोद्युम्न्याहुतः।कुविन्नोअस्यसुमतिर्भवीयस्यच्छावाजेभिरागमदिति॥म
घवाधनवान्द्युम्नीअन्नवान्यशस्वीवातथाचयास्कः॥द्युम्नंद्योततेर्यशोवान्नंवेति।समि
द्धःसम्यग्दीप्तःआहुतःआभिमुख्येनहुतोयोग्निःवीरवत्सुत्रवद्यशोयशस्करमन्नंआवंसतेय
जमानेभ्यआप्रयच्छति।तस्याग्नाग्नेःभवीयसीअस्मासुअतिशयेनभवितुंयोग्यासुमतिरनु
ग्रहबुद्धिःनोअस्मानच्छप्रतिवाजेभिरन्नैःसहकुवित्बहुसल्लिलंकुविदितिबहुनामआगमदा
गच्छतु।भवीयसीनवायसीतिपाठो॥७॥ ॥अथद्वितीयतृचेप्रथमा॥ तंतेमदंगृणीमसिवृषणं
पृक्षुसासहिं।उलोककृत्नुमद्रिवोहरिश्रियंइति॥ हेअद्रिवोवज्रिन्निन्द्रतेतवदीय तंमदंसोमपान
जनितंहर्षंगृणीमसिगृणीमः।प्रशंसामः।गृशब्देक्र्यादिः।प्वादीनांह्रस्वः।इदंने [illegible] कःसोमःस्तूय
मानागमः।कीदृशंवृषणंवर्षितारंकामानां।पृक्षुपृतनासुसंग्रामेषुसासहिं [illegible] रोचतेरो [illegible] वा
रंलोककृत्नुंलोकस्यस्थानस्यकर्त्तारंहरिश्रियंहरिभ्याम [illegible] ज [illegible] कोः [illegible] यागा [illegible] एघांस
न्वयेपरपूरणोवा।पृक्षुपृत्स्वितिपाठो॥७॥ ॥अथद्वितीया॥ [illegible] ध्यायेपंच [illegible] विमनवेचविवेदिथ
।मंदानोअस्यबर्हिषोविराजसीति॥ हेइंद्रयेनाःसीयेनमदेनअ [illegible] वृत्रह [illegible] यायमनवेविवस्वतःसु

© Dharmartha Trust J&K. Digitized by eGangotri

आयच्छ्योतींषिसूर्यादीनिरश्मिभिरावृतानितद्वारेणविवेचि[illegible]नि[illegible]ः।प्रख्यापितवान्वाप्र
काशितवानसीत्यर्थः।तेनमदेनमंदानोमोदमानस्त्वंअसु[illegible]विराजसिवि
शेषेणशोभसे।यद्वाअस्येतितृतीयार्थेषष्ठी।अनेनबर्हि[illegible]द्धनमदेनहृष्य[illegible]विशे[illegible]
दीप्यसे।।८।। ।।अथतृतीया।।तद्याचित्तउक्थिनोनुष्टुवंतिपूर्वथा।वृषपत्नी[illegible]
इति।।हेइंद्रतेत्वदीयंतत्प्रसिद्धंबलंअधाचित्अधापिपूर्वथापूर्वस्मिन्कालइ[illegible]स्ति
णस्तोतारःअनुष्टुवंतिक्रमेणप्रशंसंति।सत्वंवृषपत्नीःवृषावर्षितापर्जन्यःप[illegible]तिर्यासांतादृशी
रपःदिवेदिवेप्रतिदिवसंजयस्वायत्तांकुरु।।८।। ।।अथतृतीयतृचेप्रथमा।। ।।अधीहत्वंतिरश्च्या
इंद्रयस्त्वासपर्य्यति।सुवीर्य्यस्यगोमतोरायस्पूर्द्धिमहांअसीति।।हेइंद्रयःत्वांसपर्यति।सप
र्य्याख्यःकंड्वादिःहविर्भिःपरिचरति।तादृशस्यतिरश्च्याएतन्नामकस्यऋषेर्म्महत्वंस्तुतिभिस्त्व
द्धिषयमाह्वानंअधिशृणु।अत्वावहेइंद्रत्वंसुवीर्य्यस्यशोभनवीर्य्योपेतस्ययथावीरपुत्रोभवंवीर्यंसु
पुत्रवतःगोमतःगवादिपशुमतःरायोधनस्यदानेननःअस्मान्पूर्द्धिपूरय।एतत्सामर्थ्यंकुतइत्य
तआह।त्वंमहान्गुणाधिकःदेवेनांश्रेष्ठःअसिभवसिखलु।।८।। ।।अथद्वितीया।।यस्तइंद्रनवीय
सींगिरंमंद्रामजीजनत्।चिकित्विन्मनसंधियंप्रत्नामृतस्यपिप्युषीमिति।।हेइंद्रयोयजमानोनवीय
सीनवतरांपुनःपुनःक्रियमाणतयामंद्रांमदकरींगिरंस्तुतिलक्षणांवाचंतेत्वदर्थंअजीजनत्उदपीपदत्।।

© Dharmartha Trust J&K. Digitized by eGangotri

अकार्षीरित्यर्थः। तस्मै स्तोत्रे त्वं प्रत्नं पुरातनं ऋतस्य सत्यस्य संबंधि यद्वात् तृतीयार्थे षष्ठी सत्येन
पिप्पृषी प्रसह्य लिप्य... इत्येति प्यायतेः पीभावः। ताद्दशी कि किल्मिन संकितस्थानेक सो लुपः
आकारस्य एकारश्छांदसः। विकिलं सिद्धाता तानि सर्वेषां हृदयानि येयेति अमायया क्रयमाणं यत्त
वरक्षणं तन्न सर्वेषां हृदयं प्रज्ञापयतीति। ततः अतींद्रियार्थदर्शिकं धियं त्वदीयं रक्षणं स्व्यकर्म्म
तस्मै कुरु। यस्त इंद्र इंद्र यस्त इति व्यत्ययेन पाठो॥८॥ ॥अथ तृतीया॥ तमु ष्टवाम यं गिर इंद्र
मुक्था नि वावृधुः। पुरूण्यस्य पौंस्या सिषासंतो वनामहे इति॥ ऋष्यंत्यः परस्परमाहुः तं पूर्वोक्तल
क्षणं इंद्रस्य वधारणे। तमेवेंद्रं स्तवाम स्तुतिभिः स्तुतिभिः स्तुमः। यमिंद्रं गिरो अस्माकं स्तुतयः
उक्थानि शस्त्राणि च वावृधुः। मावर्द्धयन्। तं स्तुमः। ततो वयमस्येंद्रस्य पुरूणि बहूनि पौंस्या वीर्याणि
सिषासंतः। षण संभक्तौ सनीउ भावपक्षे आत्वे कृते तल्पं सनोतेर्वन इति सां हि ... बलं। तानि वी
र्याणि संभक्तुमिच्छंतः संतो वनामहे तमिंद्रं स्तुतिभिः संभजामहे॥८॥ ॥इति विद्यापुत्र भवं वीर्यं सु
स्वंः॥८॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थ तत्सामर्थ्यं ... हृत्य
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीर॥ हम्भूपाल...द्वितीया॥ य... णसाय
णाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे पंचम... षीमिति॥ हे...॥ ॥यस्य निश्वसितं
वेदा यो वेदेभ्योखिलं जगत्। निर्म्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ वंतेल...मपपंचमाध्याय आरभ्यते॥

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र प्रथमे खंडे प्रतस्मा श्विनी रिति त्रयं प्रथमं सूक्तं तत्र प्रथमा॥ [illegible] नी [illegible] पृश्विनीः पवमान धन
वो दिव्या अस्य अनू पयसा धरीमणि। अंतरिक्षा स्थाविरी [illegible] सृक्षत [illegible] ऋषिषा त्वे
धस इति॥ हे पवमान सोम ते तव अश्विनीर्व्याप्ताः अश्व [illegible] ता विसृसमा री [illegible] तवे [illegible]
णव्यस्य येनाह्वरात्तः धेनवः प्रीणयित्र्यः दिव्या दिवि भवाः दिवः पतंत्या धाराः प [illegible]
मणि धारके द्रोणकलशे मासृ अनुगच्छंति। ये वेधसः विधातारः ऋत्विजः हे सोम इ [illegible] द्भि
भिः संभक्तत्वात् त्वाम् अर्जंति अभिषुण्वंति। ते वेधसः स्थाविरीः स्थविरा धारा अंतरिक्षात् सकाशा
त् मासृक्षत पात्रं प्रति सृजंति। धेनवो धी जुव इति पाठे। अंतरिक्षा स्थाविरी स्ते [illegible] असृक्षत। मानत्रॠ
षय स्थाविरीरसृक्षतेति च॥ ५॥ ॥ अथ द्वितीया॥ उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः प
रियंति केतवः। यदी पवित्रे अधिमर्ज्यते हरिः सत्ता नियोनौ कलशेषु सीदतीति॥ पवमानस्य पूय
मानस्य ध्रुवस्य स्वयमविचलितस्य सतो विद्यमानस्य सोमस्य केतवः प्रज्ञापका रश्मयः उभयतः
इतश्चामुतश्च परियंति परितो गच्छंति अभिषवसमय एवं भवति। यदि यदा पवित्रे दशापवित्रे हरिर्हरि
तवर्णो ऽयं सोमः अधिमर्ज्यते तदानीं सत्ता सदनशीलो ऽयं योनौ योनिषु स्वीयेषु स्थानेषु कलशे
षु द्रोणकलशादिषु पात्रेषु निषीदति निषण्णो भवति। योनौ योनेति च पाठे॥ ६॥ ॥ अथ तृतीया॥ ॥
विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष्टे सतः परियंति केतवः। व्यानशीः पवसे सोम धर्म्मणा पति

© Dharmartha Trust J&K. Digitized by eGangotri

विश्वस्य भुवनस्य राजसीति॥ हे विश्वचक्षः सर्वस्य द्रष्टः सोम प्रभोः परिवृदस्य सतस्तत्वकृतः
स्वसः ऋभ्वा इतिमहन्नाममहांतः केतवो रश्मयो विश्वा सर्वाणि धामानि तेजस्थानानि देवश
रीराणि परियंति परितो गच्छंति प्रकाशयंती सर्पः हे सोम व्यानशी व्यापनशीलस्त्वं धर्मणा धा
रकेण रसनिष्पंदनेन पवसे पूयसे। किंच। विश्वस्य भुवनस्य पतिः स्वामी त्वं राजसि ईश्वरो भवसि। प्र
भोः सतः परियंति प्रभास्ते सतः परियंतिनीतिपाठे॥ व्यानशी व्यानशिरिति धर्मणा धर्मभिरिति
च॥८॥ ॥ अथ द्वितीयतृचे प्रथमा॥ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुं। ज्योतिर्वैश्वानरं बृह
दिति॥ पवमानः पूयमानः सोमो बृहन्महत् वैश्वानरं वैश्वानराख्यं ज्योतिस्तेजो दिवो द्युलोकस्य वि
त्रं विचित्रं तन्यतुं न ॥ अग्नानिमिव अजीजनद् जनयत्॥८॥ ॥ अथ द्वितीया॥ ॥ पवमानरसस्तव म
दो राजन्नदुच्छुनः। विवारमव्यमर्षतीति॥ हे राजन् दीप्यमान पवमान पूयमान सोम तव तृतीयो
मदकरः अदुच्छुनो रक्षोवर्जितो रसः अव्यमविमयं वारं वालं दशापवित्रमर्षति। अपः उभयतः
मानरसस्तव पवमानस्पतेरस इतिपाठे॥८॥ ॥ अथ तृतीया॥ पवमानस्य दशापवित्रे अहि
राजति द्युमान्। ज्योतिर्विश्वं स्वर्दृश इति॥ हे सोम पवमानं यो पूयमानं सुस्तोयं पुस्तकान्ने सः दशप
मानु दीप्तिमान् विराजति प्रकाशनेन केवलं स्वयमेव प्रकाशित्वपाठे॥८॥ व्याप्तं स्वः सर्वं ज्यो
तिस्तेजस्व दृशो दृष्टुं करोतीति विशेषः। पवमानस्पतेरसः पवमानानशीपवतिपाठे॥ अथ प्रथयज्ञाव

© Dharmartha Trust J&K. Digitized by eGangotri

इति॥षड्विंशतितीयंसूक्तंतत्रप्रथमा॥७॥ ॥अथयद्वावोनभूर्णयस्त्वे[illegible]नि[illegible]गा॥अयासोअक्रमुः।घ्नं
तःकृष्णामपत्वचमिति॥यत्येअभिषुताःसोमाःगावोन[illegible]नहं[illegible]मधःपतंति
तद्वत्।गावएववोपमीयंते।तायथास्वगोष्ठंप्रत्याशुगच्छंतितद्वत्।अथ[illegible]वाच[illegible]
यथाखलुसंप्रतिक्षिप्रंप्राप्नुवंतितद्वत्।भूर्णयःक्षिप्राःत्वेतादीप्ताःअयासःअ[illegible]
कृष्णांकृष्णवर्णामपत्वचंअपकृष्टांत्वचंघ्नंतःविनाशयंतःइंदिकुभूतायेसोम[illegible]ती
त्वचंइतिशेषः।यत्येइतिपाठो॥७॥ ॥अथद्वितीया॥सुवितस्यवनामहेतिसत्वंदुराय्यं।सा
ह्यामदस्युमव्रतमिति॥सुवितस्यशोभनंप्राप्तस्यसोमस्यसंबंधिनंअतिसे[illegible]रक्षोविषयंबंधनं
वनामहे।सोमकर्तृकंरक्षसांबंधनंस्तुमइत्यर्थः।कीदृशंदुराय्यंदुष्प्रापणीयं।किंचअव्रतंयज्ञादि
कर्मरहितंदस्युंशत्रुंसाह्यामअभिभवेम।दुराय्यंसाह्यामसाक्षोसोइतिपाठः॥७॥ ॥अथतृती
या॥शृण्वेवृष्टेरिवस्वनःपवमानस्यशुष्मिणः।चरंतिविद्युतोदिवीति॥शृण्वेश्रूयते।कःस्वनःकि
मिववृष्टेर्वर्षणस्यस्वनइवतस्ययथामहान्स्वनःश्रूयतेतद्वत्सकृतरसपातसमयेश्रूयते।क
स्यस्वनइतितत्राह।पवमानस्यपूयमानस्यशुष्मिणोबलवतस्तस्यैवविद्युतोदीप्तयःदिव्यंतरि
क्षेचरंति॥७॥ ॥अथचतुर्थी॥आपवस्वमहीमिषंगोमदिंदोहिरण्यवत्।अश्वावत्सोमवी
रवदिति।हेइंदोसोमअभिषुतस्त्वंमहीमिषंमहदन्नंआपवस्व।कीदृशंअन्नं।गोमद्भिर्गोभि

© Dharmartha Trust J&K. Digitized by eGangotri

युक्तं हिरण्यवत्सुवर्णैर्युतं अश्ववत् अश्वोपेतं वीरवत् पुत्रयुक्तं अश्ववत्सोम वीरवत् अश्वावद्वाज
द्वाजवत्सुत इति पाठे ॥८॥ ॥ अथ पंचमी ॥ पवस्व विश्वचर्षण आ मही रोदसी पृण उषाः सूर्यो
न रश्मिभिरिति ॥ हे विश्वचर्षणे विश्वस्य द्रष्टः सोम सत्वं पवस्व क्षर रसं तथा कृत्वाऽनेन रसेन महीम
हती रोदसी द्यावापृथिव्यौ आपृण आपूरय उषाः उषसः एकत्वं वा विनाषः ग्राह्य नाहान्यपल
क्षं नेतत्प्राधान्यात् । महानिर रश्मिभिः सूर्यो न सूर्य इव पवस्व विश्वचर्षणे पवस्व विश्वसणे
ति पाठे ॥८॥ ॥ अथ षष्ठी ॥ परि नः शर्म्मयन्त्या धारया सोम विश्वतः । सरा रसेव विष्टपमिति ॥ हे
सोम नोऽस्माकं शर्म्मयन्त्या सुखयन्त्या धारया विश्वतः सर्वतः परिसर परिस्रव । रसेव रसेनेव विष्ट
पं भूलोकं यद्वा रसा नदी सा यथा जनं प्रवणरूपमिव । परि नः परिण इति पाठे ॥८॥ ॥ इति पंचमेऽध्याये
प्रथमः खंडः ॥८॥ ॥ अथ द्वितीयखंडे आशुरर्षति षडृचं प्रथमं सूक्तं तत्र प्रथमा ॥ आशुरर्ष बृह
न्मते परि प्रियेण धाम्ना । यत्र देवा इति ब्रुवन्निति ॥ हे बृहन्मते महामते सोम प्रियेण [illegible]ता । कः स्वनः कि
न धाम्ना शरीरेण धारया आशुः शीघ्रः सन् पर्य्यर्षि परि[illegible]ति [illegible]॥ यत्र देवा इदं हारयो [illegible]तसमये [illegible] वाक
वन्तु स्वारयन्तं देवं गच्छामीति ब्रुवन्निसर्पः ॥८॥ ॥ अथ [illegible]तीया ॥ प[illegible] विविक्तो दीप्तः [illegible]जनाय
तयन्निषः । वृष्टिं दिवः परिस्रवेति ॥ अनिष्कृतमसंस्कृतं यजमान[illegible]स्थं [illegible]वत [illegible]रक्ष एव न संस्कुर्वन्
जनाय यागकर्त्रे इषोऽन्नानि यातयन्निर्गमयन् दिवोऽन्तरिक्षाद्वृष्टिं[illegible]वा कोहं[illegible]व ॥८॥ ॥ अथ तृतीया ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अयं स यो दिवस्परि रघुयामा पवित्र आ। सिंधोरूर्म्मा व्यक्षरदिति। [illegible] यं सोमः पवित्रे आसि
च्यमान इति शेषः। सिंधोर्जलस्य ऊर्म्मौ संघाते व्यक्षरन्नु [illegible] इत्याह। यो दि
वस्परि द्युलोकस्योपरि रघुयामा लघुगमनो देवप्राप्तौ सो[illegible]तिसंबंधः। [illegible] तुर्थी
त एति पवित्र आ विविंदधानुजसा। विचक्षणो विरोचयन्निति। सुतोभिषुतः [illegible]
वित्रे आ इत्यनर्थकः। ओजसा बलेन शीघ्रं एति गच्छति। कीदृशः सन् विविंदि [illegible] यन्नु
विचक्षणः सर्वं पश्यन् विरोचयन् दीपयंश्च किं देवानिति शेषः।।७।। ।।अथ पंचमी।। आविवा
सन्परावतो अथो अर्वावतस्सुतः। इंद्राय सिच्यते मध्विति। सुतोभिषुतस्सोमः परावतः दूर
नामैतत् दूरस्थान् अथो अपि च अर्वावतोंतिकस्थांश्च देवानाविवासन् परिचरन् रसेन परि
रक्षणाय इत्यर्थः।। इंद्रायेंद्रार्थं मधु मधुसदृशस्सोमः सिच्यते।।७।। ।।अथ षष्ठी।। समीचीना अ
नूषत हरिं हिन्वंत्यद्रिभिः। इंदुमिंद्राय पीतय इति।। समीचीनाः सम्यगंचिताः संगताः स्तोतारः अ
नूषत स्तुवंति। किं च सोमं हरिं हरितवर्णं हिन्वंति प्रेरयंति। गमयंति अद्रिभिर्ग्रावभिः किमर्थं हि
न्वंतीत्याह इंदुं दीप्तं सोममिंद्रायेंद्रस्य पीतये पानाय।।७।। अथ पत्वालके द्वितीयसूक्ते प्रथमा।। ।।
हिन्वंति सूरमुस्रयः स्वसारो जामयस्पतिं। महामिंदुं महीयुव इति।। उस्रयः कर्मार्थिनिवसंतः स
र्वत्र गंतार इत्यर्थः। जामयः एकस्मात्स्थाने सन्निवासस्य परस्परं बंधुभूताः स्वसारः अंगुलिनामैतत्।

© Dharmartha Trust J&K. Digitized by eGangotri

सुष्टुकर्मसु प्रेरयन्ति ऋत्विग्भिरिति स्वसारोऽङ्गुलयः महीयुवः सोमाभिषवं कामयमानाः सत्यः
सूरं सुवीर्यं सोमे पीते वीर्यं भवतीति शोभनवीर्यकारणं वा सर्वेषां कर्मणि प्रेरकं वा तादृशं पतिं
सर्वस्य स्थावरजंगमजातस्य स्वामिनं यस्माद्द्वार्यमिज्यते। अतएव महां देवेभ्यो दीयमानत्वेन
महान्तं महनीयं वा इन्दुं ग्रहेषु स्यन्दमानं सोमं हिन्वन्ति प्रेरयन्ति हिन्विर्धिनगसो इति धातोरेतत् रूपं
स्यादिति॥७॥ ॥अथ द्वितीया॥ पवमान रुचा रुचा देवो देवेभ्यः सुतः। विश्वा वसून्याविश इति॥ हे पव वोप
मान त्वमापवित्रेण पूयमान यद्वा पुनान शुद्ध सोम रुचा रुचा दीप्त्या सर्वेण तेजसा हे देव दीप्यमा
न देवेभ्यो देवार्थं सुतोऽभिषुतस्त्वं विश्वा विश्वानि सर्वाणि बहूनि वसूनि धनानि आविश। अस्मा
न्प्रापय। यद्वा सर्वाणि वसूनि वासस्थानानि ग्रहादीनि आविश समन्तात् प्रविश। देवेभ्यः सुतः देवे
भ्यस्परीति पाठे॥७॥ ॥अथ तृतीया॥ आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः। [illegible] यत
मिति॥ हे पवमान पूयमान पुनान वा सोम सुष्टुतिं शोभनस्तुतियुक्तां वृष्टिं देवे[illegible]गताः स्तोतारः
पांसुलुगिति चतुर्थ्या लुक्। दुवसे परिचरणाय आपवस्व [illegible]तिगमय त्वं। यथा[illegible] ग्रीवभिः [illegible] मर्थी हि
भवति। यथा कुधिसिर्यः। किंच। अस्माकमिषे अन्नार्थं च सं[illegible] अपम्यग[illegible]सकाद्द्वितीयसूत्रे [illegible] कुलायं॥
द्वादुवः परिचर्यमभिलक्ष्य क्रियमाणां सुष्टुतिं शोभनस्तुतिरूपं वृष्टिं च॥ उरु[illegible]स्तुतिमिसर्ग्यः। एतां देवे
भ्यः प्रापय॥७॥ ॥इति पंचमेऽध्याये द्वितीयः खंडः॥७॥ ॥अथ तृतीये॥ उपवमल्वे प्रथमा॥ जन

© Dharmartha Trust J&K. Digitized by eGangotri

४५

स्यगोपाअजनिष्टजागृविरग्निस्सुदक्षःसुवितायनव्यसे॥ घृत[illegible]हतादिविस्पृशाद्युम
द्विभातिभरतेभ्यःशुचिरिति॥ जनस्यगोपागोपयितारक्षिता[illegible]र्वि[illegible]शीलःसदाप्रबुद्धः
सुदक्षःसुबलःसर्वैःश्लाघनीयबलःसोऽग्निःनव्यसेन[illegible]सुवि[illegible]ताय[illegible]
अजनिष्टजातः। ततःघृतप्रतीकःघृतेनप्रक्षालितांगः। बृ[illegible]तामहता॥ दिविस्पृ[illegible]
तेजसायुक्तःशुचिःशुद्धःएवंविधोऽग्निःभरतेभ्यऋत्विग्भ्यःतदर्थंद्युमत्दीप्तिमत[illegible]
भातिप्रकाशते॥७॥ ॥अथद्वितीया॥ त्वामग्नेअंगिरसोगुहाहितमन्वविंदंछि[illegible]श्रि[illegible]याणंव[illegible]वने।
सजायसेमथ्यमानःसहोमहत्त्वामाहुःसहसस्पुत्रमंगिरइति॥ हेअग्नेअं[illegible]रसःएतन्नामका
ऋषयःगुहागुहायांहितंनिहितंनिगूढंवनेवनेवृक्षेशिश्रियाणंआश्रितंत्वांअन्वविंदन्॥ अल
भंतामहत्महतासहस्सहसाबलेनयुक्तःसत्त्वंमथ्यमानोजायसे। हेअंगिरसांप्रकृतभूतत्वांस
हसस्पुत्रमाहुः॥७॥ ॥अथतृतीया॥ यज्ञस्यकेतुंप्रथमंपुरोहितमग्निंनरस्त्रिषधस्थेसमिं
धते। इंद्रेणदेवैःसरथंसबर्हिषिसीदन्निहोतायजथायसुक्रतुरिति॥ नरःकर्म्मणांनेतारऋत्विजः
यज्ञस्ययागस्यकेतुंप्रज्ञापकंपुरोहितंयजमानैःपुरस्कृतंइंद्रेणदेवैःश्चसरथंतेषांमान्यत्वात्समा
नरथंअग्निंत्रिषधस्थेत्रिस्थानेविहारप्रदेशेसमिंधतेसम्यग्दीपयंति। ततःसुक्रतुःशोभनकर्माहि
तांदेवानामाह्वातासोऽग्निर्बर्हिषिबर्हिर्युक्तेतस्मिन्स्थानेयजथाययज्ञायनिषीदन्न्यसीदत्प्रतिष्ठि

© Dharmartha Trust J&K. Digitized by eGangotri

तोभवदितियावत्समिंधतेसमीधिरइतिपाठे॥७॥ ॥अथद्वितीयत्वेप्रथमा॥अयंवांमित्रावरु
णासुतःसोमऋतावृधा।ममेदिहश्रुतंहवमिति।हेऋतावृधासत्यस्ययज्ञस्यवावर्द्धकौहेमित्रा
वरुणौवांयुवाभ्यांअयंसोमसुतोभिषुतःयस्मादेवंतंतस्मादिहास्मिन्यज्ञेममेतुमदीयमेवह
वंआह्वानंश्रुतंशृणुतं॥७॥ ॥अथद्वितीया॥राजानावनभिद्रुहाध्रुवेसदस्युत्तमे।सहस्रस्थू
णआशातेइति॥राजानौईश्वरौदीप्यमानौवाअनभिद्रुहाअनभिद्रोग्धारौयौमित्रावरुणौध्रु
वेस्थिरेउत्तमेउत्कृष्टेसहस्रस्थूणेसदसिस्थानेआशातेउपविशतःतावागच्छतामितिशेषः॥७॥
॥अथतृतीया॥तासम्राजाघृतासुतीआदित्यादानुनस्पती।सचेतेअनवह्वरमिति।सम्राजा
सम्राजौआक्षय्येवसर्वेषांशास्तारौ।घृतासुतीघृतान्नौतद्धिमहित्वंघृतान्नावास्त्वितिमंत्रांतरात्
।आदित्याअदितेःपुत्रौदानुनस्पतीदानुनोदानस्यदेवस्यदेवस्यबाधनस्यपतीस्वामिनौतातेमित्रा
वरुणौअनवह्वरंअकुटिलंयजमानंसचेतेहविर्भक्षणार्थंसेवेते॥७॥ ॥अथत्रिषधस्थेसामः
॥इंद्रोदधीचोअस्थभिर्वृत्राण्यप्रतिष्कुतः।जघाननवतीर्नवेति॥अत्रशाट्यायनिनेतिहासमा
चक्षते।आथर्वणस्यदधीचोजीवतोदर्शनेनअसुराःपरानइंद्रेण।अथस्वर्गतेतेषामान्यतेअसुरा
रैःपूर्णापृथिव्यभवत्।अथेंद्रस्तैरसुरैःसहयोद्धुमशक्नुवंस्तमृषिमन्विच्छन्स्वर्गंगतइतिशुश्रा
व।अथपप्रच्छतत्रत्यान्नेहकिमस्यकिंचित्परिशिष्टमंगमस्तीति।अवोचत्।अस्त्येतद्

© Dharmartha Trust J&K. Digitized by eGangotri

श्वशीर्षेण शिरसा। अश्विभ्यां मधुविद्यां प्राब्रवीत्। तत्पुनर्विमृश्यैन्द्रो [illegible] इति पुनरिन्द्रोऽब्रवीत्।
तदन्विच्छतेति तद्धान्वेषिषुस्तच्छर्यणावत्यनुविद्याजह्रुः शर्या [illegible] स्यजघनार्द्ध
सरः स्यंदते तस्य शिरसोऽस्थिभिरिन्द्रोऽसुराञ्जघानेति [illegible] तत्स्मृतः। परे [illegible] प्र
कृत्यन्याष्टरहितं दध्यङ् आथर्वणस्य दधीचः एतत्संज्ञकस्य [illegible] अस्थिभिः अस्थि [illegible]
यस्थिभिर्नवतीर्नव नवसंख्याकाः नवतीर्दशोत्तराष्टशतसंख्याकाः तथाहि ले [illegible] नाद्
वानजेतुं आदावासुरा मायास्त्रिधा संपद्यंते। त्रिविधास्ता अतीतानागतवर्त्तमानकालभेदेन त
त्तत्कालवर्त्तिनो जेतुं पुनरपि प्रत्येकं त्रिगुणितां भवति। एवं नव संपद्यंते। पुनरप्युत्साहशक्त्य
प्रभुशक्तिरूपेण त्रैगुण्ये सति सप्तविंशतिः संपद्यंते। पुनः सात्विकादिगुणत्रयभेदेन त्रैगुण्ये सति।
एकोत्तराशीतिः संपद्यंते। एवं चतुर्भिस्त्रिकैर्गुणितास्ता मायायास्तासु दिक्षु प्रत्येकमवस्थाने
सति नवनवतयः संपद्यंते। एवंविधमायारूपाणि वृत्राण्यावरकाण्यसुरजातानि जघान हतवा।
न्। दधीचः। दधि अंचतीति दध्यङ्। अंचतेः ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। षष्ठ्ये
कवचने अचः इत्यकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वे प्राप्ते तदपवादत्वे
याचावितिपूर्वपदस्यांतोदात्तत्वं प्राप्तं। अंचेश्छंदस्यसर्वनामस्थानमिति पुनर्विभक्तेरुदात्तत्वविधा
नेन तद्बाध्यते। अस्थभिः छंदस्यपि दृश्यत इति अनङादावपि अस्थिशब्दस्यानङादेशः। स चोदात्तः।। ७।।

© Dharmartha Trust J&K. Digitized by eGangotri

॥ अथ द्वितीया ॥ इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितं । तद्विदच्छर्य्यणावतीति । पर्वतेषु पर्ववत्
सु गिरिषु अपश्रितं अपगतस्थितं अश्वस्य अश्वसंबंधि दधीचीय छिरः इच्छन्निंद्रो वर्त्तनो श
र्य्यणावति एतत्संज्ञके सरसि तच्छिरो ऽविदत् । अज्ञासीत् । आलानतत्कस्य तदीयैरस्थिभिर्वृत्रा
णि जघानेति पूर्वस्यामृचि संबंधः । इच्छन् इषु इच्छायां । तुदादिभ्यश्च प्रत्ययः । विदत् वेत्तेर्लुङि व्य
त्ययेन लेरङादेशः । शर्य्यणावति शर्य्यणानाम देशाः तेषामदूरभवः सरः शर्य्यणावत् मधादि
षु शर्य्यणशब्दस्य पाठात् । मधादिभ्यश्चेति चातुरर्थको मतुप् । संज्ञायामिति मतुपो वत्वं । मतोव
र्त्वो नजिरादित्वनामिनितिदीर्घः ॥ ६ ॥ अथ तृतीया ॥ ॥ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यं । इत्था
चंद्रमसो गृहे इति । अत्राह अस्मिन्नेव गोर्गमनशीलस्य चंद्रमसो गृहे मंडले त्वष्टुर्दीप्तस्यादित्यस्य संबंधि
अपीच्यं रात्राववंतर्हितं स्वकीयं यन्नाम तदादित्यरश्मय इच्छा इच्छमनेन प्रकारेण अमन्वत ...
जानन् उदकमये स्वच्छे चंद्रबिंबे सूर्यकिरणाः प्रतिफलंति । तत्र प्रतिफलिताः वि... घानहतवा ।
श्मीसंज्ञालभंते । नाद्यश्मीचंद्रपिवर्त्तमानालभंत इत्यर्थः । ... भवतिय ... नलोपः । ष ...
श्चंद्रमं गृहं विश्य अहनीव नैश्यं तमो निवार्य सर्वं सर्वं प्रकरणवि ... दातत्वे प्राप्ते तदन्यः सूर्य
इत्थं एव । छन्दस्मा स्वादिष्वेषु इद्रस्यापि परिगणितत्वात् । अतो ... अयोः पुनर ... क इदंएवेति । इदं स्तु
तेः प्रतीयमानत्वादिंद्रो देवते त्येतदुपपन्नं भवति । अत्र निरुक्तं । अथाप्यस्यैको रश्मिश्चंद्रमसं प्रति

© Dharmartha Trust J&K. Digitized by eGangotri

दीप्यते । तस्ते तेनोपेक्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति । सुषुम्णः सूर्यरश्मि [illegible] चंद्रमा गंधर्व इत्यपि नि-
गमो भवति । सोऽपि गोरुच्यते । अत्राह गोरमन्वतेति । अत्रो [illegible] थमं [illegible] यः संनामा-
पीच्यमपचितमपगतमपहृतमंतर्हितं वेति । अमन्य [illegible] दुः अवबोधंते [illegible] पूर्व [illegible]
ञ्चितोतेरप्यादयश्चेति निपातनाद्यत् ॥ अत एवाभिमत [illegible] सिद्धिः ॥ यद्वा अपिपू [illegible]
गित्यादिना क्विन् ॥ अनिदितामिति नलोपः ॥ अपिगते निगते भवमपीच्यं ॥ भवेः छं [illegible]
वइत्सकारलोपे वाविति दीर्घत्वं । अपीच्यो मकाम इति भट्टभास्करमिश्रः । इच्छ इत्थमूराष्टृच्छा हलोऽ
२ दसीति प्रकारवचने थाप्रत्ययः । यदित्यत्र इदंशब्दो नानुवर्त्तते । तदानीमिदम इथमु इति थमु प्रत्ययः
॥ अव्ययादाप्सुप इति सुब्लुकं बाधित्वा सुपां सुलुगिति डादेशः । चंद्रमसः चंद्रमा ल्हादनं निर्मीते
निर्मिमीत इति चंद्रमाः ॥ चंद्रे माङो डिदित्यसिप्रत्ययः ॥ दासीभारादिषु पठितत्वात् पूर्वपदप्रकृति-
स्वरत्वं । पूर्वपदस्य स्फायितंचीत्यादिना रक् । प्रत्ययांतमंतोदात्तं ॥ ७ ॥ ॥ अथ चतुर्थवर्गे प्रथमा ॥ इयं
वामस्य मन्मन इंद्राग्नी पूर्व्यस्तुतिः । अभ्राद्वृष्टिरिवाजनीति ॥ हे इंद्राग्नी इयं पूर्व्यस्तुतिः पूर्व्या मुख्या
स्तुतिः कस्य संबंधिनी अस्य मन्मनः स्तोतुः अस्माद्वसिष्ठात् वां युवाभ्यां युवयोरर्थे अभ्रान्मेघा-
द्वृष्टिरिव बह्वी सती अजनि प्रादुर्भूता ॥ शृणुतमित्युत्तरत्र संबंधः ॥ ७ ॥ ॥ अथ द्वितीया ॥ शृणु-
तं जरितुर्हवमिंद्राग्नी वनतं गिरः । ईशाना पिप्यतं धिय इति ॥ हे इंद्राग्नी जरितुः स्तोतुर्हवमाह्वानं युवां

© Dharmartha Trust J&K. Digitized by eGangotri

शृणुतं। श्रुत्वा च गिरस्त्वदीयाः स्तुतीर्वनतं संभजतं। तथाइन्द्राग्नाईश्वरौयुवांधियःअनुष्ठितानिकर्म्मा
णिपिपृतं तैस्तैः फलैः पूरयतं॥८॥ ॥अथतृतीया॥ मापापत्वायनोनरेंद्राग्नीमाभिशस्तये। मा
नोरीरधतंनिदेइति। हेनरानेतारा विंद्राग्नीनोस्मानपापत्वायपापवत्त्वायहीनभावायमारीरधत
मावशंनयतं। तथाअभिशस्तयेशत्रुभिःकृतायाभिशंसनायमारीरधतं। तथानिदेनिंदकायजना
यनोस्मान्मारीरधतंमावशीकुरुतं॥८॥ ॥इतिपंचमेऽध्यायेतृतीयःखंडः॥८॥ ॥अथचतुर्थखं
डेप्रथमतृचेप्रथमा॥ पवस्वदक्षसाधनोदेवेभ्यःपीतयेहरे मरुद्भ्योवायवेमदइति। हेहरेहरितवर्ण
यापहर्त्तर्वासोमादक्षसाधनतक्षोबलंतस्यसाधकः मदोमदकरश्चत्वंपवस्वक्षर। किमर्थंदेवेभ्यःइं
द्रादिभ्यः पीतयेपानाय। तथामरुद्भ्योवायवेचपीतयेपवस्व॥८॥ ॥अथद्वितीया॥ संदेवैःशोभ
तेवृषाकविर्योनावधिप्रियः पवमानोअदाभ्यइति। अयंसोमःसंशोभतेदेवैःस[...]कोदृ[...]मः
वृषावर्षकः। कविःक्रांतदर्शीयोनौस्थानेस्वीयेधिष्ठितःप्रियभूतःसर्वेषां। यद्वाधी[...]तृचेप्रथमा॥ इयं
क्षरन्। अदाभ्यःकेनाप्यहिंसितश्चभवति। अतएवसोम[...]शोभते॥८॥ ॥अथ[...]तीति॥ [...]स्तुतिःपूर्व्यास्या
धियाहितोभियोनिंकनिक्रदत्। धर्मणावायुमारुहइति। [...]तुवं[...]सोम[...]भ्यांयुवयोरर्थंअ[...]म्या[...]णा
एअंगुल्यावाहितोधृतःसन्कनिक्रदत्शब्दंकुर्वन्योनिंस्थानं[...]कल॥८॥ ॥[...]रोहः। अभिमुखे
नारोहणंकुरुष्व विशेत्यर्थः। तदेवाह। धर्मणाकर्म्मणावायुसंबंधि[...]ग्नीज[...]त्यर्थः। तदारुहःप्रविश॥

© Dharmartha Trust J&K. Digitized by eGangotri

आरुहः। आविशेतिपाठौ॥७॥ ॥अथमगाथरूपेद्वितीयसूक्तेप्रथ[illegible]ऋत्वाहरिःसोमशारण।
सख्यइंद्रोद्विविद्वे। पुरुणिबभ्रोनिचरंतिमामवंपरिधींश्[illegible]हि[illegible]मानसोम
नवसख्येससखिकर्मणिः अहंदिवेदिवे अन्वहंशरणरमे[illegible]द्वितमेण[illegible]
वर्णसोमपुरूणिबहूनिरक्षांसिमांतवसख्येस्थितंन्य[illegible]रंतिनीचीनंचरंतिबा[illegible]
तानुपरिधीनुरक्षसांस्त्वंअतीहिअतीसगच्छजहीतियावत॥७॥ ॥अथ[illegible]
तमुतसोमतेदिवाद्रुहानोबभ्रूसधनि। घृण्मतपंतमतिसूर्यंपरःशकुनाइवपप्तिमना॥हेबभ्रो
भ्रुवर्णहेसोमउताप्यिवदिवाअहोरात्रयोःसख्यायसख्यार्थंतवजधनिसमीपेअहंरमइतिशेषः।
तेवयंघृणातीव्यातपंतंक्षलंतंपरस्थानस्थितंसूर्यंतदात्मकंत्वांअतिपप्तिम॥तत्रस्थितंत्वांप्राप्तुं
अतिपेतेमा।कथमिवशकुनाइवायथासुवर्णादयःपक्षिणःसूर्यमतिगच्छंतितद्वत्।पत्रगतौ॥अ
स्मा।छांदसेलितनिपासोः।छंदसीत्यपधालोपः।द्रुहानःसख्यायेतिपाठौ॥७॥ ॥अथतृतीयत
चेप्रथमा॥पुनानोअक्रमीदभिविश्वामृधोविचर्षणिः।शुंभंतिविप्रंधीतिभिरिति॥पुनानःपूयमानः
विचर्षणिर्विद्रष्टासोमःविश्वाःसर्वान्मृधोहिंसकान्शत्रूनभ्यक्रमीत।अतिक्रांतवान्।तंविप्रंमेधा
विनंधीतिभिःकर्मभिरभिषवादिभिस्तुतिभिर्वाशुंभंतिदीपयंतिअलंकुर्वंति॥७॥ ॥अथद्वितीया॥
आयोनिमरुणोरुहगमदिंद्रोवृषासुतं। ध्रुवेसदसिसीदतीति॥अयमरुणोरुणव[illegible]ःसोमःयोनिं
र्णः

© Dharmartha Trust J&K. Digitized by eGangotri

स्थानं द्रोणकलशं आरुहत् आरोहति। ततः वृषाकामानां वर्षक इंद्रः सुतमभिषुतं सोमं गमत् गच्छ
ति। गत्वा ध्रुवे सदसि स्थिरे स्थाने द्युलोकाख्ये सीदति निवसंति। इंद्रो वृषा सुतं इंद्र वृषा सुत इति पा
ठे॥७॥ ॥अथ तृतीया॥ नूनो रयिं महामिंदो स्मभ्यं सोम विश्वतः। आपवस्व सहस्रिणमिति॥
हे सोम अभिषुत त्वं हे इंद्रो नु क्षिप्रं महां महांतं सहस्रिणं असंख्यातं रयिं धनं विश्वतः आपवस्व स
र्वतः परिस्रव॥७॥ ॥इति पंचमेऽध्याये चतुर्थः खंडः॥ अथ पंचमखंडे प्रथमसूक्ते प्रथमा॥ पिबा
सोममिंद्र मंदतु त्वा यन्ते सुषाव हर्यश्वाद्रिः। सोतुर्बाहुभ्यां सुयतो नार्वेति। हे इंद्र सोमं पिबस सो
मस्त्वां मंदतु मादयतु। हे हर्यश्व हरिसंज्ञकाश्ववन्निंद्र ते त्वदर्थं सोतुरभिषवकर्तुर्बाहुभ्यां अर्वान
रश्मिभ्यां अश्व इव यः सुयतः सुष्ठु परिगृहीतोऽद्रिः ग्रावायं सोमं सुषाव अभिषवं करोति सम्बन्ध इति
पूर्वेण संबंधः॥७॥ ॥अथ द्वितीया॥ यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि [illegible]
मिंद्र प्रभूवसो ममत्तिऽति॥ हे हर्यश्वेंद्र ते तव युज्यो योग्य [illegible]रुः समीचीनः मदो मद [illegible]
विघते। येन त्वं पीतेन सोमेन वृत्राण्यावरकाणि निराहंसि [illegible] हंसि हे प्रभूवसो [illegible]
सोमम मत्तु मादयतु॥७॥ ॥अथ तृतीया॥ बोधा सु मे मघ[illegible]मिमां [illegible]र्वति
स्तिं। इमा ब्रह्मा सधमादे जुषस्वेति। हे मघवन्निंद्र ते तव प्रश[illegible]स्तुतिं [illegible]चिवासिष्ठो नाम ऋषिः
अर्चति वहति। इमां मामेव सिष्ठस्य संबंधिनीं वाचं बोधा बोध सुष्टुभिबु[illegible]किंच। इमा इमानि ब्रह्म ब्रह्मा

© Dharmartha Trust J&K. Digitized by eGangotri

णिहवीरूपाएपन्ना निसधमादेपन्इंद्रेजुषस्वसेवस्व॥७॥ ॥अथप[illegible]ीयत्वेप्रथमा॥विश्वाः

पृतनाअभिभूतरंनतरः सजूस्ततक्षुरिंद्रंजजनुश्चरा[illegible]क्रत्वे[illegible]सुतोअ्रो

जिष्ठंतरसंतरस्विनमिति॥७॥वि[illegible]श्वाःसर्वाःव्या[illegible]तनाः॥मि[illegible]ति

इतिपृतनाःसेनाःसजूःपरस्परंसंगताःसत्यःअ[illegible]भूतरंशत्रूणामत्यथ[illegible]

मिंद्रंततःक्षुःआयुधादिभिस्तीक्ष्णीचक्रुः॥आयुध[illegible]तमश्ववन्तंचक्रुरित्स[illegible]तना

इतिसंग्रामनाम।व्याप्नियंतेअत्रेतिपृतनाःसंग्रामाःसर्वानेवसंग्रामानभिभवुकमिंद्र[illegible]

नेतारःस्तोतारःअन्योन्यंसंगताःस्तुतिभिस्तीक्ष्णंअकुर्वन्स्तुतोअभिबलवानभव

तीति।यद्वायष्टारोहविःप्रदानेनवीर्यवंतंकुर्वंतीति।किंचस्तोतारःराजसेराजतेःसुमर्थेअ

सेप्रत्ययः।आत्मनोविराजनार्थंप्रकाशनार्थंसूर्यात्मानमिंद्रंजजनुःजनयामासुःस्तोत्र

शस्त्रैःस्वपक्षेप्रादुरभावयन्नित्यर्थः।किंच।क्रत्वेकेतवियक्षादिकर्म्मणिस्थेमनिस्थैर्यव

तिवरेवरणीयेधनेइंद्रंस्तोतारश्चक्रुः॥आत्मनोधनलाभार्थंस्तुवंतीत्यर्थः॥कीदृशमिंद्रमा

सुरींशत्रूणामाभिमुख्येनमारयितारंउग्रंउद्गूर्णबलं।अतएवओजिष्ठमोजस्वितमंतरसंप्र

वृद्धंतरस्विनंसंग्रामेशत्रुवधार्थंवेगवंतंबलवंतंवाएवंभूतमिंद्रंधनार्थंस्तुवंति।क्रत्वेवरेस्थेम

निक्रत्वावेरिष्ठंवरइतिपाठो॥७॥ ॥अथद्वितीया॥नेमिन्नमन्तिचक्षसामेषंविप्राअभिस्वरा

49

© Dharmartha Trust J&K. Digitized by eGangotri

सुदीतयो वो अद्रुहोपि कर्णे तरस्विनं समृक्वभिरिति ॥ नेमिं अरान् अभि घाने मित्युमिति नमद्ध्वेद्रं
सर्वथा कृते । नाहन्नं नमनशीलमिंद्रं वक्षसा दर्शनमात्रेणैव विप्राः मेधाविनः अभिस्वरे अ
भिस्वरणाय स्तोत्राय इंद्रविषयं स्तोत्रं कर्त्तुमित्यर्थः ॥ नमंति नमस्कुर्वंति । कीदृशं मेषं इंद्रो
मेषो भूत्वा मेधातिथिं स्वर्ग्गमनयत् तस्मान्मेधातिथेर्म्मेषभूतमिति यावत् इदानीं यजमानः
स्तोतॄन् आह । अपि च हे स्तोतारः सुदीतयः शोभनदीप्तयः अद्रुहः कस्याप्यद्रोग्धारो नो पूर्यंश्छां
दसो वसादेशः । तरस्विनः कर्म्मसु स्तोत्रेषु वा त्वरायुक्ताः संतः इंद्रस्य कर्णे श्रोत्रसमीपे ऋक्
भिः अर्च्चनयुक्तैर्मंत्रैः यद्वा ऋचो वक्वाः येषु संति तैः स्तोमादिभिः संस्तुतं इंद्रं यथास्मदीयानि
स्तोत्रादीनि शृणोति तथा सम्यगभिष्टुतेत्यर्थः । अभिस्वरे अभिस्वरेति पाठौ ॥ ७ ॥ ॥ अथ पूर्णी
या ॥ समु रेभासो अस्वरन्निंद्रं सोमस्य पीतये । स्वः पतिर्यदीवृधे धृतव्रतो ह्योजसा सम[...]भि
रिति ॥ रेभासः रेभः शब्दः शब्दयितारः स्तोतारो यद्वा रे वि[...]सः कश्यपपुत्रा रेभाः ए[...]नि स्थैर्यव
यः इंद्रमुइंद्रमेव समस्वरन् सम्यक् शब्दयन् समस्तुव[...]पा मोपि[...]मर्थं सोमस्य पीत[...] । कीदृशमिंद्रमा
यदा स्वः पतिः स्वर्गस्य पालयिता धनस्य स्वामी वा इंद्र[...]सतए[...]जमा[...]जेष्ठमोजस्वितमं[...]तीत
धृतव्रतः धृतकर्मेंद्रः ओजसा बलेन ऊतिभिर्मरुद्भिः पालनैश्च वा[...]संग[...]स्थिरं[...]तोमबलं मरुद्भिः
पालनं वेंद्रस्य भवतीत्यर्थः । समस्तु समीमिति पाठौ ॥ स्वः पतिः स्वर्पतिरिति[...]वा ॥ ७ ॥ ॥ अथ यमगायत्स्ये
वसा

© Dharmartha Trust J&K. Digitized by eGangotri

तृतीयसूक्ते प्रथमा॥ योराजाचर्षणीनांयातारथेभिरध्रिगुः विश्वासं[illegible]तापृतनानांज्येष्ठंयोवृ
त्रहाग्रणइति। यइंद्रः चर्षणीनांमनुष्याणांराजास्वामी[illegible]रथे[illegible]रधत
मनोन्यैर्विश्वासांपृतनानांसेनानांतरुतातारकः यश्च[illegible]न्हतवान्[illegible]
महाभागमिंद्रंग्रणेस्तोमि॥७॥ ॥अथद्वितीया॥ [illegible]तंशुस्म्नपुरुहन्मन्नव[illegible]
विधर्त्तरि। हस्तेनवज्रः प्रतिधायिदर्शतोमहान्देवोन सूर्यइति॥ हेपुरुहन्मन्नु[illegible]स्तु
50 । मः हविःप्रदानादिनाअलंकुरु। किमर्थंअवसेरक्षणाय। एवमात्मास्वात्मानंसंबोध्य[illegible]
यस्यतवविधर्त्तरिविधारकेइंद्रेहिताहितमस्ति उपग्रमानोग्रंतवशत्रून्हंतुमुग्रवंत्वंतुग्रहा
यअनोग्रंवेतिहितमस्ति। तत्रोग्रवित्रंदर्शयति। दर्शतोदर्शनीयः महान्प्रभूतोवर्च्चसःदेवोन जः
सूर्य्यः द्योतमानः सूर्यइवस्थितः। हस्तेनकरेणप्रतिधायिप्रतिनिहितोभवति। हस्तेनहस्ता
येतिपाठो॥ महानुदेवोमहोदिवइतिव॥७॥ ॥इतिपंचमेऽध्यायेपंचमःखंडः॥७॥ ॥अथष
ष्ठेखंडेप्रथमतृचेप्रथमा॥ परिप्रियादिवः कविर्वयांसिनप्त्योर्हितः॥ स्वानैर्यातिकविक्रतुरिति॥
कविर्मेधावीकविक्रतुः क्रांतप्रज्ञः क्रांतकर्मवानप्त्योरधिषवणफलकयोर्हितोनिहितःसोमः
दिवोद्युलोकस्यपरिप्रियाअतिप्रियाणिवयांसिअन्नानिः स्वानैः सुन्वानैः ऋत्विग्भिः सह्यातिग
च्छति। तथाचमंत्रवर्णः। श्येनाअतितिष्ठयः पर्वतानांककुभइति। स्वानैः सुवानइतिपाठो॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथद्वितीया ॥ ससूनुर्मातराशुचिर्जातोजातेअरोचयत् । महान्महीऋतावृधेति । जातउ
त्पन्नःशुचिर्विशुद्धोमहान्प्रवृद्धतमःससोमाख्यःसूनुःपुत्रःमहीमहत्यौऋतावृधावयज्ञस्य
वर्द्धयित्र्योजातेविश्वस्यजनयित्र्योमातराआत्मनोमातरौद्यावापृथिव्यावरोचयन्नरोचयति
दीपयति ॥ ७ ॥ ॥ अथतृतीया ॥ प्रप्रक्षयायपन्यसेजनायजुष्टोअद्रुहः । वीत्यर्षचनिष्ठयइ
ति । हेसोमप्रप्रअत्यंतंक्षयायनिवासभूतायअद्रुहः । अद्रुहेअद्रोग्ध्रेःपन्यसेस्तोत्रे
जनायमनुष्यायवीतिवीसेभक्षणायजुष्टःपर्याप्तस्त्वंपरिनिष्ठयेस्तुतयेअर्षयागंप्रतिगच्छ
अद्रुहःअद्रुहइतिपाठौ ॥ चनिष्ठयेवचनिष्ठयेतिवा ॥ ७ ॥ ॥ अथप्रगाथेद्वितीयसूक्तेप्रथमा ॥
त्वंह्यंगदैव्यपवमानजनिमानिद्युमत्तमः । अमृतत्वायघोषयन्निति ॥ हेपवमानपूयमानअंगः
देवसंबंधिन्सोमद्युमत्तमःअतिशयेनद्युमांस्त्वंहित्वमेवअंगक्षिप्रंघोषयन्शब्दनंकु
र्वन्जनिमानिदेवसंबंधीनिजन्मान्यभिलक्ष्यअमृतत्वायतेषाममरणाय ॥ ७ ॥ ॥ अथप
दैव्यदैव्याइतिपाठौ ॥ ७ ॥ ॥ घोषयन्घोषयइतिवा ॥ सेन ॥ अथद्वितीया ॥ एनातिकविक्रतुरिति ॥
र्णुतेयेनविप्रासआपिरे । देवानांसुम्नेअमृतस्यचारुणोधिषवश्रवांसिलक्षयाहितोनि[illegible]नामः
यगतिर्येद्धानवभिर्मासैःसत्रस्यानुष्ठानाद्दध्यङ्एतन्नामानौआंगिरसोनैःअतानेनपणिभिरपहृ
तानांगवांद्वारंअपोर्णुतेअपछादयति । विवृतमकार्षीत् । विप्रासःसन्मुखाःसर्वमेधाविनोगि

© Dharmartha Trust J&K. Digitized by eGangotri

रसः येन वसोमेन आपिरे तेरपहतागाः आभुवन् किंचाद्रेआदिना [illegible] नां सुम्ने सुखे यज्ञे
नसंजाते सति वाहणः कल्याणस्य अमतस्योक्कस्य [illegible] निक्र [illegible] सोमे
जमानाः आघ्रातव्या भुवन् अलभंत। सर्वेषां नाम म [illegible] गच्छतिपूर्वे [illegible]
नवग्वेद् इतिपाठो॥ आघ्रात आनसुरिति वा॥८॥ ॥अ [illegible] त्तृतीयत्चे प्रथमा॥ [illegible]
णाव्यं वारं विधावति। अग्रेवाचः पवमानः कनिक्रदत् [illegible]। पुनानः पूयमानः सोमः [illegible] वाय
याधारया अव्यमयं वरसंबंधिनं वारं वालं पवित्रं विधावति विविधं गच्छति। कीदृशः सोमः पवमा [illegible]
तः वाचस्तोत्रस्याग्रे कनिक्रदत् पुनः पुनः शब्दं कुर्वन् विधावति। अव्यमय इतिपाठे॥८॥ अथद्विती
या॥ धीभिर्मृजंति वाजिनं वने क्रीडंतमत्यविं। अभित्रिपृष्ठं मतयस्समस्वरन्निति॥ वाजिनं बलवंतं वने
वननीये वसतीवर्य्यखिलेउदके क्रीडंतं संक्रीडमानमत्यविं। अविशब्देन तद्रोमकृतंपवित्रमभिधीयते॥
अतिक्रांतपवित्रं सोमं ऋत्विजो धीभिस्तुतिभिर्मृजंति शोधयंति। यद्वा धीभिर्वर्मिलोपश्छांदसः॥
धीतिभिरंगुलिभिर्मृजंति। किंचत्रिपृष्ठं त्रीणिपवित्राणिद्रोणकलशाधवनीयपूतभृदाख्यानि पात्रा
णि स्पृशतीति त्रीणि सवनानि वा स्पृशतीतिसतथोक्तः। तंसोमं मतयः स्तुनयः अभिसमस्वरन् अभि
तः संस्तुवंतीति मृजंति हिन्वंतीति पाठे॥८॥ ॥अथतृतीया॥ असर्जिकलशां अभिमीढ्वान्सप्ति
र्नवाजयुः। पुनानो वाचं जनयन्नसिष्यददिति। वाजयुर्यजमानानामन्नमिच्छन् मीढ्वान् सेक्तासस्सोमः

© Dharmartha Trust J&K. Digitized by eGangotri

कलशानभिलक्ष्य कलशेषु अससर्जि सृज्यते। तत्र दृष्टांतः। सप्तिर्न यथा सर्पणशीलोऽश्वः संग्रामे
सृज्यते तद्वत्। ततः पुनानः पूयमानः सोमः वावशत् शब्दं जनयन् तु साद्यन् असिष्यदत् पात्रेषु स्यंदते। मीढ्वा
न मेहेद् इति पाठे।।७।। ।।अथ चतुर्थर्त्त्वे प्रथमा।। सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृ
थिव्याः। जनिताग्नेर्जनिता सूर्यस्य जनितेंद्रस्य जनितोत विष्णोः। इति।। सोमः अभिषूयमाणः पवते
पात्रेषु क्षरति। कीदृशः मतीनां बुद्धीनां यद्वा मननीयानां स्तुतीनां जनिता जनयिता। जनिता मंत्रे इति नि
पातनात् णिलोपः। किंच दिवो द्युलोकस्य जनिता प्रादुर्भावयिता। तथा पृथिव्या जनयिता। अग्नेर्जनिता प्र
काशयिता। सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य जनिता। इंद्रस्य जनिता पानेन मदस्य जनयिता। उतापि च
विष्णोर्व्यापकस्य च जनिता जनयिता। एतत्सर्वं सोमे अभिषूयमाणे भवतीति।।७।। ।।अथ द्वितीया
।।ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां। श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्र
मत्येति रेभन्।। इति।। सोम एवंरूपो भवति देवानां स्तोत्रकारिणामृत्विजां ब्रह्मा ब्रह्माख्यो लोपश्छांदसः। म
ति यद्वा देवानां द्योतमानानामिंद्रादीनां ब्रह्मा राजा भवति। कवीनां क्रांतप्रज्ञानां पूतमृद्धालकानि पात्रा
त्वेन योजयति स पदवीः। वीरस्याद्धिसेनस्मान्निपिरूपं। तं सोमं गणं मे स्तुर्नयः अभिसमानविन् अभि
यागृध्राणां पक्षिविशेषाणां श्येनः शंसनीयः पक्षिराजो भवति। ... वनानां कल्पकम्।। हंसकानां छेदकानां
नां मध्ये स्वधितिरेतन्नामकछेदकोऽसि। एवं प्रभावः सोमः रेभन् शब्दायमानः पवित्रं सर्पन् स्तुवन् केन कृतमसे

© Dharmartha Trust J&K. Digitized by eGangotri

तिअतिगछति॥ ७॥ ॥ अथ तृतीया॥ प्रावी विपद्वाच ऊर्मिं न सिंधुर्गिर[illegible]मान्पवमानो मनीषाः।
अंतः पश्यन्वृजनेमावराण्यातिष्ठति वृषभो गोषु जानन्नि[illegible]मान[illegible]सई[illegible]
हूयंगमान्स्तोमान्प्रावी विपन्प्रकर्षेण विपर्यति प्रेर[illegible]मिव सिंधुः[illegible]व[illegible]
ष्टस्य ऊर्मिं निसंघयथा प्रेरयति। तद्वत् किंच वृषभः का[illegible]मुष्काणांवा वर्षकः स[illegible]
स्तु जातं पश्यन् अवराणि दुर्बलैर्वारयितुमशक्यानि दृम[illegible]जनानीमानि बलानि आ[illegible]हति॥
52 किं कुर्वन् गोषु जानन् गवां जयाय जानानः सन् परबलानि प्रविशति। स्तोमान् स्तोम इति पाठे[illegible]
इति पंचमेऽध्याये षष्टः खंडः॥ ७॥ अथ त्वत्रयात्मके सप्तमे खंडे प्रथमतृचे प्रथमा॥ ७॥ ॥ अग्निं वोवृ
धंतमध्वराणां पुरूतमं। अच्छा नप्त्रे सहस्वते इति। अध्वराणामहिंस्यानां बलिनां नप्त्रे बंधुं सहस्वते ब
लवंतं विभक्ति व्यसयः। वृधंतं ज्वालाभिर्वर्द्धमानं। पुरूतमं अतिशयेन बहुमग्निं। हे ऋत्विजो वो यूयमच्छा
भिगच्छत उपसर्गश्रुतेर्योग्य क्रियाध्याहारः॥ ७॥ ॥ अथ द्वितीया॥ अयं यथा न आभुवत्त्वष्टा रूपेव त
क्ष्या। अस्य क्रत्वा यशस्वत इति॥ अयमग्निर्नोस्मान् तक्ष्या विकर्तव्यानि रूपेव त्वष्टा रूपाणि। वर्द्धकि रिव।
यथायेन प्रकारेण आभुवत् आभवति प्राप्नोति तथैनमग्निं अभिगच्छते त्यर्थः। किंच वयं अस्याग्नेः क्रत्वा
प्रज्ञानेन युक्ताः यशास्वतो यशस्वंतो भवामेति शेषः॥ ७॥ ॥ अथ तृतीया॥ अयं विश्वा अभि श्रियोऽग्निर्दे
वेषु पत्यते। आ वाजैरुप नो गमदिति। मनुष्याणां विश्वाः सर्वाः श्रियः संपदः देवेषु देवानां मध्ये योयमग्निर

© Dharmartha Trust J&K. Digitized by eGangotri

भिपसते अभिगच्छति। सोऽग्निर्नोऽस्मानपि वाजेरन्नैरुपागमदुपागच्छतु॥७॥ ॥अथ तृतीयतृचे प्रथमा॥
॥इममिंद्र सुतं पिब ज्येष्ठममर्त्यं मदं। शुक्रस्य त्वाभ्यक्षरन् धारा ऋतस्य सादने इति॥ हे इंद्र सुतमभिषुतमि
मं सोमं पिब। कीदृशं ज्येष्ठमतिशयेन प्रशस्यं मदं मदकरं अमर्त्यममारकं सोमपानजन्यो मदो महांतरक्षमा
रको न भवतीत्यर्थः। तथात्र तस्य यज्ञस्य संबंधिनि सदने गृहे वर्त्तमानाः शुक्रस्य दीप्तस्यास्य सोमस्य धा
राः त्वामभ्यक्षरन् आभिमुख्येन संचलंति त्वां प्राप्तुं स्वयमेवागच्छंतीत्यर्थः। ज्येष्ठं प्रशस्यशब्दादिष्ठनि
ज्यादेशः। अक्षरन् क्षर संचलने छांदसो लङ्॥७॥ ॥अथ द्वितीया॥ नकिष्ट्वद्रथीतरो हरी यदिं
द्र यच्छसे। नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे इति॥ हे इंद्र यद्यस्मात्त्वं हरी एतन्नामकौ अश्वौ यच्छसे रथे
योजयसि। तस्मात्त्वत्त्वत्तोऽन्यः कश्चिन्न रथीतरः अतिशयेन रथवान् नकिर्नास्ति। अन्येषामीदृत्वतव
क्ररथाभावात्। त्वा त्वामनु लक्ष्य मज्मना बलनामैतत्। बलेन सदृशोऽपि नकिर्न्न विद्यते। स्वाभूरणमना
श्वोऽन्यस्त्वत्तो नकिरानशे न प्राप। इंद्रस्य बलाश्वयोरसाधारण्यात्वादिंद्रसदृशो बलवद्भुवत्वष्टा रूपेक्ते
कश्चिदपि नास्तीत्यर्थः। नकिष्ट्वत् युष्मत्तत्तनस्सुषं न० पा०। विकेत्त्वं। रथीतरः अतिरूपाणि। वर्षीकिरव।
थिन इति ईकारांतादेशः। यच्छासे यमेर्व्यत्ययेनात्मनेपदं स्वश्व अभिगच्छाद्यर्थः। किंच वयं असपेत्तन्नत्वा
दात्तत्वं। आनशे अश्नोतेश्चेति अभ्यासादुत्तरस्य नुट्॥७॥ ॥अथ तृतीया॥ इंद्राय नूनमर्चतोक्थं
च ब्रवीतन। सुता अमत्सुरिंदवो ज्येष्ठं नमस्यता सह इति॥ हे ऋत्विजः इंद्राय नूनं क्षिप्रं अर्चत पूजनं कुरुत।

© Dharmartha Trust J&K. Digitized by eGangotri

एतदेवस्पष्टीक्रियते।उक्थानि।अप्रगीतमन्त्रसाध्यानिशस्त्राणि।स्तोत्राणिच।ब्रवीतनब्रूत।सुताअ
भिषुता।इंद्रवः।सोमास्त्वामस्थुः।आगतमेनमिंद्रंमत्तंकुर्वं[illegible]नरं[illegible]हः।सह
वंबलवंतंतमिंद्रंनमस्यतनमस्कुरुत।ब्रवीतन।ब्रवीते[illegible]ननमतनपन[illegible]
मस्तुः।मदीहर्षेछांदसः।प्रार्थनायांलुङ्।आगमानुस्[illegible]नस्यानित्यत्वादिडभा[illegible]
वरिवश्चित्रङ्।इतिकप्चुसहः।लुगकारेकाररेफाश्चव[illegible]तिमत्वर्थीयस्यलुक्।[illegible]नुप
त्वेप्रथमा।।इंद्रजुषस्वप्रवहायाहिशूरहरिह।पिबासुतस्यमतिर्नमधोश्चकानश्चारुम[illegible]
यानिमयाहवींषिदत्तानितानिप्रवह।आयाहि।आगच्छशूरविप्रनत।उपसर्गाक्षराणि।हरिह।अथवा
हरितवर्णः।हयायस्यसहरिहयाः।तस्यसंबोधनंक्रियतेहेहरिह।छांदसोयकारलोपः।पिबासुतस्य
सोमस्यउपसर्गाक्षराणि।मतिर्नमधोश्चकानः।चारुः।शोभनःमदायामहत्वाय।।७।। ।।अथद्विती
या।।इंद्रजलरंनव्यन्नपृणस्वमधोर्दिवोन।अस्यसुतस्यस्वर्नोपत्वामदाःसुवाचो।अस्थुरिति।।इंद्रज
ठरंउदरंनव्यं।नवतरं।पृणस्वपूरयस्व।मधोःमधुरःदिवोनसोमस्य।अस्यसुतस्यअभिषुतस्य।
स्वर्न।स्वर्गस्येव।उपत्वाउपसमीपे।त्वांमदाः।सुवाचः।शोभनवाचः।अस्थुःस्थितवंतः।।८।। ।।अथ
तृतीया।।इंद्रस्तुराषाण्मित्रोनजघानवृत्रंयतिर्न।बिभेदबलंभृगुर्नससाहेशत्रून्मदेसोमस्यति।।इंद्रः
तुराषाट्तुरिधुरि।सीदतियःसःतुराषाट्।मित्रोनमित्रइववजघानवृत्रंयत्नंयतिर्नउपसर्गाक्षराणि।।

53

© Dharmartha Trust J&K. Digitized by eGangotri

विभेद भिदं स्वबलं। वलो नाम दानवः तं बलं भ्रग्नुर्न। श्रीणि श्रीणि पदानेषु उपसर्गाश्चिराणि भ-
वंति। ससोह। सहितवान् शत्रून्। मदे भक्षणे कृते सोमस्य। तथाच निविदा पादे विहृतस्य षोडशि-
नः अस्य मदे जरितरिंद्र इत्यारभ्य बहूनि वीर्ययुक्तानि कर्म्माणि॥७॥ ॥वेदार्थस्य प्रकाशेन तमो
हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥७॥ इति श्रीमद्राजाधिराजपरमेश्वर
वैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये
सामवेदार्थप्रकाशे उत्तराग्रंथे पंचमोध्यायः संपूर्णः॥७॥ ॥यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं
जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ श्रीः॥७॥ ॥अथ षष्ठोध्याय आरभ्यते॥ तत्र गो-
वित्पवस्वेति प्रथमे खंडे प्रथमा॥ गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इंदो भुवनेष्वर्पि[illegible]
स्त्वं सुवीरो असि सोम विश्ववित्तं त्वा नर उप गिरेम आसत इति। हे इंदो सोम त्वं पवस्व॥ कीदृश-
स्त्वं गोवित् गवां लंभकः वसुवित् धनस्य लंभकः हिरण्यवित् हिरण्यस्य लंभकः रेतोधा असि इति। इंद्र-
स्य धातोषधीनां। यद्वा रेतः प्रजननसामर्थ्यं तस्य धारयिता भुवनेषु लोकेषु अर्पितस्य अभिषुतस्य।
नूं त्वं सुवीरोसि शोभनवीर्योसि विश्ववित् सर्वस्य वेदनवान् अस्मत्कृतैः स्तुतिः स्तवंतः॥ [illegible] ॥अथ
दोनेतारः गिरा स्तुत्या उपासते। नरो विप्रा इति पाठे॥७॥ ॥अथ द्वितीया॥ हे शवसा असि सोम वि॥ इंद्र-
तः पवमान वृषभ ता विधावसि। स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे इति॥ सो सोम त्व-

© Dharmartha Trust J&K. Digitized by eGangotri

54

विश्वतः सर्व्वतः सर्वेषु भुवनेषु नृचक्षा असि नृणां द्रष्टा भवसि ॥ हे पवमान पुनान सोम वृषभ आपां
वर्षकता आपाविधावसि । अपो विविधं गच्छसि । स त्वं नो [illegible] पवस्व [illegible] बहुभि
भिर्व्वासि केर्वादिद्रव्यैर्युक्तं । तथाहि रण्यवत् बहुभिर्हि [illegible] कं धनं वयस्व [illegible] यि:
क्ता भुवनेषु लोकेषु जीवसे जीवितुं प्रभवः स्याम तवे [illegible] ७॥ ॥ अथ तृतीया॥ [illegible]
निईयसे युजान इंद्रो हरितः सुपर्ण्यैः । तस्ते क्षरंतु मधु [illegible] तं पयस्तव व्रते सोम तिष्ठं [illegible] ॥ हे
इंद्रो सोम ईशानः सर्वस्य स्वामी त्वं इमा इमा इमानि भुवनानि भूतजातानि ईयसे गच्छसि । इं [illegible]
द्रिवादिभ्यः स्थानेभ्यः तिष्ठन् । किं कुर्वन् हरितो हरितवर्ण्णैः सुपर्ण्यैः सुपतनाः स्वघाः रथे युजानो योज
यन ताः सुपर्ण्यैः ते तव संबंधिन्यः मधुमत् माधुर्योपेतं घृतं दीप्तं पयः उदकं क्षरंतु । हे सोम तव व्रते क
र्मणि तिष्ठंतु कृष्टयो मनुष्याः सर्वा ईयसे वियसे इति पाठो ॥ ७॥ ॥ अथ द्वितीयतृचे प्रथमा॥ पवमा
नस्य विश्ववित् प्र ते सर्गा असृक्षत सूर्यस्येव न रश्मयः इति ॥ हे विश्ववित् विश्वस्य द्रष्टः सोम पवमान
स्य क्षरतस्ते तव सर्ग्राः सृज्यमाना धाराः सूर्यस्येव रश्मयः सूर्यस्य किरणा इव प्रकाशमानानेतिसं
प्र स्पर्द्धाः इदानीं प्रासृक्षत प्रसृज्यंते ॥ ७॥ ॥ अथ द्वितीया॥ केतुं कृण्वं नु दिवस्परि विश्वा रूपाभ्यर्षसि ॥
समुद्रः सोम पिन्वस इति ॥ हे सोम समुद्रः समुद्रवंति यस्माद्रसाः स समुद्रः स त्वं केतुं प्रज्ञानं कृण्वन्
कुर्वन् अस्माकं विश्वा रूपा विश्वानि रूपाणि देवानरिक्षाद् अभ्यर्षसि । अभिपवसे । पिन्वसे । नानाविध

© Dharmartha Trust J&K. Digitized by eGangotri

निवधनानि अस्मभ्यं यच्छसि ॥ ७ ॥ ॥ अथ तृतीया ॥ जज्ञानो वाचमिष्यसि पवमान विधर्म
णि। क्रंदन्देवो न सूर्य इति ॥ हे पवमान सोम देवो न सूर्यः द्योतमानः सूर्य इव जज्ञानः प्रादुर्भूतः
त्वं विधर्मणि विधारके दशापवित्रे क्रंदन् ध्वननवाचं इष्यसि प्रेरयसि। जज्ञानः हिन्वानः इति
पाठे ॥ क्रंदन् क्रान्तिरिति ॥ ७ ॥ ॥ अथ प्र सोमास इति सप्तर्चं तृतीयं सूक्तं तत्र प्रथमा ॥ ॥ प्र
सोमासो अधन्विषुः पवमानास इंदवः। श्रीणाना अप्सु वृंजत इति ॥ पवमानासः पूयमाना इं
दवो दीप्ताः सोमासः सोमाः प्राधन्विषुः। धन्वति गतिकर्मा। प्रगच्छंति। किंच श्रीणाना गोभिः श्र
यमाणा अप्सु अप्सु वसतीवरीषु वृंजते गच्छंति। वृजव्रजी गतौ। संपृक्ता भवती स्पर्यः। वृंजते
मृंजत इति पाठे ॥ ७ ॥ ॥ अथ द्वितीया ॥ अभि गावो अधन्विषुरापो न प्रवता यतीः। पुनाना इं
माश्वतेति ॥ गावो गमनशीला इंदवः सोमाः अभ्यधन्विषुः दशापवित्रमभिगच्छंति ॥ [illegible] ॥ पु... वी
प्रवता प्रवणवता देशेन यती गच्छंत्य आपो न आप इव। प... तु पुनानाः इंद्रं श्रीणा... ः सोम पवमा
नास्तु। पात्रं आहुति प्रणाया इंद्रमेव वायामुवन् ॥ ७ ॥ ॥ अथ तृतीया ॥ प्र पव... प्रकाशमानानेतिसं
मे शयमाय नः। अभिर्यतो विनीयस इति ॥ हे पवमान सोम ॥ ... परि विश्वानि रूपा... धर्षसि ॥
सि प्रगच्छसि। पवित्रं तरेवाह। अभिर्नेत भिः ... भिर्यतो गच्छ... ः विनीय ... ः स त्वं ... वृद्धो नीता मा... नः ...
पातव इति पाठे ॥ ७ ॥ ॥ अथ चतुर्थी ॥ इंद्र यदद्रिभिः सुतः पवित्रं परिदीयसे अरमिंद्रस्य धाम्न

© Dharmartha Trust J&K. Digitized by eGangotri

इति॥हेइंद्रोत्वंयदाअद्रिभिर्ग्रावभिःसुतोऽभिषुतःपवित्रंदशापवित्रंपरिदीयसे।परिगच्छसी।त्य
र्थः।तदाइंद्रस्यधाम्नेस्थानायधारकोयोदरायवाअरंपर्य[illegible]भवसि[illegible]धावसी
तिपाठौ॥७॥ ॥अथपंचमी॥त्वंसोमनृमादनःपवस्व[illegible]तिः।सस्नि[illegible]
55 हेसोमनृमादनोनृणांमादयिताचर्षणीधृतिःचर्षणी[illegible]लिभिःप्रजाभिर्धृ[illegible]
त्वंसस्निःशुद्धःअनुमाद्यःस्तुत्यःसपवस्वेतिसमन्व[illegible]तंचर्षणीधृतिश्चर्षणीस[illegible]
॥७॥ ॥अथषष्ठी॥ ॥पवस्ववृत्रहंतमउक्थेभिरनुमाद्यः।शुचिःपावकोअद्भुतइति॥हेसो[illegible]
तमःशत्रूणामतिशयेनहंतस्त्वंपवस्वक्षर।कीदृशस्त्वंउक्थेभिःशास्त्रैःअनुमाद्यःस्तुत्यःशुचिः
शुद्धःपावकोन्यस्यशोधकः।अद्भुतोमहान्एवंमहानुभावःपवस्व।वृत्रहंतमःवृत्रहंतमेतिपाठौ
॥ ॥अथसप्तमी॥शुचिःपावकउच्यतेसोमःसुतःसमधुमान्।देवावीरघशंसहेति।सुतोऽभिषु
तःमधुमान्माधुर्योपेतःससोमःशुचिःस्वयंशुद्धःपावकःशोधकश्चोच्यते।तथादेवावीर्देवानामवि
तातर्पयिता।अघशंसहाअघंपापंशंसतीसघशंसाअसुरास्तेषांहंतेतिचोच्यते।सुतःसमधुमा
न्सुतस्यमधवइतिपाठौ॥७॥ ॥इतिषष्ठेध्यायेप्रथमःखंडः॥७॥ ॥अथद्वितीयखंडेप्रकविरिति
सप्तर्चंप्रथमंसूक्तंतत्रप्रथमा॥प्रकविर्देववीतयेऽव्यावारेभिरव्यत॥साह्वान्विश्वाअभिस्पृध
इति॥कविर्मेधावीसोमःदेववीतयेदेवानांपानायअव्यावारेभिरविसंबंधिभिर्वालैर्दशापवित्रे

© Dharmartha Trust J&K. Digitized by eGangotri

णा अव्यत अव्यते प्राप्यते। साह्वान् शत्रूणां सोढा सोमः विश्वाः स्पृधः सर्वान् संग्रामान् हिंसका
न्वा अभिभवतीति शेषः। अव्यावारेभिरव्यत अव्यावारैभिरर्षतीति पाठौ॥७॥ अथ द्वितीया॥
स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति। पवमानः सहस्रिणमिति॥ हि विस्मस खलु पवमानः
सोमः जरितृभ्यः स्तोतृभ्यः गोमन्तं बहुभिर्गोभिर्युक्तं सहस्रिणं सहस्रसंख्याकं वाजमन्नं आ आ
भिमुख्येन इन्वति व्याप्नोति प्रयच्छतीत्यर्थः॥७॥ ॥ अथ तृतीया॥ परि विश्वानि चेतसा मृज्यसे पव
से मती। स नः सोम श्रवो विदः॥ इति॥ हे सोम त्वं मती मत्या अस्मत्स्तुत्या मृज्यसे दशापवित्रेण शोध्य
से। ततः पवसे क्षरसि। एवंभूतः स त्वं नोऽस्मभ्यं श्रवोन्नं विदो देहि। किं च चेतसा स्वीयेनास्मदनुकूले
न चित्तेन परि विश्वा परितः स्थितानि विश्वानि सर्वाणि धनानि देहीति शेषः। मृज्यसे मृज्यसे इति पाठौ
॥७॥ ॥ अथ चतुर्थी॥ अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिं। इषं स्तोतृभ्य आ भर॥ इति॥ हे सोम
त्वं बृहद्यशः महतीं कीर्तिं अभ्यर्ष अभिगमय। मघवद्भ्यो हविष्मद्भ्योऽस्मभ्यं ध्रुवं रयिं वीर्यवद्धनानि च किं
च इषमन्नं स्तोतृभ्योऽस्मभ्यमाभराहर॥७॥ ॥ अथ पञ्चमी॥ त्वं राजेव सुव्रतो धितः। सुतः स मधुमा
पुनानो वह्ने अद्भुतेति॥ हे वह्ने यज्ञस्य वोढः अद्भुत महत् त्वं॥७॥ तः अथ द्वितीयखण्डमक वरति
द्यास्तुतीः आ विवेशिथ आविशसि॥७॥ ॥ अथ षष्ठी॥ स वह्निरप्सु दुष्टरो मृज्यमानो गभ
स्त्योः। सोमश्चमूषु सीदति॥ स सोमः वह्निर्यज्ञस्य वोढा अप्स्वन्तरिक्षे वर्तमानो दुष्टरो दुःखेनाभिभवितुं तरणीयो अम्

© Dharmartha Trust J&K. Digitized by eGangotri

न्यमानः शोध्यमानो गभस्त्योर्हस्तयोरेवंभूतस्सन्त्वमृषुपात्रेषु सीदति ॥ ७ ॥ ॥ अथ सप्तमी ॥
श्रीदुर्मखोन मंहयुः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवी[illegible]मिति [illegible]ऽनघशी
स्त्वं मंहयुर्महतिर्दानकर्मा दानेच्छुः । मखोन दान मिव प[illegible]च्छसि । किंकुर्व[illegible]ति
सुवीर्यं शोभनवीर्यं दधत् प्रयच्छन् ॥ ७ ॥ ॥ अथ यवं[illegible]मिति चतुर्ऋच्चं द्वितीयं[illegible]
यवं यवं नो अंधसा पुष्टं पुष्टं परिस्रव । विश्वा च सोम सौ[illegible]ति । हे सोम त्वं नोऽस्मभ्यं पु[illegible]तं बहु
लं यवं यवं पुनः पुनर्यवंतं रसं अंधसा अन्नरूपया धारया परिस्रव क्षर । तत्र प्रार्थयितुरस्म[illegible]
तं पीडितत्वात् । मा बाधेथे चेति द्विर्भावः । अवाधन मा बाधः प्रीडा । प्रयाकृधर्मो नाभिधेयधर्मेऽद्रस्यके
। वत्तिकारेस्य अपिच विश्वा विश्वानि सौभगा सौभगानि धनानि परिस्रव अस्मभ्यं प्रयच्छेत्यर्थः ॥
॥ ७ ॥ ॥ अथ द्वितीया ॥ इंदो यथा तव स्तवो यथा ते जातमंधसः । निबर्हिषि प्रिये सदइति । हे इंदो सोम
अंधसः अन्नरूपस्य ते तव संवर्धियवः अस्मभ्यं देयमन्नं यथा जातं प्रादुर्भूतमस्ति स्तवः सूबोबलं ॥
यथा प्रादुर्भूतमस्ति तथा त्वं प्रिये प्रीणयितरि बर्हिषि अस्मद्यज्ञे निषदः निषण्णो भव ॥ ७ ॥ ॥ अथ तृ
तीया ॥ उत नो गो विदश्ववित् पवस्व सोमांधसा । मक्षूतमेभिरहभिरिति । उतापि च हे सोम नोऽस्माकं
गोवित् गोप्रदः अश्ववित् अश्वप्रदः त्वं मक्षूतमेभिर्मक्षूतमैरतिशयेन शीघ्रैरहभिरहोभिर्हेतुभिरंज
सा पवस्वान्नरूपया धारया क्षर ॥ ७ ॥ ॥ अथ चतुर्थी ॥ यो जिनाति न जीयते हंति शत्रूमभीत्या सपस्व

५६

© Dharmartha Trust J&K. Digitized by eGangotri

सहस्रजिदिति॥ हे सहस्रजित् असंख्यातशत्रूणां जेतः सोम यो भवान् जितानि शत्रून् जयति स्व
यं शत्रुभिर्न जीयते। प्रकारांतरेणान्वाहे॥ शत्रुमभी से स्वयमेव शत्रुमागत्य हंति किंतु तेन न ह
न्यत इति विशेषः एवंभूतः सन् पवस्व धारया सर॥छ॥ ॥अथ तत्र वासके तृतीयसूक्ते प्रथमा॥ या
स्ते धारा मधुश्चुतः सृग्रमिंद्र ऊतये। ताभिः पवित्रमासद इति॥ भो इंद्रो सोम ते तव मधुश्चुतो मधुरर
सस्य श्चोतयित्र्यो धाराः ऊतये रक्षणाय असृग्रं सृज्यंते ताभिर्धाराभिस्त्वं पवित्रमासदः आसी
द॥छ॥ ॥अथ द्वितीया॥ सो अर्षेंद्राय पीतये तिरो वाराण्यव्यया। सीदन्नृतस्य योनिमेति॥ हे सोम सो
भिषुतस्त्वमव्यया अविमयानि वाराणि वालानि तिरस्तिरस्कुर्वन् ऋतस्य यज्ञस्य योनिं कारणभू
तं द्रोणपवित्रं आसीदन् आभिमुख्येन उपविशन् इंद्रायेंद्रस्य पीपीतये पानाय अर्षसि स[illegible]
योनिमासीदन्न योनावनेषेति पाठे॥छ॥ ॥अथ तृती[illegible] ॥ त्वं सोम परिस्रव स्वादिष्ठो [illegible] हं इदे[illegible]भ्यः व
रिवो विद्घृतं पय इति॥ हे सोम स्वादिष्ठः स्वादुतमः वरिवो [illegible] मन् अस्मदभिलषितस्य ध[illegible] नवः सूबा[illegible]त्र
मं गिरोभ्योऽङ्गिरसामथाय घृतं दीप्तं पयः क्षीरवत् सार[illegible]स्म [illegible] परिस्रव परिह[illegible]नव॥छ॥ ॥अथ त
पाठे॥छ॥ इति षष्ठेऽध्याये द्वितीयः खंडः॥छ॥ अथ तृतीय [illegible]मिभिरह[illegible]मत[illegible]ौ तापिब हे सोम [illegible]व अस्माकं
विघ्नतोग्ने त्रिकित्र उषसामिवेतयः। यदोषधीरभिसृष्टो वनानि च परिस्व[illegible]ीष्ट्रे रघुषि अन्नमासनी तं ज
अग्ने अग्नेः अंगनादिगुणयुक्तस्य तव अग्नियो रश्मिलक्षणा विभूतयः त्रिकित्रे प्रज्ञायंते। तत्र दृष्टांतः॥

© Dharmartha Trust J&K. Digitized by eGangotri

वर्षस्येव विघ्नतः यथा वर्षितुर्मेघस्य संबंधिन्यो विघ्नतः उषसामिवेतयः यथा वोषसां एतयः गमनशी
लाः व्याप्ताः प्रकाशाः प्रक्षायंते तात् द्वद्दित्यर्थः। कदेत्स्याह [illegible] त्वं [illegible] वनान्
निव अभिसृष्टो रंधुं विसृष्टस्सन् स्वयमात्मना आस [illegible] मुरवे अन्न [illegible]
परिविनुषे परिक्षिपसीत्यर्थः। विघ्नतोऽग्नेः विघ्नतश्चि [illegible] तिउषसां नकेतवः उष [illegible]
आसनि आंस्य इति पाठः॥७॥ ॥अथ द्वितीया [illegible] तो पकृत इषितो वशां अनु [illegible] न्नावषि
ष्ठितिष्ठसे आतयंते रथ्यो यथा पृथक् शद्वंस्यग्ने अजरस्य धक्षतः इति॥ हे अग्ने त्वं य [illegible]
यस्कृतो वायुना कंपितो वशान् कांतान् वनस्पतीननु प्रतितृषु क्षिप्रं इषितः प्रेषितस्सन् आन्ना अन्ना
न्यदनीयानि वनस्य सादीनि स्थावराण्येव विषतृष्या भुवन् वितिष्ठसे इतस्ततो गच्छसि। तदानीं अजरस्य
जरारहितस्य धक्षतः काष्ठानि दहतस्तेन वशाद्वंसितेजांसि रथ्यो रथ्यो रथिनः तद्वत् पृथक् पृथग् आयंते ने
गच्छंति। अजरस्य अजराणीति पाठो॥७॥ ॥अथ तृतीया॥ मेधाकारं विदथस्य प्रसाधनमग्निं हो
तारं परिभूतरं मतिं। त्वामर्भस्य हविषः समानमित्त्वां महो वृणते नान्यं त्वदिति॥ मेधाकारं प्रज्ञायाः कर्त्ता
रं विदथस्य यज्ञस्य प्रसाधनं प्रकर्षेण साधकं होतारं देवानामाह्वातारं परिभूतरं अतिशयेन शत्रूणां प
रिभवितारं मतिं मंतारं यं त्वामग्निं वयमृत्विजः वृणीमह इति शेषः। हे अग्ने त्वामित्त्वामेवार्भकस्याल्पस्य
हविषः पुरोडाशादिकस्य भक्षणार्थमिति शेषः। समानमित्सहैव ऋत्विजः वृणते प्रार्थयंते। महो महतः।

सोमात्मकस्य हविषो भक्षणार्थं त्वामित्थामेव च पुनेत्वत्तो न्यं अतिरिक्तं रक्षं न रुणेन परिभू
तरं परिभूतमं इतिच्छंदोगा बह्वृचानां पाठः॥७॥ त्वाम भक्षस्य हविषः तमित् अहं हविषी ति च त्वाम्
हः तमिन्महे ति च॥७॥ ॥अथ द्वितीयवर्गे प्रथमा॥ पुरूरुणा चिद्ध्यस्त्यवो नूनं वां मित्रावरुण।
मित्र वंसि वां सुमतिमिति॥ हे मित्रावरुणौ वां युवयोः पुरुणा प्रथमार्थे तृतीया। पुरोरपि बहु उ
रु बहुतरं अथवा पुरूरुवं तं दुरूरु च पुरूरु। अस्त्यंतं बहु न रमित्यर्थः। तादृक् अतो रक्षणं भूनं नि अये
न अस्तीति हि प्रसिद्धौ विदितिपूरणः। हे वरुण हे मित्र। वां युवयोः सुमतिमनुग्रहबुद्धिं वंसि संभजे
य अयद्वो अस्ति तस्मात् हंसी ति भावः॥७॥ ॥अथ द्वितीया॥ ता वां सम्यगद्रुह्वाणेषमश्याम धाम
च। वयं वां मित्रा स्याम ते॥ हे अद्रुह्वाणौ हे अद्रोग्धारौ नानौ प्रसिद्धौ वां युवां सम्यक् स्तुमनि अजरस्य
षः स्तोतारो वयं इषमन्नं धाम च आधारं अश्याम जग्मुयामहे। मित्रावरुणौ स्तोस्त्र तां कृपमय
स्याम भवेम। सम्यक् इति शेषः। युवाभ्यां स्वभूता वा तत्तमधाम च धायस इति पाठे प्रसाधन इति
ति च॥७॥ ॥अथ तृतीया॥ पातं नो मित्रा पायुभिरुत त्रायेथां सुत्रात्रा। सा[ह्या]म धाकारं दस्यायाः कृत्वो
ति॥ हे मित्रावरुणौ रक्षौ युवां नोस्मान् पायुवां नोस्मान् [illegible] रक्षणैः [illegible] परिभूतरं अतिशये [illegible] शत्रूणां प
त्राशोभनेन त्रानानेन त्रायेथां पालयथं। इष्ट मास्म निष्फ [illegible] रभे [illegible] स्वेक [illegible] अस्य
वा त्रायेथां। अभिमतप्रापणेरक्षत मित्यर्थः। वयं च तनूभिः पुत्रादिभिः सहिताः स्वीयैः गैर्वदस्यून्

© Dharmartha Trust J&K. Digitized by eGangotri

58

शत्रून्सहाम अभिभवेम। मित्रारुद्रेतिपाठे।। त्रायेथांत्रायेतामितिसहाममनुष्यमितिच।।७।। ।।

।। अथतृतीयत्वेप्रथमा।। उत्तिष्ठन्नोजसासहपीत्वाशि[illegible]अवेपय[illegible]सुतमिन्

।। हेइंद्रत्वंपात्वा ओजसाबलेनसहोत्तिष्ठन्शिप्रेहनू अ[illegible] अकंपयः [illegible]

किंपीत्वा। चमूचम्वोरधिषवणफलकयोस्सुतमभिषु[illegible]सोमंपीत्वापीत्वेतिपाठे[illegible]

द्वितीया।। अनुत्वारोदसीउभेस्पर्द्धमानमददेतां। [illegible]दस्युहाभवइति। हेस्पर्द्धमा[illegible]त्रुभिः

सहस्पर्द्धंकुर्वाणेंद्रत्वात्वामनुलक्ष्यउभेरोदसीउभेअपिधाव।। पृथिवीव्योमददेतांइष्यत[illegible]

दस्युहाभवतः शत्रूणांहंताभवसितथामददेतामितिसंबंधः। स्पर्द्धमानमददेतांक्रममाणमक्षेप

तामितिपाठे।।७।। ।।अथतृतीया।।७।। वाचमष्टापदीमहंनवस्रक्तिमृतावृधं। इंद्रात्परितन्वं

ममइति।। अष्टापदीं अष्टाभिर्दिग्भिरष्टापदींनवस्रक्तिंउपरिस्थितेनादित्येननवस्रक्तिं। आ

सुरिस्तुत्यातामिसर्पः।। ऋतावृधंयज्ञस्यवर्द्धिंकुर्वतींवाचंस्तुतिंमयीपरिपूर्णींइंद्रात्तन्वंतनूं

न्यूनांसंतीं अहंपरिममेन्यूनेयत्तांकरोमीसर्पः। कार्त्स्न्येनस्वरूपंस्तुत्याविषयीकर्तुमशक्यत्वा

दितिभावः। ऋतावृधंऋतस्पृशामितिपाठे।।७।। ।।अथचतुर्थत्वेप्रथमा।। इंद्राग्नीयुवामिमे

भिस्तोमा अनूषत। पिबतंशंभुवासुतमिति।। हेइंद्राग्नीयुवांइमेस्तोमास्तोतारः अभ्यनूषत अ

भिष्टुवंति। हेशंभुवासुखस्यभावयितारावींद्राग्नीसुतमभिषुतमस्मदीयंसोमंपिबतं।।७।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

॥ अथद्वितीया॥ यावांसंतिपुरुस्पृहोनियुतोदाशुषेनरा। इंद्राग्नीताभिरागतमिति। हेनरानेता

रौ इंद्राग्नी वांयुवयोः स्वभूताः पुरुस्पृहः पुरुभिर्बहुभिस्पृहणीयाः दाशुषेहवींषिदत्तवतेयज

मानार्थंउसन्नायानियतोऽश्वाः संतिहेइंद्राग्नीताभिर्नियुद्भिःसहआगतमागच्छतं॥ ७॥

॥ अथतृतीया॥ ताभिरागच्छतंनरोपेदंसवनंसुतं। इंद्राग्नीसोमपीतयइति। हेनरानेतारौ

इंद्राग्नीसूयते अभिषूयतइतिसवनः सोमः इदंसवनंइमंसोमंसुतमभिषुतंउपप्रति। यद्वाइदं

प्रातःसवनंउप अस्मिन्सवनेसुतमभिषुतंसोमंप्रतिताभिर्नियुद्भिरागच्छतं किमर्थंसोम

पीतये अस्यसोमस्यपानार्थं॥ ७॥ ॥ इतिषष्टेऽध्यायेतृतीयःखंडः॥ अथचतुर्थखंडे प्रथम

तृचेप्रथमा॥ अर्षासोमद्युमत्तमोभिद्रोणानिरोरुवत्। सीदन्योनौवनेष्वेति। हेसोमपवमान

द्युमत्तमः अतिशयेनदीप्तिमान्वनेष्वरण्येषुमत्त्वं योनौस्वकारणभूतेपर्वतादिस्थ... आ

सीदन्सर्वतोगच्छंस्त्वंद्रोणानि। प्रयोगवाहुल्यापेक्षयाबहुवचनं। द्रोणकलशानभिलक्ष्य

रोरुवत्भृशंकरोतिखलुयोनौवनेषाध्येनो। नयोनेर्मेनस्वदे॥ ७॥ ॥ अथ... कितुर्मिसाकर...

यवायवेवरुणायमरुद्भ्यः। सोमाअर्षंतुविष्णवइति। मरुत्वतुर्पतिसद्विर्मा॥ इंद्राग्नीयुवा...

कारः वनषणसंभक्तौ। जनसनेतिविद्धुःअस्वंविद्धुनोरिति। ...सोम... णकलशाभि

च्छंतु। किमर्थंइंद्राय। सर्वदेवानांप्रथमतएवइंद्रःसोमान्पिबतितस्मात्पूर्वमेवाभिहितइंद्रःतस्मैवायवे

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मै हायापवेऐंद्रवायवे हि इंद्रस्यानंतरं वायुः सोमा सिबति। तस्मात्तस्तु वायुरुक्तः तस्मै वरुणायत

दनंतरं वरुणः सोमानूपिबति तस्मै च। ततः मरुद्भ्यो मितं म[illegible]र्भ्यः[illegible]भ्यः [illegible]

भ्यो वे सर्वजगद्व्यापिने एतन्नामकाय देवाय च एतेभ्यः स[illegible]भ्यः सोमा[illegible]

सोमा अर्षन्तु सोमो अर्षतीति पाठे॥८॥ ॥अथप[illegible]॥ इषं तोकाय नो द ध[illegible]

श्वतः॥ आपवस्व सहस्रिणमिति॥ हे सोम त्वं नोस्म[illegible]काय पुत्राय एषमन्नं दधच्छि[illegible]छन्

59

सहस्रिणं सहस्रसंख्याकं धनं विश्वतः सर्वतो दिदिक्षु[illegible]स्मभ्यं वा पवस्व आपप्रापय॥ अस्म[illegible]

त्रापय च अन्न धनादिकं प्रयच्छेत्यर्थः॥८॥ ॥अथ प्रगाथरूपे द्वितीयसूक्ते प्रथमा॥ सोम उष्वाणः

सोतृभिरधिष्णुभिरवीनां॥ अश्वयेव हरिता याति धारया मंद्रयायाति धारयेति॥ सोतृभिरभिषु

एव ऋत्विग्भिः स्वानोभिषूयमाणः सोमः अवीनां स्नुभिर्म्मांस्पृत स्नूनामुपसंख्यानमितिसा

नुनासिकस्य स्नुभावः॥ समुच्छ्रितैर्वालैः पवित्रैः अधियाति अधिकं गच्छति॥ इति प्रसिद्धे॥ अश्वयेव

वडवयेव हरिता हरितवर्णया धारया मंद्रया मदकारिण्या धारया म द्रोणकलशमधिगच्छति॥ उषा

ण उ षु वाण इति पाठे॥८॥ ॥अथ द्वितीया॥ अनूपे गोमान् गोभिरक्षाः सोमो दुग्धाभिरक्षाः॥

समुद्रं न संवरणान्यग्मन्मंदी मदाय तोशत इति॥ गोमान् गोयुक्तः सोमः अनूपे निम्ने देशे कलशे

गोभिर्गोविकारैः क्षीरादिभिः सह अक्षाः क्षरति। तदेवोच्यते। स सोमः आत्मनो मिश्रणार्थं दुग्धाभिर्गो

© Dharmartha Trust J&K. Digitized by eGangotri

भिःसहअक्षीःक्षरतिस्रवते।लुङि रूपं।किंचसमुद्रंनयथासमुद्रमुदकानिगच्छंतितद्वत्संवरणा

निसंभजनीयानिरसरूपाणि अन्नानिद्रोणकलशं अग्मन् गच्छंति।गमेर्लुङि च्लेर्लुकि रूपं।किं

वामेदीमत्सरःसोमःमदायमदार्थंतोत्रातेहन्यतेअभिषूयते।तोशतिर्वधकर्मा॥७॥ ॥अथत

तीयतृचेप्रथमा॥यःसोमचित्रमुक्थ्यंदिव्यंपार्थिवंवसु।तन्नःपुनानआभर॥हेसोमयच्चित्रंचा

यनीयंउक्थ्यंस्तुत्यंदिव्यंदिविभवंपार्थिवंपृथिवीसंबंधंचयद्वसुधनमस्तितन्नोस्मभ्यंपुनानःपूयमा

नःसन् आभरआहर॥७॥ ॥अथद्वितीया॥वृषापुनानआयूंषिस्तनयन्नधिबर्हिषि।हरिःसन्यो

निमासदत्॥हेसोमआयूंषियजमानादीनांऋत्विजांजीवितकालान्पुनानःशुद्धान्कुर्वन् व

षाकामानांवर्षकस्त्वंस्तनयन्शब्दंकुर्वन्नधिबर्हिष्यतीतिसप्तम्यर्थेनुवादो।आस्तीर्णेबर्हिषि

सन्हरितवर्णःसन्योनिंस्वकीयंस्थानंआसदः [illegible]सीदः।आयूंषिआयुष्येतिपाठे [illegible]॥अ

सदःआसददितिच॥७॥ ॥अथतृतीया॥युवंहि [illegible] स्वःपतीइंद्रश्चसोमगोपती।ई[illegible]पिप्य

तंधियः॥हेसोमत्वंइंद्रश्चयुवंहियुवांखलुस्वःपती [illegible]स्वामिनौस्थोभ[illegible]मधिगच्छ[illegible]उभा

गोपालकौईशानाईश्वरौसंतौधियोस्मदीयानिकर्माणि [illegible]मान् [illegible] रक्षतः।सोमोदुग्धा [illegible] पाः॥

हिस्थःस्वःपतीतिपाठे॥७॥ ॥इतिचतुर्थेऽध्यायेचतुर्थःखं[illegible]॥७॥ ॥[illegible]अथप्रथमतृ[illegible]

प्रथमा॥इंद्रोमदायवावृधेशवसेवृत्रहानृभिः।तमिन्महत्स्वाजिषूतिमर्भेहवामहेसवाजेषुप्रनोविष

© Dharmartha Trust J&K. Digitized by eGangotri

इति॥ वृत्रहा वृत्रस्यावरकस्य वृष्टिनिरोधकस्य मेघस्यासुरस्य वा हंता। यद्वा आवरकाणां शत्रू
णां हंता इंद्रः मदाय वावृधे शवसे। बलनामैतत्। बलार्थं [illegible] यक्षय[illegible] धेस्तैः
शस्त्ररूपाभिः स्तुतिभिः प्रवर्द्धितो बभूव। स्तुत्या हि देव[illegible]तबलास्तेना[illegible]तं स
इंद्रं महत्सु प्रभूतेषु आजिषु संग्रामेषु ऊतिं रक्षां कुर्वं[illegible]तिशेषः। हवामहे अस[illegible]ाय
आह्वयामहे। अपि च। तमेतमेवंभूतमिंद्रं अर्भे अल[illegible]संग्रामे हवामहे। अस्माभिराहू[illegible]ः स इं
द्रः वाजेषु संग्रामेषु नोऽस्मान् प्राविशत् प्रावतु प्रकर्षेण परक्षतु। ऊतिमर्भे उतेमर्भ इति ष[illegible]
वृधेः वृधेः कर्मणि लिट्। तुजादित्वादभ्यासस्य दीर्घत्वं। नृभिः। सवेकाचः इति प्राप्तस्य विभक्त्युदा
त्तत्वस्य न गोश्वान्यतरस्यामिति प्रतिषेधः। हवामहे ह्वयतेर्लिटि ह्वः इस्यनुवृत्तौ बहुलं छंदसीति सं
प्रसारणं। शपि गुणावादेशौ। अविषत्। अव रक्षणे लेटि यम् अडागमः। इतश्च लोप इति अकारलोपः टप४
सिब्बहुलं लेटीति सिप्। तस्याद्धातुकत्वात्। बलादिलक्षण इट्॥७॥ ॥ अथ द्वितीया॥ असि
हि वीर सेन्योऽसि भूरि पराददिः। असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वस्विति
॥ हे वीर शत्रुक्षेपणकुशलेंद्र त्वं सेन्योऽसि सेनार्हो भवसि। त्वमेकोऽपि सेनासदृशो भवसीत्यर्थः॥
हि यस्मादेवं तस्मात् भूरि प्रभूतं शत्रूणां धनं पराददिः परादाता। शत्रूणां पराङ्मुखं यथा भवति
तथा आदाता असि भवसि। दभ्रस्य चित् अल्पनामैतत्॥ अल्पस्यापि तव स्तोतुर्वृधो वर्द्धयितासि॥ ।

६०

© Dharmartha Trust J&K. Digitized by eGangotri

तथायजमानाययोगंकुर्वतेसुन्वतेसोमाभिषवंकुर्वतेपुरुषायशिक्षसिअपेक्षितंधनंददासि । शि
क्षतिर्दानकर्मा । यस्मात्तेनत्ववसुधनंभूरिबहुलंअस्मस्यंधनंविधेतेनस्याद्ददासीतिभावः । पराददिः ।
दुदाञ्दाने । आदृगमहनजनइतिकिप्रत्ययः । लिड्वद्भावाद्द्विर्वचनेऽभ्यासह्रस्वत्वं । आतोलोपइतिचेत्याकार
लोपः । रधः । रधेरंतर्भावितण्यर्थादिगुपधलक्षणःकः । सुन्वतेशतुरनुमइतिविभक्तेरुदात्तत्वं ॥२॥
॥ अथतृतीया ॥ यदुदीरतआजयोधृष्णवेधीयतेधनं । युंक्ष्वामदच्युताहरीकंहनःकंवसौदधोऽस्मांइं
द्रवसौदधइति ॥ अत्रेदमाख्यानं । राहूगणपुत्रोगोतमःकुरुसृंजयानांराज्ञांपुरोहितआसीत् । ते
षांराज्ञांपरैःसहयुद्धेसतिसऋषिरनेनसूक्तेनेंद्रंस्तुत्वास्वकीयानांजयंप्रापयामासेति । तस्यतत्पु
रोहितत्वंवाजसनेयिभिराम्नातं । गोतमोहवैराहूगणउभयेषांकुरुसृंजयानांपुरोहितआसीदि
ति । यद्यदाआजयःसंग्रामाउदीरतेउद्गच्छंतिउत्पद्यंतेतदानीधनाधनंधृष्णवेयोधृष्णुर्धर्षकस्तस्मैशत्रू
णांजेताभवतितस्मैधीयतेनिधीयते । जयतोधनंभवतीत्यर्थः । हेइंद्रत्वंतादृशेषुयुद्धेषु[illegible]या ॥ तेषुम
दच्युताशत्रूणांमदस्यगर्वस्यच्यावयितारौहरीस्वकीयावश्वौयुंक्ष्वस्वरथेयोजय । सुन्वतेभूरितेवस्विति
विद्वज्जनानंतवपरिचरणमकुर्वंतंहनःहन्या । कंचनाल्पं सा त्वमेतेवसेनासहितोभव[illegible]र्थः ॥
रगतो । आदिः । दादिकः । अनुदात्तत्वाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः । इष्यते । बहुलंता
समितिनिघातप्रतिषेधः । धनासुपांसुलुगितिआदेशः । युंक्ष्वयुजिर्योगे । अंतर्भावितण्यर्थाल्लोट् । ध्यव ।

© Dharmartha Trust J&K. Digitized by eGangotri

नस्लिः इतिसंहितायांदीर्घत्वं।हनः हंते ह्लेडि सिप्यडागमः॥हनश्चवधश्चेतिवार्त्तिकेनतीनश्चादि
लोपेविभाषेतिप्रथमायाःस्त्रियाः भक्तेर्निघातप्रतिषेधः [illegible] लिंगव्य [illegible] स्यारदे [illegible]
टिव्यत्ययेनपरस्मैपदं।७। ।।अथद्वितीयत्वेप्रथम [illegible] रिछाविषूवा [illegible] तिर्य
।याइंद्रेणसयावरीर्वृष्णामदंतिशोभयावस्वीरनुस्व [illegible] यमिति॥स्वादेः स्वादु [illegible] रसस्य
6 कस्यइछाविषूवतः इच्छमनेनप्रकारेणसर्वेयुयइच्छमा [illegible] तियुक्तस्यमधोर्मधुररसस्य [illegible] सोमस्य
क्रियाग्रहणंकर्त्तव्यमितिकर्म्मणः संप्रदानत्वाच्चतुर्थ्यर्थेषष्टी॥एवंविधंसोमंगोर्य्योगोपस्स [illegible]
पिबंति।याःगावःशोभथाःवचनव्यत्ययः।इंद्रेणसहशोभंतेवृष्णाकामाभिवर्षकेणेंद्रेणसयावरीः
सहयांस्योगछंत्यः सत्सोमदंतितृष्टाभवंति।ताइंद्रपीतस्यसोमस्यशेषंपिबंतीत्यर्थः।वस्वीःपयः
प्रदानेनविवासकारिण्यस्ताःगावःस्वराज्यंस्वस्यैंद्रस्ययद्राज्यंराजत्वंतदनुलक्ष्यावस्थिताइतिशेषः।
विषूवतः।विष्लृव्याप्तौ।अस्माद्धातोरौणादिकःकुप्रत्ययः।ततोमतुप्।हृस्वनुड्भ्यांमतुबितिमतुपउदात्त
त्वं।अन्येषामपिदृश्यते।इतिसंहितिकोदीर्घः।व्यत्ययेनमतोर्णत्वंमधोःजसादिषुछंदसिवावचन
मितिवेर्ङितीतिगुणः।गोर्य्यः।षि।क्रीरादिभ्यश्चेतिङीष्।जसियणादेशोउदात्तस्वरितयोर्य्यणइतिपर
स्यानुदात्तस्यस्वरितत्वं।सयावरीः।याप्रापणे।आतोमनिन्क्वनिब्वनिपश्चेतिवनिप्।वनोरचेतिङीब्रेफौ।मदंतिमदी
हर्षेश्यन्निप्रातिभ्यत्ययेनशपप्।वस्वीःसवनिवासेभ्यःसृस्तृस्त्रिहीसादिनावसेरुप्रत्ययः।धात्वेनिदिस्वनु

© Dharmartha Trust J&K. Digitized by eGangotri

वृत्तेराद्युदात्तत्वं।वोतोगुणवचनादित्यत्रगुणवचनान्ङीबाद्युदात्तार्थमितिवचनान्नवसुशब्दात्ङी
पियणादेशः।जसिचांछंदसीतिपूर्वसवर्णदीर्घत्वं।स्वस्यराज्यंस्वराज्यं।अकर्म्मधारयेराज्यमित्युत्तरप
दाद्युदात्तत्वं॥८॥ ॥अथद्वितीया॥ता अस्यपृशनायुवःसोमंश्रीणंतिपृश्नयः।प्रियाइंद्रस्यधेनवोव
ज्रंहिन्वंतिसायकंवस्वीरनुस्वराज्यमिति॥ताःपूर्वोक्ताःअस्येंद्रस्यपृशनायुवःस्पर्शनकामाःपृश्न
योनानावर्णागावःइंद्रेणपातव्यंसोमंपयसाश्रीणंतिमिश्रीकुर्वंति।इंद्रस्यप्रियाःप्रीतिहेतुभूतास्ता
धेनवःसायकंअसुराणामंतकारकंवज्रमायुधंहिन्वंति।शत्रुषुप्रेरयंति।इंद्रोयथाशत्रुषुवज्रंप्रेरयति।
तथेंद्रस्यमदमुत्पादयंतीत्यर्थः।अन्यत्पूर्ववत्।हिन्वंति।हिविप्रीणनार्थः।इदित्वान्नुम्।सायकं।षोंत
कर्म्मणि।ण्वुल्यात्वेयुगागमः॥८॥ ॥अथतृतीया॥ता अस्यनमसासहःसपर्यंतिप्रचेतसःव्रतान्य
स्यसश्चिरेपुरूणिपूर्वचित्तयेवस्वीरनुस्वराज्यमिति।यत्रेतसःप्रकृष्टज्ञानास्तागावोस्येंद्रस्यसहो
बलंनमसास्वकीयेनपयोरूपेणान्नेनसपर्यंतिपरि[illegible]ततोपुरूणिबहूनिअस्येंद्रस्य[illegible]शत्रुवधा
दिरूपाणिवीर्यकर्म्माणिसश्चिरेसेविरे।ज्ञातव्यतयाइंद्रस्य[illegible]समंता[illegible]सर्वंपूर्वचित्तये[illegible]षुछंदसिवचन
मेवप्रख्यापनीयमनेनयुध्यमानावृत्रादयःसर्वमरणंप्राप्त[illegible]सियण[illegible]थमिव[illegible]दात्तस्वरितयोर्यणइतिपर
बोधनायेत्यर्थः।अन्यत्पूर्ववत्।पूर्वचित्तये।चितीसंज्ञाने।भावेक्तिन्।मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं।
॥८॥ ॥इतिषष्ठेऽध्यायेपंचमःखंडः॥८॥ ॥अथषष्ठेखंडेप्रथमतृचेप्रथमा॥असाव्यंशुर्म्मदायाप्सु

© Dharmartha Trust J&K. Digitized by eGangotri

द्सो गिरिष्ठाः॥ श्येनो न योनिमासदद् इति॥ गिरिष्ठाः पर्वते जातांशुः सोमो मदार्थ्यमदार्थं असाव्यभि

षुतः अप्सु वसतीवरीषु दक्षः प्रवृद्ध भवति। किंच श्येनो न यथा श्येनः पक्षी [illegible] न्यस्थानमा [illegible]

दति। तद्वद्यं सोमो योनिं स्वकीयं स्थानमासदत्। आसीद [illegible]॥ ॥अथ [illegible]

62 वासमप्सु धौतं नृभिः सुतं॥ स्वदंति गावः पयोभिरिति॥ [illegible] वात देवैः प्राप्यितं शुभ्र [illegible]

रूपं नृभिर्नेतृभिः सुतमभिषुतं अप्सु वसतीवरीषु धौ [illegible] धितं सोमं गावः पयोवः पय [illegible] श्रीरैः स्व

दंति स्वदयंति। धौतं सुतं धूतस्सुत इति पाठो॥७॥ ॥अ [illegible] तृतीया॥ आ घीमध्वं न्न हेतारम [illegible]

मतायाः॥ मधोरसं सधमादे इति॥ आत् आदनंतरं हेतारं प्रेरकं ईमिनं मधो मधुरस्य सोमस्य रसं सध

मादे यज्ञे अमतायामरणाय अश्रुसु भनत्र त्विजः शोभयंति॥ तत्र दृष्टांतः॥ अश्वं न। यथा प्रेरकमश्वं

संग्रामे सादिनः शोभनं तितद्वत्। हेतारं हेताइति पाठो॥ मधोर्मध्वइतिच॥७॥ ॥अथ प्रगाथरूपे त्ती

यसूक्ते प्रथमा॥ अभिद्युम्नं बृहद्यश इषस्पते दीदिहि देव देवयुं। विकोशं मध्यमं युवेति॥ हे इषस्पते अ

न्नस्य पते देव स्तोतव्य सोम द्युम्नं द्योतमानं बृहत् प्रभूतं यशोन्न रूपं देवयुं देवान् कामयमानं हविर्लक्ष

णं त्वदीयं रसं अभिदीदिहि अस्मन्ममाभिमुख्येन प्रकाशय प्रयच्छेसर्पः। यद्वा हे सोम यशोन्नं देवयुं

देवानिच्छंतं यजमानमभिलक्ष्य प्रकाशय। आमंत्रितस्य विद्यमानत्वेन पादादित्वादनिघातः॥ किंच। मध्य

मं अंतरिक्षस्थितं कोशं मेघं वियुव वर्ष्यर्थं विगमय विश्लेषय। देवयुं देवयुरितिपाठो॥७॥ ॥अथ द्वितीया॥

६२

© Dharmartha Trust J&K. Digitized by eGangotri

आवच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः। वृष्टिं दिवः पवस्व रीतिमपो जिन्वन् गविष्टये धि
यः इति। हे सुदक्ष शोभनबल चम्वोः अधिषवणफलकयोः सुतोभिषुतस्त्वं वह्निर्न विश्पतिः सर्वासां प्र
जानां वोढा। राजेव विशां प्रजानां वोढा सन् आवच्यस्व आगच्छ कलशमापवस्व। वचेर्गत्यर्थस्य व्यत्यये
न श्यपि रूपं। किं च त्वं अप अपां उदकानां रीतिं धारां वृष्टिं दिवो द्युलोकात् सवस्व कुरु। किं कुर्वन् गविष्ट
ये गामात्मन इच्छते यजमानाय धियः कर्माणि जिन्वन् प्रेरयन्। अपो जिन्वन् अपन् जिन्वेति पाठे।
॥८॥ ॥ अथ तृतीयतत्त्वे प्रथमा॥ प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिं। विश्वा परि प्रिया भुवद
ध द्विता॥ इति। प्राणा प्रनितः शशान विबहुलं छंदसीति विकरणस्य लुक् सुपां सुलुगिति सुप आकारादे
शः। यज्ञस्य प्राणयिता। चेष्टयिता। महीनां महतीनां मंहनीयानां वा अपां शिशुः पुत्रस्थानीयः सो
मः ऋतस्य यज्ञस्य दीधितिं प्रकाशकं धारकं वा स्वीयं धर्तं हिन्वन् प्रेरयन् विश्वा सर्वाणि [illegible] प्रिया
णि हवींषि परि भुवत् परिभवति। व्याप्नोति॥ अध अथ त्रिषु द्विता द्विधा भवति। दिवि च पृ[illegible]षस्य वर्तते
इत्यर्थः। प्राणा प्राणा इति पाठे॥९॥ ॥ अथ द्वितीया॥ उत्तानस्य पाण्योरभक्त यद्[illegible]यमानं ह[illegible]रस
प्तधामभिरध प्रियमिति। त्रितस्य एतन्नामकस्य ऋषेः स्तुत्य[illegible] यद्भक्षे [illegible] हस्ते सोमयशो [illegible]नेव यु
नयोः पाण्योः पाषाणवत् दृढयोः अधिषवणफलकयोः पर्वस्थानं सोमो यद्यदुपाभक्त समभजत।
अथानंतरं यज्ञस्य धामभिर्दरिकैः सप्तसप्तभिः छंदोभिर्गायत्र्यादिभिः प्रीयं प्रीणयितारं सोमं अभि

© Dharmartha Trust J&K. Digitized by eGangotri

स्तुवंति। अपि वा सक्तसर्प्पणशीलैर्घ्नसतीक्वयद्भिर्भिल्क्वैः सोममभिष्टुवंति॥७॥ ॥अथ तृतीया
॥त्रीणि त्रितस्य धारया। पृष्ठेष्वेरयद्रयिं। मिमीते अस्य योज[illegible]नि सुक्रतुः[illegible]त्रितस्य मम
यज्ञस्य स्वभूतानि त्रीणि सवनानि आसीयया धारया पृष्ठ[illegible]मसुरयिं[illegible]
मयत्तु। सुक्रतुः शोभनप्रज्ञः सोमः। अस्येंद्रस्य योज[illegible]नानि संयोजनकारी[illegible]णि विमि
मीते करोति। यस्मादेवं तस्मादिंद्रं सामसुमेरयत्विस्य प[illegible]रयत एरयेति पाठो॥७॥ ॥[illegible]चतुर्थ
त्वेमयमा॥ पवस्व वाजसातये पवित्रे धारया सुतः। इं[illegible]यसोम विष्णवे देवेभ्यो मधुमत्तरः[illegible]
63
सुतोभिषुतस्त्वं इंद्राय विष्णवे च अन्येभ्यो मित्रादिभ्यो देवेभ्यश्च मधुमत्तरः अतिशयेन माधुर्योपितः स
न्वाजसातये अन्नलाभाय पवित्रे धारया सह पवस्व क्षर। वाजसातये वाजसातम इति पाठो॥ मधुमत्तरः
मधुमत्तम इति च॥७॥ ॥अथ द्वितीया॥ त्वां रिहंति धीतयो हरिं पवित्रे अद्रुहः। वत्सं जातं न मातरः पव
मान विधर्मणीति॥ हे पवमान पूयमान सोम विधर्मणि विविधं हविषां धारके यज्ञे अद्रुहः द्रोहवर्जिताः
धीतयो अंगुलयः धीतय इत्यंगुलिनाम हरिं हरितवर्णं पवित्रे स्थितं त्वां रिहंति लिहंति। निष्पीडनार्थं स्पृशंती
त्यर्थः। तत्र दृष्टांतः। वत्सं जातं न मातरः। मातरः मातृभूता गावः उत्पन्नं वत्सं यथा लिहंति तद्वत्। धीतयो मा
तर इति पाठो। मातरो धेनव इति च॥७॥ ॥अथ तृतीया॥ त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे। प्रतिद्रा
पिममुंचथाः पवमान महित्वनेति॥ हे महिव्रत महाकर्मन् सोम त्वं द्युलोकं च पृथिवीं च अतिजभ्रिषे अ

© Dharmartha Trust J&K. Digitized by eGangotri

संतंबिभर्षि।डुभृञ्धारणपोषणयोः।नस्यणत्वंछंदसिलिटिसर्वविधीनांछंदसिविकल्पितत्वात्।अत्रइरा
गमः।अंतरिक्षेसोमात्मनापृथिव्यांलतारूपेणेति।एवंलोकत्रयवर्तित्वात्हेपवमानक्षरन्सोमत्वंमरु
त्वानामहत्त्वेनयुक्तःसन्द्रापिंकवचंप्रत्नमुंचथाः।प्रतिमुंचसि।।संवृणोषि।।७।। ।।अथपंचमत्वेप्र
यमा।।इंदुर्वाजीपवतेगोन्योघाइंद्रेसोमःसहइन्वन्मदाय।हंतिरक्षोबाधतेपर्यरातिंवरिवस्कृण्वन्वृज
नस्यराजेति।।इंदुःक्षरणशीलःसोमःवाजीबलवान्गोन्यो।।घाःगमनशीलानीचीनाग्ररससंघातःइंद्रे
सहोबलकरंसंइन्वन्प्रेरयन्सोमःमदायतस्यमदार्थंपवतेक्षरति।किंच।रक्षोराक्षसकुलंहंतिहिन
स्ति।किंच।अरातिंशत्रुंपरिबाधतेपरितःसंहरति।कीदृशः।वरिवोवरणीयंधनंकृण्वन्स्तोतृणांकु
र्वन्वृजनस्यबलस्यराजाईशितासोमइति।।अरातिंअरातीरितिपाठे।।७।। ।।अथषष्ठी
अधधारयामध्वापृचानस्तिरोरोमपवतेअद्रिदुग्धः।इंदुरिंद्रस्यसख्यंजुषाणोदेवोदेवस्यमत्सरोमदा
येति।।अध अथानंतरंअद्रिदुग्धःग्रावभिःदुग्धोअभिषुतःसोमःमध्वामदकारिण...धारया।पृचा
नः।देवान्सःपर्चयन्संयोजयन्रोमअविरोमभिःकृतंप...तं...तिरस्तिरस्कु...नेष्वीडनार्थं...ता
तेकलशेषुक्षरति।किंच।इंद्रस्यसख्यंसखिभावंकुर्वन्जुषा...सन्पवमानः...लिंहंतितद्वता...मत्सरोमा
दः।इंदुःसोमःदेवस्यइंद्रस्यमदायमदार्थंपवते।।७।। ।।अथतृतीया।।अभिव्रतानिपवतेपुनानोदेवोदेवान्
स्वेनरसेनपृंचन्।इंदुर्धर्माण्यृतुथावसानोदशक्षिपोअव्यतसानोअव्ये इति।।धर्माणिधारकाणिव्रतानि

© Dharmartha Trust J&K. Digitized by eGangotri

कर्माणि क्रतुथा ऋतौ काले वसान आच्छादयन् इंदुः सोमः पुनानः पूयमानः सन् अभिपवते कलशान्
भिलक्ष्य क्षरति। क्रीडुः देवः संक्रीडनशीलः स्वेनात्मीयेन रसेन देवान् निशादीनु पृंचन् संपर्चयन् संपृ
जयन्। तमिमं सोमं दशदश संख्याकाः क्षिपः अंगुलिनां ... कमर्थयि ... क
लयः सानौ समुच्छ्रिते अग्रे अविभवे पवित्रे अव्यतगम ... द्यातन् पवित्रे पूय ... अव्यतग
छंति॥ वीगत्यादिषु लङि व्यत्ययेनात्मनेपदं॥ व्रतानि ... ईतीति पाठे॥७॥ ॥इति षष्ठ ... षष्ठः २
खंडः॥ अथ सप्तमे खंडे प्रथम सूक्ते प्रथमा॥ आ ते अग्न ... इधीमहि द्युमंतं देवाजरं। यद्ध स्या ते प ... नीयसी
मिद्दीदयति द्यवीषं स्तोतृभ्य आ भरेति॥ हे अग्ने दे ... द्युमंतं दी ... प्तिमंतमजरं अजीर्णं त्वा आसमंत
इधीमहि दीपयामः। यद्ध यद्या खलु ते वस्या सा पनीयसी स्तुत्या समिद्दीप्तिर्घ विघ लोके दीदयति दीप्य
ते। तथा हे अग्ने स्तोतृभ्यो अस्मभ्यं इषमन्नं आभराहर॥७॥ ॥अथ द्वितीया॥ आ ते अग्न ऋचा हविः शु
क्रस्य ज्योतिषस्पते। सुश्चंद्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आभरेति॥ हे ज्योतिष्पते दी
प्तेः स्वामिन् अग्ने शुक्रस्य दीप्तस्य ते तुभ्यं ऋचा मंत्रेण सह हविराभिमुख्येन हूयते। हे सुश्चंद्र सुष्ठु आह्ला
दक शोभन हिरण्य वा हे दस्म शत्रूणामुपक्षपयितः विश्पते विशां प्रजानां पालक हव्यवाट् हविषो वोढः शि
ष्टं गतं ज्योतिषः श्रोविषः इति पाठे॥७॥ ॥अथ तृतीया॥ उभे सुश्चंद्र विश्पते दर्वी श्रीणीष आसनि। उतो
न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आभरेति॥ हे सुश्चंद्र शोभनाह्लादन शोभन हिरण्य वा अ

© Dharmartha Trust J&K. Digitized by eGangotri

ग्ने हे विश्पते विशां प्रजानां पते उभे दर्व्यौ हविः पूर्णे जुहूपभृतौ आसनि आस्ये आग्नी एषि आश्रय
सि पचसि वा। उतो अपि च नो अस्मान् पुष्टे पुयागे पुष्टौ उ पुपूर्या उत्पूरय फलैः हे शावसस्पते बलस्य पाल
यितः इषं मिस्या इत्येगंतं॥ अथ तृतीयतृचे प्रथमा॥ इंद्राय साम गायत विप्राय बृहते बृहत्। ब्रह्मकृते विप
श्चिते पनस्यवे इति। हे उद्गातारः इंद्राय बृहत् एतन्नामकं साम गायत पठत। कीदृशाय विप्राय मेधावि
ने बृहते महते ब्रह्मकृते वषट्कृते इति राहविर्लक्षणस्यान्नस्य कर्त्रे विपश्चिते विदुषे पनस्यवे स्तुतिमिच्छते ब्र
ह्मकृते धर्मकृते इति पाठो॥८॥ ॥अथ द्वितीया॥ त्वमिंद्राभिभूरसि त्वं सूर्यमरोचयः। विश्वकर्मा विश्वदे
वो महां असीति। हे इंद्र त्वं अभिभूः शत्रूणामभिभविता असि भवसि किंच त्वं सूर्यमादित्यं अरोचयः ते
जोभिर्दीपयः। किंच विश्वकर्मा विश्वस्य कर्त्तासि। विश्व[देव]ः सर्वदेवश्चासि। तथा च यजुर्ब्राह्मणं [illegible]दि
वा अन्ये देवता इंद्रमन्वन्या इति अतो महानसर्वाधिके[illegible]सि॥८॥ ॥अथ तृतीया॥ विभ्राजं[ज्यो]तिषा
स्वरगच्छो रोचनं दिवः। देवास्त इंद्र सख्याय येमिर इति। हे [illegible] त्वं ज्योतिषा तेजसा दिव आदि[त्य]स्य रोचनं
प्रकाशकं अधिकरणत्वेन स्वः स्वर्गं विभ्राजन् प्रकाशयन् [illegible]ः अगमाः। किंच [illegible] तव
सख्याय मित्रत्वाय येमिरे स्वं स्वमात्मानं नियमितवंतः अस्मा[illegible] सखाय यथा[illegible] हविष्प्रदाः [illegible]
मकार्षुरित्यर्थः॥८॥ ॥अथ तृतीयतृचे प्रथमा॥ असावि सोम इंद्र ते शविष्ठ धृष्णवागहि। आ त्वा पृण
क्त्विंद्रियं रजः सूर्यो न रश्मिभिरिति। हे इंद्र ते त्वदर्थं सोमः असावि अभिषुतो अभूत् हे शविष्ठ अतिशयेन बलव

© Dharmartha Trust J&K. Digitized by eGangotri

न् अत एव धृष्णो शत्रूणां धर्षयितरिंद्र आगहि देवयजनदेशमागच्छ। आगतं च त्वां इंद्रियं सोमपानेनो
सन्नं प्रभूतं सामर्थ्यं आपृणक्तु आपूरयतु। रजोंतरिक्षं रश्मिभि[...] किरणैः सूर्यो न यथा सूर्यः पूरयति
तद्वत्। आविष्ट्या वस्विन शब्दा दिष्टिनि विन्मतोर्लुक्। टेरिति टि[...]दादिलोप[...]
लोपे रिबल्लुलं छंदसीति शेपो लुक्। अनुदात्तोपदेशेत्यादिना [...]नुनासिकलोपः। तस्या[...]भावादि
ससिद्धत्वादुर्लिंगभावः॥ ॥८॥ अथ द्वितीया॥ आतिष्ठ [...]र्थं युक्ता ते ब्रह्मणा हरी। अर्वाचीनं सु ते म
नो ग्रावा कृणोतु वग्नुना॥ इति॥ हे वृत्रहन् शत्रूणां हंतरिंद्र रथं [...]तिष्ठ आरोह यस्मात्ते हरी त्वदीयाव[...]
स्तोत्रलक्षणेन मंत्रेण युक्ता रथे स्माभिर्योजितौ। सुपां सुलुगित्याकारः। तस्मात्त्वं रथमातिष्ठ ते मनस्त्वदीयं
मनः ग्रावा अभिषवार्थं प्रवृत्तः पाषाणः वग्नुना वचनीयेनाभिषवशब्देन वचेर्ग्नुरिति नुप्रत्ययः गकारश्चां
तो देशः। अर्वाचीनं अस्मदभिमुखं सुकृणोतु सुष्ठु करोतु॥८॥ ॥अथ तृतीया॥८॥ ॥इंद्रमिद्धरी वहतो
प्रतिधृष्टशवसं। ऋषीणां सुष्टुतीरुप यज्ञं च मानुषाणामिति॥ अप्रतिधृष्टशवसं केनाप्यप्रतिधर्षितब
लं अहिंसितबलमित्यर्थः। इंद्रमित् इंद्रमेव ऋषीणां वसिष्ठादीनां मानुषाणां अन्येषां मनुष्याणां च सुष्टु
तीः शोभनाः स्तुतीः यज्ञं च हरी अश्वौ उपवहतः समीपं प्रापयतः। यत्र स्तुवंति यत्र यजंते तत्र सर्वत्रेंद्रमश्वौ प्रा
पयत इत्यर्थः। मानुषाणां मनोर्जाताविति। मनुञ्ञा ष्टा ऽ सुषुगागमश्च ऋषाणां सुष्टुती ऋषीणां च स्तुतीरि
ति पाठे॥८॥ इति षष्ठाध्यायस्य सप्तमः खंडः॥८॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्च

© Dharmartha Trust J&K. Digitized by eGangotri

तुरीयस्याद्विघानीर्यमहेश्वरः॥८॥ ॥इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्क
भूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्तराग्रंथेषष्ठोऽध्या
यःसंपूर्णः॥८॥ ॥यस्यनिश्वसितंवेदायोवेदेभ्योऽखिलंजग[illegible]र्ममितमहंवंदे[illegible]म्॥
॥८॥ ॥अथसप्तमाध्यायआरभ्यते॥ ॥तत्रप्रथमखंडे[illegible]मतृचेप्रथमा॥ज्योतिर्यज्ञस्यपवतेम
धुप्रियंपितादेवानांजनिताविभूवसुः॥दधातिरत्नंस्वध[illegible]पिच्यंमदिंतमोमत्सरइंद्रियोरसइति॥य
ज्ञस्याग्निष्टोमादेर्ज्योतिर्दीपकःसोमःप्रियंइंद्रादीनां[illegible]भूतंमधुमधुरंरसंपवतेस्रवत्यभि[illegible]
तूरससुसादयति।यद्वाज्योतिर्यज्ञस्येत्येतन्मधुविशेषणंउक्तलक्षणंप्रियंमधुमधुरःसोमरसःपव
तेपूयतेदशापवित्रेणशोध्यतइत्यर्थः।रसोविशेष्यतेदेवानांपितापालकःजनिताफलस्योत्पादकःविभू
वसुःप्रभूतधनःतेनसंपादयितुंशक्यत्वात्तादृशःसोमरसःस्वधयोःस्वधइतिद्यावापृथिव्योर्नाम।अपी
च्यमितिवांतर्हितस्यद्यावापृथिव्योर्मध्येऽंतर्हितंरत्नंरमणीयंधनंदधाति।स्थापयतियजमानेषु।सए
वपुनर्विशेष्यते।रसोरसयितामदिंतमोमादयितृतमःमत्सरःससोमःइंद्रियइंद्रेणजुष्टःइंद्रियवर्द्धको
वा॥८॥ ॥अथद्वितीया॥ ॥अभिक्रंदन्कलशंवाज्यर्षतिपतिर्दिवःशतधारोविचक्षणः॥हरिर्मित्रस्य
सदनेषुसीदतिमर्मृजानोविभिःसिंधुभिर्वृषेति॥सोमरसोवाजीवेजनवानगमनवान्।यद्वाअश्वसदृ
शःअभिक्रंदन्अभितःशब्दंकुर्वन्कलशंद्रोणकलशमर्षति।गच्छति॥कीदृशः।दिवोद्योतमानस्यांतरि

© Dharmartha Trust J&K. Digitized by eGangotri

द्धस्य दशापवित्रलक्षणस्य पतिः पालकः स्वामी यद्वा द्युलोकस्य स्वामी दिवि हि सोम उत्पन्नः तृतीयस्यामि
तो दिवि सोम आसीदिति श्रुतेः। शतधारो ऽपरिमितधारोपेतः विचक्षणः विशेषेण द्रष्टा॥ हरिर्हरितवर्णः सो
मः सो मित्रस्य मित्रवद्धितकरस्य यज्ञस्य सदनेषु स्थानेषु सीदति। निषण्णो भवति। कीदृशः सन् सिंधुभिः
स्यंदनसाधनैरविभिरविरोमभिर्दशापवित्रावयवैर्मर्मृजानः शोध्यमानः वृषा वर्षकः फलानां॥७॥ ॥
अथ तृतीया॥ अग्रे सिंधूनां पवमानो अर्षस्यग्रे वाचो अग्रियो गोषु गच्छसि। अग्रे वाजस्य भजसे महद्ध
66 नं स्वायुधः सोतृभिः सोम सूयसे॥ हे सोम त्वं सिंधूनां स्यंदनस्वभावानामुदकानामग्रे पुरस्तात्पवमा
नः पूयमानः शोध्यमानः सन् अर्षसि गच्छसि। वचः शब्दं जनयितुमाहुतिद्वारांतरिक्षे गच्छसीत्यर्थः॥ तथा
वाचो माध्यमिकाया अग्रे त्वमप्यग्रियो ऽग्राह्याः पूज्यः सन् गच्छसि। तथा गोषु रश्मिषु तेषामग्रे गच्छसि। त
था वाजस्य शत्रूणामन्नस्यास्माकं लाभायेति शेषः। तद्धं॥ हाधनं संग्रामं भजसे सेवसे। कीदृशः सन् स्वा
युधः शोभनप्रहरणसाधनायुधः हे सोम त्वं सोतृभिरृत्विग्भिरध्वर्य्वादिभिः सूयसे ऽभिषूयसे॥७॥
॥ अथ द्वितीये तृचे प्रथमा॥ असृक्षत प्रवाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः॥ असृज्यंत। वाजि
नो वेगवंतः शुक्रासो दीप्ताः आशवो वेगवंतश्च सोमासः गव्यया पत्रस्तनस्य गवेच्छया तेन तत्र सवी अश्वेच्छया पा
था वीरया वीराः पुत्रभृत्यादयस्तेषामिच्छया प्रासृक्षत प्रासृज्यंत रसा न्वाविसृजंति॥७॥ ॥ अथ द्वितीया॥
शुंभमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवंते वारे अव्यये इति॥ ऋतायुभिर्यज्ञेच्छुभिरध्वर्यु

© Dharmartha Trust J&K. Digitized by eGangotri

प्रभृतिभिः शुंभमानाः अलंक्रियमाणाः गभस्त्योर्हस्तयोर्हस्ताभ्यां मृज्यमानाः शोध्यमानाः सोमाः वारे
वाले दशापवित्रे कीदृशे अव्यये अविमये एवं ते पूयंते॥७॥ ॥अथ तृतीया॥ ते विश्वा दाशुषे वसु सोमा दि
व्यानि पार्थिवा। पवंतामांतरिक्ष्या इति॥ ते सोमाः अभिषूयमाणाः दाशुषे हविः प्रदत्ते यजमानाय विश्वा सर्वा
णि वसु वासकानि गवादिधनानि आपवंतां सर्वतः क्षरंतु। वस्वित्युक्तं। कथं वसूनां विश्ववमिति उच्यते। दिव्या
नि दिविभवानि पार्थिवानि पृथिवीसंबद्धानि अंतरिक्ष्या अंतरिक्षाणि अंतरिक्षे भवानि एवमुक्तप्रकारेण
विश्वानी सर्वः॥७॥ ॥पवस्वेति दशर्चं तृतीयसूक्तं प्रथमा॥ पवस्व देववीरति पवित्रं सोम रंह्या। इंद्रमिंदो वृ
षा विशेति॥ हे सोम त्वं वीर्देवकामस्त्वं रंह्या वेगेन पवित्रं यथा भवति तथा अतिपवस्वातिक्षर। किंचाहे इंदो
वृषा सेवकस्त्वमिंद्रमाविश प्रविश॥७॥ ॥अथ द्वितीया॥ आवच्यस्व महि प्सरो वृषेंदो द्युम्नवत्तमः। आ
यो निं धर्णसिः सदः इति॥ हे इंदो सोम वृषा कामानां वर्षको द्युम्नवत्तमो यशस्वितमो धर्णसिर्धर्त्ता त्वं महि मह
त्सरः पानीयमंधोऽन्नं आवच्यस्वास्मान्प्रति आगमय॥ [illegible] योनिं स्वकीयं स्थानमासदः। आसीद॥७॥
॥अथ तृतीया॥ अधुक्षत प्रियं मधु धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुरिति॥ सुतस्य [illegible] तस्य वेध
सोऽभिलषितस्य विधातुर्यस्य सोमस्य धारा प्रियं प्रीतिकरमन्नरूपं मतं मधुक्षत दु[illegible] सुक्रतुः सु
मीसोमः आपो वसतीवरीर्वसिष्टाच्छादयति॥७॥ ॥अथ चतुर्थी॥ महांतं त्वा महीरन्वापो अर्षंति सिंधवः
।यद्गोभिर्वासयिष्यस इति॥ हे सोम त्वं यद्यदा यस्मै गोभिर्गोविकारैः पयोभिर्वासयिष्यसे आच्छादयिष्यसे।

© Dharmartha Trust J&K. Digitized by eGangotri

नद्दामहांतंगुणैः प्रवृद्धंत्वामनुतांप्रतिसिंधवःस्यंदमानामहीर्म्महत्यआपोअर्षंतिगच्छंति॥७॥ ॥अथपं
चमी॥समुद्रोअप्सुमामृजेविष्टंभोधरुणोदिवः।सोमःपवित्रेअस्मयुरिति॥समुद्रवंत्यस्मादापइतिस
मुद्रः विष्टंभोदिवःस्वर्गस्यधरुणोधर्त्ताचअस्मयुरस्मत्कामः॥नि॰ श्रूहकेषुमास्रजेभ्यःसन्॥पवित्रेभि
षिच्यसेवेसर्षः॥७॥ ॥अथषष्ठी॥अचिक्रदद्वृषाहरिर्म्महान्मित्रोनदर्शतः।संसूर्येणदिद्युतइति॥वृ
षाकामानांवर्षकोहरिर्हरितवर्णोमहान्सर्वोत्तमोमित्रोन्यस्यासखातद्वद्दर्शनीयोयःसोमोविक्र
न्दच्छब्दंकरोति।सोयंसोमःसूर्येणसहसंदिद्युतेसमिद्यते।अस्मावेसूर्येणहयोततइत्यर्थः।रोचतइतिवा
चानांपाठः॥अथसप्तमी॥७॥ ॥गिरस्तइंद्रओजसामर्मृज्यंतेअपस्युवः।याभिर्म्मदायशुंभसइति॥
हेइंदोतेनवोजसाबलेनापस्युवःकर्मेच्छोःसंबंधिन्यस्तागिरस्तुतयोमर्मृज्यंतेशोध्यंते।याभिर्गीर्भिस्त्वं
मदायहर्षायशुंभसेअलंकुरुषे॥७॥ ॥अथाष्टमी॥तंत्वामदायघृष्वयउलोककृत्नुमीमहे।तवप्रशस्तये
महइति॥हेसोमतंतादृशंउक्तगुणकंलोककृत्नुंलोकस्यकर्त्तारंत्वांलंयेशत्रूणांघर्षणशीलायमदायईम
हेयाचामहे।सोमपानमितिशेषः।किमर्थमितिउच्यते।तवमहेमहतेप्रशस्तयेप्रशंसनाय॥७॥ ॥अथ
नवमी॥गोषाइंदोनृषाअस्यश्वसावाजसाउत।आत्मायज्ञस्यपूर्व्यइति॥हेइंदोक्षियमानसोमयज्ञस्यज्यो
तिष्टोमादेःपूर्व्यःपुराणोनित्यःआत्मास्वरूपभूतःसोमस्ययज्ञस्वरूपत्वंप्रसिद्धं।तादृशस्त्वंगोषाअस्म
भ्यंगवांदाताअसिभवसि।नृषाःनृणांपुत्रभृत्यादीनांदाताअसि।अश्वसाःअश्वानांदातावाअसि।उतापिचवा

© Dharmartha Trust J&K. Digitized by eGangotri

जसा॥ अन्नानां दाता चासि॥७॥ ॥अथ द्वादशी॥ अस्मभ्यमिंद्र विंद्रियं मधोः पवस्व धारया। पर्जन्यो
वृष्टिमाँ इवेति॥ हे इंद्रो सोम इंद्रियमिंद्रेण जुष्टमिंद्रियस्य वीर्यस्य वा वर्द्धकं रसं मधोर्मदकरस्यात्मन
स्य धारया पर्जन्यो वृष्टिमाँ इव। यथा वर्षवान् पर्जन्यो मेघस्तस्या अस्मभ्यं मे धातीत्यभिः पवस्व क्षर॥७॥
॥इति सप्तमोऽध्याये प्रथमः खंडः॥७॥ ॥अथ द्वितीयखंडे सनाच्चेति दशर्चं प्रथमे सूक्ते प्रथमा॥ सनाच
सोम जेषि च पवमान महि श्रवः। अथा नो वस्यसस्कृधीति। हे महि श्रवो महदन्नं पवमान सोम सनात्स
दा गेयं जनीयान् देवान् भजन् जेषि वा यागविघ्नकारिणो राक्षसांश्च जय। अथ देवान् प्राप्य राक्षसांश्च
जित्वाऽनंतरं नोऽस्मान् वस्यसः श्रेयसं स्कृधि कुरु। श्रेयोऽस्मभ्यं देहीत्यर्थः॥७॥ ॥अथ द्वितीया॥ स
ना ज्योतिः सना स्वर्विश्वा च सोम सौभगा। अथा नो वस्यसस्कृधि॥ हे सोम त्वं ज्योतिस्तेजः सनात्सर्वं
प्रयच्छ। अपि च स्वः स्वर्गं सनाऽस्मभ्यं देहि विश्वा विश्वानि सौभगा सौभाग्यानि च सना। सिद्धमन्यत्॥७॥॥
अथ तृतीया॥ सना दक्षमुत क्रतुमप सोम मृधो जहि। अथा नो वस्यसस्कृधि॥ हे सोम त्वं दक्षं बलं सना
अस्मभ्यं देहि। उत अपि च क्रतुं प्रज्ञानं सना मृधो हिंसकान् शत्रून् अपमहि। मारय। सिद्धमन्यत्॥७॥ ॥अथ
चतुर्थी॥७॥ पवीतारः पुनीतन सोममिंद्राय पातवे। अथा नो वस्यसस्कृधीति॥ हे पवीतारः सोमस्य शोध
यितार ऋत्विजः सोमं पुनीतन। पावयत दशापवित्रेण शोधयत। किमर्थमिंद्राय पातवे इंद्रस्य पानाय। गतम
न्यत्॥७॥ ॥अथ पंचमी॥ त्वं सूर्ये न आभज तव क्रत्वा तवोतिभिः। अथा नो वस्यसस्कृधीति॥ हे सोम त्वं त

© Dharmartha Trust J&K. Digitized by eGangotri

वक्रत्वात्तवोतिभिस्त्वत्कर्तृकेणकर्म्मणा कत्वत्कर्तृकाभीरक्षाभिश्चनोऽस्मान् सूर्ये आभजप्रापयसि
द्धमन्यत्॥७॥ ॥अथषष्ठी॥तवक्रत्वातवोतिभिर्ज्योक्पश्येमसूर्यं।अथानोवस्यसस्कृधीति॥हेसो
मतवक्रत्वाप्रज्ञानेनतवोतिभीरक्षाभिश्चज्योक्चिरंपश्येमासूर्यं(ति)।तथाप्रदृक्षामः।सिद्धमन्यत्॥७॥
॥अथसप्तमी॥अभ्यर्षस्वायुधसोमद्विबर्हसंरयिं।अथानोवस्यसस्कृधीति॥हेस्वायुधशोभनायुध
सोमत्वंद्विबर्हसंद्वयोर्द्यावापृथिव्योःस्थानयोःपरिवृ(ढं)...नंअभ्यर्षास्मानभिगमय।सिद्धमन्यत्
68
॥७॥ ॥अथाष्टमी॥अभ्यर्षनिपच्युतोवाजिन्समत्सु(सा)।सहिः।अथानोवस्यसस्कृधीति॥हेवाजिन्
सोमसमत्सुसंग्रामेषुअनपच्युतःशत्रुभिरनभिहतःसासहिःशत्रूणामभिभविता।त्वंअभ्यर्षअभिग
च्छस्रगतमन्यत्॥७॥ ॥अथनवमी॥त्वांयज्ञैरवीवृधन्पवमानविधर्म्मणि।अथानोवस्यस्यस्कृधीति
॥हेपवमानशोध्यमानसोमत्वांविधर्म्मणिविविधफलस्यधारकेयज्ञेयज्ञैर्यज्ञसाधनैस्तोत्रैरवीवृधन्
यजमानावर्द्धयंति।गतमन्यत्॥७॥ ॥अथदशमी॥रयिंनश्चित्रमश्विनमिंदोविश्वायुमाभर।अथानो
वस्यसस्कृधीति॥हेइंदोयागेषुक्लिद्यमानसोमत्वंचित्रंनानाविधंअश्विनंअश्ववंतंचविश्वायुंसर्वगामि
नंरयिंधनंनोस्मभ्यमाभराहर।गतमन्यत्॥७॥ ...तरत्समंदीतिचतुर्ऋचेद्वितीयसूक्तेप्रथमा॥तरत्समं
दीधावतिधारासुतस्यांधसः॥तरत्समंदीधावतीति॥मंदीदेवानांहर्षकरःससोमःतरत्स्तोतॄन्पाप्मनः ८
सकाशात्तारयन्धावतिशीघ्रंपवित्रादधःक्षरति।तस्येवत्र्ययतिसुतस्याभिषुतस्यांधसोदेवानामन्नात्स

© Dharmartha Trust J&K. Digitized by eGangotri

कस्यसोमस्यधाराधावतीति।पुनरपितदेवाह।संतादस्यार्थंतरत्समंदीधावतीति।यद्वा।अस्याःस्तोत्रया
स्क्तेनोक्तोर्थोद्रष्टव्यः।तद्यथातरतिसपापंसर्वंमंदीयःस्तोतिधावतिगच्छतिपूर्वंगतिंधारासुतस्यांधसो
धारयाभिषुतस्यसोमस्यमंत्रपूतस्यवावासुविरंति।।७।। ।।अथद्वितीया।।उस्रावेदवसूनांमर्त्तस्यदे
व्यवसः।तरत्समंदीधावतीति।।वसूनांधनानांउस्रासरणशीलाप्रदात्रीदेवीद्योतमानास्तूयमानावासो
मस्यधारामर्त्तस्यमनुष्यस्ययजमानमवसोरक्षितुंवेदजानाति।।सिद्धमन्यत्।।७।। ।।अथतृतीया।।ध्वस्र
योःपुरुषंत्योरासहस्राणिदद्महे।तरत्समंदीधावतीति।।ध्वस्रयोःपुरुषंत्योः।ध्वस्रश्चपुरुषंतिश्च
।तयोरुभयोरत्रेतरयोराविवक्षयाद्विवचनंद्रष्टव्यं।सहस्राणिधनानांसहस्राण्यादद्महे।तयोःसंबंधिध
नंवयंप्रतिगृह्णीमस्तदस्माभिःप्रतिगृहीतंधनमुत्तमम[प]निऋषिःसोमंप्रार्थयतइतिसोमस्यस्तुतिः।।
सिद्धमन्यत्।।७।।यथावसारएतयोर्दानानिप्रतिजग्राह[ध्व]न्यरंतपुरुमीढौप्रतिजगृहतुः।तथाचशाट्याय
नकं।अथहवैतरंतपुरुमीढौवैदश्वीध्वस्रयोःपुरुषंत्योर्दानंप्रतिगृह्यगरगिराविवमेनाते।तौहस्मांगुल्या
सातंप्रतिमृशानेनावकामयेतामसातन्नाविवेदसातंस्यादित्तमिवैवनप्रतिगृहीतमितितावेवचतुर्थ्यं च
मपश्यतांतौनप्रस्यैनांततोवैतयोरसातंसातमभवददत्तमिवैवनप्रतिगृहीतं।सयःप्रतिग्रहकामयेतेसा
दि।।७।। ।।अथचतुर्थी।।आययोस्त्रिंशतंतनासहस्राणिचदद्महे।तरत्समंदीधावतीति।।ययोर्ध्वस्र
पुरुषंत्योस्त्रिंशतंत्रिंशतानिसहस्राणिचतनावस्त्राण्यादद्महेवयंप्रतिगृह्णीमः।तयोरस्माभिःप्रतिगृही

© Dharmartha Trust J&K. Digitized by eGangotri

तं तमुसर्वमप्रतिगृहीतमस्त्विति। सोमं ऋषिः प्रार्थयत इति सोमस्यैव स्तुतिः। गतमन्यत्॥७॥ ॥एते सो
मा इति त्वं तृतीयं सूक्तं तत्र प्रथमा॥ एते सोमा अस्रक्षत गृणानाः श्रवसे महे। मदिंतमस्य धारयेति॥ म
दिंतमस्य देवानां मादयितृतमस्य रसस्य संबंधिन एते सोमा अभिषुताः स्तुरूपा गृणानाः स्तूयमानाः म
हे महते श्रवसे अस्माकं बलाय धारया अस्रक्षत गच्छंति॥७॥ ॥अथ द्वितीया॥ अभि गव्यानि वीतये नृ
म्णा पुनानो अर्षसि। सनद्वाजः परिस्रवेति॥ हे सोम वी[तये] देवानां भक्षणाय नृम्णा नृम्णानि धनवंतु
69 प्रियतराणि गव्यानि गोसंबंधीनि क्षीरादीनि पुनानः पूय[मा]नः सन् अभ्यर्षसि अभिगच्छसि। हे सोम स
नद्वाजः दीयमानान्नस्त्वं परिपरितः स्रव। दशापवित्राद[ध]ः क्षर॥७॥ ॥अथ तृतीया॥ उत नो गोमतीरिषो
विश्वा अर्ष परिष्टुभः। गृणानो जमदग्निनेति॥ उत अपि च हे सोम जमदग्निना जमदग्निनाम्ना ऋषिणा
मया गृणद्भिः स्तूयमानस्त्वं नोऽस्माकं गोमतीर्गोभिर्युक्तानि परिष्टुभः परितस्तोतव्यानि विश्वाः सर्वाणीषो
न्नान्यर्ष गच्छ। अस्मभ्यमेवं विधान्यन्नानि देहीत्यर्थः॥७॥ ॥इति सप्तमाध्याये द्वितीयः खंडः॥७॥ ॥इ
मं स्तोममिति तृतीयखंडे प्रथमं तत्रे प्रथमा॥ इमं स्तो[मम]र्हते जातवेदसे रथमिव संमहेमा मनीषया॥ भद्रा
हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तवेति॥ अर्हते पूज्याय जातवेदसे जातानामुत्पन्नानां वे
दित्रे जातप्रज्ञाय जातधनाय वा अग्नये मनीषया बुद्ध्या इमं एतत् सूक्तरूपं स्तोमं स्तोत्रं रथमि
व यथा तक्षा रथं संस्कारातिशयात् संमहे सम्यक् पूजितं कुर्मः। तस्याग्नेः संसदि संभजने नोऽस्माकं प्रमतिः ६९

प्रकृष्टाबुद्धिः भद्राहिकल्याणीसमर्थाखलु।अनेनस्तयाबुद्ध्या स्तुमः इत्यर्थः। हे अग्नेतवसख्ये अस्मा
कं त्वयासहसखित्वेसतिवयंमारिषाममाहिंसितानभवामः। अस्मान्रक्षेत्यर्थः। अर्हते। अर्ह पूजायां।
अर्हः प्रशंसायामितिलटःशत्रादेशः। शपः पि[illegible]नुदात्तत्वं। शतुश्चादुपदेशाल्लसार्वधातुकस्वरेणा
द्युदात्तत्वं। महे मह पूजायां॥ रिषाम। रिषहिंसायां। व्यत्ययेनशः। तवयुष्मदस्मदोर्ङसीत्याद्युदात्तत्वं॥७॥
॥अथद्वितीया॥ भरामेध्मंकृणवामाहवींषितेचितयंतःपर्वणापर्वणावयं। जीवातवेप्रतरंसाधयाधि
योग्नेसख्येमारिषामावयंतवेति। हे अग्नेत्वदर्थं इध्मं इंधनसाधनंएकविंशतिदार्वात्मकंसमित्स
मूहंभराम। संभराम। संपादयाम। तदनंतरंतेतुभ्यंहवींषिचपुरोडाशादिलक्षणान्यन्नानिवयंकृणवा
म करवाम। किंकुर्वंतः। पर्वणापर्वणाप्रतिपक्षमावृत्ताभ्यांदर्शपूर्णमासाभ्यांचितयंतस्त्वांप्रज्ञापयंतः
संतंजीवातवेअस्माकंजीवनौषधायचिरकालावस्थानायधियःकर्म्माण्यग्निहोत्रादीनिप्रतरांप्रकृ
ष्टतरंसाधयनिष्पादय। अन्यत्समानं। चितयंतश्चितीसंज्ञा।नसंज्ञापूर्वकस्यविधेरनित्यत्वाल्लघूपगुणा
भावः। पर्वणापर्वणानित्यवीप्सयोरितिवीप्सायांद्विर्भावः। तस्यपरमाम्रेडितमितिपरस्याम्रेडितसंज्ञा
यां अनुदात्तंचेत्यनुदात्तत्वं। प्रतरांनरवतात्प्रशाष्टाक्रयाप्रकर्षेवर्त्तमानात्किमेत्तिङव्ययघादाम्वद्रव्यप्रक
र्षेइत्यामुप्रत्ययः॥७॥ ॥अथतृतीया॥ शकेमत्वासमिधंसाधयाधियःस्त्वेदेवाहविरदंत्याहुतंत्वमादि
त्यां आवहतान्ह्युश्मस्यग्नेसख्येमारिषामावयंतवेति॥ हे अग्नेत्वात्वांसमिधंसम्यगिद्धंकर्त्तुंशकेमशक्ता

© Dharmartha Trust J&K. Digitized by eGangotri

क्षा भूयास्म। त्वं च धियः अस्मदीयानि दर्शपूर्णमासादीनि कर्माणि साधयन् निष्पादय। त्वया हि सर्वे य
गा निष्पाद्यन्ते। यस्मात्त्वय्यग्नावाहुतं ऋत्विग्भिः प्रक्षिप्तं चरुपुरोडाशादिकं हविर्देवा अदंति भक्षयंति
तस्मात्त्वं साधयेत्यर्थः। अपि च त्वं आदित्यान् अदितेः पुत्रान् सवने देवानावह। अस्मद्यज्ञार्थमानय। तान्
हि इदानीं वयमुश्मसि कामयामहे। अन्यत्पूर्ववत्। शाकेम शकेम शक्लृ शक्तौ। लिङि छान्दसः शपो लुक्। अनुपदेशात्परस्मा
दुर्धातुकानुदात्तत्वे अडागमः स्वरो निघात्यते। समिधं। सिदं क्विपीतो। अस्मात्संपदादिलक्षणः कर्मणि।
क्विप्। त्वे सुपां सुलुगिति। सप्तम्येकवचनस्य शे आदेशः। उश्मसि वशकांतौ। इदंतो मसिः। अदादित्वाच्छ
पो लुक्। ग्रहिज्यादिना संप्रसारणं॥६॥ ॥अथ द्वितीया॥ तत्र प्रथमा॥ प्रति वां सूर उदिते मित्रं गृणीषे व
रुणं। अर्यमणं रिशादसमिति॥ हे मित्रावरुणौ मित्रं मित्रावरुणं च वां युवां रिशादसं शत्रूणामत्तारमत्तार
मर्यमणं च प्रति प्रत्येकं गृणीषे स्तुवे। कदेति उच्यते। सूरे सूर्ये देवे उदिते सति प्रातरित्यर्थः॥ ॥अथ द्वि
तीया॥ राया हिरण्यया मतिरियमवृकाय शवसे। इयं विप्रा मेधसातय इति॥ हिरण्यया हितरमणीये
न राया धनेन सहिता या अवृकाय हिंसाय शवसे बलाय इदमिदानीं क्रियमाणा मतिः स्तुतिर्भवति
तिशेषः। हिरण्यये सप्तम्यसुपां सुलुगिति तृतीयायाः। किंच हे विप्राः प्रज्ञाः इयामवस्तुति
र्मेधसातये यज्ञलाभाय च भवतु॥७॥ ॥अथ तृतीया॥ ते स्याम देव वरुण ते मित्र सूरिभिः सह। इषं स्व
श्च धीमहीति॥ हे देव वरुण ते तव वयं तव स्तोतारः स्याम समृद्धा भवेम। न केवलं वयमेव यजमानाः किंतु सू

© Dharmartha Trust J&K. Digitized by eGangotri

रिभिः स्तोतृभिः ऋत्विग्भिः सह तथा हि मित्रदेवत वयं सूरिभिः सह स्याम भवेम। किंच इषमन्नं स्वरु
द्रं च धीमहि धारयामहे॥७॥ ॥अथ तत्वास्मके तृतीयसूक्ते प्रथमा॥ भिंधि विश्वा अप द्विषः प
रि बाधो जही मृधः। वसु स्पार्हं तदा भरेति॥ हे इंद्र विश्वाः सर्वाः द्विषः द्वेष्ट्रीः शत्रुसेनाः अप भिंधि वि
दारय। तथा बाधो हिंसकान् मृधः संग्रामांस्त्वं परि जहि परिभावय। हे वसो वासक इंद्र स्पार्हं स्पृहणीयं द्र
व्यं धनं यदस्ति तदाभर अस्मभ्यमाहर॥७॥ ॥अथ द्वितीया॥ यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेद
ति। वसु स्पार्हं तदा भरेति॥ हे इंद्र ते त्वा विभक्तिव्यत्ययः त्वया दत्तस्य दत्तं भूरेर्बहु यस्य यद्धनं सर्वत्र कर्मणि पोष
ष्टी वेदितव्यानि त्वं सर्वं तद्धनमानुषक् इति आनुपूर्व्येण सिततं सर्वो मनुष्यो वेदति जानाति। तत् स्पार्हं
स्पृहणीयं वस्वाभर॥७॥ ॥अथ तृतीया॥ यद्वीळाविंद्र यत्स्थिरे यत्पर्शाने पराभृतं वसु स्पार्हं तदा भरे
ति॥ हे इंद्र त्वया त्वद्वीळौ दृढे परैः कंपयितुमशक्ये यद्धनं परैः आभृतं विन्यस्तं। यच्च स्थिरे स्वयमचले पराभृ
तं यच्चापि तिपर्शाने विमर्शने स्तसे पराभृतं तत् स्पार्हं स्पृहणीयं वस्वाभर॥७॥ आहर॥७॥ ॥अथत
वांके ते तृतीयं सूक्तं तत्र प्रथमा॥ यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु॥ इंद्राग्नी तस्य बोधतमि
ति॥ हे इंद्राग्नी युवां यज्ञस्य ज्योतिष्टोमादेः ऋत्विजौ स्थः ऋतौ काले काले यष्टव्यौ भवथः। अतो वाजेषु सं
ग्रामेषु कर्मसु यज्ञात्मकेषु च सस्नी संस्नातौ शुद्धौ संतौ तस्य तं मां हे इंद्राग्नी बोधतं। अथवा तस्य मम
स्तुतिं जानीतं॥७॥ अथ द्वितीया॥ तोशासा रथयावाना वृत्रहणापराजिता॥ इंद्राग्नी तस्य बोधतमिति॥

© Dharmartha Trust J&K. Digitized by eGangotri

हे इंद्राग्नी तौ युवां सासहा शत्रून् हिंसंतौ रथयावाना रथेन गच्छंतौ वृत्रहणा वृत्रस्य हंतारौ अपराजिता केनाप्य
पराजितौ तस्य तं मां बाधेतां ॥ अथ तृतीया ॥ इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः । इंद्राग्नी तस्य बोधतमि
ति । हे इंद्राग्नी वां युवां उद्दिश्य नरो यज्ञस्य नेतारो अद्रिभिर्ग्रावभिर्मदिरं मदकरं मधु सोमात्मकमन्नं तन्मधु
क्षन् सिद्धमन्यत् ॥८॥ ॥ इति सप्तमाध्याये तृतीयः खंडः ॥८॥ ॥ अथेंद्रायेंदो मरुत्वत इति चतुर्थखंडे
तृचात्मके प्रथमसूक्ते प्रथमा ॥ इंद्रायेंदो मरुत्वते पवस्व मधुमत्तमः । अर्कस्य योनिमासदमिति ॥ हे इंदो
सोम मधुमत्तमोऽतिशयेन मधुमान् त्वं अर्कस्यार्चनीयस्य यज्ञस्य योनिं स्थानमासदमुपवेष्टुं मरुत्वात
इंद्राय इंद्रार्थं पवस्व क्षर ॥८॥ ॥ अथ द्वितीया ॥ तं त्वा विप्रा वचोविदः परिकृण्वंति धर्णसिं । सं त्वा मृजंत्याय
व इति ॥ हे सोम तं सोमं पवमानं त्वा त्वां धर्णसिं धर्तारं विप्राः प्राज्ञा वचोविदः स्तोतारः परिकृण्वंति सलंकुर्वं
ति । अपि च त्वा त्वाम् आयवो मनुष्याः संमृजंति सम्यक् शोधयंति ॥८॥ ॥ अथ तृतीया ॥ रसं ते मित्रो अर्य
मा पिबंतु वरुणः कवे पवमानस्य मरुत इति ॥ हे कवे क्रांतकर्मन् सोम पवमानस्य क्षरतस्तव रसं मित्रो
अर्यमा च वरुणश्च मरुतश्चैते सर्वे देवाः पिबंतु ॥८॥ ॥ मृज्यमान इति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथ
मा ॥ मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि । रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसीति ॥ हे सुह
स्त्य हस्ते भवा हस्त्या अंगुलयः शोभनांगुलिक सोम मृज्यमानः शोध्यमानस्त्वं समुद्रे अंतरिक्षे कलशे वा
वाचं शब्दमिन्वसि प्रेरयसि । किं च हे पवमान पूयमान सोम पिशंगं हिरण्येयः पिशंगवर्णं बहुलं प्रभूतं पुरुस्पृ

© Dharmartha Trust J&K. Digitized by eGangotri

हंबहुभिःस्पृहणीयंरयिंधनमभ्यर्षसिस्तोतॄणामभिक्षरसि।प्रयच्छसि॥७॥ ॥अथद्वितीया॥
पुनानोवारेपवमानोअव्ययेवृषोअचिक्रदद्वने।देवानांसोमपवमाननिष्कृतंगोभिरंजानोअर्षसीति
॥अयंसोमःवृषःवृषभसदृशःसन्पुनानोध्रियमाणःसर्वंशोधयन्वाअव्ययेअविमयेवारेवा
लेपवित्रेपवमानःपूयमानःसन्वनेवननीयेउदीचकाष्ठकलशेवाअचिक्रदत्शब्दमकरोत्।अथप्रत्य
क्षवादः।हेसोमपवमानत्वंगोभिर्गव्यैःक्षीरादिभिःअंजानोऽज्यमानःसन्निष्कृतंसंस्कृतंदेवानांस्थानं
अर्षसिगच्छसि॥७॥ ॥एतमुत्यमितितृचात्मकंवैतीयंसूक्तंतत्रप्रथमा॥ एतमुत्यंदशक्षिपोमृजं
तिसिंधुमातरं।समादित्येभिरख्यतेति॥सिंधुमातरंयस्यसोमस्यसिंधवोनद्योमातरोभवंति।सन
मेतमिमंसोमंदश।क्षिपोदशसंख्याकाअंगुलयोमृजंतिशोधयंति।अपिचसोयंसोमआदित्येभि
रादित्यैःसमख्यतसंगच्छते॥७॥ ॥अथद्वितीया॥सायंदेणोतवायुनासुतएतिपवित्रआ।संसूर्य
स्यरश्मिभिरिति॥सुतोभिषुतःसोमःपवित्रेइंद्रेणसमेतिसंगच्छते।उतापिचवायुनासमेतिसूर्यस्यर
श्मिभिःकिरणैरपिसमेति॥७॥ ॥अथतृतीया॥सनोभगायवायवेपूष्णेपवस्वमधुमान्।चारुर्मित्रेव
रुणेचेति।हेसोममधुमान्मधुररसःचारुःकल्याणस्वरूपश्चसोभिषुतस्त्वंनोस्माकंयज्ञेभगायभगाख्या
यदेवायवायवेपूष्णेचमित्रेमित्रायदेवायवरुणायचपवस्वक्षर॥७॥ ॥इतिसप्तमेऽध्यायेचतुर्थःखंडः॥ ॥७॥
अथपंचमखंडेरेवतीर्नइतित्र्यात्मकंप्रथमंसूक्तंतत्रप्रथमा॥रेवतीर्नःसधमादइंद्रेसंतुतुविवाजाः।क्षुमंतो ६५

© Dharmartha Trust J&K. Digitized by eGangotri

याभिर्मदेमेति॥ क्षुमंतोऽन्नवंतो वयं याभिर्गोभिः सह मदेम हृष्येम। इंद्रे सधमादे अस्माभिः सह हर्षयु
क्ते सति नोऽस्माकं ता गावो रेवतीः क्षीराज्यादिधनवत्यस्तुविवाजाः प्रभूतबलाश्च संतु। रेवतीः रयिशब्दा
न्मतुपि रयेर्मतौ बहुलमिति संप्रसारणं। परपूर्वत्वे छंदसीरइति मतुपो वत्वं। वा छंदसीति पूर्वसवर्ण
दीर्घः। आरे शब्दाये मतुप उदात्तत्वं वक्तव्यमिति रेशब्दादुत्तरस्यापि भवतीति पूर्वमेवोक्तं। सधमादे मद
तृप्तियोगे चौरादिकः सहमादयंतीति सधमादाः। पचाद्यच्। सधमादस्थयोः छंदसीति सहशब्दस्य स
धआदेशः। थाथादिना उत्तरपदांतोदात्तत्वे प्राप्ते परादिः छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। तुविवाजाः
बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। क्षुमंतः। क्षुत्शब्दात्। अस… पिनुगभावः छांदसः। ह्रस्वनुड्भ्यां मतुबिति
मतुप उदात्तत्वं। मदेम मदी हर्षे व्यत्ययेन श्यापू अदुप…शात् लसार्वधातुकानुदात्तत्वे शपः पित्वादनुदात्तत्वे
। ततो धातुस्वरः शिष्यते॥७॥ ॥अथ द्वितीया॥ आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः। ऋणो
रक्षं न चक्र्योः॥ इति॥ हे धृष्णो धार्ष्ट्ययुक्तेंद्र त्वावान् …सदृशो देवताविशेषः त्मना आत्मना अस्मदनुग्र
हबुद्ध्या युक्तः इयानो अस्माभिर्याच्यमानः स्तो…ः स्तोतॄणामनुग्रहाय तदभीष्टमर्थं घ अवश्यं आ
ऋणोः आनीय प्रक्षिपतु। तत्र दृष्टांतः। चक्र्योः …चक्रयोः अक्षं न। यथा अक्षं प्रक्षिपति तद्वत्। त्वा
वान् वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् प्रत्ययोत्तरपदयोश्चेति मपर्यं
तस्य त्वादेशः। आ सर्वनाम्न इति दकारस्यात्वं। वतुपः पित्वादनुदात्तत्वे प्रातिपदिकस्वरः शिष्यते। त्मनाम

© Dharmartha Trust J&K. Digitized by eGangotri

त्रेधाऽथादेशः। मनइत्साकारलोपः। धक्षो मिध्रषाप्रागल्भ्ये। त्रसिगृधिधृषिक्षिपेः क्नुः। आमंत्रितानुदा
त्तत्वं। ईयानः। ईङ् गतौ। छंदसि लिट्। तस्य लिटः कानच् इति कानजादेशः। अचिश्नुधात्विसादिना इयङादेशः
। चितइत्यंतोदात्तत्वं। ऋण्वोः। ऋण गतौ। लङि व्यत्ययः। पूर्वस्य लोपः। सिपि इतश्चेतीकारलोपः। तनादिकृञ्भ्य उः। सा
र्वधातुकगुणः। बहुलं छंदस्यमाङ्योगेपीत्यडागमाभावः। विकरणस्वरेणांतोदात्तत्वं। अक्षं। अक्षस्या
देवनस्येत्याद्युदात्तत्वं। शचीभिः। अकारस्येकारः छांदसः॥८॥ ॥अथ तृतीया॥ आ यद्दुवः शतक्रतवा
कामं जरितॄणां। ऋणोरक्षं न शचीभिः॥ हे शतक्रतो इंद्र यत् दुवो धनं कामितार्थरूपं आस्तोतृभि
रीप्सितव्यमस्ति तं कामं जरितॄणां स्तोतॄणामनुग्रहाय त्वमा ऋणोः आनीय प्रक्षिपसि। तत्र दृष्टांतः। शची
भिः कर्मभिः शकटोचितव्यापारविशेषैः अक्षं न यथाक्षं प्रक्षिपंति तद्वत्। शचीभिः। शचीशब्दः शा
र्ङ्गरवादि ङीनंत आद्युदात्तः॥८॥ ॥सुरूपकृत्नुमिति नवर्चं द्वितीयं सूक्तं तत्र प्रथमा॥ सुरूपकृत्नु
मूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि॥ सुरूपकृत्नुं शोभनरूपोपेतस्य कर्मणः कर्तारमिंद्रं स्व
तये स्वरक्षणार्थं द्यविद्यवि प्रतिदिनं जुहूमसि आह्वयामः। द्योशब्दः प्रातिपदिकस्वरेणांतोदात्तः। नित्य
वीप्सयोरिति द्विर्भावः। तस्य परमाम्रेडितं अनुदात्तं चेति द्वितीयस्यानुदात्तत्वं। जुहूमसि। इदंतो मसीती
कार आगमः। प्रत्ययस्वरेण मकारउदात्तः। आह्वाने दृष्टांतः। गोदुहे गोधुगर्थं। गां दोग्धीति गोधुक्। सत्सूद्वि
षेत्यादिना क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वं। सुदुघामिव। सुष्ठु दोग्ध्रीं गामिव। यथा लोके गोदोहनार्थं तस्य

© Dharmartha Trust J&K. Digitized by eGangotri

आभिमुख्येन दोहनीयां गामाह्वयंति तद्वत्। सुष्ठु दुग्ध इति सुदुघा। दुहः कब्घश्चेति कप्रत्ययः। हकारस्य
घकारः। कित्वाद्गुणाभावः। कपः पित्वादनुदात्तत्वे धातुस्वरेणोकार उदात्तः॥१॥ ॥अथ द्वितीया॥ उप नः
सवना गहि सोमस्य सोमपाः पिब। गोदा इद्रेवतो मदः॥ हे सोमपाः सोमस्य पातरिंद्र सोमं पातुं नोऽस्मदी
यानि सवनानि त्रीणि सवनानि उप समीपे आगहि आगच्छ। सूयते सोम एष्विति सवनानि। सुपां डादेशः। टि
लोपश्चालितीति प्रत्ययात्पूर्वस्याकारस्य उदात्तत्वं। गहीत्यत्र। सेर्बहुलं छंदसीति शपो लुक्। हेर्ङित्वादनुदात्तो
पदेशेत्यादिना मकारलोपः। अतो हेरित्याभावाछांदसीये लोपे कर्त्तव्ये असिद्धवदत्राभादिति अभाच्छांदसीयो
मकारलोपो सिद्धवद्भवति। आगत्य च सोमस्य सोमं पिब। रेवतो धनवतस्तव मदो हर्षो गोदा इत्। गोप्रद एव। त्व
यि हृष्टे सत्यस्माभिर्गवो लभ्यंत इत्यर्थः॥२॥ ॥अथ तृतीया॥ ॥अथा ते अंतमानां विद्याम सुमतीनां॥ मा नो अ
ति ख्य आ गहि॥ अथ सोमपानानंतरं हे इंद्र ते तव अंतमानां अंतिकतमानां अतिशयेन तव समीपव
र्त्तिनां सुमतीनां शोभनमतियुक्तानां शोभनप्रज्ञानां पुरुषाणां मध्ये स्थित्वा विद्याम वयं त्वां जानीयाम। यद्वा
सुमतीनां शोभनानुग्रहबुद्धीनां कर्मानुष्ठानविषयाणां [illegible]र्थमित्यध्याहारः। बहुव्रीहिपक्षे पूर्वपदप्रकृतिस्वराप
वादेन सुमत्यामित्युत्तरपदांतोदात्तः। कर्मधारयादपि अव्ययपूर्वपदप्रकृतिस्वरापवादः। कृत्स्वरेणांतोदा
त्तत्वे वा। अंतोमतुपि रूपादंतोदात्ताच्च सुमतिशब्दात्परस्य नामो नामन्यतरस्यामित्युदात्तत्वं। अंतमपि नोऽस्मान
तिक्रम्य मा अतिख्यः। अन्येषां स्वरूपं मा प्रकथय। ख्याः ख्याप्रकथन इत्यस्य लुङि। अस्यतिवक्तिख्यातिभ्योङ्

© Dharmartha Trust J&K. Digitized by eGangotri

तिङ्क्स्वरस्तेदेशः। आतोलोपइटिचेत्याकारलोपः। इतश्चेतीकारलोपहल्ल्विसर्गोनमाङ्योगइत्यडभावः। गीर्हि
गामर्वत्सुलङिच्छन्दसीतिशपोलुक्। हेर्डिः। तातन्नुणस्तोपप्रेणोतिमकारलोपस्यासिद्धत्वस्याभावादितिअसिद्धत्वमात्वा
दितोहेरितिलुङ्न भवति। उभेयदिंद्ररोदसीइत्यामन्त्र्यं ऋत्वात्मकंतृतीयंसूक्तंतत्रप्रथमा॥ उभेयदिंद्ररोदसी
आपप्राथोषाइवामहांतंत्वामहीनांसम्राजंचर्षणीनां॥ देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनदिति॥ हेइंद्रउभे
रोदसीद्यावापृथिव्यौयत्त्वंयस्त्वंआपप्राथाःस्वतेजसाआपप्राथआपूरयसि। प्रापूरणे। आदादिकःछांद
सोलिट्। उषाइव। यथाउषाःस्वभासासर्वंजगदापूरयतितद्वत्तंमहीनांमहतांदेवानामपिमहांतमधिकंचर्ष
णीनांमनुष्याणामपिसम्राजमीश्वरमिंद्रंत्वांदेवीस्वनशीलाजनित्रीसाधुजनयित्रीअदितिःअजीज
नत्। अजनयत्। जनेर्ण्यंतात्लुङिचङिरूपमेतत्। यस्मादेषाजनयित्रीइंद्रंपुत्रमजीजनत्। अतःका
रणात्साभद्राकल्याणीप्रशस्ताज्ञाताजनेर्ण्यंतात्साधुत्वं॥ रितित्वज्जनितामंत्रइतिइडादौणिलोपोनि
पात्यते। ऋत्व्येभ्यइतिङीप्॥७॥ ॥अथद्वितीया॥ दीर्घंह्यंकुशंयथाशक्तिंबिभर्षिमंतुमः। पूर्वेणमघवन्पदा
वयामजोयथायमः। देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनदिति॥ दीर्घमायतंअंकुशंस्त्रणिंयथाबिभर्षि
। एवमायतांशक्तिंहेमंतुमःमंतुर्ज्ञानंतद्वन्मन्नुवसोरुरितिदीर्घमायतंअंकुशंसृणिंयथाबिभर्षि। एवमाय
तांशक्तिंहेमंतुमःमंतुर्ज्ञानंतद्वन्मतुवसोरुरितिसंबुद्धौनकारस्यरुत्वं। इंद्रस्त्वंबिभर्षिधारयसि। डुभृञ्धार
णपोषणयोः। जौहोत्यादिकःश्लोभ्यासइत्यभ्यासस्येत्वं। हेमघवन्धन। वन्निंद्रयथापूर्वेणदेहस्यपूर्व

© Dharmartha Trust J&K. Digitized by eGangotri

भागिवर्त्तमानेनपदापाठेन अजः छागः वयांशाखां आकर्षतितथापूर्वोक्तयाशक्त्या आकृष्य यमः शत्रून्निय
छसि। यमेर्लोघडागमः बहुलंछंदसीतिशपोलुक्॥ गतमन्यत्॥७॥ ॥अथतृतीया॥ अवस्मदुर्हृणायतो
मर्त्तस्यतनुहिस्थिरं। अधस्पदंतमींकृधियो अस्मां अभिदासति॥ देवीजनि अजीजनद्भद्राजनि अजीजुनदि
ति॥ दुर्हृणायतः दुःखप्रदंहरणमाचरतो मर्त्तस्यमनुष्यस्यशत्रोः स्थिरंदृढंबलमवतनुहि अवततंनी
चीनंकुरु। स्मेतिपूरकः। तंशत्रुमीमिनमधस्पदंपादयोरधस्तनाद्वर्त्तमानंकृधिकुरु। यः शत्रुरस्मानस्मान
भिदासतिउपक्षिपयति। समानमन्यत्॥७॥ ॥इतिसप्तमोध्यायेपंचमः खंडः॥ अथषष्ठेखंडेपरिस्वाने
तुचात्मकंप्रथमंसूक्तंतत्रप्रथमा॥ परिस्वानोगिरिष्ठाः पवित्रेसोमो अक्षरत्। मदेषुसर्वधा असीति॥
अयंसोमः पवित्रेदशापवित्रेपर्यक्षरत्परितःक्षरति। कीदृशः सनस्वानः शब्दायमानः। सुवान इतिब
ह्वचानांपाठः॥ सूयमानः। गिरिष्ठाः गिरिस्थायीग्रावसुपर्णमान इत्यर्थः। हेसोमसत्वंमदेषुमादकेषुसो
त्रेषुसर्वधा असिसर्वस्यधातादातावाभवसि॥७॥ ॥अथद्वितीया॥ त्वंविप्रस्त्वंकविर्मधुप्रजातमंधसः।
मदेषुसर्वधा असीति॥ हेसोमत्वंविप्रविविधंप्रीणयिता॥ विप्रसदृशोवा। त्वंचकविर्मेधावी। अंतस्त्वमंध
सोन्नात्जातंमधुमधुररसंप्रयच्छसीतिशेषः॥ ॥७॥ ॥अथतृतीया॥ त्वेविश्वेसजोषसोदेवासःपीतिमाश
त। मदेषुसर्वधा असीति॥ हेसोमत्वेत्वयिपीतिंपानंविश्वेदेवासोदेवाः समानप्रीतयः संतः आशत आप्नु
वन्॥७॥ ॥सस्सुन्वइतिप्रगाथात्मकंद्वितीयंसूक्तंतत्रप्रथमा॥ ससुन्वेयोवसूनांयोरायामानेतायईडानांसो

74

© Dharmartha Trust J&K. Digitized by eGangotri

मोयः सुक्षितीनामिति।। स सोमः सुन्वे अभिसुषुवे ऋत्विग्भिर्यः सोमः वसूनां धनानामानेता। यश्च रायां
रातिप्रयच्छति क्षीरादिकमिति रायो गावः तेषामानेता यश्च इडानामन्नानां च। यश्च सोमः सुक्षितीनां सुनि
वासानां शोभनमनुष्ययुक्तानां गृहाणामानेता मा अस्मिन्नभिषुतो भूदिति।।८।। ।।अथ द्वितीया।। यस्य त इंद्रः
पिबाद्यस्य मरुतो यस्य वार्य्यमणा भगः। आ येन मित्रावरुणा करामह एंद्रमवसे महे इति।।८।। हे सोम यस्य अभि
षिक्तस्य ते तव रसं इंद्रः पिबात् पिबति। पा पाने लेट्याडागमः। यं च सोमं मरुतः पिबंति। वा अपि च अर्य्यमणा एत
न्नामकेन देवेन सह भगो देवो यं सोमं पिबति। येन सोमेन मित्रावरुणा मित्रावरुणौ वयमाकरामहे। अभि
मुखी कुर्म्मीह। तथा महे महते अवसे रक्षणाय येन सोमेन इंद्रमभिमुखी कुर्म्महे तं त्वामभिषुणोमी
त्यर्थः।।८।। ।।तं व इति सप्तर्चात्मकं तृतीयं सूक्तं तत्र प्रथमा।। तं वः सखायो मदाय पुनानमभिगायत। शिशुं
न हव्यैः स्वदयंत गूर्त्तिभिरिति।। हे सखायः ऋत्विजो वो यूयं मदाय देवानां मदार्थं पुनानं पूयमानं तं सोममभि
गायत अभिष्टुत। तमिमं सोमं शिशुं न। शिशुमिव अलंकारैः क्षीरादिभिश्च स्वादूकुर्वंति तद्वत् हव्यैर्ह
विर्भिर्मिश्रणैर्गूर्त्तिभिः स्तुतिभिश्च स्वदयंतु स्वादूकुर्वंति।।८।। ।।अथ द्वितीया।। सं वत्स इव मातृभिरि
दुर्हिन्वानो अज्यते। देवावीर्मदो मतिभिः परिष्कृत इति।। हिन्वानः प्रेर्य्यमाणः इंदुः सोमः वसतीवरीभिः स
मज्यते सम्यक् सिक्तो भवति। तत्र दृष्टांतः। वत्स इव वत्सो यथा मातृभिर्गोभिः समक्तो भवति तद्वत्। कीदृ
शः देवावीः देवानां रक्षकः मदो मदकरः मतिभिः स्तुतिभिः परिष्कृतो लंकृतः भूषणार्थे संपर्य्युपेभ्यः इति सु

© Dharmartha Trust J&K. Digitized by eGangotri

ङ्गमः।परिनिविम्पइतिसुदःषलं।।७।। ।।ऽथतृतीया।।ऽयंदक्षायसाधनोऽयंशर्द्धायवीतये।ऽयंदे
वेभ्योमधुमत्तरःसुतइति।ऽयंसोमःदक्षायबलायवर्द्धनायवासाधनःसाधयिताभवति।तथायं
सोमःशर्द्धायबलायवीतयेदेवानांभक्षणार्थंचभवति।सुतःअभिषुतोयंसोमःदेवेभ्यइन्द्रादिभ्योमधु
मत्तरःअतिशयेनमाधुर्ययुक्तोभवति।अत्यंतंमदकरोभवतीतिवा।।७।। ।।सोमाःपवंतइतितृचात्म
कंचतुर्थसूक्तंतत्रप्रथमा।।सोमाःपवंतइंदवोऽस्मभ्यंगातुवित्तमाः।मित्राःस्वानाअरेपसःस्वाध्यःस्व
र्विदइति।।गातुवित्तमाःअतिशयेनमार्गस्योपलंभकाः।इंदवोदीप्ताःसोमाःपवंतेअस्मभ्यमस्मदर्थं
क्षरंति।आगच्छंतिवा।।कीदृशाः।मित्राःदेवानांसखिभूताःस्वानाःसुन्वानाःअभिषूयमाणाःअरेपसः
पापरहिताःअतएवस्वाध्यःशोभनाध्यानाःस्वर्विदःसर्वज्ञाःस्वर्गप्रापकावा।।७।। ।।ऽथद्वितीया।।
तेपूतासोविपश्चितःसोमासोदध्याशिरः।सूरासोनदर्शतासोजिगत्नवोध्रुवाघृतइति।।पूताःपवित्रेणपरि
पूताः।विपश्चितोमेधाविनोदध्याशिरःदध्यामिश्रणाःघृतेवसतीवयस्मिन्नुदके।जिगत्नवोगमनशीलाः
ध्रुवास्तत्रस्थैर्येणवर्त्तमानाःतेसोमासःसोमाःसूरासोनसूर्यइवदर्शताःसःपात्रेषुसर्वैर्दर्शनीयाभवं
ति।।७।। ।।ऽथतृतीया।।सुष्वाणासोव्यद्रिभिश्चिताना।गोरधित्वचि।इषमस्मभ्यमभितःसमस्वरन्वसु
विदइति।।गोरनडुहःअधित्वचिअधिषवणचर्मणि।चितानाःज्ञायमानाःअद्रिभिर्ग्रावभिर्विविधंसुष्वाणा
सःसूयमानाःवसुविदोवसुनोलंभकाःएतेसोमाऽस्मभ्यमिषमन्नमभितःसमस्वरन्सम्यक्शब्दयंति।

75

© Dharmartha Trust J&K. Digitized by eGangotri

प्रयच्छंतीतियावत्॥७॥ ॥अथ अयापवेति त्र्यात्मकंपंचमंसूक्तंतत्रप्रथमा॥ अयापवापवस्वेनावसूनि
मांश्चत्वइंदोसरसिप्रधन्व॥ब्रध्नश्चिदत्रवातोनजूतिःपुरुमेधाश्चित्तकवेनरंधादिति॥हेसोम अयाअन
यापवापवमानयाधारयाएनाएनानिवसूंनिभवतिपवस्वक्षर॥पवा॥पूञ्पवनेअन्येभ्योपिदृश्यंतइति
क्विप्प्रत्ययः॥आदुधातुकत्वलक्षणोगुणः सावेकाचइतितृतीयायाउदात्तत्वं॥तथाहेइंदोत्वंमांश्चत्वेमन्यमा
नानांचानकेसरसिउदकेवसतीवर्यायाश्चित्प्रधन्वप्रगच्छ॥यस्यसोमस्यरसोधनेसतिब्रध्नश्चित्सर्वेषांमहान् भं
कःमूलभूतोवाआदित्योपिवातोनवायुरिवजूतिंवेगंप्राप्तःसन्किंचपुरुमेधाश्चिद्बहुविधयज्ञइंद्रोपित
कवेतकतिगतिकर्मसुपठितः॥अस्मादौणादिकउन्प्रत्ययः सोमममिगच्छतेमह्यंनरंकर्मनेतारंपुत्रंधात्
ददातुप्रयच्छतु॥सत्वंप्रधन्वेतिपूर्वेणसंबंधः॥यस्यात्रेतिपाठे॥जूतिर्जूतइतिधाद्गदितिच॥७॥ ॥अ
तेपूर्तीतीया॥उतनएनापवयापवस्वाधिश्रुतेश्रवाय्यस्यतीर्थे॥षष्टिंसहस्रानैगुतोवसूनिवृक्षंनपक्वंधून
वद्रणाय॥हेसोमउतापिचश्रवाय्यस्यसर्वैःश्रवणीयस्यतवश्रुतेप्रसिद्धेयज्ञाख्येपर्वतुर्थी॥श्रुतः
शब्दस्यतीर्थेस्थानेनोस्माकंस्वभूतयज्ञेएनाअनयापवयापूयमानयाधारयाअधिकंपवस्वक्षर॥नैगु
तः नीचीनंधनंगतवेशत्रुर्यंतइतिगुतःशत्रवःतेषांहंतृत्वेनसंबंधीसोयंसोमःषष्टिसंख्याकानिसहस्रा
सहस्राणिवसूनिधनानिरणायशत्रूणांजयार्थंधूनवत्अस्माकमकंपयत्प्रायच्छदितियावत्॥कथमिव
वृक्षंनपक्वंपक्वफलंवृक्षंयथाकंपयतिफलार्थीतद्वत्॥७॥ ॥अथतृतीया॥महीमेअस्यवृषनामशूषे

© Dharmartha Trust J&K. Digitized by eGangotri

मांऽस्त्वे वा पृशने वा वधत्रो अस्वापरान्निगुतस्त्वेहयस्त्वा पामित्रां अपाचितो अचेत इति ॥ महि महते
प्रभृते वधनाम । सुपां सुलुगिति सुपो लुक् । वधनामनी वर्प्पणेन मने शराणां वर्षणं शत्रूणां नमनं इमे
एते द्वे कर्मणी । अस्य सोमस्य अत्र बे सुखकरे भवतः । येच कर्म्मणि मांऽस्त्वे अस्वनामेतत् । मध्वुचरतीति
अश्वैः क्रयमाणे युद्धे तत्साध्यत्वात् युद्धमिह गह्यते । वा अपि वा स्पृशने स्पर्शने स्ताध्येवाहुर्युद्धे वधत्रे शत्रू
[illegible]सुप अरीले भवतः । सोयं नि गुनः नीचैः शाड्याघमानात् शत्रून् स्वापयन् । निम्याम सूषुपत् । अवधीरि
र्यः । किं च स्लेहयत् प्राड्वयत् । संग्रामात् शत्रून् अप[illegible]स्तः । हे सोम सत्वं अमित्रान् शत्रून् अपाव
अपगमय । तथा च अचितः । अग्निचयनम् कुर्वतो [illegible]स्तिकां अद्व इतो अस्मत्सकाशात् अपाव अपगमय । अ
चतिर्गतिकर्मा ॥ ७ ॥ ॥ इति सप्तमेऽध्याये षष्ठः खंडः ॥ ॥ अथ सप्तमे खंडे प्रथमं तत्र प्रथमा ॥ अग्ने त्वं नो
अंतम उत त्राता शिवो भुवो वरूथ्य इति ॥ हे अग्ने वरू[थ्]यः वरणीयाः संभजनीयः यद्वा वरूथैः परिधिभिर्वृत
स्त्वं नोऽस्माकं अंतमोंतिकतमा भुवो भव । उत अपि [त्रा]ता रक्षकः शिवः सुखकरश्च एवम् भुवो भवेति पा
ठो ॥ ७ ॥ ॥ अथ द्वितीया ॥ वसुरग्निर्वसुश्रवा [illegible]न क्षि द्युमत्तमो रयिं दा इति ॥ वसुर्वासकोऽग्निः सर्वे
षामग्रणीः वसुश्रवाः व्याप्तान्नत्वं अच्छाभिमुखं [illegible]क्षि अस्मान् व्याप्नुहि । द्युमत्तः अतिशयेन दीप्तिमांस्त्वं
रयिं पश्वादिलक्षणं धनं दाः अस्मभ्यं देहि । द्युमत्तमो द्युमत्तममिति पाठो ॥ ७ ॥ ॥ अथ तृतीया ॥ तं त्वा शो
चिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्य इति ॥ हे शो[चि]ष्ठ अतिशयेन शोचिष्मन् दीदिवः स्वतेजोभिर्दीप्त

© Dharmartha Trust J&K. Digitized by eGangotri

नेतं त्वां सुम्नाय सुखाय। सुम्नमिति सुखनामैतत्। तदर्थं सखिभ्यः समानख्यातिभ्यः पुत्रेभ्यः स्तदर्थं
च नूनमीमहे याचामहे॥७॥ ॥अथ द्वितीयत्वेऽध्यमा॥ इमा नु कं भुवना सीषधामेंद्रश्च विश्वे च देवाः इति
॥इमा इमानि परिदृश्यमानानि भुवनानि नु [भ]वतः। सीषधेम साधयेम। वशीकरवाम। कमिति पूरकः॥
यद्वा इमानि सर्वाणि भूतजातानि अस्मभ्यं कं सुखं [व]सीषधेम। साधयंतु पुरुषव्यत्ययः। इंद्रश्च विश्वे सर्वे
अन्ये देवाश्च स्तुसा प्रीता इममर्थं साधयंतु। सीषधे[मे]म सीषधामेति पाठौ॥७॥ ॥अथ द्वितीया॥ यज्ञं
च नस्तन्वं च प्रजां चादित्यैरिंद्रः सह सीषधाति॥ अस्माकं यज्ञं ज्योतिष्टोमादिकं च यागं तन्वं शरीरं च
प्रजां पुत्रादिकां च आदित्यैरदितिपुत्रै रन्यैर्देवैः सह व[र्त]मान इंद्रः सीषधात् साधयतु। सह सीषधातु
सहचीकृपातीति पाठौ॥७॥ ॥अथ तृतीया॥ आदि[त्यै]॥ इंद्रस्सगणो मरुद्भिरस्मभ्यं भेषजा करद्
च
[आ]दित्यैरदितिपुत्रैर्मि आदित्यैर्मरुद्भिश्च सगणः स[हि]त इंद्रः अस्माकमस्मभ्यं भेषजा भेषजान्यौ
अंतमुत
[औ]षधानि करत्करोतु। भेषजा करत्। भूत्वविताननूनामिति पाठौ॥७॥ ॥अथैकर्चात्मकं सूक्तं प्रवो वर्चो
पेति चतुरक्षरात्मिका का विधियम कुल्पाय यथा वद्धकवाभां भद्रौ अपि वा नयमन इत्येक एव पाहन्गाल्म
श्च तद्वत्। हे अग्ने लिप्य जामाना वो पूर्यंतु पसमीपे प्रार्च्य प्रकर्षेणेंद्रं पूजयत॥७॥ ॥इति सप्तमेऽध्याये सप्तमः
खंडः॥७॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥७॥ इति
श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्य

© Dharmartha Trust J&K. Digitized by eGangotri

णविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्तराग्रंथेसप्तमोऽध्यायःसमाप्तः॥७॥ ॥यस्यनिश्वसितं
वेदायोवेदेभ्योखिलंजगत्। निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥७॥ ॥अथाष्टमोऽध्यायआरभ्यते॥
तत्रप्रकाव्यमितिप्रथमेखंडेद्व्यृचस्यार्चप्रथमसूक्तेप्रथमा॥ ॥प्रकाव्यमुशनेवब्रुवाणोदेवोदेवानांजनिमा
विवक्ति।महिव्रतःशुचिबंधुःपावकःपदावराहोअभ्येतिरेभन्निति॥उशनेवएतन्नामकऋषिरिवकाव्यं
[illegible]स्तोत्रंब्रुवाणउच्चारयन्देवःस्तोतादेवानामिंद्रादीनांजनिमजन्मानिप्रविवक्तिप्रकर्षेणब्रवी
[illegible]वचपरिभाषणे।व्यत्ययेनविकरणस्यश्लुः।बहुलं[illegible]सीत्यभ्यासस्येत्वं।महिव्रतःप्रभूतकर्मा।शु
चिबंधुः।बध्नंतिशत्रूनितिबंधूनितेजांसिबलानिवा[illegible]तिजस्कःपावकःपापानांशोधकःवराहःवरंवत
दहस्यवराहः।राजाहःसर्वस्यप्रेष्टजितिरच्युसमा[illegible]तःतस्मिन्नहनिअभिषूयमाणत्वेनतद्वानुम्म
ऽर्थआदित्वान्मत्वर्थीयोअच्।ताहशःसोमःरेभंशब्दंकुर्वन्पदापदानिस्थानानिपात्राणिअभ्ये
ति।अभिगच्छतियद्वायथाकश्चनवराहःपदापादेनभूमिंविक्रममाणःशब्दंकुरोतितद्वत्॥७॥ ॥अथ
द्वितीया॥ ॥प्रहंसासस्तृपलावग्नुमच्छामादस्तं[illegible]णंअयासुः।आंगोषिणंपवमानंसखायोदुर्म
र्षंवाणंप्रवदंतिसाकमिति॥ हंसासःशत्रु[illegible]नाःहंसाइवआचरंतोवावृषगणाःएतन्नामकाऋ
षयःअमानुषात्रूणांबलात्त्रासिताःसंतःतृपलात्तृपलं।सुपांसुलुगितिसोराकारादेशः।तृपलशब्दः
क्षिप्रवाची।तदुक्तंयास्केन।तृपलप्रभर्माक्षिप्रप्रहारीति।क्षिप्रप्रहारिणंवग्नुंअभिषवशब्दंमच्छ।मित्यस्या

77

© Dharmartha Trust J&K. Digitized by eGangotri

सि

स्तं यज्ञगृहं प्रायासुः प्रायासिषुः प्रगच्छंति। ततः सखायः स्तुतः स्तोतृत्वलक्षणेन संबंधेन सखि
भूतास्तोतारा अंगोषिणं सर्वैरभिगंतव्यं। यद्वा अंगोषिणं स्तोत्रार्हं दुर्म्मर्षं शत्रुभिर्दुर्धर्षं दुःसहं ए
वंविधं सोमं पवमानमुद्दिश्य वाणं वाच्छ विश[illegible]सं हेत्वप्रवदंति प्रवादयंति तदुपलक्षितं गानं कुर्व
ती सर्पः॥७॥ ॥अथ तृतीया॥ स योजत उ[illegible]य स्य जूतिं रथा क्रीडंतं मिमते न गावः। परीणसं
कृणुते तिग्मशृंगो दिवा हरिर्ददृशे नक्तमृज्र इति॥ स सोमः उरुगायस्य बहुभिः स्तुतस्य। स्य मनो जू
तिं गतिं योजते युनक्ति। अंतरिक्षे प्रेरयति। रथा क्रीडंतं अनायासेन विहरंतं गच्छंतं सं सोमं गावः
अन्ये गंतारः न मिमते न परिच्छिंदंति। तमनुमातुं न [illegible] कुर्वंती स्पर्धः। किंच। तिग्मशृंगः अणंति हिंसं
ति तमांसीति शृंगाणि तेजांसि। तेजस्कः। परीणसं बहु नामैतत्। बहुविधं तेजः कृणुते करोति। अ
[illegible]र्तमानो यः सोमो दिवा अहनि हरिर्हरितवर्णो दृश्यते। न प्रकाशत इत्यर्थः। नक्तं रात्रौ तु
ऋज्रः ऋजुगामी विस्पृष्टः प्रकाश उक्तो दृश्यते। हरेः कर्माणि लिटि रूपं॥७॥ ॥अथ चतुर्थी॥ प्रस्वा
नासो रथा इवार्वंतो न श्रवस्यवः। सोमासो राये अक्रमुरिति॥ प्रस्वानासः अधिषव वेलायां उपर
वेषु शब्दं कुर्वंतः। सोमासः सोमाः रथा इव शब्दं कुर्वंतो रथाः तथा अर्वंतो न यथा शब्दं कुर्वंतो अश्वत
था श्रवस्यवः शत्रुभ्यः सकाशादन्नमिच्छंतो राये यजमानानां धनाय प्राक्रमुः प्रगच्छंति॥७॥ ॥अथ
पंचमी॥ हिन्वानासो रथा इव दधन्विरे गभस्त्योः। भरासः कारिणामिव॥ रथा इव युद्धं प्रति यथा र

© Dharmartha Trust J&K. Digitized by eGangotri

यास्तथा । स्विानासः यागेदेशं प्रतिगच्छंतः सोमागभस्त्योः ऋत्विजां बाह्वोरिधन्विपधीयंते । तत्र दृष्टां
तः भरासोभराः कारिणामिवयथाभारवाहानां बाह्वोर्धीयंते तद्वत् ॥७॥ ॥ अथ षष्ठी ॥ राजानोनप्र
शस्तिभिः सोमासोगोभिरंजते । यज्ञोनसप्तधातृभिरिति ॥ सोमासः सोमाः प्रशस्तिभिः प्रशस्ताभिः ।
स्तुतिरूपाभिर्वाग्भी राजानोनयथाराजानः सप्तधातृभिः सप्तहोत्राभिर्यज्ञोनयथाचयज्ञः तथागोभि
[illegible]ः पयोभिरंजते अज्यते । संस्क्रियंत इत्यर्थः ॥७॥ ॥ अथ सप्तमी ॥ परिस्वानासइंदवोमदाय
[illegible]णागिरा । मधोअर्षंति धारयेति ॥ स्वानासः सुवानाः [illegible]भिषूयमाणाः इंदवः सोमाः बर्हणामहत्या गि
रास्तुतिरूपयावाचायुक्ताः संतः मदाय मदार्थं मधोर्म्म[illegible]रसस्य धारया पर्य्यर्षंति परितो गच्छंति । परिस्वा
नासः परिसुवानास इति पाठो । मधोसुता इति च[illegible]७॥ ॥ अथाष्टमी ॥ आपानासोविवस्वतोजिन्वंत ।
उषसोभगं । सूराअएवं वितन्वत इति ॥ विवस्वतः [illegible]मित इंद्रस्य आपानासः आपानभूताः उषसोभगं
उषसः शोभां जिन्वंतः प्रेरयंतः सूराः सरंतः सोमा[illegible] अएवं तितन्वते अभिषववेलायां उपरवेषु शब्दं कुर्वंति ।
जिन्वंतो जनंत इति पाठो ॥७॥ ॥ अथ नवमी ॥ [illegible]रामतीनां पवमानाऋएवंतिकारवः । वत्सोहरसआय
व इति ॥ मतीनां कारवः स्तुतीनां कर्त्तारः प्र[illegible]सः सेवकस्य सोमस्य हरसः आहर्त्तारः आयवोम
नुष्या ऋत्विजा द्वारा यज्ञस्यद्वाराणि अपऋएवंति [illegible]वृएवंति ॥७॥ ॥ अथ दशमी ॥ समीचीनासआशत
होतारः सप्तजानयः । पदमेकस्य पिप्रत इति ॥ समी[illegible]नासः समीचीनाः जानयोजानिसदृशाः एकस्य सोमस्य

© Dharmartha Trust J&K. Digitized by eGangotri

पदं स्थानं पिप्रतः पूरयंतः सप्त होतारः सप्त होत्रकाः यज्ञे सोमम् आशतश्च आ भुवंति। आयात आसत इति पा
ठे॥ जानयोजामयइतिच॥ ७॥ ॥ अथैकादशी॥ नवानामित्र आहस्व चक्षुषा सूर्यं दृशे। कुवेरपत्स मादुह इति
॥ नाभिं यज्ञस्य नाभिभूतं सोमं नो स्माकं नाभानभि हिमादधे। सोमं पीत्वा नाभिस्थाने करोमि। सूर्यः। किं
मर्थं चक्षुषा सूर्यं दृशे द्रष्टुं किंच। कवेः क्रांतकर्म्मणः एतामस्य अपत्यम् अंशुम् आदुहे आपूरयामि चक्षुषा सू
र्यं दृशे चक्षुष्मिन् सूर्यस्य च इति पाठे॥ ७॥ ॥ अथ द्वादशी॥ अभिप्रियं दिवस्पदम् अध्वर्युभिर्गुहा हितं। सूरः प
श्यति चक्षसेति। सूरः सुवीर्य इंद्रः चक्षसा चक्षुषा सोमस्य आसनः प्रियं पदम् अध्वर्युभिः गुहा गुहायां
हृदये हितं निहितं पीतं सोमम् अभिपश्यति। प्रियं प्रिये ति पाठे॥ ७॥ ॥ इत्यष्टमोऽध्याये प्रथमः खंडः॥ ७॥ ॥
अथ द्वितीये खंडे असृग्रमिति द्वादशर्चं प्रथमं सूक्तं तत्र प्र॥ मा॥ असृग्रमिंदवः पथा धर्म्मन्नृतस्य सुश्रि
युः सोमः ता अस्य योजनेति। अस्य अनेन यजमानेन कृतां योजना तद्देवतायोग्यान् संबंधान् विदाना जा
नंतः सुश्रियः शोभनश्रवणाः इंदवः सोमाः धर्मन् कर्मणि ऋतस्य यज्ञस्य पथा मार्गेण असृग्रं हि विद्वांना
नुसृज्यंते योजनायोजनमिति पाठे॥ ७॥ ॥ अथ द्वितीया॥ प्र धारा मध्वो अग्रियो महीरपो विगाहते। हवि
र्हविष्षु वंद्य इति॥ हविष्षु हविषां मध्ये वंद्यः स्तुत्यो हविर्हविरात्मको यः। सोमः महीर्महतीरपो वसतीवरीर्वि
गाहते। तस्य मध्वः सोमस्य सोमस्य अग्रियो मुख्या धाराः प्रपतंति सर्पः। मधोर्मध्व इति पाठे॥ ७॥ ॥
अथ तृतीया॥ प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने। सद्माभि सत्यो अध्वर इति॥ अग्रियो हविषां

© Dharmartha Trust J&K. Digitized by eGangotri

मध्येमुख्यः सोमयुजायुक्तावाश्वः प्रकरोतीत्यर्थः। एतदेवदर्शयति। वृषः कामानांवर्षकः सत्यः सत्यभूतः
अध्वरोहिंसावर्जितः सोमः सप्रपद्यग्रहं अभिप्रतिवनेउदके अविक्रदत्। शब्दंकरोतीत्यर्थः। वृषो अविक्र
दत्वृषावक्रिकदितिपाठे॥८॥ ॥अथचतुर्थी॥ परियत्काव्याकविर्नृम्णापुनानो अर्षति। स्वर्वाजीसिषा
सतीति। कविः क्रांतकर्मसोमो नृम्णा निबलानि पुनानः शोधयन्काव्याकाव्यानिकविकर्माणिस्तोत्राणिय
[illegible] तीः परिगच्छति। तदास्वः स्वर्गेवाजीबलवान्नवान्वेंद्रः सिषासतियागंप्रत्यागंतुस्वकीयंबलंसंभ
[illegible] च्छति। पुनानोवसानइतिपाठे॥८॥ ॥अथपंचमी॥ पवमानो अभिस्पृधोविशोराजेवसीदतीाय
दीमृण्वंतिवेधसइति॥ यघ्रदाइमेनं सोमंवेधसः कर्म्मणं [illegible] त्तारः ऋत्विजः ऋण्वंतिप्रेरयंति। तदापवमानः
क्षरन्नेषसोमः स्पृधः स्पर्द्धमानान्यागविघ्नकारिणो [illegible] कसादीनभिषीदति। नाशयितुमभिगच्छति। तत्रदृ
ष्टांतः। विशोराजेवयथाराजाविशः स्पर्द्धमानान्मनुष्यान्नाशयितुमभिगच्छतितद्वत्॥८॥ ॥अथषष्ठी॥
श्री अव्यावारेपरिप्रियोहरिर्वनेषुसीदति। रेभोवनुष्यते [illegible] तीति॥ हरिर्हरितवर्णः प्रियोदेवानांप्रियतमः एषसो
मः वनेषूदकेषुसंपृक्तः अव्यो अवेः वारेवालेपरि [illegible] त्॥ किंचारेभोभिषववेलायांउपरवेषुशब्दंकुर्वन्मतीम
त्सास्तुसावनुष्यते। सेव्यते॥८॥ ॥अथस [illegible] वायुमिंद्रमश्विनासाकंमदेनगच्छति। रणायो अस्यधर्म्म
णेति॥ योयजमानः अस्यसोमस्यधर्मभिः कर्मभिः क्रयणाभिषवादिभिः रणरमते। सयजमानोवायुमिंद्रंच
अश्विना अश्विनौचमदेनसाकंसहगच्छतिप्रमन्नौति॥८॥ ॥अथाष्टमी॥ ॥आमित्रेवरुणेभगेमधोः पिबंत

79

मन्नौ

© Dharmartha Trust J&K. Digitized by eGangotri

जन्मेयः॥ विदानाअस्यशाक्मभिरिति॥ येषांयजमानानांमध्येः सोमस्योर्मयस्तरंगाः मित्रावरुणौदेवौ
गो भगंभगशब्दंदेवंचप्रतिपद्यंतेसरंति। तेयजमानाः अस्यसोमस्यइमंसोमंविदानाःजानंतःशाक्मभिःसुखैःसं
गच्छंतइतिशेषः॥८॥ ॥अथनवमी॥ अस्मभ्यं॥ परियिंमध्वोवाजस्यसातयेप्रवोवसूनिसंजितमिति॥
हेरोदसीद्यावापृथिव्यौयुवांमध्वोदेवानांमादयितुर्नस्यसोमात्मकस्यान्नस्यसातयेलाभायअस्मभ्यंर
यिंधनंअश्वावन्तंचवसूनिवासकान्यन्यान्यपिपश्वादीनिधनानिसंजितंसंजयतंप्रयच्छतमित्यर्थः॥८॥ ॥अथ
दशमी॥ आतेदक्षंमयोभुवंवह्निमद्यावृणीमहे। पांतमापुरुस्पृहमिति॥ हेसोमयष्टारोवयंतेतवस्वभूतंद
क्षंबलंअद्यास्मिन्यागदिनेआभिमुख्येनावृणीमहे। [illegible]भजामहे। कीदृशंमयोभुवंसुखस्यभावकंवह्निंध
नादीनांप्रापकंपांतंशत्रुभ्योरक्षकंपुरुस्पृहंबहुभिःस्पृहणीयंकाम्यमानंबलमिति॥८॥ ॥अथैकादशी॥
ष्ठा॥ [illegible]मावरेण्यमाविप्रसामनीषिणं। पांतमापुरुस्पृहमिति॥ हेसोममंद्रंमदकरंस्तुत्यंवात्वामावृणीमहे
अद्यावारेण
[illegible]एयंसर्वैर्वरणीयंसंभजनीयंच। किंच। विप्रंमेधाविनंत्वांतथामनीषिणंमनसईषामनीषा। तद्वंतंस्तु
तिमंतंवात्वामावृणीमहे। प्रत्येकंविशेषणेआयेषाआडुपसर्गःकृतः। किंच। पांतंसर्वेषांरक्षकंपुरुस्पृ
हंबहुभिःस्पृहणीयंचत्वांसंभजामहे॥८॥ ॥अथद्वादशी॥ आरयिमासुचेतुनमासुक्रतोतनूष्वा। पांत
मापुरुस्पृहमिति॥ हेसुक्रतोशोभनप्रज्ञसोमत्वदीयंरयिंधनंवयमावृणीमहे। किंच। सुचेतुनंचितोसंज्ञाने
भावेअणादिकउनत्प्रत्ययःसुज्ञानंच। किंच। तनूषुअस्मत्पुत्रेषुधनंसुज्ञानंचत्वमाविधेहि। यद्वापुत्रार्थं

© Dharmartha Trust J&K. Digitized by eGangotri

वयमावृणीमहे। तथापां तं सर्वस्य रक्षकं पुरुस्पृहं बहुभिर्यष्टृभिः काम्यमानं त्वां संभजा तथापां तं सर्वस्य र
क्षकं पुरुस्पृहं बहुभिर्यष्टृभिः काम्यमानं त्वां संभजामहे॥८॥ ॥इत्यष्टमेऽध्याये द्वितीयः खंडः॥ अथ तृती
यखंडे प्रथमत्वे प्रथमा॥ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं। कविं सम्राजमतिथिं ज अग्नौ
नानामासन्नः पात्रं जनयंत देवाः इति॥ मूर्द्धानं शिरोभूतं कस्य दिवो द्युलोकस्य पृथिव्याः पृथिव्या भूमेरर
[..]गंतव्यं स्वामिनं वैश्वानरं विश्वेषां नराणां संबंधिनं ऋते कृतमिति सत्यस्य यज्ञस्य वा नाम निमित्त
[..]तस्मिन्यषा ऋतनिमित्तं आभिमुख्येन जातं स्वप्रादुर्भूतं [..]वेऽक्षां तदर्थिनं सम्राजं सम्यग्राजमानं जनानां य
जमानानां अतिथिं हविर्वहनाय सततं गंतारं। यद्वा अतिथि[..]वत्पूज्यं। आसन् आसनि द्वितीयार्थे सप्तमी। आ
स्यभूतं अग्निलक्षणेनास्येन हि देवा हवींषि भुंजते। तोऽस्य[..]कं पात्रं पातारं रक्षकं वैश्वानरमग्निं देवा स्तोतार ऋ
त्विजः देवा एव वा आजनयंत यज्ञाभिमुख्येनाजीजनन् अरण्योः सकाशात् उत्पादयन् आसंनः पात्रं आस
न्ना पात्रमिति पाठौ॥८॥ ॥अथ द्वितीया॥ त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवंते। तव क्रतु
भिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेरिति॥ [..]रतमरणरहिताग्ने विश्वे सर्वदेवाः स्तोतारः जायमानं
अरण्योः सकाशादुत्पद्यमानं त्वां शिशुं न पुत्र[..]संनवंते अभिसंस्तुवंति। यद्वा दीव्यंतीति देवा रश्मयः
ते सर्वे जायमानं त्वां अभिसंनवंते अभिसंगच्छंते। यथा पितरः पुत्रमभिगच्छंति। अपि च हे वैश्वानराग्ने यद्यदा त्व
पित्रोः पालयित्र्योर्द्यावापृथिव्योः मध्ये अदीदेः दीप्यसे तदानीं तव त्वदीयैः क्रतुभिः कर्मभिर्ज्योतिष्टोमादिभिर्या

© Dharmartha Trust J&K. Digitized by eGangotri

गेरमृतत्वं देवत्वमायन् यजमानाः प्राप्नुवंति॥ ७॥ ॥ अथ तृतीया॥ नाभिं यज्ञानां सदनं रयीणां महामाहा
वमभि संनवंत। वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयंत देवा इति॥ यज्ञानां ज्योतिष्टोमादियागानां
नाभिं नहनं बंधकं। तथा रयीणां धनानां सदनं रयियावे मकनिलयं महाम्महांतं आहावं आहूयंते स्मिन्न्
हुतय इत्याहावः। तादृशं यद्वा वक्ष्यमाणस्रुक्धाराणां आधारावस्थानीयमेवंभूतमग्निं अभिसंनवंतः स्तोतारः
सम्यक् स्तुवंति। तथा वैश्वानरं विश्वेषां नराणां संबंधिनं अध्वराणां यज्ञानां रथ्यं रथिनं यथा रथी स्वरथं नय
ति। तद्वन्नेतारं रंहयितारं गमयितारं यज्ञस्य केतुं प्रज्ञापकं एवंविधमग्निं देवाः स्तोतारः ऋत्विजो देवा एवा ज
नयंत जनयंति मंथनेनोत्पादयंति॥ ७॥ ॥ अथ पद्वितेत्वे प्रथमा॥ प्र वो मित्राय गायत वरुणाय विपा गि
रा महिक्षत्रावृतं बृहत् इति॥ हे महीयाः ऋत्विजः वो यूयमित्येतत्। मित्राय वरुणाय च विपा व्याप्तया गिरा स्तुत्या
त्विजः प्रगायत कुरुत। स्तुत्या स्तुतेस्येन पाकं भवतीति वत। हे महिक्षत्रौ प्रभूतबलौ युवां ऋतं यज्ञं बृहन्महत्
अतिप्रवृद्धं स्तुत्यर्थमागच्छतमिति शेषः। अथवा महत्प्रभूतं ऋतं सत्यं ऋणुतमिति शेषः॥ ७॥ ॥ अ
थ द्वितीया॥ सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च देवा देवेषु प्रशस्ता इति। या यौ मित्रश्च वरुणश्च पर
स्परापेक्षया च शब्दः। उभा उभौ सम्राजा सर्वस्य स्वामिनौ घृतयोनी उदकस्योत्पादकौ देवा द्योतमानौ देवेषु म
ध्ये प्रशस्ता प्रकर्षेण स्तुत्यौ तौ स्तुत्या गायतेति पूर्वत्रान्वयः॥ ७॥ ॥ अथ तृतीया॥ ता नः शक्तं पार्थिवस्य
महो रायो दिव्यस्य। महि वां क्षत्रं देवेष्विति॥ ता तौ देवौ नोस्मभ्यं पार्थिवस्य पृथिवी संबद्धस्य दिव्यस्य दिवि भ

© Dharmartha Trust J&K. Digitized by eGangotri

वस्य च महो महतो रायो धनस्य शक्तं समर्थं भवतं दातुमिति शेषः। हे देवौ वां युवयोर्महि महत् पृक्षं सत्रं बलं
देवेषु प्रसिद्धं स्तुम इति शेषः।।८।। ।।अथ द्वितीयतृचे प्रथमा।। इंद्रायाहि चित्रभानो सुता इमे त्वायवः। अ
ण्वीभिस्तना पूतास इति।। चित्रभानो हे विचित्रदीप्ते इंद्र अस्मिन्कर्म्मणि आयाहि आगच्छ सुताः अभिषु
ता इमे सोमाः त्वायवः त्वां कामयमाना वर्त्तंते। अण्वीभिः अण्व्य इत्यंगुलिनामैतत्। ऋत्विजाम् अंगुलिभिः
...ाद्यन्वयः। किंचैते सोमाः तना नित्यं पूतासः शुद्धा दशापवित्रेण शोधितत्वात्।।८।। ।।अथ द्वितीया।
...ाहि धियेषितो विप्रजूतः सुतावतः। उप ब्रह्माणि वाघ...त इति।। हे इंद्र त्वमायाहि अस्मिन्कर्मण्यागच्छ।
किमर्थं वाघतः ऋत्विङ्नामैतत्। ऋत्विजो ब्रह्माणि वेदरूपा...स्तोत्राण्युपैतुं। कीदृशस्त्वं धिया अस्मदीयया प्र
ज्ञया इषितः प्राप्तः अस्मन्मत्यापि प्रेरित इत्यर्थः। विप्रज...ः यथा यजमानभक्त्या प्रेरितः तथान्यैरपि विप्रैर्मे
धाविभिर्ऋत्विग्भिः प्रेरितः। कीदृशस्य वाघतः सुतावतः अभिषुतसोमयुक्तस्य।।८।। ।।अथ तृतीया।।
इंद्रायाहि तूतुजान उप ब्रह्माणि हरिवः। सुते दधिष्व नश्चन इति।। हरिशब्दः इंद्रसंबंधिनोरश्वयोर्नामधेयं। ह
री इंद्रस्य रोहितोऽग्नेरिति नदीयाश्वनामत्वेन पठि...तत्वात्। हे हरिवो अश्वयुक्तेंद्र त्वं ब्रह्माण्युपैतुमायाहि। की
दृशस्त्वं तूतुजानः त्वरमाणः आगत्य चास्मिन्सु...अभिषुतवयुक्ते कर्म्मणि नो अस्मदीयं चनः। अन्ननामैत
त्।। हविर्लक्षणमन्नं दधिष्व धारय स्वीकुर्विति इत्यर्थः।।८।। ।।अथ चतुर्थतृचे प्रथमा।। तमीळिष्व यो अर्चिषाव
ना विश्वा परिष्वजत्। कृष्णा कृणोति जिह्वया इति।। हे स्तोतः त्वं अग्निमीळिष्व स्तुहि। योऽग्निरर्चिषा स्वज्वालारूपेण ते

© Dharmartha Trust J&K. Digitized by eGangotri

जसाविश्वासर्वाणिवनावन्यरण्यानिपरिष्वजत् परिष्वजन्निपरितोवेष्टयति।यश्चतानिवनानिजिह्वयाज्वाल
यारग्धाकृष्णाकृष्णवर्णानिकरोति।तमीळिष्वेतिसंबंधः॥७॥ ॥अथद्वितीया॥यइंद्राग्नीविवासतिसुम्न
मिंद्रस्यमर्त्यः।द्युम्नायसुतराअपइति।योमर्त्तःहेइंद्रहेअग्नेसुम्नंसुखकरंहविरिंद्रस्यचतुर्थ्यर्थेष
ष्ठी॥इंद्राय।आविवासतिपरिचरयतिप्रयच्छति।तस्यौदिर्यस्यद्युम्नायद्योतमानायान्नायतदर्थंसुतरासुखे
नतरणीया।अपउदकानिरष्यात्मका।निइंद्रःकरोतीतिशेषः॥७॥ ॥अथतृतीया॥तानोवाजवतीरिषआ
शून्पिपृतमर्वद्भिः।ऐंद्रमग्निंचवोढवइति।हेइंद्राग्नीतौयुवांवाजवतीःअन्नवतीःइषःइष्यमाणावृष्टीःअ
द्भवाजोबलंतद्वतीरिषोन्नानि।आशून्शीघ्रगान्अर्वद्भिरश्वांश्चनोस्मभ्यंपिपृतंपूरयतंप्रयच्छतं।किमर्थमि
मग्निंचयुवांआषावोढवेआसमंतान्वोढुंहविर्भिःप्रापयितुं॥७॥ ॥इत्यष्टमेध्यायेतृतीयःखंडः॥७॥
अयावीतिखंडेप्रथमतृचेप्रथमा॥सोअयासीदिंदुरिंद्रस्यनिष्कृतंसखासख्युर्नप्रमिनातिसंगिरं।मर्यइव
युवतिभिःसमर्षतिसोमःकलशेशतयाम्नापथेति॥इंदुःसोमःइंद्रस्यनिष्कृतंसंस्कृतंस्थानमुदरंप्रोअ
यासीत्प्राप्नोत्येवगच्छति।गत्वाचसखासखिभूतःसोमःसख्युरिंद्रस्यसंद्रस्यसंगिरंसम्यग्गिरणाधारभूत
मुदरंनप्रमिनाति॥नहिनस्ति।किंच।मर्यइवयुवतिभिर्मर्त्योयथातरुणीभिःस्त्रीभिःसहसंगतोभवति।
तद्वद्यमपिसोमःयुवतिभिर्मिश्रणशीलाभिःवसतीवरीभिरद्भिःसहसमर्षति।संगते।अभिषवकालेपश्चा
त्सोमःशतयाम्नाअनेकयामनसाधनछिद्रोपेतेनपथामार्गेणदशापवित्रसंबंधिनाकलशेद्रोणकलशे

© Dharmartha Trust J&K. Digitized by eGangotri

शततयामनापथ्यासंगच्छते। ऋ॰ शतयामनाशतयाम्नेतिपाठो॥८॥ ॥अथद्वितीया॥ प्रवोधियोमंद्रयुवो
विपन्यवःपनस्यवःसंवरणेष्वक्रमुः। हरिंक्रीडंतमभ्यनूषतस्तुभोभिधेनवःपयसेदभिश्रयुरिति। हे सोमा वो
युष्माकंधियोध्यातारःमंद्रयुवःमदकरंशब्दंकामयमा[illegible]नस्यवस्तुतिकामयमानाःविपन्यवःस्तोतारो
मैतत्स्तोतारःसंवरणेषुतत्एकटावरणोपेतेषुयागगृहेषुप्राक्रमुःप्रक्रमंते। तदेवाह। स्तुतःस्तोतारःहरिं
[illegible]तिरंतंक्रीडनशीलंसोमंअभ्यनूषतअभिष्टुवंति। धेनवोपिपयसेस्वीयेनक्षीरेणवद्धमंसोमंसो
[illegible]मिलिक्ष्य अभिश्रयुरधिकंश्रीणं। संवरणेषुसंवननेष्विति पाठो॥८॥ हरिंक्रीडंतसोमंमनीषाइतिव। प
यसेदभिश्रयुःपयसेमभिश्रयुरितिव॥८॥ ॥अथत[illegible]या॥ आनःसोमसंयतंपिप्युषीमिषमिंदोपवस्व
८२ पवमानऊर्म्मिणा। यानोदोहतेत्रिरहन्नसश्चुषीक्षुमद्वाजवन्मधुमत्सुवीर्यमिति। हे इंदो त्वंसोमपव
मानस्त्वंनोस्माकंसंयतंसंगृहीतंपिप्युषीमवर्द्धइषमन्नंऊर्म्मिणाप्रवाहरूपेणतदीयेनरसेनपवस्वप्रयच्छे
त्यर्थः॥ याइट्नोस्माकंअहन्अहनिअन्हःत्रिःत्रिषुसवनेषुअसश्च्युषीअप्रतिबंधादोहतेक्षरति। किंक्षु
मत्शब्दोपेतंसर्वत्रस्रूयमाणंवाजवत्बलवत्[illegible]तू माधुर्य्योपितंसुवीर्य्यंशोभनसामर्थ्यपुत्रंदोहतेता
मिषंपवस्वेतिसमन्वयः। ऊर्म्मिणाअधि[illegible]॥८॥ ॥अथनकिरितिप्रगाथरूपेद्वितीयसूक्तेप्र
थमा॥ नकिष्टंकर्मणानशद्यश्चकारसदावृधं। इंद्रंनय[illegible]र्विश्वगूर्त्तमृभ्वसमधृष्टंधृष्ण्वोजसेति॥ तंजनं
सोमर्षकोजनःकर्म्मणाहना दिव्यापारेणनकिनंश[illegible]नेवव्याप्नोतियइंद्रंचकारइंद्रमेवानुकूलंयज्ञैस्साधाने

८२

© Dharmartha Trust J&K. Digitized by eGangotri

अकारः। कीदृशमिंद्रं सदावृधं सर्वदा वर्द्धकं विश्वगूर्त्तं सर्वैः स्तुत्यं ऋभ्वसं महान्तं तेजसा स्वीयेन बलेन अषाढं शत्रु
भिरनभिभूतं धृष्णुं शत्रूनभिभवनशीलं धृष्णुमोज ... धृष्ण्वोजनमिति पाठः॥८॥ ॥अथ द्वितीया॥ अषाढ
मुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः। सं ... जायमाने अनोनवुर्धावः क्षामीरनोनवुरिति॥ अषाढं
असोढं उग्रमुद्गूर्णबलं पृतनासु शत्रुसेनासु सासहिमभिभवितारमिंद्रं स्तोमीत्यर्थः। यस्मिन्निंद्रे जायमाने
महीर्महत्यः उरुज्रयो बहुगा वोधो नवः हविरादिना प्रीणयित्र्यः प्रजा गाव एव वा समनोनवुः समस्तुवन् न केवलं
धेनव एव। अपि तु द्यावो द्युलोकाः क्षामी पृथिव्यश्च समनोनवुः स्तुवन्त्यः सर्वे प्राणिनो नमस्कुर्युरित्यर्थः। निरुक्तो लोका इति
कृते बहुवचनं। क्षामीः क्षाम इति पाठः॥८॥ ॥इति ... षष्ठेऽध्याये चतुर्थः खंडः॥ ॥अथ पंचमखंडे प्रथमतृचे
प्रथमामृचं॥ सखाय आ निषीदत पुनानाय प्रगायत। शिशुं न यज्ञैः परिभूषत श्रिय इति॥ हे सखायः सखिभूता
मानस ... ऋत्विजः आ निषीदत तस्तोतुमुपविशत। अथ पुनानाय पूयमानाय सोमाय प्रगायत प्रकर्षेण गायत म
सर्पिः॥ यात ...
न धुता नततः अभिषुतं सोमं यज्ञैर्यजनीयैर्हविर्भिः श्रिणौश्च श्रियै शोभार्थं परिभूषत। परितोऽलंकुरुत। तत्र
दृष्टांतः। शिशुं न। यथा शिशुं बालं पुत्रं पि... आभरणैरलंकुर्वंति तद्वत्॥८॥ ॥अथ द्वितीया॥ समी वत्सं न मा
तृभिः सृजता गयसाधनं। देवाव्यं मदमभिद्विशवसमिति॥ हे ऋत्विजः गयसाधनं गृहस्य साधनभूतं इमं सो
मं मातृभूताभिर्वसतीवरीभिः संसृजत संमिश्रयत। कथमिव वत्सं न। यथा वत्सं मातृभिर्गोभिः संयोजयंति तद्व
त्। कीदृशं। देवाव्यं देवानां रक्षकं। मदं मदनहेतुं द्विगुणं एवं गं अतिशयितबलं वा येद्वा द्वयोर्लोकयोस्तत्र स्थितादेव

© Dharmartha Trust J&K. Digitized by eGangotri

मनुष्या इत्यर्थः। तेषां हविर्दानप्रदानेन प्रवर्द्धयितारं तं सोममभिसंसृजत॥८॥ ॥अथ तृतीया॥ पुनाना र
क्षसाधनं यथा राद्धये वीतये। यथा मित्रावरुणा यवशंतममिति॥ रक्षसाधनं बलस्य साधनं धनादेर्वा
साधकं सोमं पुनते पवित्रेण पुनीत। पूञ् पवने क्र्यादिः। तस्माल्लोटि तप्तनप्तनथनाश्चेति तस्य तबादेशः। पित्वा
दीर्घाभावः। राद्धये वेगार्थं वीतये देवानां पानार्थं यथा भवति तथा मित्रावरुणा यवशंतममतिशयेन सुखं यथा
[illegible]णीतेत्यर्थः। शंतमं शातमं इति पाठे॥८॥ ॥अथ प्रवाजीति त्र्यृचात्मकं द्वैपदं द्वितीयं सूक्तं तत्र प्र
[illegible]प्रवाज्यक्षाः सहस्रधारस्तिरः पवित्रं विवारमव्यमिति। वाजी बलवान्वेगवान्वा। सहस्रधारः बहुधारायु
क्तः सोमः अयं अविमयं वारं वालं पवित्रं तिरः व्यवधायकं कुर्वन्नक्षाः विविधमक्षरत्। क्षरतेर्लुङि रूपं। प्रवा
जी प्रसुवान इति पाठे॥८॥ ॥अथ द्वितीया॥ स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणान इति। वाजी
रसात्मकान्नवान् स सोमः अक्षाः क्षरति। कीदृशः सहस्ररेताः बहुरेतस्कः। बहूदकः अद्भिर्वसतीवरीभिर्मृ
जानो मृज्यमानो गोभिर्गोविकारैः क्षीरादिभिः श्रीणानः श्रीयमाणः॥८॥ ॥अथ तृतीया॥ प्र सोम याहीन्द्र
स्य कुक्षा नृभिर्येमानो अद्रिभिः सुत इति। हे सो[illegible]भिर्ऋत्विग्भिर्येमानो नियम्यमानः अद्रिभिर्ग्रावभिस्सुतो
भिषुतः इन्द्रस्य कुक्षा सप्तम्या आदेशः कुक्षौ [illegible]कोशो वा प्र याहि प्रकर्षेण गच्छ। संहितायां येमान इत्यत्र णत्वं
॥८॥ ॥अथ ये सोमास इति त्र्यृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ ये सोमासः परावति ये अर्वावति सुन्विरे। ये वा
दः शर्यणावति इति॥ एतदादि ग्राम्रगम्या मिं द्रार्यं स[illegible]त्र सोमाभिषवोऽस्तीत्याह। ये सोमासः सोमाः परावति प्र

© Dharmartha Trust J&K. Digitized by eGangotri

कृष्टेति दूरदेशे ये वा अर्वावति अंतिके देशे सुन्विरे अभिषूयंते। अभ्यषूयंत वा। ये वा शर्य्यणावति कुरुक्षे
त्रस्य जघनार्द्धे शर्य्यणावत्संज्ञकं मधुररससंयुक्तं सेयम्वत्सरोऽस्ति। अदः अस्मिन् सरसि सुरसा ये सो
माः इंद्रायाभिषूयंते ते ऽस्माकमभिमतफलानि यच्छंत्विति वक्ष्यमाणेन संबंधः॥८॥ ॥अथ द्वितीया॥
यआर्जीकेषु कृत्वसु ये मध्ये पस्त्यानां ये वा जनेषु पंचस्विति॥ ये वा सोमाः आर्जीकेषु ऋजीका नाम
दूरभावा आर्जीकाः देशास्तेषु तथा कृत्वसु कृत्वान इति देशाभिधानं तेषु कर्मवत्सु देशेषु वा। किंच पस्त्या
नां सरस्वत्यादीनां नदीनां मध्ये समीपे च ये सोमा अभिषूयंते। ऋषयो वै सरस्वत्यां सत्रमासतेत्यादिषु
नदीतीरे यज्ञकरणस्य श्रवणात्। किंच जनेषु पंचसु निषादपंचमाश्चत्वारो वर्णाः पंचजनास्तेषु च ये वा
सोमा अभिषुतास्ते सोमाः अस्माकमभिमतं प्रयच्छंत्विति उत्तरेण संबंधः॥८॥ ॥अथ तृतीया॥ ते नो
रसा [illegible] रि पवंतामा सुवीर्यं स्वाना देवास इंदव इति॥ स्वानाः। सुवानाः तत्र तत्राभिषूयमाणाः देवा
सा देवाः दीपनशीलाः स्तुयावोऽ इंदवः गृहेषु च मसेषु स्तरंतः ते सोमा नोऽस्माकं दिवस्परि परिशब्दः पंचमीद्यो
तकः अंतरिक्षाद्वादित्याद्वा वृष्टिं अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिरिति
वृष्टिकारणत्वात्। किंच सुवीर्य्यं शोभनवीर्य्योपेतं पुत्रं धनादिकं वा आपवंतां प्रापयंतु। यजमानः सो
मेनाभिमतफलानि प्राप्नोतीति खलु। स्वानाः सुवाना इति पाठौ॥८॥ ॥इत्यष्टमेऽध्याये पंचमः खंडः॥८॥ ॥
अथ षष्ठे खंडे आ ते वत्स इति त्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्॥

© Dharmartha Trust J&K. Digitized by eGangotri

अग्नेत्वांकामयेगिरेति॥हेअग्ने।वसुऋषिस्त्वतवमनःपरमाश्चित्‌उत्कृष्टं।दपिसाधस्थात्‌सहस्थानान्‌
द्युलोकादायमत्‌अयमयति।आगमयति।केनसाधनेनत्वांकामयेकामयात्वामभिलषंत्यांगिरस्तुसाका
मयइत्सत्रापिविशेषःआदेशःपूर्ववत्‌।यद्वात्वांकामयेअ[illegible]त्वामिकामयेकामयाइतिविशेषोआदेशःपूर्ववत्‌
यद्वात्वांकामयेअभिलस्वामिक[illegible]येकामयाइतिपाठो॥७॥ ॥अथद्वितीया॥पुरुत्राहिसदृङ्ङसिदिशोवि
[illegible]सःसम[illegible]तुत्वाहवामहइति॥हेअग्नेपुरुत्राहिबहुषुहिदेशेषुत्वंसदृङ्ङसिसमानदृष्टाभ
[illegible]सिएवविश्वाःसर्वादिशाअनुलक्ष्यप्रभुरीश्वरोभवसिईदृशंत्वात्वांसमत्सुसंग्रामेषुरक्षणार्थंह
म वामहे।आद्ध्याहो।दिशोविशइतिपाठो॥७॥ ॥अथतृतीया॥समत्स्वग्निमवसेवाजयंतोहवामहे।वा
जेषुचित्रराधसमिति॥समत्सुसहमर्दनेषुसंग्रामेषुआजयंतोबलमिच्छंतोवयंअवसेरक्षणार्थंअग्निं
हवामहे॥कीदृशं।वाजेषुसंग्रामेषुचित्रराधसंचायनीयंधनं॥७॥ ॥अथद्वितीयस्तत्वेप्रथमा॥त्वंनइंद्रा
भरओजोनृम्णंशतक्रतोविचर्षणे।आवीरंपृतनासहमिति॥हेशतक्रतोबहुकर्मन्‌विचर्षणेविद्रष्टरिंद्र
त्वंनोस्मभ्यमोजोबलंनृम्णंधनंचआभराहर।[illegible]वीर्यंपितंपृतनासहंसेनानामभिभवितारंत्वांआ
याचामहइतिशेषः।आभरजःआभरंदु[illegible]ठो॥७॥ ॥अथद्वितीया॥त्वंहिनःपितावसोत्वं
माताशतक्रतोबभूविथ।अथातेसुम्नमीमहइति।हेवसोवासयितःशतक्रतोबहुकर्मन्निंद्रत्वंनोस्मा
कंपितापितृवत्पालकोबभूविथ।भव।त्वंमातामातृ[illegible]वत्पालकश्चबभूविथ।अथअधवयंतेतवस्वभूतंसुम्नंसुख

© Dharmartha Trust J&K. Digitized by eGangotri

मीमहे याचामहे॥७॥ ॥अथ तृतीया॥ त्वां शुष्मिन् पुरुहूत वाजयन्तमुप ब्रुवे सहस्कृत। स नो रास्व सुवीर्य
मिति॥ सहसा बलेन स्तोतृभिर्युक्तैः कृत सहस्कृत इंद्रः। सुष्ठ्या हि देवतया बलं वर्द्धते तस्य संबोधनं हे स
हस्कृत शुष्मिन्नन एव बलवन् पुरुभिर्बहुभिर्यजमानैराहूत तं त्वा बाहुयंत बलमिच्छंतं यं त्वां उपब्रुवे उपस्तौ
मि स त्वं नोऽस्मभ्यं सुवीर्यं धनं रास्व देहि। सहस्कृत शतक्रतो इति पाठो॥७॥ ॥अथ तृतीये त्वे प्रथमा
॥यदिन्द्र चित्र म इह नास्ति त्वा दातमद्रिवः। राधस्तन्नो विदद्वस उभयाहस्त्या भर ति। हे अद्रिव वज्रावन् चि
त्र चायनीयेंद्र त्वादातं त्वया दातव्यं यद्धनं मेमम मइहास्मिन् लोके नास्ति हे विदद्वसो लब्धधन इंद्र नोऽस्मभ्यं उ
भयाहस्ती उभाभ्यां हस्ताभ्यां तद्राधो धनं आभर आहर मह इह मेहनेति छंदोगानां बह्वृचानां पाठो॥ अत्र तु
पाठद्वयपक्षे यास्केन व्याख्यातं यदिंद्र चित्र चायनीयं मंहनीयं धनमस्ति यन्म इह नास्तीति वा त्रीणि मध्य
हवामहेत्यादि॥७॥ ॥अथ द्वितीया॥ यन्मन्यसे वरेण्यमिंद्र द्युक्षं तदाभर। विद्याम तस्य ते वयमकूपा
रस्य दावने इति॥ हे इंद्र त्वं द्युक्षं मन्नं वरेण्यं वरणीयं यन्मन्यसे तद्द्युक्षमाभर अस्मभ्यं तेन वसं बंधिनो व
यं तस्य तादृशस्योत्कलक्षणस्य अकूपारस्य अकुत्सितः पारो नोयस्य तादृशस्यान्नस्य दावनो दानस्य वि
द्याम स्याम। दावनो दावने इति पाठो॥७॥ ॥अथ तृतीया॥ यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत्। तेन दृढा
चिदद्रिव आ वाजं दर्षि सातय इति॥ हे इंद्र ते तव दित्सु प्रराध्यं प्रकर्षेण श्रुसंस्तुतं विश्रुतं बृहन्महत् यन्मनोऽस्ति
तेन मनसा हे अद्रिवो वज्रवन्निंद्र दृढा चित् दृढमपि वाजमन्नं आदर्षि आधारयसि॥ सातये अस्मत्संभज

© Dharmartha Trust J&K. Digitized by eGangotri

नापत्लाभायवादिस्युदित्स्रिति पाठो॥ ७॥ ॥इत्यष्टमेध्याये षष्ठः खंडः॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीमद्राजाधिराजपरमेश्वरावैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभू
पालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे उत्तराग्रंथे ऽष्टमोध्यायः संपू
र्णः॥ ७॥ यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ७॥ अथ नवमो
[illegible] सुजज्ञानमिति प्रथमखंडः तत्र वात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ शिशुं जनानं हर्यतं
[illegible] शुंभंति विप्रं मरुतो गणेन। कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन्निति॥ शिशुं इदानीमु
त्पन्नत्वाच्छिशुवत्तिष्ठंतं यद्वा पापानि तनूकुर्वंतं विनाशयंतं जज्ञानं प्रादुर्भूतमत एव च हर्यतं। हर्य गतिकांत्योः
मृदृशीसादिना अत्र। सर्वैः काम्यमानं सोमं मृजंति ऋत्विजः शोधयंति। किंच। विप्रं मेधाविनं सोमं गणेनात्मीये
न सप्तसंख्याकेन शुभं सलंकुर्वंति। ततः कविः क्रांतप्रज्ञः सोमः काव्येन कविकर्मणैव कविः शब्दायितव्यः सन् रेभ
न् शब्दायमानाभिर्गीर्भिस्स्तुतिभिः सह पवित्रमत्येति अतीत्य गच्छति॥ विप्रमति छंदोगाः वन्निमिति बह्वृचाः पठंति॥
अथ द्वितीया॥ ७॥ ॥ऋषिमना य ऋषिकृत्स्वर्षाः [illegible] सहस्रनीथः पदवीः कवीनां। तृतीयं धाम महिषः सिषासन्त्सो
मो विराजमनुराजति ष्टुबिति॥ ऋषिमनाः सर्व[illegible]मनस्काः अत एव ऋषिकृत्सर्वस्य दर्शनकर्त्ता प्रकाश
नस्य कर्त्ता। स्वर्षाः सर्वस्य सूर्यस्य वा संभक्ता सहस्रनीथः नीथा स्तुतिः बहुविधस्तुतिकः कवीनां क्रांतप्रज्ञानां मध्ये
पदवीः स्खलितानां पदानां साधुत्वेन संयोजयिता यः सोमो विद्यते स महिषो महान् पूज्यो वा सोमः तृतीयं धाम

८५

© Dharmartha Trust J&K. Digitized by eGangotri

लोकं सिषासन् संभक्तुमिच्छन् स्तुभ्रु स्तूयमानः सम्राट् विराजं विशेषेण राजंतं दीप्यमानमिंद्रं अनुराजति प्र
काशयति ॥८॥ ॥ अथ तृतीया ॥ चमूषच्छ्येनः शकुनो विभृत्वा गोविंदुर्द्रप्स आयुधानि बिभ्रत् । अपामूर्मिं
सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ [illegible] चमंति भक्षयंत्यस्मिन्निति चमूश्चमसाः तेषु सीदन् ॥
यद्वा चम्वो अधिषवणफलके तयोर्वर्तमानः श्येनः शंसनीयः शकुनः शक्तः सामर्थ्यकारी विभृत्वा हरतेरतो
मनिन्निसादिना क्तनिप् । पात्रेषु विहरणशीलः गोविंदुः यजमानानां गवां लंभकः विंदुरिच्छुरिति उप्रत्ययांतत्वेन नि
पातितः । द्रप्सः द्रवणशीलः आयुधानि स्फ्यकपालादीनि बिभ्रत् धारयन् अपामुदकानामूर्मिं प्रेरकं समुद्रं
अंतरिक्षनामैतत् । अंतरिक्षलोकं सचमानः सेवमानः महिषो महान् य एवंविधः सोमः स तुरीयं चतुर्थं धाम
चंद्रमसं स्थानं विवक्ति सेवते । सूर्यलोकस्योपरि स्थितं चंद्रमसो लोकं विघत्त इति । यमः पृथिव्या अधिपतिः समाव
नस प्तसंख्योपि चंद्रमा नक्षत्राणामधिपतिः समाववित्सं ते मंत्रे श्रूयते ॥८॥ ॥ एते सोमा इति नवर्चं द्वितीयं सूक्तं
तत्राद्या प्रथमा ॥ एते सोमा अभि प्रियमिंद्रस्य काममक्षरन् । वर्धंतो अस्य वीर्यमिति ॥ एते अभिषुताः सोमाः अस्ये
द्रस्य वीर्यं शक्तिं वर्धंतो वर्धयंतः इंद्रस्य कामं कमनीयं प्रियं प्रीतिकरं रसमभ्यक्षरन् अभ्यवर्षन् अभिपवते ॥८॥
॥ अथ द्वितीया ॥ पुनानासश्चमूषदो गच्छंतो वायुमश्विना । ते नो धत्त सुवीर्यमिति ॥ हे सोमाः पुनानासः पूयमानाः
अभिषूयमाणाः चमूषदः चमसेषु सीदंतो वायुमश्विना अश्विनौ च गच्छंतः प्राप्नुवंतस्ते यूयं नोस्मभ्यं सुवीर्यं
शोभनवीर्यं धत्त प्रयच्छत । धर्तु धत्तेति पाठो ॥८॥ ॥ अथ तृतीया ॥ इंद्रस्य सोम राधसे पुनानो हार्दि चोदय । देवा

© Dharmartha Trust J&K. Digitized by eGangotri

नां योनिमासदमिति॥ हे सोम पुनानः पूयमानस्त्वं राधसे इंद्रस्य संराधनाय हार्द्दि इति हृदयसंबंधि स्थानं चो
दयन्नेरयत्यासति अहमपि देवानामिंद्रादीनां योनिं स्वर्गाख्यं स्थानं आसदं प्राप्नवानि। यद्वा देवानां यज्ञ
साधनयज्ञाख्यं स्थानं प्राप्नवानस्मि ... ॥७॥ ॥ अथ चतुर्थी॥ मृजंति त्वा दश क्षिपो हि
न्वंति सप्त धीतयः। अनु विप्रा ... दिषुरिति॥ हे सोम त्वां दश दशसंख्याकाः क्षिपः अंगुलिनामैतदंगुल
... नः सप्त सप्तसंख्याकाः धीतयो होत्रकाः त्वां हिन्वंति स्वस्वव्यापारैः प्रीणयंति। तथा
... मेधाविनः स्तोतारश्च त्वां त्वामनु अन्वमादिषुः अनुमादयंति॥७॥ ॥ अथ पंचमी॥ देवेभ्यस्त्वाम
दाय कं सृजानमति मेष्यः। सं गोभिर्वासयामसीति॥ हे सो ... सुखभूतं त्वां देवेभ्यो देवानां मदाय मदार्थं
गोभिर्गोविकारैः पयोभिः संवासयामसि। संवासयामः संस्थापयामः। कीदृशं मेष्यः आविकलोमानि दशा
पवित्ररूपेण अति सृजानं अत्यंतं सृजंतं दशाय विरूपेषु आविकलोमसु वर्त्तमानं इत्यर्थः॥७॥ ॥ अथ षष्ठी॥
पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः। परि गव्यान्यव्यतेति॥ पुनानः पूयमानः कलशेषु द्रोणकलशेषु आसि
च्यमानः अरुषः आरोचमानः हरिर्हरिवर्णः सो ... व्यानि गोसंबंधीनि पयः प्रभृतीनि वस्त्राणि वासांसीव
पर्यव्यत पर्याच्छादयति॥७॥ ॥ अथ सप्तमी॥ ... आ पवस्व नो जहि विश्वा अप द्विषः। इंदो सखायमा विशे
ति॥ हे इंदो सोम मघोनो धनवतो नोस्मान् आभिमुख्येन पवस्व क्षर। विश्वा विश्वान् द्विषो द्वेष्टॄन् अपजहि मारय
च॥ सखायं मित्रभूतमिंद्रं आविश प्राप्नुहि॥७॥ ॥ अथ अष्टमी॥ वृष्टिं वृषभसंस्थानं यमिंद्रं पीतं स्वर्विदं। मक्षी महि

© Dharmartha Trust J&K. Digitized by eGangotri

प्रजामिषमिति ॥ हे सोम न्वस्य संदृशं द्रष्टारं स्त्वमिदं सर्वं ... पीतं त्वां सेवमाना वयं प्रभुञ्जां पुत्रान्दिशां इ
षमन्नं वनसीमहि भजेम ॥ ८ ॥ ॥ अथ नवमी ॥ वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि । सहो नः सोम पृ
त्सु धा इति ॥ हे सोम त्वं दिवो द्युलोकात् वृष्टिं [illegible] व परितो वर्षय । धिव्याः अधि अधीति सप्तम्यर्थानुवा
दी । धाम्नमन्नं वनुत्पादयेति शेषः । नोस्माकं स[illegible] पृत्सु संग्रामेषु वा पेहि ॥ ८ ॥ ॥ इति नवमेध्याये प्रथमः
खंडः ॥ अथ द्वितीयखंडे सोमः पुनान इति नवर्चं सूक्तं तत्र प्रथमा ॥ सोमः पुनानो अर्षति सहस्रधारो अ
त्यविः । वायोरिंद्रस्य निष्कृतमिति ॥ अयं पुनानः पावकः सोमः अर्षति गच्छति । कीदृशोयं सहस्रधाराः अ
परिमितधारः । अत्यविः । अत्राविशब्देन तल्लोमानि [illegible] ग्यंते । अविलोमानि निर्मितं दशापवित्रमित्यर्थः ।
तदतिक्रम्य गच्छतीत्यत्यविः । किमर्थं वायोरिंद्रस्य च पा[illegible]ये इति शेषः । किं प्रति निष्कृतं । निरिसेषस मित्येतत्
पवित्रं[illegible] संस्कृतं पात्रं प्रति ॥ ८ ॥ ॥ अथ द्वितीया ॥ ॥ पवमानमवस्यवो विप्रमभि प्र गायत । सुष्वाणं देववी
तये ॥ हे अवस्यवः [illegible] रक्षणकामाः उद्गातारः यूयं पवमानं शोधकं विप्रं विशेषेण देवानां प्रीणयितारं वि
प्रं वक्तुं वा । अथवा विप्र इति मेधाविनाम [illegible] मेधाविनं देववीतये देवयानाय सुष्वाणं अभिषूयमाणं सो
मं अभि आभिमुख्येन प्रगायत प्रकर्षेण स्तुत ॥ ८ ॥ ॥ अथ तृतीया ॥ पवंते वाजसातये सोमाः सहस्रपाज
सः । गृणाना देववीतय इति ॥ पवंते क्षरंति सोमाः । किमर्थं वाजसातये अन्नस्य लाभाय कीदृशाः सहस्र
पाजसः बहुलाः पाजः बलं बलप्रदा इत्यर्थः । गृणानाः कर्मणि कर्तृप्रत्ययः । स्तूयमानाः पुनः किमर्थं देववीत

© Dharmartha Trust J&K. Digitized by eGangotri

येदेवानांवीतिर्गीतिःप्राप्तिलक्षणंयस्मिन्सादेववीतिर्य्यज्ञस्तस्यैयज्ञस्सिद्धिः॥साक्षात्प्रयोजनंतद्द्वारावा
जलाभइति॥७॥ ॥अथचतुर्थी॥उतनोवाजसातयेपवस्वबृहतीरिषः।द्युमदिन्दोसुवीर्य्यमिति॥उताऽपि
चनोस्माकंवाजसातयेअन्नलाभायहेइन्दो[illegible]इषः।महतीरसधाराद्युमत्दीप्तिमत्सुवीर्यं
शोभनवीर्यसामर्थ्यंचपव[illegible]रा।शोभनसामर्थ्योपेताधाराःपवस्वेत्यर्थः।अथवावाजसातयेसंग्रा
[illegible]द्युमत्सुवीर्य्यंसंपादयितुंपवस्वेतियोज्यं॥७॥ ॥अत्यासोनयानानहेतृभिरसृग्रंवाज
सातये।विवारमव्यमाशवइति॥वाजसातयेसंग्रामायहियानाःप्रेर्यमाणाःआशवःशीघ्रंधावंतितद्व
त्।हेतृभिःप्रेरकैःप्रेर्यमाणाःआशवःशीघ्रगामिनःसोमाःवाजसातयेन्नलाभायअव्यंवारंवालंदशा
पवित्रंव्यपस्त्र्यंच्यतिसृज्यंते॥७॥ ॥अथषष्ठी॥तेनःसहस्त्रिणंरयिंपवंतामासुवीर्य्यं।स्वानादेवासइंद
वइति।चआपवंतां।कीदृशास्तेस्वानाःसुवानाःपूयमानाःदेवासोद्योतनादिगुणकाःस्वानाःसुवानाइति
पाठे॥७॥ ॥अथसप्तमी॥वाश्राअर्षंतीन्दवोभिवत्संनमातरः।दधन्विरेगभस्त्योरिति।वाश्राःशब्दयंत
इंदवःसोमाःअभ्यर्षंतिपात्रंप्रति।वाश्राःशब्द[illegible]यामातरःमातृभूतागावः।वत्संन।वत्संयथाप्रत्याग
च्छंतितद्वत्।तएवगभस्त्योर्बाह्वोर्दधन्विरेप्रियंत[illegible]तरोधेनवइतिपाठे॥७॥ ॥अथाष्टमी॥जुष्टइंद्रा
यमत्सरःपवमानःकनिक्रदत्।विश्वाअपद्विषोजहीति॥इंद्रायजुष्टःपर्याप्तोमत्सरः।सोमोभवतीशेतिषः।
मत्सरःसोमोमंदतेस्तुतिकर्मणइतिनिरुक्तंपवमानःपूयमानःस्ताद्गाःसोमःकनिक्रदत्शब्दयन्विश्वाद्वि

© Dharmartha Trust J&K. Digitized by eGangotri

षः सर्वानस्माकं द्विषः हन् अपजहि पवमानः यवमानेति पाठे ॥ ८ ॥ ॥ अथ नवमी ॥ अपघ्नंतो अराव्णः प
वमानाः स्वर्दृशः । योनावृतस्य सीदत ॥ हे पवमानाः अराव्णः अदानान् अयजमानान् घ्नंतो हिंसंतः स्वर्दृशः
सर्वस्य द्रष्टारः यूयं ऋतस्य योनौ यज्ञस्य [illegible] सीदत । अथवा सोमपानार्थं उत्तरवेद्यां [illegible] ऋतस्य
योनौ सादयतेति योज्यं ॥ ८ ॥ ॥ इति नवमे अध्याये द्वितीयः खंडः ॥ ॥ अथ तृतीये खंडे सोमा असृग्रमिति
नवर्चं विद्यमानमेकं सूक्तं तत्र प्रथमा ॥ सोमा असृग्रमिंदवः सुता ऋतस्य धारया । इंद्राय मधुमत्तमाः ॥ इ
ति ॥ ऋतस्य यज्ञस्यार्थं सुता अभिषुता मधुमत्तमा अतिशयेन माधुर्योपेताः इंदवः सोमाः इंद्रायेंद्रार्थं
धारया असृग्रं सृज्यंते । धारया सादनेनेति पाठे ॥ १ ॥ ॥ अथ द्वितीया ॥ ॥ अभि विप्रा अनूषत गावो व
त्सं न धेनवः । इंद्रं सोमस्य पीतये ॥ इति । विप्रा मेधाविनः सोमस्य पीतये पानाय इंद्रं अभ्यनूषत अभिष्टुवंति
पा [illegible] ः धेनवः प्रीणयित्र्यो गावः वत्सं न वत्सं यथा पयः पानाय अपिशब्दयंति निनदंति । धेनवो मातर इ
व इति ॥ [illegible]
तिपाठे ॥ ८ ॥ ॥ [illegible] तीया ॥ मदच्युत् क्षेति सादने सिंधोरूर्मा विपश्चित् । सोमो गौरी अधिश्रित इति
मदच्युत् मदस्य करस्य रसस्य च्यावयिता [illegible] सोमः [illegible] स्थाने क्षेति निवसति । एतद्विवरणोति । सिंधो
र्नद्या जलस्य ऊर्मौ तरंगे वसतीव रोचित इत्यर्थः । विपश्चित् विद्वान् सोमो गौरी अधि गौर्यां वेद्यां अधीति सप्तम्य
र्थानुवादः । माध्यमिकायां वाचि गौरी गांधर्वीति वाङ्नामैतत् । श्रितो निवसति ॥ ८ ॥ ॥ अथ चतुर्थी ॥ दिवो
ना भा विचक्षणो व्यावारे महीयते । सोमो यः सुक्रतुः कविरिति ॥ यः सुक्रतुः सुप्रज्ञः कविः क्रांतकर्मा विचक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

णोविष्टष्टाससोमः द्व्योंतरिक्षस्यनाभानाभौनाभिभूतेअव्याऽवेवरिवालेमहीयतेपूज्यते॥७॥ ॥अथ
पंचमी॥यःसोमःकलशेष्वा अंतःपवित्र आहितः।तमिंदुःपरिषस्वजेइति॥यःसोमःकलशेषुकुंभेष्वा
स्तोपश्चपवित्रेपवित्रस्यांतर्मध्येआहितो[illegible]तंभूतंसोमंइंदुःतदभिमानी।सोमोदेवःपरि
स्वजेप्रविशति॥ ॥७॥अथषष्ठी॥प्रवावमिंदुरिष्यतिसमुद्रस्याधिविष्टपि।जिन्वन्कोशंमधुश्चुतं॥
[illegible]सोमःघृतमल्कैस्तइतिधातोरूपं।लोहनवंस्तंमधुश्चुतंमधुनःच्यावकं द्रोणकलशंजिन्वन्प्री
[illegible]पूरयन्निसर्यः॥समुद्रस्यांतरिक्षःस्यअधिविष्टपिविष्टब्धेस्थानेवावंप्रेष्यतिप्रेरयति।पवित्रपू
यमानःशब्दंकरोतीत्सर्थः॥७॥ ॥अथसप्तमी॥नियस्तोत्रोवनस्पतिर्धीनामंतःसबर्दुघां।हिन्वानोमा
नुषायुजेति।निसस्तोत्रःसंततस्तोत्रःवनस्पतिः।वनानांस्वामीसोमःमनुषामानुषाणियुजायुग्मानि
अहीनैकाहात्मकानिहिन्वानःप्रीणयन्सबर्दुघांअमृतसघानिप्रियवचनानितेषांधीअंतःस्तोत्रेणंम
ध्येस्थितांधेनांस्तुतिरूपंवाचंगृणातितिशेषः।धेनामंतःसबर्दुघांधीनामंतःसबर्दुधस्मइतिपाठे॥७॥ ॥
अथाष्टमी॥आपवमानधारयरयिंसहस्रवर्चस[illegible]अस्मेइंदोस्वाभुवमिति।हेपवमानपूयमानपुनाना
वाइंदोसोमत्वंसहस्रवर्चसंदीप्तिंस्वाभुवंशोभ[illegible]नंरयिंधनंअस्मेअस्मासुधारयप्रक्षिपेसर्थः॥७॥
॥अथनवमी॥अभिप्रियादिवःकविर्विप्रस्सधारयासुतः।स्तोमोहिन्वेपरावतीति॥कविःक्रांतकर्मासुतो
भिषुतःसोमःपरावतिविप्रकृष्टेदेशेस्थितःसन्विप्रःमेधावीस्वस्यधारयादिवोद्युलोकस्यप्रियाप्रियाणि

© Dharmartha Trust J&K. Digitized by eGangotri

स्थानान्यभिलक्ष्य हिन्वे प्रेरयति। रिवः कविः। रिवस्य इतिपाठे॥ हिन्वे परावर्तितिहिन्वानो अर्षतीतिवसुतः कविरिति॥७॥ ॥इतिनवमेऽध्यायेतृतीयः खंडः॥७॥ ॥अथउत्तेशुष्मा सइतिचतुर्थखंडे विद्यमानंप्रथमंसूक्तं तत्र प्रथमा॥ उत्तेशुष्मा सइरते सिंधोरूर्मेरिव स्वनः। वाणस्य चोदयापविमिति॥ हेसोमतेतव शुष्मासः शुष्मावेगा उदीरते उद्गच्छंति। तत्र दृष्टांतः। सिंधोः समुद्रस्यऊर्मेरिव। यथा तरंगाः स्वनोध्वनिरुद्गच्छतितद्वत्। सत्वंवाणस्य विधस्य वाल्यस्यतंत्रीकस्यवीणाविशेषस्य पविं वाङ्गमेतनच्छब्दं चोदय प्रेरयावेगेनस्यंदमानस्त्वं विसर्पन्‌वाणशब्दसदृशंशब्दं कुर्वन्विसर्पः॥७॥ ॥अथद्वितीया॥ प्रसवेतउदीरतेतिस्रोवाचो मखस्युवः। यदव्य एषिसानवीति॥ हेसोमतेतव प्रसवे सतिमखस्यवेयज्ञमिच्छतोयजमानस्यतिस्रोवाचः ऋग्यजुःसामात्मिका निस्रीणिवाचा निउदीरते उद्गच्छंति। कदेसानयसीदासान्‌विदुच्छिन्नेऽव्येअविमयेपविच्छिन्ने एषि लंगच्छति॥७॥ ॥अथतृतीया॥ अव्यावारैः परिप्रियं हरिं हिन्वन्त्यद्रिभिः पवमानं मधुश्चुतमिति॥ प्रियंदेवानां प्रीतिकरं हरिं हरितवर्णं अद्रिभिर्ग्रावभिरभिषुतं मधुश्चुतं मधुनोरसस्य ...पवमानं सोमं अव्या अवेर्वारैर्वालैः परिहिन्वंति ऋत्विजः परिप्रेरयंति॥७॥ ॥अथचतुर्थी॥ आपवस्वमदिंतम पवित्रंधारयाकवे। अर्कस्ययोनिमासदमिति॥ हेमदिंतममादयितृतमकवेक्रांतकर्मन्‌सोम अर्कस्यअर्चनीयस्येंद्रस्य योनिमुदरभूतंस्थानं आसदंप्राप्तुंपवित्रमतीत्य धारयासंपातेनापवस्वआभिमुख्येनक्षर॥७॥ ॥अथपंचमी॥ सपवस्वमदिंत

मगोभिरंजानो अक्तुभिः। एंद्रस्य जठरं विशतीति। हे मदिंतम मादयितृतम सोम अक्तुभिरंजनसाधन
भूतैर्गोभिर्गोविकारैः पयोभिः रंजानो ऽ ज्यमानः संस्क्रियमाणः सन् त्वं पवस्व क्षर। ततोनंतरं इंद्रस्य जठर
२ मुदरं आविश प्रविशेत्युंद्रस्य जठरं वि... नयइतिपाठो॥७॥ ॥इति नवमे ऽ ध्याये चतुर्थः
खंडः॥७॥ ॥अथ पंचम... यावीतील्वास्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अयावीती परिस्रव यस्त इंद्रो
...नपा... नवतीर्नव इति॥ हे इंद्रो सोम अया अनेन रसेन वीती वीत्यै इंद्रस्य भक्षणाय परिस्रव परिक्षर।
॥ यो नरसेनेस्यतत्र आहा तेन वयोरसोमरेषु संग्रामे षु नवतीर्नवेति नवनवति संख्याका अश्शत्रुभिः पुरीः अ
वाहन् जघान। इमं सोमरसं पीत्वा मत्तः सन्निंद्रः उक्त संख्याकाः शत्रु... पुरीर्जघानेति त्वा रसो जघानेत्य
पचारः॥७॥ ॥अथ द्वितीया॥ पुरः सद्य इत्थाधिये दिवोदासाय शंबरं। अध संत्यं तुर्वशं यदुमिति। यद्यएक
स्मिन्नेवाह्नि पुरः शत्रूणां पुराणि सोमरसो वाहन्। इत्था धिये सत्यकर्म्मणे दिवोदासाय राज्ञे शंबरं शत्रुपुरा
णां स्वामिनं अध अथानंतरं त्यं तं तुर्वशं तुर्वशनामकराजानं दिवोदासस्य शत्रुं यदुं यदुनामकं च राजानं वशमानय
त्।। अत्रापि सोमरसं पीत्वा मत्तः सन्निंद्रः सर्वं ... कार्षीदिति। सोमरसे कर्तृत्वमुपचर्यते॥७॥ ॥अथ
तृतीया॥ परि नो अश्वमश्वविद्गोमदिंदो ... वत्। क्षरा सहस्रिणीरिषः इति॥ हे सोम अश्ववित् अ
श्वस्य लंभकस्त्वं नोस्माकं अश्वं गोमत् गायुक्तं हिरण्यवत् हिरण्योपेतं पश्वादि धनं च परिक्षर। अपि च सह
स्रिणीर्बहूनीषोन्नानि क्षर। संहितायां परि नः परि ण इति पाठो॥७॥ ॥अथ त्वा वास्मके द्वितीय सूक्ते प्रथमा॥

© Dharmartha Trust J&K. Digitized by eGangotri

आः

अपघ्नन् पवते मृधो ऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतमिति॥ सोमो मृधो हिंसकान् शत्रून् अप-
घ्नन् मारयन्। अराव्णः। शत्रोः संसाधनानामदातॄन्श्च अपघ्नन् इन्द्रस्य निष्कृतं स्थानं गच्छन् अनुक्रम्
पवते धारया क्षरति॥ ७॥ ॥ अथ द्वितीया॥ [illegible] रायमाभर पवमान जही मृधः। रास्वेंदो वीरवद्यश
इति॥ हे पवमान इंदो सोम नो ऽस्माकं महो महान्ति रायो धनानि आभर आहर। मृधो हिंसकान् शत्रून् जहि
मारय। वीरवत्सुनाध्वे पेतां यशः कीर्त्तिं च रास्व अस्मभ्यं देहि॥ ७॥ ॥ अथ तृतीया॥ न त्वा शतं चन ह्रुतो रा-
धो दित्संतमामिनन्। यत्पुनानो मखस्यस इति॥ हे सोम राधो धनं दित्सन्तं आदातुमिच्छन्तं त्वा त्वां शतं च न ब-
हवो ऽपि ह्रुतो हिंसकाः शत्रवः नामिनन् न हिंसन्ति। कदेत्य आह। यद्यदा पुनानः पूयमानस्त्वं मखस्यसे धनं
दातुमिच्छसि॥ ७॥ ॥ अथ त्वासकेत्तीयसूक्ते प्रथमा॥ अया पवस्व धारया यया सूर्यमरोचयः। हिन्वा-
[illegible] इति। हे सोम मानुषीः मनुष्याणां हितान् अपः उदकानि हिन्वानः प्रेरयन् त्वं यया धारया सूर्य-
स्मिन्न् वा हि पूर[illegible]
[illegible] वयः प्राकाशय [illegible] अनया धारया पवस्व क्षर॥ ७॥ ॥ अथ द्वितीया॥ अयुक्त सूर एतशं पवमानो
मनावधि। अन्तरिक्षेण यातवे इति॥ [illegible] नः पूयमानः सोमो मनावधि मनुर्मनुष्यस्तस्मिन्मनुष्य इत्य-
[illegible] काषा
र्थः। अन्तरिक्षेण यातवे गंतुं सूरः प्रेरकः स्यादित्यस्य एतशं। अश्वनामैतत्। अश्वं अयुक्त युंक्ते॥ ७॥ ॥
अथ तृतीया॥ उत त्या हरितो रथे सूरो अयुक्त यातवे। इंदुरिन्द्र इति ब्रुवन्निति॥ उतापि च इंदुः सोमः इंद्र इ-
ति ब्रुवन् त्याः ताः हरितो हरितवर्णान् अश्वान् सूरः सूर्यस्य रथे यातवे गंतुं अयुक्त न युंक्ते। रथे दश इति पाठे॥ ७॥

© Dharmartha Trust J&K. Digitized by eGangotri

इतिनवमेऽध्यायेपंचमःखंडः॥५॥ ॥अथषष्ठखंडेअग्निंवइतिल्वचात्मकंप्रथमंसूक्तंतत्रप्रथमा॥॥

अग्निंवोदेवमग्निभिःसजोषायजिष्ठंदूतमध्वरेकृणुध्वं।योमर्त्येषुनिध्रुविर्ऋतावातपुर्मूर्धघृतान्नः

पावकइति॥हेदेवावोयूयंदेवंद्योतमान [illegible] त्वरहितेयज्ञेदूतंकृणुध्वंकुरुत।कीदृशंअ

ग्निभिःअन्यैःसजोषाःसजो[illegible]द्वितीयार्थेप्रथमायजिष्ठंयष्टृतमं।योग्निर्देवोपिसन्मरर्त्येषुनिध्रु

स[illegible]पपक्ष[illegible]ता।कीदृशः।ऋतावायज्ञवान्सत्यवान्वातपुर्मूर्धतापकतेजाः।घृतान्नःपावकशो

[illegible]चभवति।तमग्निंदूतंकृणुध्वमितियोजना॥५॥ ॥अथद्वितीया॥प्रोथदश्वोनयवसेविष्यन्यदा

महःसंवरणाद्व्यस्थात्।आदस्यवातोअनुवातिशोचिरधस्मातेव्रजनंकृष्णमस्तीति॥यवसेघासेअ

विष्यन्भक्षयन्प्रोथत्शब्दंकुर्वन्संवरन्वा।अश्वोनअश्वइव।महोमहतःसंवरणान्निरोधान्यदावह्नि

ग्निर्यदाव्यवस्थात्संनतेषुवृक्षेषुवितिष्ठते।आत्तदाअस्याग्नेःशोचिरर्चिरनुवातोवाति।अथअस

90 (शु क्षस्तुतिः।अथानंतरंहेअग्नेतेनवव्रजनंवर्त्मकृष्णमस्तिभवतिस्मेतिपूरणः॥५॥ ॥अथतृतीया॥उ

घस्पतेनवजातस्यवृष्णोग्नेचरंत्यजराइधानाः[illegible]याधामरुषोधूमएषिसंदूतोअग्नईयसेहिदेवानि

ति॥हेअग्नेनवजातस्यनूतनप्रादुर्भूतस्यवृष्णो[illegible]निर्वर्ष्यस्यतेतवअजराजरारहिताद्वालाःइधानाःस

मिध्यमानायाःउच्चरंतिउद्गच्छंति।हेअग्नेअरुषःआरोचमानःधूमोधूमयुक्तःदूतस्त्वंधामद्युलोकं

प्रतिसमेषिसस्यगच्छसि।पश्चात्तत्रस्थितान्देवानिंद्रादीन्ईयसेहिसंप्राप्नोषिखलु।यद्वाहेअग्नेत

© Dharmartha Trust J&K. Digitized by eGangotri

द्वितीयो यो धूमः स्वर्लोकं प्रति एति गच्छति। पुरुषव्यत्ययः। त्वमपि देवान् प्राप्नोषि एषि एति इति पाठे॥७॥

॥ अथ तमिंद्रमिति त्वा सकं द्वितीयं सूक्तं तत्र प्रथमा॥ तमिंद्रं वाजयामसि महे वृत्राय हंतवे। स वृषा

वृषभो भुवदिति॥ यजमाना आहुः। तं पूर्वोक्त[illegible]मिंद्रं वाजयामसि वाजयामः सोमेन स्तुतिभिर्वा

जवंतं बलवंतं कुर्म्मः। किमर्थमिह महांतं वृत्रायेत्यपामावरकं स्वासुरं हंतावहंतुं सोमपानेन मत्तः

स्तुतिभिर्वा स्तुतः सन् वृत्रं हंतवे वाजयामसि वाजवंतं करोतीत्यर्थे तत्करोतीति णिपु। एणा विषवदिति ए

विषवन्नवात्। टेरिति लोपः। विम्मतो र्लुगिति मतुपो लुक्। रपाधनानीसेक्ता दानास इंद्रः वृषभः अस्मा

कं स्तोत्रणां सोमस्य दात्रणां धनादि सेक्ता दाता भुवद्भवतु॥७॥ ॥ अथ द्वितीया॥ इंद्रः स दामने कृ

तनु जिष्ठः स बले हितः। द्युम्नी श्लोकी स सोम्य इति॥ स इंद्रः दामने स्तोतॄ यो धनादि दानायेव कृतः प्रजा

[illegible]नेयः [illegible] किंवर्तु जिष्ठः [illegible]ज स्वितमः। स एवेंद्रः बले बलवति सोमे प्रजापतिना सृष्टिकाले निहितः

स्तुतिः। अथ[illegible] सोमपानार्थं विनि[illegible] र्थः। द्युम्नी द्युम्नं द्योतनत्वं यशो वान्नं वेति यास्केनोक्तत्वात्। एत्रास्वी अन्नवान्॥

अतएव श्लोकी श्लोकः स्तुतिस्त[illegible]इंद्रः सोम्यः सोमार्हो भवति। बले मद इति पाठे॥७॥ ॥ अथ तृ

तीया॥ गिरा व[illegible] नसंभृतः सबलो अनपच्युतः। ववक्ष उग्रो अस्तृत इति॥ गिरा स्तुति लक्षण[illegible]या वाचा

स्तोतृभिः संभृतः उत्साहितः स्वाहोकृतः। तत्र दृष्टांतः। व[illegible] नयथा व[illegible] आयुधं तत्कर्त्तृभिर्निशितधा

रोयथा भवतीति निरुक्ती क्रियेन तद्वत् स्तोतृभिः स्तुत्या संभृतः अतएव सबलो बलसहितः तस्मात् अनपच्युतः

© Dharmartha Trust J&K. Digitized by eGangotri

परैरनभ्यक्तः। अनभिगत इत्यर्थः॥ नाद्यत्रा उग्रो महान् असस्तनः युद्धे शत्रुभिरहिंसितः इंद्रः ववक्षे स्तो

तृभ्यो धनादिकं वोढुमिच्छति उग्रन्कू व इति पाठे॥७॥ ॥इति नवमे ऽध्याये षष्ठः खंडः॥ ॥अथ सप्तम

खंडे अध्वर्यो अद्रिभिरिति त्रिचात्मकं [damaged] मा॥ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आन

य। पुनाहींद्राय पातवइति॥ [damaged] ध्वर्यो अद्रिभिर्ग्रावभिः सुतमभिषुतं सोमं पवित्रे आनय। आपय। ए

[damaged] ति॥ इं[damaged] स्य पातवे पानाय पुनाय पुनीहि पावय। आनय आसृजेति पाठे॥ पुनाहि पुनी

[damaged] हि॥७॥ ॥अथ द्वितीया॥ तव त्य इंदो अंधसो देवा मधो व्यश्नत पवमानस्य मरुत इति॥ हे इंदो सो

म तव संबंधिनं मधोर्मदकरस्य पवमानस्य पूयमानमंधसोऽन्नं तत्र कर्म्मणि षष्ठी॥ से ते इमे देवाः इंद्राद

यो मरुत्वश्च एवंभूतमन्नं व्याशत व्याप्नुवंतीत्यर्थः। व्याशत व्यश्नुत इति पाठे॥७॥ ॥अथ तृतीया॥ दिवः

पीयूषमुत्तमं सोममिंद्राय वज्रिणे। सुनोता मधुमत्तममिति॥ हे अध्वर्यवो यूयं मधुमत्तमं अतिशयेन मा

धुर्योपेतं दिवो द्युलोकस्य पीयूषममृतभूतं उत्तमं श्रेष्ठं सोमं वज्रिणे वज्रवते इंद्राय सुनोत अभिषुणुत॥७॥

॥धर्त्ता दिव इति त्र्यात्मकं द्वितीयं सूक्तं तत्र प्रथमा[damaged]र्त्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृ

भिः। हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजां[damaged]न दीष्वेति॥ धर्त्ता सर्वस्य धारकः सोमः दिवो अंतरिक्षात्

अंतरिक्षस्थिता दशापवित्रात् स्रवते पूयते। कीदृशः सोमः कृत्व्यः कर्त्तव्यः शोध्य इत्यर्थः। रसो रसात्मकः स्वा

नां रक्षः बलप्रदः यद्वा दक्षः प्रवर्द्धनीयो देवानामर्थाय। तथा नृभिर्नेतृभिर्ऋत्विग्भिः रनुमाद्यः। अनुमादनीयस्तु

९१

© Dharmartha Trust J&K. Digitized by eGangotri

स्योवाशेषः प्रत्यक्षकृतः। हरिर्हरितवर्णः सप्तभिः प्राणेभिः सादिभिः सृजानः सृज्यमानः अत्योनऋ-
श्वइवसयथाशिक्षितोश्वः अनायासेनगच्छति। तद्वत्सृथा अप्रयत्नेनपाजांसिबलानिसृतीयानवेगा
नृकृण्वषेकुरुषे। किंचानदीषुवसतीवरीषुतां सर्पः॥ आसिक्तइतिशेषः। अयमभिषवसमया
भिप्रायः। कृण्वषेकृणुतइतिपाठो॥८॥ ॥अथद्वितीया॥ सूरोनधत्तआयुधागभस्त्योःस्वःसिषास
न्रथिरोगविष्टिषु। इंद्रस्यशुष्ममीरयन्नपस्युभिरिंदुर्हिन्वानोअज्यतेमनीषिभिरिति॥ अयंसोमोग
भस्त्योर्हस्तयोरायुधाआयुधानिशूरोनशूरइवधत्तेधारयति। स्वःस्वर्गंसुखंसाधनंयज्ञंवासिषा
सन्संभक्तुमिच्छन्रथिनोरथवान्। रथादिरअस्यसः। गविष्टिषुयजमानस्यगवामेषणेषुसत्सुयजमा
नार्थंगोसंभजनायरथवानिसर्पः। इंद्रस्यशुष्मंबलमीरयन्प्रेरयन्निंदुःसोमोदेवःअपस्युभिःकर्मेच्छु
भीयूषमुत्तमेर्धाविभिरङ्गुलिभिर्हिन्वानःप्रेर्यमाणःअज्यतेगोभिः॥८॥ ॥अथतृतीया॥ इंद्रस्यसो
मपवमानऊर्मिणातविषःमाणोजठरेष्वाविश। प्रनःपिन्वविद्युदभ्रेवरोदसीधियानोवाजांउपमासिश
श्वतइति। हेसोमपवमानःपूयमान। ऊर्म्याधारयातविष्यमाणोवर्द्धिष्यमाणःसन्इंद्रस्यजठरेषुऊर्मिणाप्रभूत
याधारयाआविश। जठरप्रदेशस्यबाहुल्यात्तबहुवचनं। नोस्मदर्थंविद्युदभ्रेवअभ्राणीवसायथा
ऽआणिदीप्यतहृतत्प्रपिन्वधुक्ष्वरोदसीद्यावापृथिव्यौ। किंच। धियाकर्मणानोस्मभ्यंशश्वतःबहुनामेतत्।
बहून्वाजमन्नानिउपसमीपेमासिनिर्मासिमोहिमासीतिपाठो। नानोतिच॥८॥ ॥अथप्रगाथहत्पेत्ततीयसूक्ते

© Dharmartha Trust J&K. Digitized by eGangotri

प्रथमा॥१॥ यदिंद्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः। सिमा पुरू नृषूतो अस्यानवेसि प्रशर्ध तुर्वशे इति॥ हे
इंद्र यद्यदि प्राक् प्राच्यां दिशि वर्तमानैः सप्तम्यंतादिक्। इत्यादिहितस्यास्ताते रंचेर्लुगिति लुक्। यदि वा अ
पा प्रतीच्यां दिशि वर्तमानैः यदि वा उदक् उदीच्यां दि[शि व]र्तमानैः यद्वा न्यक् नीच्यां दिशि स्थिताद्वर्तमानैः
न्यधीवति नैः प्रकृतिस्वरत्वं। उ[illegible]स्वरितयोर्यणः इति परस्यानुदात्तस्य स्वरितत्वं। एवंभूतैर्नृभिः स्तोतृ
भिः त्वं हूयसे स्व[illegible]आय आहूयसे। हे सिम श्रेष्ठ इंद्र सिम इति श्रेष्ठ नामैतदिति वाजसनेयकं। यद्य
[illegible]भिराहूयसे तथापि आनवे अनुर्नाम राजा तस्य पुत्रे राजर्षौ पुरु बहुलं नृषूतः नृभिः स्तोतृभिः
स्तोतृभिः प्रेरितोसि भवसि। राक्षोहितकरणे त्वां स्तोतारः प्रेरयंतीत्यर्थः। षू प्रेरणे। अस्मात्कर्मणि नि
ष्ठा तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। अपि च हे प्रशर्ध प्रकर्षेण शर्धयितरभिभवितरिंद्र तुर्वशे ए
तत्संज्ञके राजनि नृषूतो नृभिः प्रेरितोसि भवसि॥७॥ ॥अथ द्वितीया॥ यद्वा रुमे रुशमे श्यावके कृ
प इंद्र मादयसे सचा॥ कण्वासस्त्वा स्तोमेभिर्ब्रह्मवाहस इंद्रा यच्छंत्या गहि॥ यद्वा यद्यपि हे इंद्र मा रिषु
चनुर्षु राजसु हे इंद्र त्वं सचा सह मादयसे माद्य[सि] तथापि ब्रह्मवाहसः ब्रह्मणां स्तोत्राणां वोढारः अथ
वा ब्रह्मणां अन्नानां वोढारः कण्वासः कण्वगो[त्रा ऋ]षयः स्तोमेभिः स्तोमैः स्तोत्रसमूहैः सह हे इंद्र त्वां आ
यच्छंति आयमयंति अतस्त्वमागहि शीघ्रमागच्छ गमेर्लोटि छंदसः शपो लुक्। स्तोमेभिर्ब्रह्मवाहसः॥ ब्र
ह्मभिः स्तोमवाहस इति॥ पाठो॥७॥ ॥अथ प्रगाथे चतुर्थसूक्ते प्रथमा॥७॥ ॥उभयं शृणवच्च न इंद्रो अ

© Dharmartha Trust J&K. Digitized by eGangotri

1 वीगिर्देवः।सत्राच्यामघवान्सोमपीतये धियाशविष्ठ आगमदिति।।उभयंस्तोत्रात्मकंशस्त्रात्मकंचोभयवि
धमिदंवचोऽर्वागस्मदभिमुखं इंद्र श्रृणवच्छृणोतु।श्रुत्वाचमघवान्धनानिंद्रःसत्राच्या अस्माकंसह अंचत्या
धियायुक्तःसन्शविष्ठोतिशायेनबलवानिंद्रःसोमपीतये अस्माकंसंबंधिसोमस्यपानाय आगमदागच्छतु।
यद्वामघवान्धनवानिंद्रःशविष्ठोतिशायेनबलवान्सत्राच्या अस्मान्सह अंचत्याधियायुक्तःसन्सोम
पीतयेसोमस्यपानाय आगमदागच्छतु।।७।। ।।अथद्वितीया।।तंहिस्वराजंवृषभंतमोजसाधिषणेनित
ष्टतुः।उतोपमानांप्रथमोनिषीदसिसोमकामंहितेमनइति।।तंहितंखलुइंद्रंस्वराजंस्वयमेवराजमानंधिष
णेद्यावापृथिव्यौवृषभंजगदुपकारकवृष्टेर्वर्षकंओजसाबलेननिष्टतक्षतुःसंवस्करतुः।उत अपियस्मात्त्वं
तस्मात्हेइंद्रउपमानांउपमानभूतानामन्येषांदेवानांमध्येप्रथमोमुख्यःसन्निषीदसिवेद्यां।सोमकामं
तेस्त्वमेमनः।ओजसा।ओजसेतिपाठो।।७।। ।।इतिनवमेऽध्यायेसप्तमःखंडः।।७।। ।।अथाष्टमखंडेत्वा
पंडंद्र यश्च सूक्तस्य।।१।।पवस्वदेव आयुषगिंद्रंगच्छतुतेमदः।वायुमारोहधर्मणेति।।हेसोमदेवयोत
मानस्त्वंपवस्वधारयाक्षर।अत्यपक्ष्येत्तवमदोमदकरोरसः आयुषक्तमिंद्रंप्रतिगच्छतु।अपिच।त्वंवायुं
धर्मणाधारकेणरसेनारोहप्राप्नुहिदेवोदेवतेतिपाठो।।७।। ।।अथद्वितीया।।पवमाननितोशासेरयिंसो
मश्रवाय्यं।इंदोसमुद्रमाविशेति।।हेपवमानेंदोसोमत्वंश्रवाय्यंश्रवणीयंरयिंशत्रूणांधनन्नितोशासेनितरां
पीडयसि।सत्वंसमुद्रंद्रोणकलशं आविशप्रविश।इंदोप्रियइतिपाठो।।७।। ।।अपघ्नन्पवसेमृधइतित्वी

© Dharmartha Trust J&K. Digitized by eGangotri

यायास्तव: प्रतीकमिदंसाचष्टंरस्याम्नाताव्याख्याताच॥७॥ ॥अथद्वितीयसूक्तेत्र्यात्मकेअभीनोवा
जसातममितिप्रतीकंसावास्नातोव्याताव॥७॥ ॥अथद्वितीया॥वयंतेअस्यराधसोवसोर्वसोपुरुस्पृ
ह:॥निनेदिष्टतमाइष:स्यामसुम्नेतेअध्रिगो॥ हेसोम.....वासयित:सोमअस्यएतादृशस्यतेतवराधसो
धनस्यपुरुस्पृहबहुभि:स्पृह..यस्यवसोर्वसिकस्यत्वयादीयमानस्यवयंनितरांनेदिष्टतमाअसंतमं
भि:त्वहय...मन्तिपाइषोन्नस्यदीयमानस्यांतिकतमा:स्याम॥किंच॥हेअध्रिगोअधृतगमनसोमते
तवसुम्नेसुखेवयमंतिकतमा:स्यामभवेम॥७॥ ॥अथतृतीया॥परिस्यस्वानोअक्षरदिंदुरव्योमदच्यु
त:॥धारायऊर्ध्वोअध्वरेभ्राजानयातिगव्ययुरिति॥गव्ययुर्गोकाम:पयआदीराद्रिकामयमानऊर्ध्व:स
मुच्छ्रित:सर्वेषांमुख्योय:सोम:भ्राजान॥यथाभ्राजमानयादीप्त्याअंतरिक्षेगच्छतितद्वत्॥दीप्त्यासह
अध्वरयज्ञेधारास्वकीययाधारयायातिगच्छति॥स्वान:सुवान:अभिषूयमाण:स्य:इंदु:सोम:मद
च्युत:मदार्थंदेवै:प्रेरित:सन्अव्येअविभवेपवित्रेपर्यक्षरन्॥परितक्षरतिअक्षरन्अक्षाइति॥पाठो॥७॥
॥अथतृतीयसूक्तेतृतीयात्मकेप्रथमा॥पवस्वसोममहान्समुद्र:पितादेवानांविश्वा॥भिधामेति॥हेसोम
महान्देवेभ्योदीयमानस्त्वेनमहत्वयुक्त:समुद्र:समुंदन:यस्मात्समुद्रवंतिरसस्तादृश:पितासर्वेषांपा
लयितात्वंदेवानांविश्वाविश्वानिसर्वाणिधामधामनिशरीराणिअभिलक्ष्यपवस्वक्षर॥७॥ ॥अथ
द्वितीया॥शुक्र:पवस्वदेवभ्य:सोमदिवेपृथिव्यैशंचप्रजाभ्यइति॥हेसोमशुक्रोदीप्तस्त्वंदेवेभ्योदेवार्थंप

93

६३

© Dharmartha Trust J&K. Digitized by eGangotri

वसस्वक्षर। किंच। दिवि पृथिव्यैव द्यावापृथिवीभ्यां च ततः प्रजाभ्यश्च शं सुखं च कुरु। प्रजाभ्यः प्रजायेइति।
पाठे॥७॥ ॥अथ तृतीया॥ दिवो धर्त्तासि शुक्रः पीयूषः सत्ये विधर्मन् वाजी पवस्वेति॥ हे सोम शु
क्रो दीप्तः पीयूषः पातव्यस्त्वं दिवो द्युलोकस्य धर्त्ता धारकोसि। वाजी बलवान् सत्यं सत्ये सत्यभूते विधर्म्म
न् विधर्म्मणि विविधाः कर्म्माणि क्रतवो यस्मिन् यद्वा विविधं सोमादि हविषां धारके यस्मिन् यज्ञे पवस्व
क्षर॥७॥ ॥इति नवमेऽध्यायेऽष्टमः खंडः॥७॥ ॥अथ नवम खंडे प्रेष्ठं व इति त्र्यृचात्मकं प्रथमं सूक्तं॥ तत्र
प्रथमा॥ प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियं। अग्ने रथं न वेद्यमिति॥ हे अग्ने वस्त्वां पूजार्थे बहुवचनं स्तु
षे स्तौमि अहम् उपाने इति शेषः। कीदृशं प्रेष्ठं अस्माकं स्तोतृणां धनदानेन प्रियतमं। अतिथिं सर्वैरतिथि
वत्पूज्यं। यद्वा अत सातत्यगमने। कृतन्यं जीत्यादिना अतेरिथिन्। सततं देवानां हविः प्रस्तनुं गच्छंतं मित्र
अधारयज्ञे [illegible]मिव प्रियं स्तोतुः प्रीणनकरं। रथं न रथमिव वेद्यं वेदो धनं रथं न रथमिव। यद्वा यथा स्वाभि
मतलाभायाश्रयंते तद्वत् स्तोतारो धनलाभायाश्रयंते धनलाभहेतुं। तादृशं धनलाभकारणं हे अग्ने
तस्मै हितं वेद्यं लाकर्म विध्यर्थं अहर [illegible] स्तोमी मिहं बंधः। अग्ने अग्नि मिति पाठे॥७॥ ॥अथ द्विती
या॥ कविमिव प्रशंस्यं यं देवास इति द्विता। नि मर्त्येष्वादधुरिति॥ हे देवासो देवाः इंद्रादयः यमग्निं मर्त्येषु मनु
ष्येषु इति वक्ष्यमाणप्रकारेण द्विता द्विधा न्यादधुः गार्हपत्याहवनीयात्मकत्वेन द्वेधा निहितवंतः। तत्र दृष्टां
तः। कविमिव प्रशंस्यं प्रशंसनार्हं क्रांतकर्म्माणं पुरुषं यथा द्विधा कार्यद्वये अन्यो नियोजयति तद्वत्। यथा दि

© Dharmartha Trust J&K. Digitized by eGangotri

विपृथिव्यां च निहितवंतः। भूमौ तु हविराहरणार्थं दिवि तु हविः प्रदानार्थमिति द्वेधा निधानं कृतवंत इत्यर्थः
। तमग्निं धुषइति पूर्वेण संबंधः। प्रशंस्यं प्रचेतसमिति पाठो॥ इति आधतिव॥ ॥७॥ अथ तृतीया॥ त्वं
यविष्ठ दाशुषो नॄः पाहि शृणुही गिरः। रक्षा तोकमुत त्मना इति। हे यविष्ठ युवतम यद्व यौतेसृजं तस्य
दृष्टनिरूपं देवानां हविषां णां मिश्रायेत्ततमं त्वं दाशुषो हविर्दत्तवतो नॄन् कर्म्मणां नेतॄन् यजमा
नान् ... धनादिदोषेभ्यो रक्षन्नृः पाहि। सत्र संहितायां नॄन्पइति नकारस्य रुत्वं। अत्रानुनासिक इति पूर्व
तव सानुनासिकः। किंच। गिरस्तद्विषयाः स्तुतीः शृणुहि अवहितः सन् शृणु। उत अपि च त्मना आत्मनैव तो
कमस्मदीयं तनयं पुत्रं शृणुः। शृणुहि शृणुधीति पाठो॥७॥ ॥ अथ चत्वारिंशके द्वितीयसूक्ते प्रथमा॥७॥
एंद्र नो गधि प्रिय सत्राजिदगोह्य। गिरिर्न विश्वतः पृथुः पतिर्दिव इति। हे प्रिय स्तोतॄणां प्रीणनकरः सत्रा
जित महतां शत्रूणां जेतः हे अगोह्य केनापि गूहितुमशक्य एवंभूतेंद्र गिरिर्न पर्वत इव विश्वनः सर्वतः।
पृथुः पृथुतमो दिवः स्वर्गस्य पतिरीश्वरस्त्वं नोस्मानागाह्यागच्छ। प्रियसत्राजिदगोह्य प्रियः सत्राजिदगो
ह्य इति पाठो। विश्वतः पृथुर्विश्वनस्पृथुरिति च॥७॥ ॥ अथ द्वितीया॥ अभि हि सत्य सोमपा उभे बभूथ रो
दसी। इंद्रासि सुन्वतो वृधः पतिर्दिव इति॥ हे सत्य सत्य सोमपाः सोमस्य पातरिंद्र यस्त्वं उभे रोदसी द्यावापृथिव्यौ
अभिबभूय। हि सामर्थ्येनाभिभवसि खलु। स त्वं सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य वृधो वर्द्धकोसि।
दिवः पतिः स्वर्गस्यापि ईश्वरोसि॥७॥ ॥ अथ तृतीया॥ त्वं हि शश्वतीनामिंद्र दर्त्ता पुरामसि। हंता दस्योर्म

© Dharmartha Trust J&K. Digitized by eGangotri

नोर्वधः पतति द्विव इति॥ हे इंद्र त्वं शश्वतीनां बह्वीनां पुरां शत्रुनगरीणां दर्त्तासि हि। दारयिता भवसि खलु।
किं च। दस्योः वधाकालस्योपक्षेपयितुरसुरस्य हंतासि घातको भवसि। मनोर्म्मनुष्यस्य यागादिकं
कुर्वतो वृधो वर्द्धयिताऽसि दिवः स्वर्गस्यापि पतिरीश्वरोसि॥ ७॥ ॥ अथ तत्वालसके तृतीयसूक्ते प्रथ
मा॥ पुरां भिंदुर्युवा कविरमितौजा अजायत। इंद्रो विश्वस्य कर्मणो धर्त्ता वज्री पुरुष्टुत इति॥ अयमिंद्रः
उच्यमानगुणयुक्तोऽजायत संपन्नः। कीदृग्गुणक इति तदुच्यते। पुरामसुरपुराणां भिंदुर्भेत्ता। युवा क
दाचिदपि वलीपलितादिवृद्धकरहितः कविर्मेधावी। अमितौजाः प्रभूतबलः विश्वस्य कर्मणः क्रतोस्य स्ता
ज्योतिष्टोमादेर्द्धर्त्ता पोषकः। वज्री यजमानरक्षणार्थं सर्वदा वज्रयुक्तः। पुरुष्टुतः बहुविधैस्तत्तत्कर्म्मणि
स्तुतः। भिंदुः। भिदिर् विदारणे कुरित्यनुवृत्तौ। नभिदिद्व्यधिगृधिधृषिदशिभ्य इति कुप्रत्ययः। तस्य छंदस्यु
[illegible]ेति सार्वधातुकसंज्ञायां रुधादिभ्यः श्नम्। मित्वादंत्यादचः परो भवति। श्नसोरल्लोपः। अनुस्वारप
[illegible]सवर्णौ। अचः प[illegible]स्पूर्वविधौ विति प्राप्तस्य स्थानिवद्भावस्य न पदांतेत्यादिना निषेधः। युवा। यु मिश्र
णामिश्रणयोः कनिन्युवृषितक्षि[illegible]धन्विद्युप्रतिदिव इति कनिन्। नित्वादाद्युदात्तः। कविः कुशब्दे अव इ
रितीइः प्रत्ययस्वरः। अमितशब्दस्याव्ययपूर्वपदप्र[illegible]ते। स्वरत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव
शिष्यते। विश्वस्य आमरषीत्यादिनाक्वन्। नित्वादाद्युदात्तः। कर्मणः अन्येभ्योपि दृश्यंत इति मनिन्। नित्स्वरः
। धर्त्ता तृच्। चित्वादंतोदात्तः। वज्री मत्वर्थीय इनिः प्रत्ययस्वरः। पुरुष्टुतः स्तुतस्तोमयोश्छंदसीति षत्वं। बहु

© Dharmartha Trust J&K. Digitized by eGangotri

षुप्रदेशेषु स्रुतः । धाघघड्गाजबिभ्रकाणामित्यंतोदात्तत्वं । तृतीयासमासे हित्याद्यादिस्वरापवादः । तृती
या कर्म्मणीति पूर्वपदप्रकृतिस्वरस्यात् ॥ ७ ॥ ॥ अथ द्वितीया ॥ त्वं वलस्य गोमतोपावरद्रिवो बिलं । त्वां रे
वा अबिभ्युषस्तुज्यमानास आविषु[illegible]वलस्य[illegible] । कश्चिद्दसुरो स्वसंबंधिनीर्गा अपहृत्य कस्मिं
श्चिन् बिले गोपितवान् । तदानीमिन्द्रस्तद्बिलं स्वसैन्येन समावृत्य तास्माद्बिलाद्गाः निःसारयामास । त
[illegible]न । मघ्नबलस्य बिलमपोर्णोदित्यादिब्राह्मणेषु मंत्रांतरेषु च प्रसिद्धं । तदेतद्दृदि निधायायं
मंत्रः प्रवर्त्तते । हे अद्रिवः वज्रयुक्तेन्द्र त्वं गोमतो वलस्य गोभिर्युक्तस्य बलनामकस्यासुरस्य संबंधि बिलं
अपावः स्वसैन्यमुखेन । अपावृतवानसि । तदानीं तुज्यमाना सो बलेन हिंस्यमाना देवा अबिभ्युषः त्वदीय
या रक्षया बलाद्भीताः संतः त्वामाविषुः प्राप्तवंतः । अपेत्यस्य निपातत्वादाद्युदात्तत्वं । अवावरणे । ल
ङ् । तिप् । इतश्च लोपः । सादिभ्यः श्लुः । तस्य बहुलं छंदसीति लुक् । सुणोर परत्वं । हल्ङ्याब्भ्यो दीर्घादिति लोपः । विसर्जनी
यः । अडागमः । अद्रिवः । अद्रिरस्यास्तीति मतुप् । छंदसीर इति वत्वं । संबोधने । उगिदचामिति नुम् । हल्
ङ्याद्यासंयोगांतलोपौ । मतुवसो रुः संबुद्धौ छंदसीति रुत्वं । बिलं । नब्विषयस्यानिसंतस्येत्याद्युदात्तत्वं । अ
बिभ्युषः । ञिभी भये । लिट् । द्विर्भावः । अभ्यासस्य ह्रस्वजश्त्वे । क्वसुश्चेति लिटः क्वसुरादेशः । क्र्यादिनियमात्
प्राप्त इट् वस्वेकाजाद्घसामिति नियमान्निवर्त्तते । जसि सर्वनामस्थाने पि व्यत्ययेन भत्वाद्वसोः संप्रसारणं
। परपूर्वत्वं । शासिवसिघसीनां चेति षत्वं । अबिभ्युषा त्वियादिना प्राप्तमियङादेशं बाधित्वा एरनेकाच इति यण्

९५

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मादुपदेशादुत्तरस्य कर्म ल्टः स्थानेशानच् ॥ सार्वधातुके यगिति यक् ॥ २ ॥

देवाः । नञ्समासः । अव्ययपूर्वप्रकृतिस्वरत्वं तुज्यमानासः । तुजेर्हिंसार्थात्कर्म्मणि लटः स्थाने शा
नच् । सार्वधातुके यगिति यक् । तस्मादुपदेशादुत्तरस्य लसार्वधातुकस्यानुदात्तत्वं । यक एव अस्य यस्वरः
शिष्यते । आविषुः । अवरक्षणादिषु । अस्मात् गत्यर्थात् लुङि । तस्य सिजभ्यस्तविदिभ्यश्चेति जुस् । सि
च इडागमः । आडजादीनामित्याडागमः । आदेशप्रत्यययोरिति षत्वं ॥ ८ ॥ ॥ अथ तृतीया ॥ इंद्रमी
शानमोजसाभिस्तोमैरनूषत । सहस्रं यस्य रातय उत वा संति भूयसीरिति ॥ स्तोतारः ओजसा बले
न ईशानं जगतो नियामकमिंद्रं स्तोमैः स्तोत्रैरभिरभ्यनूषत । सर्वत्र स्तुतवंतः । यस्येंद्रस्य रात
यो धनदानानि सहस्रं सहस्रसंख्योपेतानि संति । उत वा अपि वा भूयसी । सहस्रसंख्याका अप्यधि
काः संति । तमिंद्रमिति पूर्वान्वयः । स्तोमैः स्तोमाः इति पाठे ॥ इंद्रं ऋज्रेंद्रसां इत्यादिना रन् । नित्वादाद्युदात्तः
ई॥ति पूर्वं लटः शानच् । अदिप्रभृतिभ्यः शप इति शपो लुक् । धातोरनुदात्तेत्त्वात् तस्यानुदात्तेदित्यादिना शान
चोनुदात्तत्वं ॥ तुजस्ववः ... षयत्वादाद्युदात्तः । स्तोमैः । अर्तिस्तुसुस्वित्यादिना मन्प्रत्ययः । नित्वादाद्युदात्तः ।
अनूषत । णु स्तुतौ । णो नः । लुङि व्यत्ययेनात्मनेपदं । तस्य झस्यादेशः । च्लेः सिच् । अस्य धातोः कुटादित्वेन सिचो
ङित्वात् गुणाभावः । इडभावश्छांदसः । अडागमः । सह... ईमादीनां चेति द्वितीयाक्षरमुदात्तं । रातयः । मं
त्रे वृषघासान्नाक्तिन् उदात्तः । उत्तमातिपदिकस्वरः वा । चादिरनुदात्तः । संति । प्रत्ययाद्युदात्तत्वं । तिङः तिङः
इति निघातो न भवति यद्वृत्तान्नित्यमिति प्रतिषेधात् । स हि व्यवहितेपि भवतीत्युक्तं । भूयसीः सहस्रा

© Dharmartha Trust J&K. Digitized by eGangotri

इतिशायेनवक्ष्यः भूयस्यः। अत्र विभक्त्यव्ययस्य सहस्रस्य संनिधिबलात्तूपपदत्वप्रतीते द्विर्वचनविभज्यो।
पपदे तरवीयसुनाविति। बहुशास्त्वादीयसुन्बहोर्लोपो भूचबहोरितीकारलोपः। अक्रुतेर्भूरित्यादेशश्च।
ईयसुनो नित्वादाद्युदात्तत्वं। उगितश्चे [illegible] नवमेऽध्यायेनवमः खंडः। वेदार्थस्य प्रकाशेने
तमोहार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥८॥ ॥इति श्रीमद्राजाधिराजपरमे
[illegible] प्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये सा
मवेदार्थप्रकाशे उत्तराग्रंथे नवमोऽध्यायः॥८॥ ॥यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तम
हं वंदे विद्यातीर्थमहेश्वरं॥८॥ ॥अथ दशमोऽध्याय आरभ्यते॥ तत्र प्रथमखंडे अक्रान्समुद्र इति तृचात्मकम
96 कं प्रथमं सूक्तं तत्र प्रथमा॥ अक्रान्समुद्रः प्रथमे विधर्मन्जनयन्प्रजा भुवनस्य गोपाः। वृषा पवित्रे अ
धि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिरिति॥ समुद्रः यस्मादापः संद्रवंति स समुद्रः अपां वर्ष
कः गोपाः। स्वामित्वेन सर्वस्य रक्षकः सोमः प्रथमे विस्तृते भुवनस्य उदकस्य विधर्मन् विधारके अंतरिक्षे प्र
जा। जनयन् उत्पादयन् अक्रान् सर्वमतिक्रामति। क्रमतेर्लुङि तिपि वृभावे वृद्धौ च कृतायां सिजलोपे मकार
स्य मो नो धातोरिति नकाररूपं वृषा कामानां वर्षिता स्वानोऽभिषूयमाणः अद्रिरादरणशीलः स सोमः अ
धि अधिकं सानौ समुच्छ्रिते अव्ये अविमये पवित्रे बृहन्महान् प्रभूतं ववृधे वर्द्धते। गोपाः राजे इति पाठे॥ अद्रिर्दिदुरि
तिवा॥८॥ ॥अथ द्वितीया॥ मत्सि वायुमिष्टये राधसे नो मत्सि मित्रावरुणा पूयमानः। मत्सि शर्द्धो मारुतं म

© Dharmartha Trust J&K. Digitized by eGangotri

न्सि देवानुमन्सि द्यावापृथिवी देव सोमेति। हे सोम त्वं वायुं मन्सि मादयसि किमर्थं नोऽस्माकं इष्टये एषणीयाया
नाय। राधसे धनाय च। तथा पवित्रेण पूयमानस्त्वं मित्रावरुणा मित्रावरुणौ च मन्त्सि मन्सि तर्पयसि। किंच।
मारुतं मरुतां स्वभूतं शर्द्धो बलं च मन्सि। तथा देवान् इन्द्रादीननुमन्सि हर्षयसि। हे देव स्तोतव्य हे सोम द्यावापृथिव्यौ
च मन्सि मादयसि। एतान् मदयस्युक्तान् कृत्वास्मभ्यं धनं प्रयच्छेत्यर्थः। राधसे नः राधसे चेति पाठे॥८॥ ॥
अथ तृतीया॥ महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्। अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये
ज्योतिरिन्दुरिति॥ महिषो महान् पूज्यो वा सोमः महत्प्रभूतं तत्कर्म विकारान् करोत्। किं तत्कर्म अपां गर्भः उद
कानां गर्भभूतः जनयिता वा जन्मत्वाच्च स सोमः देवानवृणीत सम्भजतेति यत् तत्कृतवानिति किंच। पवमानः
पूयमानः सोमः इन्दुरोजस्तत्सानि नजन्यं बलं इन्द्रे अदधात्। अदधात् तथा इन्दुः सोमः सूर्ये ज्योतिस्तेजोऽजनयत्॥
॥ अथैष देव इति दशर्चं द्वितीयं सूक्तं तत्र प्रथमा॥ एष देवो अमर्त्यः पर्णवीरिव दीयति। अभि द्रोणान्या
धिसान॥ [illegible] सा घो [illegible] नसः [illegible] नः अमर्त्यो मरणरहित एष स्तोमः द्रोणानि द्रोणकलशान् अभि अभिलक्ष्य आसदमास
न्तुमासदनार्थं पर्णवीरिव पर्णपक्षः [illegible] तथा वेगेन दीयते गच्छति। दीयते दीयतीति पाठे॥८॥ ॥ अथ द्वितीया॥
एष विप्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे [illegible] विप्रैर्मेधाविभिः स्तोतृभिरभिष्टुतः आभिमुख्येन
स्तुतः अयं देवो द्योतमानः एष सोमः दाशुषे हवींषि प्रदत्ते यजमानाय रत्नानि रमणीयानि धनानि दधत् धारयन् प्र
यच्छन्। अपो वसतीवरीर्विगाहते प्रविशति॥८॥ ॥ अथ तृतीया॥ एष विश्वानि वार्या शूरो यन्निव सत्वभिः॥

© Dharmartha Trust J&K. Digitized by eGangotri

पवमानः सिषासतीति॥ पवमानः पूयमानः शूरो वीरः एष सोमः विश्वानि सर्वाणि वार्य्याणि वरणीयानि धनानि
सत्वभिर्बलैर्य्यन्निव गच्छन्निव सिषासति अस्मदर्थं संभक्तुमिच्छति॥ ७॥ ॥अथ चतुर्थी॥ एष देवो रथर्य्य
ति पवमानो दिशस्यति। आविष्कृणोति [illegible] तुमिति। [illegible]मानः क्षरन्नेव सोमो देवो रथर्य्यति अस्मदीयं यागं
प्रत्यागमनाय रथं क[illegible]मे दिशस्यति। आगत्य चास्मभ्यं अभिलषितं धनं प्रयच्छति वा वग्वनुं शब्दं आ
[illegible] अभिषवकाले प्रकटयति दिशस्यति दशस्यतीति पाठे॥ ॥अथ पंचमी॥ एष देवो विपन्युभिः
पवमान ऋतायुभिः। हरिर्वाजाय मृज्यत इति॥ पवमानः क्षरन्नेष सोमो देवो विपन्युभिः स्तोतृभिः ऋता
भिः ऋतायुभिर्यज्ञकामैः सत्यकामैर्वा हरितवर्णः वाजाय संग्रामार्थं मृज्यते स्तुतिभिरलंक्रियते॥ ७॥ ॥
अथ षष्ठी॥ एष देवो विपाकृतोतिह्वरांसि धावति। पवमानो अदाभ्य इति॥ विपा अंगुलिनामैतत् अंगुल्या
तनो भिषुत एष सोमो देवः पवमानः क्षरन् अदाभ्यः केनाप्यहिंसितः अन्नसन् ह्वरांसि शत्रून् अतिधावति हन्तुम
भिगच्छति॥ ७॥ ॥अथ सप्तमी॥ एष दिवं विधावति तिरो रजांसि धारया। पवमानः कनिक्रददिति॥ धारया
पवमानः क्षरन्नेष सोमः कनिक्रदत् अभिषूयमाणः शब्दं कुर्वन् रजांसि लोकान् तिरस्तिरस्कुर्वन् सद्या
दिवं स्वर्गं प्रतिधावति॥ ७॥ ॥अथाष्टमी॥ एष दिवं व्यासरत् तिरो रजांस्यस्पृतः। पवमानः स्वध्वर इति॥ पव
मानः क्षरन्नेष सोमः स्वध्वरः सुयज्ञः अस्पृतः केनाप्यहिंसितः अन्नसन् रजांसि लोकांस्तिरस्तिरस्कुर्वन् य
ज्ञाद्दिवं प्रति व्यासरत् अनुविसरन्निगच्छति॥ ७॥ ॥अथ नवमी॥ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः प

९७

९६

© Dharmartha Trust J&K. Digitized by eGangotri

वित्रे अर्षतीति ॥ हरिर्हरितवर्णः देवो द्योतमानः एष सोमः प्रत्नेन पुराणेन जन्मना जननेन देवेभ्यो देवार्थं सुतो ऽभिषुतः सन् पवित्रेस्थानं तु अर्षति गच्छति ॥ ७ ॥ ॥ अथ दशमी ॥ एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः ॥ धारया पवते सुत इति ॥ एष उ स्यः एष एव स सोमः पुरुव्रतो बहुकर्म्मा जज्ञानो जायमान एव इषो ऽन्नानि जनयन्नुत्पादयन् सुतो ऽभिषुतः धारया पवते क्षरति ॥ ७ ॥ ॥ इति दशमे ऽध्याये प्रथमः खंडः ॥ अथ द्वितीयखंडे एष धियेत्यष्टर्चं सूक्तं तत्र प्रथमा ॥ एष धिया यात्यण्व्या शूरो रथेभिराशुभिः गच्छन्निंद्रस्य निष्कृतमिति ॥ एष सोममिति । एष सोमः शूरो विक्रांतः अण्व्या अंगुल्या अभिषुतः धिया कर्म्मणा याति गच्छति । क्वेत्यत इति उच्यते । इंद्रस्य निष्कृतं स्थानं स्वर्ग्गाख्यं प्रति आशुभिः शीघ्रगामिभिः रथेभिः रथैः गच्छन् इंद्रेण रथवस्थाप्य स्वस्थानं नयतायां गुहायां अभिषूयमाणः सन् होमद्वाराग्निनिःष्पीडन द्वारा पात्रेवा गच्छतीत्यर्थः ॥ ७ ॥ ॥ ...द्वितीया ॥ एष पुरु धियायते बृहते देवतातये । यत्रामृतास आशतेति ॥ एष सोमः पुरु बहुलं धियायतनो ऽभिषुतः ...यकमच्छति । ध... तक्रव्याकारोपजनः । यद्वा द्वितीयार्थे तृतीया छांदसस्यालुक् । कस्मै बृहते महते देवतातये यज्ञाय यत्र यस्मिन्यज्ञे अमृतासो ऽमृता देवा आशत व्याप्नुवंति । तद्यथा आशत आसत इति पाठः ॥ ७ ॥ ॥ अथ तृतीया ॥ एतं मृजंति मर्ज्यमुप द्रोणेष्वायवः प्रचक्राणं महीरिष इति ॥ आयवो मनुष्या ऋत्विजः एतं सोमं मर्ज्यं मार्जनीयं उप मृजंति निष्पीडयंतीत्यर्थः । कुत्र द्रोणेषु द्रोणकलशेषु कीदृशं महीरिषः महांत्यन्नानि प्रचक्राणं कुर्वाणं । प्रभूतः रसस्त्राविण मित्यर्थः ॥ ७ ॥ ॥ अथ चतुर्थी ॥ एष हितो विनीयते

© Dharmartha Trust J&K. Digitized by eGangotri

गु

तःशुभ्रावतापथा। यदींतुंजंति भूर्णयइति॥ एषसोमः हितो निहविर्द्धानेविधीयते तस्मात्स्थानात् ल्वनी
यंप्रति। अंतस्तयोर्मध्ये एषोंशुं ब्यावताशुभ्रिमतापथा मार्गेण यदियदातुंजंति प्रयच्छंति देवेभ्यो पूर्णयोभ
रणशीलाः अध्वर्य्यादयः तदा विनीय[illegible]मन्व[illegible]तु ध्यावताशुभ्रावनेति पाठो॥८॥ ॥अथपंच
मी॥ एषरुक्मिभिरीयतेवाजी शुभ्रेभिरंशुभिः। पतिः सिंधूनां भवन्निति॥ एषसोमरुक्मिभिरध्वर्य्वादिभिः
[illegible]तीति। कीदृशः एषः वाजी वगवान् शुभ्रेभिर्दीप्तैरंशुभिर्विशिष्टः अथवा रुक्मिभिरित्येतदंशुवि
शेषणं। सिंधूनां स्यंदमानानां रसानां पतिर्भवन्नीयतइति॥८॥ ॥अथषष्टी॥ एषशृंगाणि दोधुवच्छिशीते
यूथ्योवृषा। नृम्णा दधान ओजसेति॥ एषसोमः शृंगाणि शृंगवदुन्नतानंशून् अभिषवकाले दोधुवत् धुनोति॥
यूथ्यो यूथार्हो यूथपतिर्वृषा वृषभो यथा शिशीते तीक्ष्णे शृंगे धुनोति तद्वत्। कीदृशः ओजसा बलेन नृम्णा नृम्णा
निधनानि दधानो स्मदर्थं धारयन्॥८॥ ॥अथसप्तमी॥ एषवसूनि पिब्दनः परुषाययिवां अति। अवशादे
षु गच्छतीति॥ एष वसूनि आच्छादकानि रक्षांसि पिब्दनः पीडयन्नेषसोमः परुषा पर्वणा अति अतिक्रम्य।
ययिवान् गच्छन् शादेषु शातनीयेषु रक्षःसु अवगच्छति पिब्दनः पिशाच्छनेति पाठो॥८॥ ॥अथाष्टमी॥
एतमुत्यं दशक्षिपो हरिं हिन्वंति यातवे। स्वायुधं मदिंतममिति॥ हरिं हरितवर्णं त्यंतं एतमु एतमेव सोमं दशक्षि
पः दशसंख्याका अंगुलयः यातवे गमनाय हिन्वंति प्रेरयंति। कीदृशं सोमं स्वायुधं शोभनायुधं मदिंतमं माद
यिततमं। रक्षोहनन सामर्थ्य प्रदर्शनाय स्वायुधशब्दग्रहणं हरिं हिन्वंति यातवे मर्जंति सप्तधीतयइति पाठो॥८॥

९८

© Dharmartha Trust J&K. Digitized by eGangotri

इति दशमे ऽध्याये तृतीयः खंडः॥७॥ ॥अथ तृतीयखंडे एष उ स्येति षडृचं प्रथमं सूक्तं तत्र प्रथमा॥ एष उ स्य
वृषा रथो ऽव्यावारेभिरव्यत। गच्छन्वाजं सहस्रिणमिति॥ स्यः प्रसिद्ध एषो ऽभिषुतः सोमः वृषा वर्षिता रथो रंह
णस्वभावः अव्यावारेभिरवेर्वालैर्दशापवित्रेण अव्यत द्रोणकलशं प्रतिगच्छति। वाजमन्नं सहस्रिणं स
हस्रसंख्याकं यजमानाय प्रदातुं गच्छन् द्रोणकलशं प्रविशन्नव्यते स्पर्धः। अव्यावारेभिरव्यत अव्यावारेभि
रर्षतीति पाठो॥७॥ ॥अथ द्वितीया॥ एतं त्रितस्य योषणो हरिं हिन्वंत्यद्रिभिः। इंदुमिंद्राय पीतय इति॥ ए
तमिंदुं हरिं हरितवर्णं सोमं त्रितस्य एवन्नामकस्य ऋषेर्योषणो ऽंगुलयः अद्रिभिरभिषवपाषाणैर्हिन्वंति
प्रेरयंति। किमर्थं इंद्रायेंद्रस्य पीतये पानाय॥७॥ ॥अथ तृतीया॥ एष स्य मानुषीष्वा श्येनो न विक्षु सीदति
गच्छन्जारो न योषितमिति॥ स्यः स एष सोमः मानुषीषु विक्षु प्रजासु श्येनो न श्येन इव शीघ्रमागत्य यजमा
नधनानि अनुग्रहेण [redacted] गत्य सीदतीति। पुनः
कः इव योषितं गच्छन् सुनिष्क्रन् जारो न जार इव स यथा संकेतितः तस्याः कामपूरणाय गूढो गच्छति तद्वदित्य
र्थः॥७॥ ॥अथ चतुर्थी॥ एष स्य मद्यो रसो ऽवचष्टे दिवः शिशुः। य इंदुर्वारमाविशदिति॥ स्यः स एष मद्यो मदनि
मित्तो रसो ऽवचष्टे सर्वमावपश्यति। दिवः शिशुः द्युलोकस्य पुत्रः स्य पुत्रस्तत्रोत्पत्तेः पुत्रत्वमस्य य इंदुरिति तः सो
मो वारं दशापवित्रमाविशत् आविशति। स एष इति॥७॥ ॥अथ पंचमी॥ एष स्य पीतये सुतो हरिरर्षति धर्ण
सिः। क्रंदन्योनिमभि प्रियमिति॥ एष स्यः स सोमः पीतये पानाय सुतो ऽभिषुतो हरिर्हरितवर्णः धर्णसिर्धारकः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रियंस्वप्रियभूतंयोनिंस्थानंद्रोणकलशांकंस्वस्थानंपवमानमर्षति अभिगच्छति।।७।। अथ षष्ठी।।एतंत्यं
हरितो दशमर्मृज्यंते अपस्युवः याभिर्मदाय शुंभत इति।। एतं त्यं तं सोमं अध्वर्योर्दश हरितो हरणस्व
भावा अंगुलयः अपस्युवः कर्मेच्छवः [illegible] मृज्यं[illegible]धयंति। याभिरंगुलिभिरिंद्रस्य मदाय शुंभंते दी
प्यते शोध्यत इत्यर्थः।। तमेतमिति। संबंधः।।७।। ।।इति दशमे ऽध्याये तृतीयः खंडः।।७।। ।।अथ प
[illegible]वाजी इति षड्चं सूक्तं तत्र प्रथमा।। एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः। अव्यं वारं वि
धावतीति। एष सोमः वाजी गमनशीलः हितो ऽध्वर्युणा पात्रे निहितः धृतः विश्वविद् सर्वज्ञः मनसस्तोत्रस्य
पतिः स्वामी। अथवा सोमस्य मनोभिमानिता मनसः स्वामित्वं। चंद्रमा मनो भूत्वा हृदयं प्राविशदिति
श्रुतेः। तादृशो सो अव्यं वारं अविसंबंधिनं वालं दशापवित्रं विधावति विविधं गच्छति। अव्यमव्य इति पाठे
।।७।। ।।अथ द्वितीया।। एष पवित्रे अक्षरन् सोमो देवेभ्यः सुतः। विश्वा धामान्याविशन्निति।। एष सो
मः देवेभ्यो देवार्थं सुतोभिषुतः सन् पवित्रे अक्षरत् स्रवति। विश्वा सर्वाणि धामानि देवशरीराणि आ
विशन् प्रविशन् प्रवेष्टुमित्यर्थः।।७।। ।।अथ तृतीया।। एष देवः शुभायते ऽधि योनावमर्त्यः। वृत्रहा देववी
तम इति।। एष सोमो देवः शुभायते शोभते। कुत्र। अधियोनौ स्वीये स्थाने कीदृशः एषः अमर्त्यो ऽमरणध
र्म्मा वृत्रहा शत्रुहंता। देववीतमो ऽतिशयेन देवानां कामयिता।।७।। ।।अथ चतुर्थी।। एष वृषा कनिक्र
दद्दशभिर्जामिभिर्यतः। अभि द्रोणानि धावतीति।। वृषा कामानां वर्षिता युधि सोमः कनिक्रदत् शब्दं कुर्वन्

९९

© Dharmartha Trust J&K. Digitized by eGangotri

दशभिर्ज्ञीभिर्यतः। दंगुलीभिर्यतो धृतः द्रोणानि द्रुममयानि पात्राणि अभिधावत्यभिगच्छति॥छ॥
अथ पंचमी॥ एष सूर्यमरोचयत् पवमानो अधि द्यवि। पवित्रे मत्सरो मद इति॥ पवमानः पूयमान एष सो
मः अधि द्यवि द्युलोके स्थितं सूर्यमरोचयत्। रोचयति कीदृशः। पवित्रे स्वयं दशापवित्रे स्थितः मत्सरो
मदहेतुं प्राप्तः मदो हर्षदाः। अधि द्यवि पवित्रे मत्सरो मदः क्विचर्षणिः। विश्वा धामानि विश्वविदिति पाठो॥छ॥
॥अथ षष्ठी॥ एष सूर्येण हासते संवसानो विवस्वता। पतिर्वाचो अदाभ्य इति॥ एष सोमः संवसानः सर्व
माप्याच्छादयन्। विवस्वता दीप्तिमता सूर्येण हासते परिस्रवते पवित्रे इति शेषः। कीदृशः। वाचः स्तुतिल
क्षणायाः पतिः पालकः स्वामी वा अदाभ्यः केनाप्यहिंस्यः॥छ॥ ॥इति दशमेऽध्याये चतुर्थः खंडः॥छ॥ ॥
अथ पंचमखंडे एष कविरिति षडृचं प्रथमं सूक्तं तत्र प्रथमा॥ एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो तः
घ्नन्नप द्विष इति॥ एष सोमः कविर्मेधावी अभिष्टुतो अभितस्तुतः पवित्रे अधि दशापवित्रमतीत्य तोशते। यद्य
प्येवं तोशतेर्वधकर्मतो पि हनने गतिसद्भावादिति गतिमात्रे वर्तते। गच्छतीत्यर्थः। अथवा पवित्रे अधि द
शा जिनेनो तोशते हन्यते पीड्यते इत्यर्थः। किं कुर्वन् पुनानः पूयमानः द्विषः शत्रून् अप घ्नन् अपगमयन्। द्वि
षः स्त्रिध इति पाठो॥छ॥ ॥अथ द्वितीया॥ एष इंद्राय वायवे स्वर्जित्परिषिच्यते। पवित्रे दक्षसाधन इति॥
एष सोमः स्वर्जित् स्वर्गस्य सर्वस्य वा जेता। इंद्राय वायवे च पवित्रे परिषिच्यते। परिस्राव्यति। कीदृशः एषः।
दक्षसाधनो बलकारी॥छ॥ ॥अथ तृतीया॥ एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित्

© Dharmartha Trust J&K. Digitized by eGangotri

ति॥एषसोमोनृभिःकर्म्मनेतृभिःऋत्विग्भिर्विनीयतेविविधंनीयते।कीदृशःएषःदिवःद्युलोकस्यमूर्द्धा
शिरोवत्प्रधानभूतः।वृषाभिमतवर्षकःसुतोभिषुतःकुम्भनीयते।वनेषुवननीयेषुपात्रेषुवनसंभूत
द्रुमविकारेषुवापात्रेषुविश्वविन्सर्व[illegible]इतिस[illegible]यः॥७॥ ॥अथचतुर्थी॥एषगव्युरचिक्रदत्प
वमानोहिरण्ययुः।इंदुःसत्राजिदस्तृतइति॥एषसोमःपवमानःपूयमानःअचिक्रदत्शब्दंकरोति॥क
[illegible]गव्युरस्माकंगाइच्छन्हिरण्ययुर्धनमिच्छन्इंदुर्दीप्तःसन्सत्राजितमहतःशत्रोर्वसुरादे
र्जेतास्तृतःस्वयंअन्यैरहिंसितःसन्॥७॥ ॥अथपंचमी॥एषशुष्म्यसिष्यददंतरिक्षेवृषाहरिःपु
नानइंदुरिंद्रमेति॥एषशुष्मीबलवान्सोमःअंतरिक्षेदशापवित्रेअसिष्यदत्स्यंदते।कीदृशःएषःवृषा
वर्षकःहरिर्हरितवर्णःपुनानःपूयमानःइंदुर्दीप्तःसएवंभूतःइंद्रंवाभिगच्छतीतिशेषः।आइतिवाक्ये॥७॥
॥अथषष्ठी॥एषशुष्म्यदाभ्यःसोमःपुनानोअर्षति।देवावीरघशंसहेति॥एषसोमःशुष्मीबलवान्अद
भ्योदंभनीयः।अहिंसनीयः।पुनानःपूयमानःअर्षतिगच्छति।देवावीर्देवानामविताअघशंसहाअघान
६ शंसंतीत्यघशंसाः।तान्हंता॥७॥ ॥इतिद्व्यामेऽध्यायेपंचमःखंडः॥ ॥अथषष्ठेखंडेससुतइतिषडृचं
। सूक्तंतत्रप्रथमा॥ससुतःपीतयेवृषासोमःपवित्रेअर्षति।विघ्नन्रक्षांसिदेवयुरिति॥ससोमःपीतयेइंद्रादि
पानायसुतोभिषुतःवृषावर्षकःसन्पवित्रेअर्षतिगच्छति।किंकुर्वन्रक्षांसिविघ्नन्देवयुर्देवकामोयःसइ
च्छन्यः॥७॥ ॥अथद्वितीया॥सपवित्रेविचक्षणोहरिरर्षतिधर्णसिः।अभियोनिंकनिक्रददिति॥ससोमो

100

© Dharmartha Trust J&K. Digitized by eGangotri

विचक्षणः पश्यति कर्मैतत्सर्वस्य द्रष्टा हरिर्हरितवर्णः स सोमः धर्णसिः सर्वस्य धारकः पवित्रे अर्षति गच्छ
ति। पश्चात्क्रनिक्रदत् शब्दं कुर्वन् योनिं स्थानं द्रोणकलशमभिगच्छति॥३॥ ॥अथ तृतीया॥ स वा
जी रोचनं दिवः पवमानो विधावति। रक्षोहा वारमव्ययमिति॥ स वाजी वेजवानश्वस्थानीयो दिवो रो
चनं स रोचकः पवमानः पूयमानो विधावति। कीदृशः। रक्षोहा रक्षसां हन्ता। अव्ययं वारं दशापवि
त्रं अतीत्य विधावति विविधं गच्छति। रोचनं रोचने इति पाठे॥३॥ ॥अथ चतुर्थी॥ स त्रितस्याधि सा
नवि पवमानो अरोचयत्। जामिभिः सूर्यं सहेति॥ स सोमः त्रितस्य महर्षेरधिसानवि समुच्छ्रिते
यज्ञे अधीति सप्तम्यर्थानुवादी। पवमानः पूयमानो जामिभिः प्रवृद्धैर्बंधुभूतैः स्वतेजोभिः सह स
हितः सन् सूर्यमरोचयत् प्रकाशितवान्॥३॥ ॥अथ पंचमी॥ स वृत्रहा वृषा सुतो वरिवोविद्दा
॥अथ वाजमिवासरदिति॥ स सोमो वृत्रहा शत्रूणां हन्ता। वृषा वर्षकः सुतो ऽभिषुतो वरिवोवित्
९ शुर्द्धनस्य लंभकः अदाभ्यो ऽन्यैरदंभनीयः। एवंगुणः सन् वाजमिव संग्राममश्वइवासरद्गच्छति कल
शम्॥३॥ ॥अथ षष्ठी॥ स देवः कविनेषितो ऽभि द्रोणानि धावति। इंदुरिंद्राय मंहयन्निति॥ स सोमो
देवः इंदुः क्लिद्यमानः कविना क्रांतप्रज्ञेनाध्वर्युणा इषितः प्रेरितः सन् द्रोणानि द्रोणकलशान् अभिधा
वत्यभिगच्छति। किं कुर्वन् इंद्रायेंद्रं मंहयन् स्वकीयरसेन पूजयन्॥ मंहयन् संहने इति पाठे॥३॥ ॥
इति द्वितीयाध्याये षष्ठः खंडः॥ ॥अथ सप्तमे खंडे यः पावमानीरिति षड्चं सूक्तं तत्र प्रथमा॥ यः पावमानी

© Dharmartha Trust J&K. Digitized by eGangotri

रध्येत्यृषिभिः संभृतं रसं। सर्व्वं स पूतमश्नाति स्वदितं मातरिश्वनेति॥ यो जनः पावमानीः पवमान
देवताकाः सर्व्वा ऋचस्तद्रूपं ऋषिभिः सूक्तद्रष्टृभिः मधुच्छंदः प्रभृतिभिः संभृतं संपादितं रसं वे
दसारभूतं पावमानं सूक्तसंघं योध्येति अधीते सजनः सर्व्वं भोज्यमात्रं पूतं परिशुद्धमेवाश्नाति।
परिपूतं पापरहितमन्नं भक्षयति। कथमस्य पूतत्वं तत्राह। स्वस्याशनात्प्रागेव मातरिश्वनामात
रिअंतरिक्षे श्वसितिरसंतं मातरिश्वा वायुः स च पवित्रमेव। पवित्रेण वायुना स्वदितं स्वादूकृतं परिपू
10 तं नैर्मल्यं पश्चात्स नरोश्नाति॥८॥ ॥अथ द्वितीया॥ पावमानीर्यो अध्येत्यृषिभिः संभृतं रसं॥
तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकमिति॥ यो ब्राह्मणः पावमानीः पवमानदेवताका ऋचः तदात्मकं
ऋषिभिर्मधुच्छंदः प्रभृतिभिर्मंत्रद्रष्टृभिः संभृतं रसं वेदसारं सूक्तसंघं अध्येति अधीते तस्मै पवमा
नाध्ययनं कुर्व्वते जनाय सरस्वती सर्व्वत्र सरणवती वाग्देवता क्षीरं यज्ञसाधनं पयः सर्पिराज्यं
घृतं मधु मद्यकारं उदकं सोमं दुहे स्वयमेव दुग्धे। तन्नरं यागादिपरं वेदशास्त्रविदं करोतीत्यर्थः। दुह प्र
पूरणे। कर्म्मकर्त्तरि नदुहस्नुनमां यक्चिणाविति यकः प्रतिषेधः लोपस्त आत्मनेपदेष्विति तलोपः
॥९॥ ॥अथ तृतीया॥ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः। ऋषिभिः संभृतो रसो ब्राह्मणे
ष्वमृतं हितमिति॥ याः पावमान्य ऋचः ताः स्वस्त्ययनीः क्षेमप्रापिकाः सुदुघाः सुष्ठुफलदोहनाः घृत
श्चुतः घृतं श्चोतंति क्षारयंतीति घृतश्चुतः। ईदृग्भूताः अस्माननुगृह्णंत्विति शेषः। ऋषिभिर्मंत्र

© Dharmartha Trust J&K. Digitized by eGangotri

ऋषिभिर्मुनिभिः रसः फलसारः संभृतोऽस्मासु संपादितः। ब्राह्मणेषु ब्राह्मणैर्मंत्रा। तस्मात् पाठका ब्राह्म
णाः तेष्वस्मासु अमृतममविनाशि बलं हितं संपादितं॥७॥ ॥अथ चतुर्थी॥ पावमानीर्दधंतु न इमं
लोकमथो अमुं। कामान् समर्धयंतु नो देवीर्देवैः समाकृता इति। देवैरिंद्रादिभिः समाकृताः संपा
दिताः पावमानी देवैः पवमानमंत्राभिमा। निम्नोऽस्माकं इममीदृग्भूतं भूलोकं अथो अपि च अ
मुं स्वर्गलोकं दधंतु प्रयच्छंतु। तत्रस्थान् कामांश्च नोऽस्मदर्थं समर्धयंतु समृद्धान् कुर्वंतु॥७॥ ॥अथ
पंचमी॥ येन देवाः पवित्रेणात्मानं पुनते सदा। तेन सहस्रधारेण पावमानीः पुनंतु न इति। देवा इंद्राद्याः
यः येन पवित्रेण शुद्धिसाधनेन सदा आत्मानं स्वदेहं पुनते शोधयंति। सहस्रधारेण सहस्रावांतरभे
दयुक्तेन तेन सधनेन पावमान्यः ऋचो नोऽस्मान् पुनंतु॥७॥ ॥अथ षष्ठी॥ पावमानीः स्वस्त्ययनीस्ता
[illegible]भिर्गच्छति नांदनं। पुण्यांश्च भक्षान् भक्षयत्यमृतत्वं च गच्छतीति। पावमानीः पवमानः पावकः पू
यमानो वा सोमः तन्मू[illegible]धन्यस्तद्देवताका ऋचः पावमान्यस्ताः स्वस्त्ययनीः स्वस्त्ययन्यः स्वस्तीः अवि
नाशानाम। तथाविधफलस्य प्रापयित्र्यः ताभिः कृतलक्षणाभिः पावमानीभिस्तत्पाठेन स्तोतानां
दनः नंदयति सुकृतिन इति नंदनः स्वर्गः स एव नांदनः। स्वार्थिकस्तद्धितप्रत्ययः। तं गच्छति प्राप्नोति॥
किं चेह लोके पुण्यान् सुकृतसंपादितान् तस्मात् भक्ष्यान् भोग्यान् अन्नपानादिलक्षणान् भक्षय
ति। किं चामृतत्वं गच्छति। अमृतत्वं नाम मोक्षस्तं च प्राप्नोति॥७॥ ॥इति द्वितीयेऽध्याये सप्तमः खंडः॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथाऽष्टमखंडे अगन्मेति त्वालकं प्रथमं सूक्तं तत्र प्रथमा ॥ अगन्म महा नमसा यविष्ठं यो दीदाय
समिद्धः स्वे दुरोणे । चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यंचमिति ॥ यो अग्निः स्वे दुरोणे आ
त्मनीयाख्ये स्वस्थाने समिद्धः काष्ठैः सम्यग्दीप्तः स[illegible]त यदीप्यते । तमिमं यविष्ठं युवतमं उर्वी विस्ती
र्णे यो रोदसी रोदस्यो द्यावापृथिव्योः अन्तर्मध्ये अन्तरिक्षे चित्रभानुं चित्रज्वालं स्वाहुतं सुष्ठु आहूतिभिर्हुतं
102 [illegible] सर्वतः प्रत्यंचं प्रतिगच्छन्तमग्निं महा महता नमसा नमस्कारेण आगन्म वयमुपगच्छामः ॥७॥
अथ द्वितीया ॥ स मह्ना विश्वा दुरितानि साह्वान् अग्निः ष्टवे दम आ जातवेदाः । स नो रक्षिषद् दुरिताद् अव
द्यादस्मान् गृणत उत नो मघोन इति ॥ यो अग्निः मह्ना महत्त्वेन विश्वा विश्वानि दुरिता दुरितानि साह्वान्
अभिभवन् जातवेदाः जातधनो जातप्रज्ञो वा दमे यज्ञगृहे स्तवे स्माभिः स्तूयते सोऽग्निः गृणतः स्तुवतः
नोऽस्मान् दुरितात् पापात् अवद्यान्निंदिताच्च कर्मणो रक्षिषद् रक्षतु उत अपि च मघोनः हविष्मतो
ऽस्मान् रक्षतु ॥७॥ ॥ अथ तृतीया ॥ त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः । त्वे वसु सुष
णनानि संतु यूयं पात स्वस्तिभिः सदा नः ॥ इति ॥ हे अग्ने त्वं वरुणोऽसि पापानां निवारको भवति । उत अ
पि च मित्रोऽसि पुण्यप्रापणे सखा भवसि । वसिष्ठाः एतन्नामका ऋषयः हे अग्ने त्वां मतिभिः स्तुतिभि
मं र्वर्धंति वर्द्धंति । त्वे च यि विद्यमानानि वसु वसूनि सुषणनानि सुसंभजनानि संतु । हे अग्ने यूयं त्वदाद्याः स
र्वे देवाः स्वस्तिभिः क्षेमैः नोऽस्मान् सदा सर्वदा पात रक्षत ॥७॥ ॥ अथ त्वालके द्वितीयसूक्ते प्रथमा ॥

© Dharmartha Trust J&K. Digitized by eGangotri

महांइंद्रोयऊर्जिसापर्जन्योवृष्टिमांइवस्तोमैर्वत्सस्यवावृधइति॥यइंद्रऊर्जसाबलेनमहान्सर्वे
भ्योधिकः।कइवावृष्टिमानिव।यथावृष्ट्यायुक्तःपर्जन्यः रसानांप्रार्जयितास्वोमहान्सइवेत्यर्थः।
सइंद्रःवत्सस्यपुत्रस्थानीयस्यस्तोतुःवत्सनाम्नएववाऋषेःस्तोमैःस्तोत्रैर्ववृधेप्रवर्द्धते॥७॥
॥अथद्वितीया॥कण्वाइंद्रंयदक्रतस्तोमैर्यज्ञस्यसाधनं।जामिब्रुवतआयुधेति॥कण्वाःस्तो
तृनामैतत्स्तोतारःकण्वगोत्रावाइंद्रंस्तोमैःस्तोत्रैःयज्ञस्ययागस्यसाधनंसाधयितारन्निष्पा
दकंयद्यदाअक्रत।अकृण्वन।करोतेर्लुङिमंत्रेघसेति।च्लेर्लुक्।तदानींआयुधाशत्रूणांहिंसका
निबाणादीनिजामिअतिरेकनामैतत्।अतिरिक्तंअधिकंप्रयोजनरहितंब्रुवतेकथयंति।आयुध
साध्यस्यसर्वस्यकार्यस्यइंद्रेणकृतत्वात्।आयुधानिनिष्प्रयोजनानीत्यर्थः।यद्वा।आयुधाआ
[illegible]धनशीलमिंद्रंजामिजामिंभ्रातरंब्रूवतेवदंति।सर्वकार्येषुभ्रातृवद्वर्त्तनइत्यर्थः।आ
युधाआयुधमि[illegible]॥[illegible]ठे॥७॥ ॥अथतृतीया॥प्रजामृतस्यपिप्रतःप्रयद्भरंतवह्नयः।विप्राऋ
तस्यवाहसेति॥ऋतस्ययज्ञस्यसत्यस्यवाप्रजांप्रकर्षेणजातमिंद्रंपिप्रतःनभसाःप्रदेशान्
पूरयंतोवह्नयोवाहकाअस्यायद्यदाप्रभरंतप्रकर्षेणभरंतिवहंतितदाविप्रामेधाविनःस्तोता
रऋतस्ययज्ञस्यवाहकाप्रापकेणस्तोत्रेणतमिंद्रंस्तुवंतीतिशेषः॥७॥ ॥इतिरष्टमेऽध्यायेऽष्ट
मःखंडः॥ ॥अथनवमेखंडेपवमानस्येतित्र्चात्मकंप्रथमंसूक्तंतत्रप्रथमा॥पवमानस्यजिघ्न

© Dharmartha Trust J&K. Digitized by eGangotri

तो हरेरश्वं द्रा अससृक्षत। जीराः अजिरशोचिष इति॥ जिघ्नतः पुनः पुनस्तमांसि विनाशयतः हरेर्हरि
तवर्णस्य अजिरशोचिषः सर्वत्रगमनशीलतेजसः पवमानस्य सोमस्य चंद्राः। वह्निः आह्लाददा देवा
नामाह्लादयित्र्यः जीराः क्षिप्रं प्रसरणशीला धाराः। असृक्षत असृजंत। पवित्रान्निर्गच्छंतीत्यर्थः॥
जीघ्नतः जघ्नत इति पाठो॥७॥ ॥अथ द्वितीया॥ पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरि
श्चंद्रो मरुद्गण इति। पवमानो देवः रथीतमः अतिशयेन रथवान्। ईद्रथिन इती कारः। तथा शुभ्रे
भिः शोभायुक्तैरश्वैस्तेजोभ्यो पि शुभ्रशस्तमः। अत्यंतं दीप्यमानश्च। यद्वा निर्म्मलतमयशोयुक्तः। ह
रिश्चंद्रः हरिश्चंद्र इत्तरपदे ऽमंत्र इति सांहितिकः सुट्। हरितवर्णदीप्तिः हरितधारायुक्तो वा मरु
द्गणः मरुतो यस्य गणः सहायभूतास्स तथोक्तः। तादृशः सोमः सवतु स्वरश्मिव्याप्नोत्वित्युत्त
रेण संबंधः॥७॥ ॥अथ तृतीया॥ पवमान व्यश्नुहि रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्य
मिति॥ हे पवमान सोम त्वं रश्मिभिः स्वदीप्तिभिर्व्यश्नुहि सर्वं जगद्व्याप्नुहि। कीदृशस्त्वं। वाजसात
मः अतिशयेनान्नस्य दाता बलस्य संभक्ता वा। तथा स्तोत्रे पवमानं स्तोत्रं कुर्वते जनाय सुवीर्यं
शोभनवीर्योपेतं पुत्रं धनं वा दधत् विदधत् प्रयच्छन् व्याप्नुहि। पवमान व्यश्नुहि पवमानो व्यश्नु
व इति पाठो॥७॥ ॥अथ तवालके द्वितीयसूक्ते प्रथमा॥ परीतो षिंचता सुतं सोमो य उत्तमं
हविः। दधन्वाँ यो नर्यो अप्स्वंतरा सुषाव सोममद्रिभिरिति॥ हे ऋत्विजः सुतमभिषुतं सोमं इ

© Dharmartha Trust J&K. Digitized by eGangotri

तःअस्मात्कर्म्मणऊर्द्ध्वंअथवाअस्मात्प्रदेशादूर्द्ध्वंपरिषिंचतवसतीवरीभिःइतोषिंचेतस्पत्र सं
हितायांछंदःसंरोहत्वं।आद्योन्मत्ययपयोरितिषत्वं।यःसोमःदेवानामुत्तमंप्रशस्यंहविर्भवति
अ आअप्स्विन्तर्येमनुष्यहितोसअसोमःअप्सुवसतीवरीषुअंतरिक्षेवांतद्धन्वान्गच्छन्भ
वतितंसोमंअद्रिभिर्ग्रावभिरध्वर्युःसुषावअभिषुतंचकार।तंपरिषिंचतेतिसमन्वयः॥७॥ ॥
अथद्वितीया॥नूनंपुनानोविभिःपरिस्रवादब्धःसुरभिंतरः।सुतेचित्वाप्सुमदामोअंधसाश्रीणं
तोगोभिरुत्तरमिति॥हेसोमअदब्धैःकेश्चिदप्यहिंसितःसुरभिंतरःअत्यंतंसुगंधितंनूनमिदा
नींपुनानःपूयमानःसन्अविभिरविवालकृतैःपवित्रैःपरिस्रवपरितःक्षर।सुतेचित्अभिषुतेस
तिअंधसामदकुलक्षणेनान्नेनगोभिर्गोविकारैःक्षीरादिभिःश्रीणंतःमिश्रयंतोवयंउत्तरमुद्गत
तरंअप्सुवसतीवरीष्वस्थितंत्वात्वांमदामःमंदामहेस्तुमः॥७॥ ॥अथअध्यास्यास्तृतीया॥
परिस्वानश्चक्षसेदेवमादनःक्रतुरिंदुर्विचक्षणइति॥स्वानःसुवानोभिषूयमाणःसोमःचक्षसेस
र्वेषांदर्शनायपरिस्रवति।कीदृशःदेवमादनःदेवानांतर्पयिता।क्रतुःकर्त्ताइंदुःपात्रेषुक्षरणशी
लःदीप्तोवाविचक्षणःसर्वस्यविद्रष्टा॥७॥ ॥अथतवास्मकेतृतीयसूक्तेप्रथमा॥असाविसोमोअ
रुषोवृषाहरीराजेवदस्मोअभिगाअचिक्रदत्।पुनानोवारमत्येष्यव्ययंश्येनोनयोनिंघृतवंतमास
ददिति॥सोमोऽसाविअभिषुतोभूत्।कीदृशःसोमःअरुषःआरोचमानःवृषावर्षकोहरिःहरितव

© Dharmartha Trust J&K. Digitized by eGangotri

104

र्भः स च राजेव दर्शनीयः सन् गाः उदकान्यभिलक्ष्य अचिक्रदत् शब्दं करोति। स्वरसनिर्मोकस
मये पवित्रे पुनानः पूयमानः अव्ययमविमयं वारवालं दशापवित्रमत्येषि हे सोम अतिक्रम्य गच्छ
सि। ततः श्येनो न श्येन इव योनिं स्वीयं स्थानं घृतवंतं एकवंतं आसदत् प्रविशति। अत्येषि पर्येती
षि पाठे॥ आसदत्। आसदमिति च॥८॥ ॥अथ द्वितीया॥ पर्जन्यः पिता महिषस्य पर्णिनो ना
[illegible]भा गिरिषु क्षयं दधे। स्वसार आपो अभि गा उतासरन्त्सं ग्रावभिर्वसते वीते अध्वरे इति॥ य
स्य महिषस्य महतः पर्णिनः पर्णवतः पतनवतो वा सोमस्य पर्जन्यः पिता जनकः स सोमः पृथिव्या
नाभा नाभौ नाभिस्थानीये हविर्धाने गिरिषु गिरिसंबंधिषु ग्रावसु क्षयं निवासं दधे धारयति। अभि
षवसमये तथा स्वसारो ऽङ्गुलयः आपो वसतीवर्यो गाः आशिरार्थाः स्तुतयो वा अभि आभिमु
ख्येन उत असरन् उद्गच्छंति॥ संवसते संगच्छते च ग्रावभिः साकं। कुत्र। वीते कांते अध्वरे यज्ञे। उतस
रन् उतासरन्निति पाठे॥ वीते वीपे इति च॥८॥ ॥अपसेधन्दुरिता सोम नो मृड घृता वसानः परिया
सि निर्णिजमिति॥ हे सोम कविः क्रांतदर्शी त्वं वेधस्या यागविधाने इच्छया महान्तं महनीयं पवि
त्रं पर्येषि परिगच्छसि। पश्चात् मृष्टः प्रक्षालितः अत्यो न अश्व इव वाजं संग्रामं अभ्यर्षसि हे सोम दु
रिता अस्मदीयानि दुरितानि अपसेधन् परिहरन् नोऽस्मान् मृड सुखय। अस्माकं घृतानि उदकानि वसान
आच्छादयन् परियासि अभिगच्छसि। किं। निर्णिजं निर्णिजं रूपं पवित्रं सोम नो मृड घृता सोम मृडय

© Dharmartha Trust J&K. Digitized by eGangotri

घनमितिपाठे॥ ७॥ इति सप्तमे ऽध्याये नवमः खंडः॥ ७॥ ॥ अथ दशमखंडे प्रगाथात्मके प्रथमसू
क्ते प्रथमा॥ श्रायंतइव सूर्यं विश्वेदिंद्रस्य भक्षत वसूनि जातो जनिमान्योजसा प्रतिभागं न दीधि
म इति॥ हे अस्मदीया जयाः श्रायंतइव सूर्यं यथा समाश्रिता रश्मयः सूर्यं भजंते। यथैवं इंद्रस्य वि
श्वेत् विश्वान्येव धनानि भक्षत भजत। स च जातं प्रादुर्भूतं इंद्रः यानि वसूनि धनानि ओजसा बलेन ज
निमानि जनिष्यमाणानि करोति। अतो भागं न पित्र्यं भागमिव तानि धनानि प्रति दीधिम प्रतिधा
रयेम। जाते जनमाने जातो जनिमानीति पाठे॥ ७॥ ॥ अथ द्वितीया॥ अलर्षिरातिं वसुदामुप
स्तुहि भद्रा इंद्रस्य रातयः। यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन्निति॥ हे स्तोतः अल
र्षिरातिं अपापकदातं अपापिष्टस्य दातारमित्यर्थः। अलर्षिपदसमानार्थमनर्शपदं यास्केन
व्याख्यातं। अनर्शरातिमनश्लीलदानमश्लीलं पापकमिति। वसुदां धनस्य दातारमिंद्रमुपस्तुहि
। यत इंद्रस्य रातयो दानानि भद्राः कल्याणानि महदैश्वर्यकारीणीत्यर्थः। य इंद्रः स्वकीयं मनः दानाय
भीष्टप्रदानाय चोदयन् प्रेरयन् विधतः परिचरतो अस्य स्तोतुः काममिच्छां न रोषति न हिनस्ति तमिं
द्रमुपस्तुहीति संबंधः। अलर्षिरातिमिति छंदोगाः पठंति। अनर्शरातिमिति बह्वृचाः। यो अस्य सो
मस्येति॥ ७॥ ॥ अथ प्रगाथात्मके द्वितीयसूक्ते प्रथमा॥ यत इंद्र भयामहे ततो नो अभयं कृधि म
घवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहीति॥ हे इंद्र यतो हिंसकान् भयामहे भयं ततो नो अस्मभ्यं

© Dharmartha Trust J&K. Digitized by eGangotri

अभयं कृधि नुं। हे मघवन् धनवन्निंद्र नोस्मानुद्दिश्य तत्तस्मै तव अन्तये त्वत्कर्तृकायै रक्षायै शग्धि शक्तो भ
वा। किंच। विद्विषः अस्मद्द्वेष्टॄन् विजहि। मृधः अस्मद्धिंसकान् विजहि। अन्तये अन्तिभिरिति पाठो॥छ॥ ॥
अथ द्वितीया॥ त्वं हि राधसस्पते राधसो महः क्षयस्यासि विधर्त्ता। तं त्वा वयं मघवन्निंद्र गिर्वणः सुता
वंतो हवामहे इति। हे राधसस्पते धनस्य स्वामिन् त्वं हि त्वं खलु। महो महतो राधसो धनस्य क्षयस्य गृ
हस्य च विधर्त्तासि हि अस्मभ्यं दातुं धारको भवति खलु। हे गिर्वणो गीर्भिर्वननीय मघवन् धनवन्निंद्र
तं तादृशं त्वा त्वां वयं सुतावंतः अभिषुतसोमाः हवामहे आह्वयामः। राधसस्पते राधस्पत इति
पाठो॥ विधर्त्ता विधीत इति च पाठो॥छ॥ ॥इति द्वामेध्याये उत्तराग्रंथे पंचमः खंडः॥छ॥ ॥अथैका
दशे खंडे त्वं सोमेति त्र्यर्चात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ त्वं सोमासि धारयुर्मंद्र ओजिष्ठो अध्वरे पवस्व
मंहयद्रयिरिति। हे सोम अभिषूयमाण पवमान मंद्रो मादयितृतमः ओजिष्ठः ओजिष्ठतमः त्वं अध्वरे हिं
सारहिते अस्मदीये यज्ञे धारयुरभिषवण धाराकामोसि भवसि। ततस्त्वं मंहयद्रयिः स्तोतृभ्यः प्री
यमाणधनः सन् पवस्व द्रोणकलशे ग्रहादिषु पवित्रेण पूतो भव। यद्वा धारयुस्तच्छन्दस्यर्थे भाष्यत इति म
त्वर्थीयो युः। हे सोम त्वं धारावानसि ततः पवस्वेति संबंधः॥छ॥ ॥अथ द्वितीया॥ त्वं सुतो मदिंतमो
दधन्वान्मत्सरिंतमः। इंदुः सत्राजिदस्तृत इति। हे सोम सुतोऽभिषुतस्त्वं मदिंतमः अतिशयेन मदयु
क्तोसि। कीदृशस्त्वं। दधन्वान् यज्ञस्य धारकः। मत्सरिंतमः। अतिशयेन मदकारी। इंदुर्दीप्तः सत्राजि

© Dharmartha Trust J&K. Digitized by eGangotri

त्वंबहूनांजेता।अस्तृतःकेनाप्यहिंसितः।मदिंतमः।मादनइतिपाठे॥इंदुःसत्राजिदस्तृतःइंद्रायसु
रिरंधसेतिच॥७॥ ॥अथतृतीया॥त्वंसुष्वाणोअद्रिभिरभ्यर्षकनिक्रदत्।द्युमंतंशुष्ममाभरे
ति॥हेपवमानसोमअद्रिभिर्ग्रावभिःसुष्वाणःसुन्वानःअभिषूयमाणस्त्वंकनिक्रदत्भृशंशब्दंकु
र्वन्अभ्यर्षकलशंपात्राणिचाभिगच्छ।किंच।द्युमंतंदीप्तियुक्तंशुष्मंशत्रूणांशोषकंबलंचाभर।आ
हरास्मभ्यंधारयवा।आभरउत्तममितिपाठे॥७॥ ॥अथतस्वात्मकेद्वितीयसूक्तेप्रथमा॥पवस्व
देववीतयइंदोधाराभिरोजसा।आकलशंमधुमान्सोमनःसदइति॥हेइंदोसोमदेववीतयेदेवा
नांभक्षणाय।ओजसाबलेनधाराभिरात्मीयाभिःएवस्वक्षर।हेसोममधुमान्मदकररसवांस्त्वं
नोस्मदीयंकलशंद्रोणाभिधानंआसदः।आसीदःसदेर्लुङिरूपं॥७॥ ॥अथद्वितीया॥तवद्रप्सा
उदप्रुतइंद्रंमदायवावृधुः।त्वांदेवासोअमृतायकंपपुरिति॥उदप्रुतःवसतीवयाश्यामुदकंप्रतिगच्छं
तः।यद्वाउदकस्यनिर्गमयितारःतवस्वभूताद्रप्साःद्रुतगामिनोरसाःमदायमहायइंद्रंवावृधुःवर्धयं
ति।ततःदेवासोदेवाइंद्रादयःकंसुखकरंत्वांअमृतायअमरणार्थंपपुःपिबंति॥७॥ ॥अथतृतीया
॥आनःसुतासइंदवःपुनानाधावतारयिं।वृष्टिद्यावोरीत्यापःस्वर्विदइति॥हेसुतासःअभिषूयमा
णाःहेइंदवःदीप्ताःपात्रेषुक्षरंतो।वारीत्यापःयैःपृथिवींप्रतिस्रवणशीलाआपःकृताः।तादृशाहेसो
माःपुनानाःपूयमानायूयंनोस्मभ्यंरयिमाधावत।आगमयत।किंभूताःवृष्टिद्यावःवृष्टिमभिद्योत्यैः

© Dharmartha Trust J&K. Digitized by eGangotri

क्रियते। वृष्ट्यभिमुखवृष्टलोकवंतः। स्वर्विदः सर्वस्य लंभकाः॥ छ॥ ॥ अथ त्वासके तृतीयसूक्ते प्रथमा
॥ परि स्य हर्य्यतं हरिं बभ्रुं पुनंति वारेण। यो देवान् विश्वां इत् परि मदेन सह गच्छतीति॥ हर्य्यतं सर्वैः स्पृ
हणीयं हरिं हरितवर्णं बभ्रुं बभ्रुवर्णं च स्यंतं सोमं वारेण वालेन पवित्रेण भूरि पुनंति परिशोधयंति।
यः सोमः विश्वानि सर्वानि इंद्रादीन् देवान् एवमादेन मादकेन रसेन सह परिगच्छति॥ छ॥ ॥ अथ द्वि
तीया॥ द्विर्यं पंचस्वयशसं सखायो अद्रिसंहतं। प्रियमिंद्रस्य काम्यं प्रस्नापयंत ऊर्म्मय इति॥ द्विः पं
च दशसंख्याकाः सखायः समानख्याना अंगुलयः स्वयशसं स्वभूतयशस्कं अद्रिसंहतं ग्रावभि
रभिषुतं इंद्रस्य प्रियं काम्यं सर्वैः काम्यमानं ऊर्म्मयः। द्वितीयैकवचने प्रथमा बहुवचनं। ऊर्म्मिं प्रभूत
रसं यं सोमं प्रस्नापयंते वसतीवरीभिः प्रकर्षेण सेवयंति। यद्वा ऊर्म्मय इत्यंगुलिविशेषणं। प्रभूता
इति। तं सोमं पुनंतीति पूर्वेण संबंधः। सखायः स्वसार इति पाठे। प्रस्नापयंत ऊर्म्मयः प्रस्नापयंत सू
र्म्मिणमिति च॥ छ॥ ॥ अथ तृतीया॥ इंद्राय सोम पातवे वृत्रघ्ने परि षिच्यसे। नरे च दक्षिणावते वी
राय सदनासद इति॥ हे सोम वृत्रघ्ने वृत्रस्य हंत्रे इंद्राय षष्ठ्यर्थे चतुर्थी॥ इंद्रस्य पातवे पानार्थं परि
षिच्यसे परितः पात्रेषु सिच्यसे वसतीवरीभिर्वा। किं च दक्षिणावते ऋत्विग्भ्यो दक्षिणादानेन तद्व
ते वीराय विक्रांताय इंद्राय हवींषि दातुं सदनसदे यज्ञगृहे सीदते नरे मनुष्याय यजमानाय तस्मै फ
लप्रदानार्थं परिषिच्यसे वीराय देवायेति पाठे॥ छ॥ ॥ अथ त्वासके चतुर्थसूक्ते प्रथमा॥ पवस्व सो

© Dharmartha Trust J&K. Digitized by eGangotri

ममहेदक्षायाश्वोननिक्तोवाजीधनायेति॥हेसोम अश्वोन अश्वइवनिक्तः वसतीवरीभिरद्भिर्वि
निर्णिक्तः वाजीवेगवांस्त्वं महे महते दक्षाय बलाय धनाय धनार्थं च प्रपवस्व क्षर॥ महेत्क्रत्वइतिपा
ठे॥छ॥ ॥अथद्वितीया॥प्रतेसोतारोरसम्मदायपुनंतिसोमंमहेद्युम्नायेति॥सोतारः अभि
षोतार ऋत्विजः हेसोम तेतवरसभूतंरसंमदायमदार्थंपुनंति। तद्रसोव्यते महेमहते द्युम्नायद्यु
म्नंद्योततेर्यशोवान्नंवेतियास्कः। अन्नाययशसेवापुनंतिसोमंशोधयंति। यद्वासोममभिषूय
माणंरसंपुनंतीति एकवाक्यतयायोजनीयं। प्रतेतेनइतिपाठे॥छ॥ ॥अथतृतीया॥शिशुंजज्ञा
नंहरिंमृजंतिपवित्रेसोमंदेवेभ्यइंदुमिति॥शिशुमपांपुत्रभूतंजज्ञानंजायमानंहरिंहरितवर्णमिं
दुंदीप्तंसोमंदेवेभ्योदेवार्थंपवित्रेमृजंति ऋत्विजोमार्जयंति॥छ॥ ॥अथतत्रवातस्मेकेपंचमसूक्ते
प्रथमा॥उपोषुजातमप्तुरंगोभिर्भंगंपरिष्कृतं।इंदुंदेवा अयासिषुरिति॥जातंसम्यक्प्रादुर्भू
तं अप्तुरंवसतीवरीभिःप्रेरितंभंगंशत्रूणांभंजकंगोभिर्गोविकारैःपयोभिःपरिष्कृतमलंकृतंसं
स्कृतमिंदुंसोमंदेवाइंद्रादयः अयासिषुः उपागच्छंति॥छ॥ ॥अथद्वितीया॥तमिद्वर्धंतुनो
गिरोवत्संसंशिश्वतीरिवायइंद्रस्यहृदंसनिरिति॥यःसोमःइंद्रस्यहृदंसनिःहृदयस्यसंभक्ताभ
वति।तमित्तमेवसोमंनोऽस्माकंगिरःस्तुतिरूपावाचःसंवर्द्धंतुसम्यग्वर्द्धयंतु।तत्रदृष्टांतः।वत्संबा
लंशिश्वतीरिव।यथाशिश्वर्योवृद्धवयस्कामातरोवत्संसम्यक्वर्द्धयंतितद्वदित्यर्थः॥छ॥ ॥अथ

© Dharmartha Trust J&K. Digitized by eGangotri

तृतीया॥ अर्षन्नः सोम शं गवे धुक्षस्व पिप्युषीमिषं। वर्धा समुद्रमुक्थ्यमिति॥ हे सोम त्वं नोस्माकं गवे
शं सुखं अर्षस्व। अपि च पिप्युषीं प्रवृद्धामिषमन्नं धुक्षस्व प्रपूरय। किं च हे उक्थ्य प्रशस्य समु
द्रमुदकं वर्धं वर्धय॥ अर्षन्नः अर्षाण इति पाठो॥ ७॥ ॥ उक्थ्य उक्थ्यमिति च॥ ७॥ ॥ इति ग्रामेऽध्या
यउत्तरार्ध्ये एकादशः खंडः॥ ॥ अथ द्वादशखंडे आधाये अग्निमिति त्र्यात्मकं प्रथमं सूक्तं तत्र प्र
थमा॥ आधाये अग्निमिंधते स्तृणंति बर्हिरानुषक्। येषामिंद्रो युवा सखेति॥ ये ऋषयः आधा
आभिमुख्येन खलु अग्निमिंधने दीपयंति। येषां च युवा नित्यतरुणः इंद्रः सखा भवति। त आ
नुषगानुपूर्व्येण बर्हिः स्तृणंति॥ ७॥ ॥ अथ द्वितीया॥ ॥ बृहन्निदिध्म एषां भूरि शस्त्रं पृथुः स्व
रुः। येषामिंद्रो युवा सखेति॥ एषामृषीणां इध्मो बृहन्नित् महान् खलु भूरि बहु च शस्त्रं स्तोत्रं स्व
रुश्च पृथुर्महान्। सिद्धमन्यत्॥ ७॥ ॥ अथ तृतीया॥ अयुद्ध इद्युधा वृतं शूर आजति सत्वभिः
। येषामिंद्रो युवा सखेति॥ युवेंद्रः येषां सखा तेषां तर्भूतः कश्चिदयुद्धः रत्नभागयोद्धैव सन् युधा
वृतं योधृभिः परिवृतं शत्रुं सत्वभिरात्मीयैर्बलैः शूरः सन् आजति नमयति॥ ७॥ ॥ अथ य
एक इति त्र्यात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ य एक इद्विदयते वसु मर्ताय दाशुषे। ईशानो अप्र
तिष्कुत इंद्रो अंगेति॥ य इंद्रः एक इत् एक एव दाशुषे हविर्दत्तवते मर्ताय मनुष्याय यजमानाय व
सु धनं विदयते विशेषेण ददाति। अंगेति क्षिप्रनाम। अप्रतिष्कुतः परैरप्रतिशब्दितः। प्रतिकूलश

© Dharmartha Trust J&K. Digitized by eGangotri

दुरहितइत्यर्थः।एवंभूतःसइंद्रःक्षिप्रंईशानःसर्वस्यजगतःस्वामीभवति॥७॥ ॥अथद्वितीया॥यश्चि
द्धित्वाबहुभ्यआसुतावांआविवासति।उग्रंतत्पत्यतेशवइंद्रोअंगेति।बहुभ्योमनुष्येभ्यःसकाशा
द्यश्चिद्धियएवखलुयजमानःसुतावान्अभिषुतसोमयुक्तःसनहेइंद्रत्वात्वांआविवासतिप
रिचरति।विवासतिःपरिचरणकर्मातत्तस्मैयजमानायउग्रमुद्गूर्णंशवोबलंइंद्रःअंगक्षिप्रंप्रस
तेपतयतिप्रापयति॥८॥ ॥अथतृतीया॥कदामर्त्तमराधसंपदाक्षुंपमिवस्फुरत्।कदानःशु
श्रवद्गिरइंद्रोअंगेति।अराधसंहविर्लक्षणेनराधसाधनेनरहितंअयष्टारमित्यर्थः।एवंवि
धंमर्त्तमनुष्यंइंद्रःपदापादेनक्षुंपमिवअहिछत्रकमिवकदास्फुरत्स्फुरिष्यतिवधिष्यतिप
याअहिछत्रंमंडलाकारेणशयानंकश्चित्पादायासेनहंति।एवमिंद्रोपिकदास्मछत्रून्हनिष्यती
त्यर्थः॥स्फुरतिर्वधकर्मा।स्फुरतिस्फुलतीतिवधकर्मसुपठितत्वात्।नोस्माकंयष्टॄणांगिरः
स्तुतिलक्षणावाचःइंद्रःकदाकस्मिन्कालेअंगक्षिप्रंसुश्रवत्।श्रोष्यतीतिवितर्कयति।अत्रनिरु
क्तं।क्षुंपमहिछत्रकंभवतियत्क्षुभ्यतेकदामर्त्तमनाराधयंतंपादेनक्षुंपमिववास्फुरिष्यतिकदा
नःश्रोष्यतिगिरइंद्रोअंगेतिक्षिप्रनामेति॥९॥ ॥अथगायंतीतितृचात्मकंतृतीयंसूक्तंतत्रप्रथ
मा॥गायंतित्वागायत्रिणोर्चंत्यर्कमर्किणः।ब्रह्माणस्त्वाशतक्रतउद्वंशमिवयेमिरइति।हेशत
क्रतोबहुकर्मन्बहुप्रज्ञवेंद्रत्वात्वांगायत्रिणःउद्गातारोगायंतिस्तुवंतिअर्किणोर्चनहेतुमंत्र

© Dharmartha Trust J&K. Digitized by eGangotri

युक्ता॥ होतारः अर्कमर्चनीयमिंद्रं अर्चंति शाश्वगनैर्मंत्रैः प्रशंसंति। ब्रह्मणो ब्रह्माणमन्तयः इतरे ब्रा
ह्मणाः त्वां मुद्येमिरे उन्नतिं प्रापयंति। तत्र दृष्टांतः। वंशमिव यथा वंशाग्रे नृत्यंतः शिल्पिनः स्रौढं
वंशं उन्नतं कुर्वंति। यथा वा सन्मार्गवर्तिनः स्वकीयं कुलमुन्नतं कुर्वंति तद्वत्। एताः अत्र वं यास्क
एवं व्याचष्टे॥ गायंति त्वा गायत्रिणः प्रार्चंति तेऽर्कमर्किणो ब्राह्मणास्त्वा शतक्रत उद्येमिरे वंशमिव
वंशो वनशयो भवति वननाच्छ्रूयत इति वेति। अर्कशब्दं च बहुधा व्याचष्टा अर्को देवो भवति यदेन
मर्चंत्यर्को मंत्रो भवति यदनेनार्चंत्यर्कमन्नं भवत्यर्चति भूतान्यर्को वृक्षो भवति संवृत्तः कटुकिम्नी
ति॥१॥ ॥अथ द्वितीया॥ यत्सानोः सानुमारुहद्भूर्य्यस्पष्ट कर्त्वं। तदिंद्रो अर्थं चेतति यूथेन वृष्णि
रेजति॥ इति॥ यद्यदा सानोः सानु यजमानः सानोः सानु सोमवल्ल्याः समिदाद्याहरणाय एकस्मात्प
र्वतप्रदेशात्परं पर्वतप्रदेशं आरुहत् आरूढवान्। तथा भूरि प्रभूतं कर्त्वं कर्म सोमयागरूपं अस
ष्ट स्पृष्टवान् उपक्रांतवानित्यर्थः। तत्तदानीमिंद्रः अर्थं यजमानस्य प्रयोजनं चेतति जानाति। क्षा
त्वा च वृष्णिः कामानां वर्षिता सन् यूथेन मरुद्गणेन सह एजति कंपते। स्वस्थानाद्यज्ञभूमिमागंतु
मुद्युंक्ते इत्यर्थः। सानोः सान्वारुहः सानोः सानुमारुहदिति पाठौ॥२॥ ॥अथ तृतीया॥ युंक्ष्वा हि
केशिना हरी वृषणा कक्ष्यप्रा। अथा न इंद्र सोमपा गिरामुपश्रुतिं चर इति॥ हे सोमपाः सोमपानयु
क्तं इंद्र हरी त्वदीयावश्वौ युंक्ष्व हि। सर्वथा संयोजय। अथानंतरं नोस्मदीयानां गिरां स्तुतीनां उपश्रु

© Dharmartha Trust J&K. Digitized by eGangotri

तिं समीपेऽश्ववणमुद्दिश्य चर । तस्मैरेरोगच्छ । कीदृशौ हरी । केशिना स्कंधप्रदेशे लंबमानकेशयुक्तौ ।
वृषणा सेचनसमर्थौ युवानौ । कक्ष्यप्रा कक्ष्यस्योदरबंधनरज्जुः वक्ष्यः तस्य पूरकौ । पुष्टांगावि
त्यर्थः । युंक्ष्व पुंक्ष्वेति पाठो । युंक्ष्व सति शिष्टत्वेन प्रत्ययस्वरः शिष्यते । ह्यचोतस्तिङ इति संहि
तायां दीर्घत्वं । केशिना प्रशस्ताः केशाः अनयोः संतीति मत्वर्थीय इनिः प्रत्ययः स्वरः सुपांसु
लुगिति सात्त्विनाद्विवचनस्याकारादेशः । वृषणा पृषु वृषु मृषु सेचने । कनिन्युवृषितक्षिराजिध
न्विद्युप्रतिदिव इति कनिन् । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं । पूर्वस्य निगम इति उपधायाः
ह्रस्वदीर्घभावः । पूर्ववदाकारः । कक्ष्यप्रा । कक्ष्यायां भवं कक्ष्यं सूत्रं तस्यानः पूरयतः पुष्टत्वादिति
कक्ष्यप्रौ । प्रा पूरणे । आतोनुपसर्गे क इति कप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तत्वं । आ
कारः पूर्ववत् । अथ निपातस्य चेति संहितायां दीर्घः । अनुदात्तं सर्वमपादादाविति अनुवर्तमानो एव
क्वचनस्य वस्नसाविति नसादेशोनुदात्तः । इंद्र सोमपा इत्यस्य आमंत्रितस्य चेति सर्वानुदात्तो
गिरां सावेकाचः तृतीयादिर्विभक्तिरिति । विभक्तिरुदात्त उपशब्दो निपातत्वादाद्युदात्तः श्रुतिश
ष्टेन प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते तादौ च निति कृत्यताविति नुवर्जितत्वादिप्र
त्वात् गतेः प्रकृतिस्वरः स्वरनिधातः ॥ ७ ॥ ॥ इति सप्तमेऽध्याये द्वादशः खंडः ॥ ७ ॥ ॥ वेदार्थस्य प्र
काशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ७ ॥ ॥ इति श्रीमद्राजाधि

© Dharmartha Trust J&K. Digitized by eGangotri

109

राजः परमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचि
ते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे दशमोऽध्यायः ॥ छ ॥ ॥ अथैकादशोऽध्याय आरभ्यते
॥ तत्र प्रथमे खंडे सुषमिद्ध इति चतुर्ऋचं प्रथमसूक्तं तत्र प्रथमा ॥ सुषमिद्धो न आवह देवां अग्ने ह
विष्मते । होतः पावक यक्षि च ॥ इति ॥ हे अग्ने सुषमिद्धनामकस्त्वं नोऽस्मदीयाय हविष्मते यजमाना
यतदनुग्रहार्थं देवाना वह । हे पावक शोधक होतर्होमनिष्पादकाग्ने यक्षि च यज च सुषमिद्धः स
मः क्रियाविशेषणत्वेन गतिसंज्ञकत्वात् प्रादिसमासः । शोभनत्वं चिनः सुशब्दस्य तु विशेषणं वि
शेष्येणेति बहुलमिति समिद्धपदेन कर्मधारयः समासः ॥ सुशब्दः प्रातिपदिकस्वरेणांतोदात्तः क
र्मधारये निष्ठेति पूर्वपदप्रकृतिस्वरत्वं । क्रियाविशेषणत्वे हि सुशब्दस्य गतित्वात् प्रादिसमासे ग
तिरनंतर इति समो यदुत्तरत्वं न द्भवकदुत्तरपदप्रकृतिस्वरत्वेन स्थास्यतीति सुशब्दोऽनुदात्तः स्या
त् । देवां अग्ने दीर्घादटि समानपाद इति नकारस्य रुत्वं । अत्रानुनासिकः पूर्वस्य तु वा । आतोऽटि नित्य
मित्यनुनासिकः ॥ हविष्मते हविष्मास्तीति मतुप् भूतसोमत्वर्थ इति मतेन पदत्वस्य बाधितत्वान्न
रुत्वं । होतः पावक एते च छंदस्यो रामंत्रितायाः पृथक्पृथगेवक्रियान्वये परस्परसामर्थ्यात् परां
गवत्त्वाभावान्न तं निबंधनमेकस्वर्यं न च द्वितीयस्यामंत्रितस्याष्टमिकनिघातेनैकस्वर्यं । आमंत्रि
तं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानत्वेन पदात् परत्वात् पादादित्वाच्च परस्परसामानाधि

© Dharmartha Trust J&K. Digitized by eGangotri

करणे पि होतरित्यस्य विशेषणत्वे समानमेवाविद्यमानवत्त्वं । अत एवाविद्यमानवत्त्वात् सामर्थ्ये
पि न परांगवद्भाव इति नैकस्वर्य्यसिद्धिः ॥ अतो होतरिति विशेष्यं । अतः पुनातीति पावकः इत्यवय
वप्रसिद्धः स्वीकारेण विशेषणत्वाद्धोतरिति विशेष्यं । तच्च सामान्यवचनमिति नामंत्रिते समाना
धिकरण इत्यविद्यमानत्वप्रतिषेधात् परासत्त्वात् पादादित्वाच्च द्वितीयामंत्रितस्याष्टमिकनि
घातेन वा परांगवद्भावे सति शेषनिघातेन वा सर्वानुदात्तत्वसिद्धिः । यक्षि यजेर्लोटि । सिपि बहुलं
छंदसीति शपो लुक् । व्रश्चादिना षत्वं षढोः कः सीति कत्वं । सेर्हिरादेशः ॥ छांदसत्वान्न भवति । सिपः
पित्वेनानुदात्तत्वाद्धातुस्वर एव शिष्यते । न च तिङ्ङतिङ इति निघातः । पूर्वस्य पावकेत्यामंत्रितस्यावि
द्यमानवत्त्वेन पदात्परत्वात् । अत एव तस्याप्यवधायकत्वेन होतरित्यपेक्ष्य निघातः स्यादिति चेत्
। न यक्षिपदापेक्षया होतरित्यस्यापि पूर्वत्वेनाविद्यमानवत्त्वात् । ननु नामंत्रिते समानाधिकरण इ
ति तस्य निषिद्धमविद्यमानवत्त्वं न च पावकपदस्याविद्यमानवत्त्वेन समानाधिकरणपरत्वभावः ।
यक्षिपदस्यैव हि कार्यप्रतिपावकपदं पूर्वत्वादविद्यमानवत्स्यात् । होतः परकार्यमविद्यमानवत्त्व
प्रतिषेधप्रति तु परत्वाद्विद्यमानवदेवेति भवत्येव होतरित्यस्याविद्यमानवत्त्वप्रतिषेधः । अतस्तस्या
विद्यमानवत्त्वात्तदपेक्षया यक्षीत्यस्य निघातः प्राप्नोत्येव । सत्यं । अत्र यक्षीत्यस्य चशब्दपरत्वाच्चादिषु
चेति निघातप्रतिषेधो भविष्यतीत्यदोषः ॥ छ ॥ ॥ अथ द्वितीया ॥ मधुमंतं तनूनपाद्यज्ञं देवेषु नः क

© Dharmartha Trust J&K. Digitized by eGangotri

110

वो॥ अद्या कृणुहूतय इति॥ हे कवे मेधाविन्नग्ने तनूनपादेतन्नामकस्त्वं अद्यास्मिन् दिने नोऽस्मदीयं
मधुमंतं रसवंतं यज्ञं यजनीयं हविर्देवेषु कृणुहि कुरु। अपा पये त्सर्यः। किमर्थं मतये अस्मद्रक्षणा
यज्ञतये वीतय इति पाठो॥ छ॥ ॥अथ तृतीया॥ नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये। मधुजिह्वं
हविष्कृतमिति॥ इह देवयजने ऽस्मिन्वर्त्तमाने यज्ञे नराशंसमेतन्नामकमग्निं उपह्वये आह्व
यामि। कीदृशं प्रियं देवानां प्रीतिहेतुं मधुजिह्वं मधुरभाषिजिह्वोपेतं माधुर्यरसास्वादकजिह्वोपे
तं वा। हविष्कृतं हविषो निष्पादकं॥ छ॥ ॥अथ चतुर्थी॥ अग्ने सुखतमे रथे देवाँ ईळित आ वह। असि
होता मनुर्हित इति॥ इडाख्याभिधेय हे अग्ने ईडितोऽस्माभिस्स्तुतः सन् सुखतमे अतिशयेनेन
सुखहेतौ कस्मिंश्चिद्रथे देवानुपस्थापयित्वा कर्मभूमावावह इडाशब्दाभिधेयत्वमत्र सूचयितुमीडि
त इति विशेषणं। मनुर्हितः मनुना मंत्रेण मनुष्येण वा यजमानादिरूपेण हितोऽत्र स्थापितस्त्वं हो
ता देवानामाह्वातासि॥ छ॥ ॥अथ पद्येतितवे। सकं प्रथमं सूक्तं तत्र प्रथमा॥ छ॥ ॥यदद्य सूर
उदितेनागा मित्रो अर्यमा। सुवाति सविता भग इति॥ छ॥ ॥यद्वन्नमस्माकमपेक्षितं तदद्यास्मिन्
काले सूर उदिते सति प्रातःसमये अनागाः पापरहितान्मित्रो अर्य्यमा सविता भगश्चैते प्रत्येकं सुवा
ति प्रेरयेत्। अथवा अनागाः मित्रो अर्य्यमा दाता भवतु इदं तदपेक्षितं धनं। भगो भजनीयः सविता सु
वाति प्रेरयतु॥ छ॥ ॥अथ द्वितीया॥ सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः। ये नो अंहोऽतिपि

© Dharmartha Trust J&K. Digitized by eGangotri

प्रतीति।सक्षयःसनिवासःसुप्रावीरस्तुस्तुसुष्टुप्रकर्षेणरक्षितास्तु।प्रप्राशब्दश्चाप्यर्थः।प्रकर्षेण
तु क्षितिं भवत्विति शेषः। कदेति उच्यते। हे सुदानवः सुदानाः युष्माकं यामन् यामनि गमने सति।।
कदा त्वानां गमने। ये पूयमागत्य नो ऽस्माकं अंहः पापं अतिपिप्रति अतिपारयथ तेषां गमन इति।।
।।छ।। ।।अथ तृतीया।। उत स्वराजो अदितिरदब्धस्य व्रतस्य ये। महो राजान ईशत इति।। उतापि
च ये मित्रादयः स्वराजः सर्वस्य स्वामिनः अदितिस्तेषां च माता संति। ते अदब्धस्याहिंसित
स्यारक्षकस्य महो महतो व्रतस्यास्य कर्म्मणः राजानः स्वामिनः ते ईशते समर्था भवंति। अभिमतं दा
तुमिति शेषः। अथैवं वा योज्यं। ये मित्रादयो ऽदितिश्च अदब्धस्य व्रतस्य स्वराज ईश्वरास्ते महो म
हतो ऽस्मदभिमतधनस्य राजानः स्वामिनः संतः ईशते अस्मभ्यं दातुं।।छ।। ।।उत्वेति त्वा स
कं प्रथमं सूक्तं तत्र प्रथमा।। उत्वा मंदंतु सोमाः कृणुष्व राधो अद्रिवः।। अव ब्रह्मद्विषो जहीति।।
हे इंद्र त्वां सोमाः उत उत्कृष्टं मंदंतु मादयंतु। हे अद्रिवः वज्रयन् इंद्र त्वं राधो ऽन्नं कृणुष्व अस्मभ्यं
कुरु। किंच। ब्रह्मद्विषो ब्रह्मणो द्वेष्टॄन् अवजहि। सोमाः स्तोमा इति पाठे।।छ।। ।।अथ द्वितीया।। प
दा पणीन् राधसो नि बाधस्व महां असि। नहि त्वा कश्चन प्रतीति।। पणीन् लुब्धान् अराधसो यष्ट
व्यधनरहितान् केवलधनान् पदा दानेनातिक्रम्य नितरां बाधस्व। हे इंद्र त्वं महान् असि। त्वत्वया प्रतिप्र
ति निधिः सदृशः कश्चन कश्चिदपि देवो ऽसुरो मनुष्यो वा नहि नास्ति खलु। पणीन् राधसः पणीन् अराध

© Dharmartha Trust J&K. Digitized by eGangotri

सइतिपाठे॥छ॥ ॥अथतृतीया॥त्वमीशिषेसुतानामिंद्रत्वमसुतानां।त्वंराजाजनानामिति॥
हेइंद्रत्वंसुतानामभिषुतानांसोमानामीशिषेईश्वरोभवति।तथात्वंअसुतानांबल्याकारेणवर्त्त
मानानांवेशिषे।किंच।त्वंसर्वेषांजनानांराजाभवसि॥छ॥ ॥इत्येकादशोऽध्यायेप्रथमःखंडः॥॥
अथद्वितीयखंडे।आजागृविरितित्र्यात्मकंप्रथमंसूक्तंतत्रप्रथमा॥छ॥ ॥आजागृविर्विप्रऋ
तंमतीनांसोमःपुनानोअसदच्चमूषु।सपंतियंमिथुनासोनिकामाअध्वर्यवोरथिरासःसुह
स्ताइति॥जागृविर्जागरणशीलःऋतंऋतानांसत्यभूतानांसतानांस्तुतीनांविप्रोऽज्ञातासस्सो
मःपुमानःपूयमानस्सन्चमूषुचमसेष्वासदत्आसीदति।मिथुनासःपरस्परंसंगताःनि
कामानितरांकामयमानाःरथिरासःयज्ञनेतारःसुहस्ताःकल्याणपाणयःअध्वर्यवःपवित्रेण
यंसोमंसपंतिस्पृशंति।षपसमवायो।सपतिःस्पृशतिकर्मेतिनैरुक्ताःऋतंऋतेतिपाठे॥छ॥ ॥
अथद्वितीया॥सपुनानउपसूरेदधानउभेअप्राारोदसीवीषआवः।प्रियश्चिद्यस्यप्रियसास
ऊतीसतोधनंकारिणेनप्रयंसदिति॥पुनानःपूयमानःदधानःयज्ञादिकर्मधारकःससोमःसू
रेप्रेरकेइंद्रेउपगच्छति।किंच।उभेरोदसीद्यावापृथिव्योआप्राःस्वमहिम्नाआपूरयति।तथासोमः
अवेःस्वतेजसातमांसिविवृणोति।वृणोतेर्मंत्रेघसेतिच्लेर्लुक्।छंदस्यपिदृश्यतइत्यडागमः॥
पूर्वपदादितिसइत्यस्यसांहितिकंषत्वं।प्रियाषष्ठ्याआकारः।प्रियस्ययस्यसतोविद्यमानस्यसोम

© Dharmartha Trust,J&K. Digitized by eGangotri

स्यपदा प्रियाप्रियाणि प्रयछतः सोमस्य प्रियसासः अत्यंतं प्रियतमा धाराः जतीजस्यैरक्षणा
यभवंति। ससोमः क्षिप्रमस्मभ्यं धनं प्रयंसत् प्रयछतु। पछतेर्लेटि सिप्यडागमः। तत्र दृष्टांतः
॥कारिणेनयथाकारिणे भृतकाय भृतिं प्रयछति तद्वत्। उपसृरेद्धानः उभे उपसृरेद्धातोमेइ
तिपाठे॥ सनोधनं सनृधनमितिच॥ ७॥ ॥अथतृतीया॥ सवर्द्धितावर्द्धनः पूयमानः सोमोमी
ढ्वां अभिज्योतिषावीत्। यत्रनः पूर्वेपितरः पदज्ञाः स्वर्विदो अभिगा अद्रिमिष्णन्निति॥ वर्द्धिता
देवानां स्वकलाप्रदानेन वर्द्धयिता वर्द्धनः स्वयं वर्द्धनः पूयमानः पवित्रेण पूयमानः मीढ्वान् कामानां॥
सेक्ता ससोमः नो अस्मान् ज्योतिषा स्वतेजसा अभ्यावीत् अभिरक्षतु। यत्र यस्मिन् सोमे प्र
सन्ने सति पदज्ञाः पणिभिरपहृतानां गवां पदानि जानंतः स्वर्विदः सर्वज्ञाः सूर्यं जानंतो वा नो
स्माकं पूर्वे चिरंतनाः पितरोंगिरसः गाः पश्यन् लुब्धं अद्रिं शिलोच्चयमभिलक्ष्य गंतुं इष्णन् ऐछ
न्। यत्रनः येनान इति पाठे। इष्णन् सुष्णन्निति च॥ ७॥ ॥अथमाचिदन्यदिति चप्रगाथात्मकेद्वि
तीयसूक्ते प्रथमा॥ माचिदन्यद्विशंसत सखायो मा रिषण्यत। इंद्रमित् स्तोता वृषणं सचा सु
ते मुहुरुक्था च शंसतेति। हे सखायः समानख्याना स्तोतारः इंद्रस्तोत्रादन्यस्तोत्रं माचिद्विशंसं
तमेवोच्चारयत। मारिषण्यत मा हिंसिता भवत। अन्यदीय स्तोत्रोच्चारणेन वृथोपक्षीणा मा भव
त। सुते अभिषुते सोमे वृषणं कामानां वर्षितारमिंद्रमित्। इंद्रमेव हे प्रस्तोत्रादयः सचा सहसं

© Dharmartha Trust J&K. Digitized by eGangotri

धीभूयस्तोतस्तुत।हेप्रशास्तारः यः उक्थावउक्था निशस्त्राणि त्वंद्रविषया। णि सूयंमुहुः पुनःपु
नःशंसेत।।छ।। ।।अथद्वितीया।।अवक्रक्षिणंवृषभंयथाजुवंगांनचर्षणीसहं।विद्वेषणंसं
वननमुभयंकरंमंहिष्टमुभयाविनमिति।।वृषभंयथावृषभमिवअवक्रक्षिणंअवकर्षण
शीलंशत्रूणांहिंसितारंजुवंशीघ्रकारिणं।गान्नगामिववृषमिव।चर्षणीसहंमनुष्याणांशत्रु
भूतानामभिरवितारंविद्वेषणंद्वेष्टारंशत्रूणांसंवननंसम्यक्संभजनीयंस्तोतृभिःउभयं
करन्निग्रहानुग्रहयोरुभयोःकर्त्तारंमंहिष्ठंदातृतमंउभयाविनंदिव्यपार्थिवलक्षणेनउभय
विधधनेनोपेतं।यस्थावरजंगमरूपेणद्विप्रकारेणरक्षितास्यनोपेतं।अथवाउभयविधैः
स्तोतृभिर्यष्टृभिश्चोपेतं।एवंविधमिंद्रमिस्तोत्वेतिपूर्वेणान्वयः।जुवंअजुरमितिपाठे।।सं
वननंसंवननेतिवा।।छ।। ।।अथउदुत्यइतिप्रगाथात्मकंतृतीयंसूक्तंतत्रप्रथमा।।उदुत्येमधु
मत्तमागिरःस्तोमासईरते।सत्राजितोधनसाअक्षितोतयोवाजयंतोरथाइवेति।।व्येतेप्रसि
द्धाःमधुमत्तमाःअतिशयेनमधुराःगिरस्तुतिरूपावचःस्तोमासस्त्रिवृदादिस्तोमाश्चउदी
रतेहेइंद्रत्वामुद्दिश्योद्गच्छंतिप्रसरंति।ईरगतौ।आदादिकः।तत्रदृष्टांतः।सत्राजितःसहै
वशत्रून्जयंतः।अतएवधनधनसाधनानिसंभजंतःवनषणसंभक्तौ।जनसनखनक्रमगमो
विट्।विड्वनोरनुनासिकस्यादित्यात्वं।अक्षितोतयःअक्षिताःअक्षरहिताःमतयोरक्षा

© Dharmartha Trust J&K. Digitized by eGangotri

येषां ते तथोक्ताः। स्त्रियो भावे (तिष्ठ) निष्ठायामन्यतरस्यामिति पूर्वपदस्य दीर्घाभावः। अत एव स्त्रियो दीर्घा
दिति निर्दिष्टानित्वाभावश्च। वाजयंतः वाजमन्नमिच्छंतः। किंचिन ढंरस्य पुत्रस्येति ईत्वदीर्घयोः प्रतिषे
धः। एवं गुणविशिष्टा रथा इव। ते यथा विविधमिस्ततः उत्तिष्ठंति तद्वदुदीरत इत्यर्थः॥ ६॥ ॥ अथ द्वि
तीया॥ कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमानशुः। इंद्रं स्तोमेभिर्महयंत आयवः प्रियमेधासो
अस्वरन्निति॥ कण्वा इव कण्वगोत्रोत्पन्ना ऋषय इव स्तुवंतो भृगवो भृगुगोत्रोत्पन्ना ऋषयः धीत
माध्यातं विश्वमित्सर्वमपि तं तमेवेंद्रं आनशत आनशिरे। सूर्या इव यथा सूर्यरश्मयः सर्वं जगद्व्याप्नु
वंति तद्वत्। अपि च प्रियमेधासः प्रिययज्ञाः एतत्संज्ञका वा आयवो मनुष्याः तमेवेंद्रं महयंतः पूज
यंतः स्तोमेभिः स्तोत्रैरस्वरन् अस्तुवन्। स्वृ शब्दोपतापय[illegible]योः भौवादिकः। आनशत आनशुरिति
पाठो॥ ७॥ ॥ अथ पर्यू षु इति त्र्यृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ पर्यू षु प्र धन्व वाजसातये परि वृ
त्राणि सक्षणिः। द्विषस्तरध्या ऋणया न ईयस इति॥ हे सोम सुसु षु वाजसातये अस्मभ्यमन्नदाना
यैव परि प्र धन्व परितः प्रगच्छ। यद्वा वाजसातये अन्नस्य लाभाय संग्रामं प्रगच्छ। किंच सक्षणिः सह
नशीलस्त्वं वृत्राणि शत्रून् परिगच्छ। तदेवोच्यते। नोऽस्माकं ऋणयाः ऋणानां यापयिता विनाशयिता
त्वं द्विषः शत्रून् तरध्यै तरीतुं हंतुं ईयसे परि गच्छसि। ईयसे ईयसे इति पाठो॥ ८॥ ॥ अथ द्वितीया॥ अ
जीजनो हि पवमान सूर्यं विधारे शक्मना पयः। गोजीरया रंहमाणः पुरंध्येति॥ हे पवमान सोम त्वं पयः

© Dharmartha Trust J&K. Digitized by eGangotri

पयस उरुकस्य विधारे विधारकेंतरिक्षे शाकमना सामर्थ्येन बलेन सूर्यं अजीजनो हि उत्पादितवान् भवसि

खलु कीदृशः गोजीरया स्तोतृभ्यो गवां प्रेरकेण स्तोत्रेण प्रेरितप्रसुकेनेत्यर्थः। तादृशेन पुरंध्या बहुविध

प्रज्ञानेन युक्तः रंहमाणः वेगं कुर्वाणस्त्वं सूर्यमजीजनः॥छ॥ ॥अथ अनु हि त्वा सुतं सोम मदामसीति

तृतीयाया ऋचः प्रतीकमिदं सा चान्यत्र व्याख्याता॥छ॥ अथ द्वितीया॥ रिप्रधन्वेति तृचात्मकं पंचमं सूक्तं

तत्र प्रथमाया ऋचः परि प्रधन्वेति प्रतीकमिदं। सा चान्यत्र व्याख्याता॥छ॥ ॥अथ द्वितीया॥ एवामृता

य महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूष इति॥ हे सोम शुक्रो दीप्तः दिव्यो दिवि भवः पीयूषः देवैः पातव्यः

स त्वं अमृताय अमरणाय महे महते क्षयाय निवासाय च एवा एव अर्ष एवं पवस्व क्षर॥छ॥ ॥अथ तृतीया॥

इंद्र स्तोम सुतस्य पेयात् क्रत्वे दक्षाय विश्वे च देवा इति॥ हे सोम सुतस्य अभिषुतस्य ते तव स्वभूतं रसमिति

शेषः। इंद्रः पेयात् पिबतु। पातेराशीर्लिङि रूपं। किमर्थं॥ क्रत्वे क्रतवे प्रज्ञानाय दक्षाय बलाय च॥ किंच अ

मी विश्वे सर्वे देवाश्च त्वदीयं रसं पिबंतु। पेयात् पेया इति पाठे॥छ॥ इत्येकादशेऽध्याये द्वितीयः खंडः॥छ॥

अथ तृतीयः खंडः सूर्यस्येवेति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ सूर्यस्येव रश्मयो द्रावयित्नवो मत्स

रासः प्रसुतः साकमीरते। तंतुं ततं परि सर्गास आशवो नेंद्रादृते पवते धाम किंचनेति॥ सूर्यस्य सर्वस्य

प्रेरकस्य सुवीर्यस्यादित्यस्य रश्मय इव सर्वतो व्यापकाः किरणा इव द्रावयित्नवः सर्वत्र द्रवणशीलाः

उ मत्सरासो मदकराः प्रसुतः प्रकर्षेण सुता अभिषुताः एकवचनं छांदसं। आशवो ग्रहेषु चमसेषु व्याप्ताः

113

© Dharmartha Trust J&K. Digitized by eGangotri

सर्गासिः मृज्यमानाः सोमाः ततं विस्तृतं तंतुं तंतुभिः कृतं वस्त्रं दशापवित्रं साकं सह युगपत्परी
रते परितो गच्छंति। ते सोमाः इंद्रादेतें इंद्रं वर्जयित्वा अन्यत्र किंचन धाम देवशरीरं लक्षीकृत्य न पव
तेन गच्छंति। एकवचनं छांदसं। किंतु इंद्रस्यैव धाम प्रति गच्छंति। इंद्रस्य धाम्नो यष्टव्यत्वं च अया लिं
द्रस्य प्रिया धामानीति मंत्रवर्णादवगम्यते॥ ७॥ अथ द्वितीया॥ ॥उपो मतिः पृच्यते सिच्यते म
धु मंद्राजनी चोदते अंतरासनि। पवमानः संतनिः सुन्वतामिव मधुमान्द्रप्सः परिवारमर्षति॥ति
॥अस्मिन्पवमानरूपे स्तोत्रे इंद्र सनिः स्तुतिरूपा नतिरूपो पृच्यते उपपृच्यते स्तोतृभिः संयोज्यते॥
पृथ्वीसंपर्के। तथा मधुमत्करः सोमः इंद्रार्थं सिच्यते मदि र्यव सक्तुभिश्च सिक्तो भवति। ततः मंद्राज
नी अजगतिक्षेपणयो रित्यस्य ल्युटि ङीपि रूपं। मत्करस्य रसस्य प्रेरयित्री सोमधारा। तस्यां द्रप्स
आसनि अस्यं तर्मध्ये चोदयते यष्टृभिः प्रेर्यते आस्यशब्दस्य पद्दन्नोमास्यिनसुदित्या आसन्नि
सादेशाः। किंच। संतनिः ग्रहादिषु सम्यग्विस्तृतः। सुन्वतां अभिषुतवतां यजमानानां संबंधी पव
मानः पूयमानः सोमः द्रप्सः द्रुतमनशीलः सन् वारं अविवालमयं पवित्रं परिपरितो ऽर्षति आगच्छ
ति। इवेति पूरणः। सुन्वतामिव प्रघ्नतामिवेति पाठे॥ ७॥ ॥अथ तृतीया॥ उक्षा मिमेति प्रति यंति
धेनवो देवस्य देवीरुप यंति निष्कृतं। अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत॥ति॥
उक्षा रेतसः सेक्ता वृषभः पुरतो मिमेति शब्दायते। माङ् माने शब्दे च। तं वृषभं धेनवो गावः प्रति यंति

© Dharmartha Trust J&K. Digitized by eGangotri

मनुगच्छंति। तथा। स्वस्य घोतमानस्य निष्कृतं संस्कृतं स्थानं देवीर्दिव्याः स्तुतय उपयंति। उपयंति उपग
च्छंति। अनेनार्द्धेन सोमः पुनीते इत्यभिधीयते। सोमो हि द्रोणकलशाभिगमनकाले शब्दं करोतीति। तम
नु धेनवः प्रीणयित्र्यः स्तुतयः परियंति। स्वस्य स्थानं स्तुतयोऽभिगच्छंति। तथा सोमं सोमः अ
॥ र्जुनं श्वेतवर्णं अव्ययं अविमयं अविस्वभूतं वारं वालं पवित्रं अत्यक्रमीत्। अतिक्रामति। अतिक्र
म्य पात्राणि गच्छतीत्यर्थः। किंच। सोमः अत्कं न आत्मीयं कवचमिव। निक्तं शुद्धं अवनद्ध्यं पर्य
यत परितः संवृणोति। मिमेति मिमातीति पाठौ॥ ॥६॥ ॥अग्निं नर इति त्र्यात्मकं द्वितीयं सूक्तं त
त्र प्रथमा॥ अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तं। दूरेदृशं गृहपतिमथर्युमिति॥
114 हे नरो नेतार ऋत्विजो यूयं प्रशस्तं प्रकर्षेण स्तुतं दूरेदृशं दूरे दृश्यमानं दूरेप्रकाशं तं वा गृहपतिं गृहाणां
पालकं अथर्युं अगमं अतनवंतं वा अग्निं अरण्योः सकाशाद्धस्तच्युतं हस्तगतं दीधितिभिः अंगुलि
भिर्जनयत उत्पादय। हस्तच्युतं जनयत। हस्तच्युती जनयंतेति पाठौ॥ अथर्युमथर्युमिति च॥१॥ ॥
अथ द्वितीया॥ तमग्निमस्ते वसवो न्यृण्वन्सुप्रतिचक्षमवसे कुतश्चित्। दक्षाय्यो यो दम आस नित्य
इति॥ योग्निर्दमे गृहे दक्षाय्यः पूजनीयो हविर्भिः समर्धनीयो वा नित्यो जस्रः आस बभूव। तं सुप्रतीच
क्षं सुप्रतिदर्शनमग्निं कुतश्चित् सर्वस्माद्दपि भयहेतोः अवसे रक्षणाय वसवो वासकाः वसिष्ठाः स्तो
तारः अस्ते गृहे न्यृण्वन्नधुः॥२॥ ॥अथ तृतीया॥ प्रेद्धो अग्ने दीदिहि पुरो नो जस्रया सूर्म्या यवि

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टा त्वां शश्वंत उपयंति वाजाः ॥ इति ॥ हे यविष्ठ युवतमाग्ने श्रेष्ठः प्रकर्षेण समिद्धस्त्वं अनस्तया स्तरणशी
लया सूर्म्या स्थालया नो ऽस्मदर्थं पुरस्तादाहवनीयायतने दीदिहि दीप्यस्व । त्वां शश्वंतो बहवो वाजाः
अन्नानि हवींषि उपयंति उपगच्छंति ॥ ७ ॥ ॥ आयं गौरिति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा ॥ आयं
गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वरिति ॥ गौर्गमनशीलः पृश्निः प्राष्टवर्णो व्याप्ततेजाः
अयं सूर्यः आक्रमीत् आक्रांतवान् उदयाचलं प्राप्तवानित्यर्थः ॥ आक्रम्य पुरः पुरस्तात् पूर्वस्यां दिशि
मातरं सर्वस्य भूतजातस्य निर्मात्रीं भूमिं असदत् आसीददिति प्राप्नोति । सदेश्छंदसो लुङ् । लिदित्वात्
च्लेरङादेशः । ततः पितरं पालकं द्युलोकं च शब्दादंतरिक्षं च प्रयन् प्रकर्षेण शीघ्रं गच्छन् स्वः सु अरणः शो
भनगमनो भवति । यद्वा पितरं स्वर्द्युलोकं प्रयन्वर्त्तते ॥ १ ॥ ॥ अथ द्वितीया ॥ अंतश्चरति रोचनास्य प्रा
णादपानती ॥ व्यख्यन्महिषो दिवमिति ॥ अस्य सूर्यस्य रोचना रोचमाना दीप्तिरंतः शरीरमध्ये मुख्यप्रा
णात्मना चरति वर्त्तते । किं कुर्वती । प्राणादपानती । मुख्यप्राणस्य प्राणाद्याः पंचवृत्तयः तत्र प्राणनं नाडी
भिरूर्द्ध्वं वायोर्निर्गमनं । तथा ध्यान् प्राणान् प्राणनादनंतरं अपानती । अपाननं नाडीभिरवाङ्मुखं
वायोर्नयनं तत्कुर्वती अप पूर्वादनितेः लटः शतृ अदादित्वात् छपो लुक् उगितश्चेति ङीप् । प्राणान्मुखम
इति नद्या उदात्तत्वं । यद्वा अंतर्द्यावापृथिव्योर्मध्ये अस्य सूर्यस्य रोचना रोचमाना दीप्तिश्चरति गच्छति । म
वधिष्णो ॥ अनुदात्तेतश्च हलादेरिति युच् । किं कुर्वती प्राणात् प्राणनादुदयानंतरं अपानती सायंसमये

© Dharmartha Trust J&K. Digitized by eGangotri

स्वंगछतादित्यादौस्यायुक्तेः॥अतएवमहिषोमहान्सूर्यःदिवमंतरिक्षंउदयास्तसमययोर्म्मध्येव्य
ख्यन्विचष्टेप्रकाशयति।महेरविमहोद्दिषजितिअण्।दिकृष्टिषवृप्रत्ययश्च।चक्षिङःख्याञ्छांद
सेलुक्॥अस्यतिवक्तिख्यात्यादिना।च्लेरङादेशः॥छ॥ ॥अथतृतीया॥त्रिंशद्धामविराजतिवाक्पतंगा
यधीयते।प्रतिवस्तोरहर्द्युभिरिति॥त्रिंशद्धामानि।स्थानानिवचनव्यत्ययः।वस्तोर्व्वासरस्याहोरात्रस्या
वयवभूतानि।अहर्शब्दोवधारणे।द्युभिःसूर्यस्यदीप्तिभिरेवविराजतिविराजंतेविशेषेणदीप्यंते।व्य
त्ययेनैकवचनं।मुहूर्त्तान्यत्रधामान्युच्यंते।पंचदशरात्रेःपंचदशान्हःपतंगायपततिगछतीतिपतंगः
सूर्यःतस्मैसूर्यायस्तुतिरूपावाक्प्रतिधीयते।प्रतिमुखंवस्तोर्द्युभिर्व्विधीयतेक्रियते।यद्वावस्तोरहनित्रिं
115 शद्धामानिघटिकाभिप्रायमेतत्।किंत्रिंशद्धटिकाः॥अत्यंतसंयोगेद्वितीया।एतावंतंकालंद्युभिर्दी
प्तिभिः॥असौसूर्योविराजतिविशेषेणदीप्यते।तस्मिंश्चसमयेवाक्त्रयीरूपायपतंगायप्रतिधीय
तेप्रतिमुखंधीयते।तंसूर्यंसेवतइत्सर्पः।श्रूयतेहि।ऋग्भिःपूर्वान्हेदिविदेवईयतेयजुर्वेदेतिष्ठतिमध्ये
अन्हइत्यादि।इत्येकादशोऽध्यायेतृतीयःखंडः॥छ॥ ॥वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्।पुम
र्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ॥छ॥इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवी
रबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्तराग्रंथेए
कादशोऽध्यायःसंपूर्णः॥छ॥ ॥यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगत्।निर्म्ममेतमहंवंदेविद्या

© Dharmartha Trust J&K. Digitized by eGangotri

द्वादशोऽध्याय आरभ्यते। तत्र प्रथमे खंडे उपप्रयंत इति चतुर्ऋचं प्रथ

तीर्थमिहेश्वरं॥ ७॥ ॥अथैमं सूक्तं तत्र प्रथमा॥ उपप्रयंतो अध्वरं मंत्रं वोचेमाग्नये। आरे अस्मे च शृ
ण्वते इति॥ अध्वरं हिंसाप्रत्यवायरहितं अग्निष्टोमादियज्ञं उपप्रयंतः उपेत्य प्रकर्षेण यंतो ग
च्छंतः प्राप्त्याविच्छेदेन सम्यगनुतिष्ठंत इत्यर्थः। तादृशा वयं अस्मये अंगनादिगुणयुक्तायदे
वाय मंत्रं मननसाधनं। एतत्सूक्तरूपं स्तोत्रं वोचेम वक्तारो भूयास्मेत्याशास्महे। कीदृशाया॥
ग्नये आरे अस्मे च शृण्वते। चशब्दोप्यर्थे आरे शब्दादस्य परो द्रष्टव्यः। आरे दूरेपि स्थित्वास्माकं
स्तुतीः शृण्वते अस्मासु प्रीत्यतिशयेन सर्वत्र वर्त्तमानोग्निः अस्मदीयमेव स्तोत्रं शृणोतीति
भावः। वोचेम। ब्रूवो वचिः। लिङ्याशिष्यङ्। वच उम् इत्युमागमः। शृण्वते शतुरनुम इति विभक्ते
रुदात्तत्वं॥ ७॥ ॥अथ द्वितीया॥ यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु। अरक्षद्दाशुषे ग
यमिति॥ पूर्व्यश्चिरंतनो योग्निः स्नीहितीषु वधकारिणीषु कृष्टिषु शत्रुभूतासु प्रजासु संजग्मा
नासु तीषु दाशुषे हवींषि दत्तवते यजमानाय गयं धनं अरक्षत् रक्षति। तस्मै मंत्रं वोचेमेति पूर्वेण सं
बंधः। स्नीहितासु स्निह स्नेह हनने उणादिः। स्नेहयतीति वधकर्मसु पठितं। स्नेहयंते हिंसंते प्रजा आ
भिरिति स्नेहितयः। करणे क्तिन्। नित्वान्नेयग्रहादीनामितिवक्तव्यमिति वचनान्निग्रहीतिर्निपत्ति
तिरितिवदिडागमः। व्यत्ययेन एकारस्य ईकारः। क्तिनो दीर्घश्च नित्वादाद्युदात्तत्वं। संजग्मानासु।
समो गम्यृच्छिभ्यामात्मनेपदं। लिटः कानच्। गमहनेत्यादिनोपधालोपः। अरक्षत्। छंदसि लुङ् लि

© Dharmartha Trust J&K. Digitized by eGangotri

116

इतिवर्त्तमानेलट्॥७॥ ॥अथतृतीया॥ सनोवेदोअमात्यमग्नीरक्षतुशंतमः।उतास्मान्पा
त्वंहसइति॥ सोग्निर्नोस्माकंवेवेदोधनंअमात्यंअंतिकेभवंसहभूतंवारक्षतु।शत्रोःसकाशा
त्पालयतु।कीदृशः।संतमःसुखतमः।उताप्यिवअस्मान्वसिष्ठान्अंहसःपापात्पातुरक्षतु।
शंतमोविश्वतइतिपाठे॥७॥ ॥अथचतुर्थी॥ उतब्रुवंतुजंतवउदग्निर्वृत्रहाजनि।धनंजयोरणे
रणइति॥ अग्निरुदजनिअरण्योःसकाशादुत्पन्नः।उतानंतरंजंतवोजाताःसर्वेऋत्विजोब्रुवं
तु।तमग्निंस्तुवंतु।कीदृशोअग्निर्वृत्रहावृत्राणामावरकाणांशत्रूणांहंता।रणेरणेसर्वेषुसं
ग्रामेषुधनंजयःशत्रुधनानांजेता।संज्ञायांभृतृवृजीतिखच्।अरुर्द्विषदजंतस्येतिमुम्।चित्स्वरे
णांतोदात्तत्वं।रणेरणे।रणः।शब्दार्थः।रणंतिदुंदुभयोस्मिन्निति रणःसंग्रामः।वशिरण्योरुपसं
ख्यानमित्यप्।नित्यवीप्सयोरितिद्विर्वचनं।आम्रेडितानुदात्तत्वं॥७॥ ॥अथाग्नेयुंक्ष्वाहीति
त्र्यात्मकंद्वितीयंसूक्तं।तत्रप्रथमा॥ अग्नेयुंक्ष्वाहियेतववाश्वासोदेवसाधवः।अरंवहंत्याशवइति
॥हेदेवद्योतमानाग्नेतानश्वान्युंक्ष्व।आलीयेरथेयोजय।येतवत्वदीयाःसाधवःसाधकाःसु
शीलावाअश्वासोश्वाः।आशवःशीघ्रगामिनःसंतःअरमलंपर्याप्तंत्वदीयंरथंवहंति।हिरवस्तु
तुतानश्वान्रथेयुंक्ष्वेत्यर्थः।युंक्ष्वायुंक्ष्वेतिपाठे॥ आशावोमन्यवइतिव॥७॥ ॥अथद्वितीया॥
अच्छानोयाह्यावहाभिप्रयांसिवीतये।आदेवान्सोमपीतयइति।हेअग्नेनोस्मान्अच्छाभिमुख्येन

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

याहि। आगच्छ। तथा प्रयांसि हविर्लक्षणान्यन्नान्यभिलक्ष्य देवानावह। किमर्थं। वीतये एतेषां हविर्
लक्षणार्थं। तथा सोमपीतये सोमपानार्थं च तान् देवानावह॥७॥ अथ तृतीया॥ ॥ उदग्ने भारत द्यु
मदजस्रेण दविद्युतत्। शोचा विभाह्यजरेति। हे भारत हविषां भर्त्तरग्ने उच्छोच उद्गततरं दीप्यस्व।
तदेव विवृणोति। हे अजर जरारहिताग्ने दविद्युतत् द्युमत्। द्योतमानस्त्वं द्युमत् द्युमता दीप्तिमता।
सुपां सुलुगिति तृतीयालुक्। अजस्रेणाविच्छेदेन तेजसा विभाहि विशेषेण प्रकाशयस्व। यद्वा
भातिरंतर्णीतण्यर्थः त्वं प्रथममुद्दीप्यस्व। पश्चादात्मीयेन तेजसा सर्वं जगत्प्रकाशयेति योजनीयं॥७॥
॥ अथ प्रसुन्वानायेति त्र्यात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ प्रसुन्वानायांधसो मर्त्तो न वष्ट तद्वचः। अ
पश्वानमराधसं हता मखं न भृगवः इति। सुन्वानाय प्रसुन्वानाय स्याभिषूयमाणस्यांधसोऽन्नी
यस्य सोमस्य तत्संसिद्धं वचो वचनं घोषं मर्त्तो मारकः कर्मविघ्नकारी श्वा न वष्ट कांतौ वितिधातुः। न का
मयतां न शृणोत्विति यावत्तथा हे स्तोतारोऽराधसं संसाधककर्म्मरहितं श्वानं अपहत। तत्र दृष्टां
तः। मखं न। यथा पुरा अपराद्धं मखं एतन्नामानं भृगवोऽपहतवंतः तथा अपहतेत्यर्थः। सुन्वाना
य सुन्वानस्येति पाठो। वष्टवतेति च॥७॥ ॥ अथ द्वितीया॥ आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः
। सरज्जारो न योषणां वरो न योनिमासदमिति॥ जामिर्बंधुभूतो देवानां सोमोऽत्के आच्छादके पवित्रे
आव्यत आवृणोति संबद्धो भवति। तत्र दृष्टांतः। भुजे न यथा तु ओण्योः रक्षकयोर्मातापित्रोर्भुजे पुत्र

© Dharmartha Trust J&K. Digitized by eGangotri

आवृणोतीति तद्वत्। ततः सोऽयं सोमो योनिं स्वस्थानभूतं कलशमासदमासत्तुं सरत्सरति। तत्र दृष्टां
तद्वत्यं जारो न। यथा जारो योषणामसतीं स्त्रियं प्रत्यनुसरति। यथा वा वरः कन्यां प्रत्यनुगच्छतीति तद्वत्
॥ ७॥ ॥अथ तृतीया॥ स वीरो दक्षसाधनो वि यस्तस्तंभ रोदसी। हरिः पवित्रे अव्यत वेधा न योनिमास
दमिति॥ दक्षसाधनो बलसाधनः स सोमः वीरः समर्थो भवति। यः सोमः रोदसी द्यावापृथिव्यौ वि रत
स्तंभ स्वतेजसा व्यस्तंभ्नात्। आच्छादयदित्यर्थः। किंच। हरिर्हरितवर्णः सोमः वेधा मन। यथा विधाता
यजमानः स्वगृहमासीदति। तद्वत् योनिं स्वस्थानं कलशं आसदमासत्तुं पवित्रे अव्यत। आवृणो
तीति संबंधो भवति॥ ७॥ ॥इति द्वितीयेऽध्याये प्रथमं खंडः॥ ॥अथ द्वितीयखंडे अभ्रातृव्य इति प्रगा
थात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अभ्रातृव्यो अना त्वमनापिरिंद्र जनुषा सनादसि। युधेदापित्वमि
च्छसे इति। हे इंद्र त्वं जनुषा जन्मनैव अभ्रातृव्यः। ध्वंसपत्न इति। अपत्नस्य यः सपत्नरहित इत्यर्थः॥
अना अनेता कः। ऋतं च रसाति कपः प्रतिषेधः। अनियंतृक इत्यर्थः अना। पितृबंधुवर्जितश्च॥ स
नादसि चिरादेवाभ्रातृव्यो विवर्जितोऽसि। यत्त्वया अपित्वं बांधवमिच्छसे इच्छसि॥ तत्र युधेत्युद्धेनैव
युद्धं कुर्वन्नेव स्तोतॄणां सखा भवसीति॥ ७॥ ॥अथ द्वितीया॥ ॥नकी रेवंतं सख्याय विंदसे पीयंति
ते सुराश्वः। यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे इति॥ हे इंद्र रेवंतं केवलधनवंतं यागादिरहित
मयष्टारमात्मनः स्मानवं सख्याय सखिभावाय न किर्विंदसे न लभसे नाश्रयसीत्यर्थः। अयष्टारो

© Dharmartha Trust J&K. Digitized by eGangotri

जनाः किं संतीत्यत आह। सुराश्वः। दुर्दुर्भिगतिवद्धाः सुरयारूढाः तदुन्मत्ता नास्तिकाः ते त्वां पी
यंति। पीयतिर्हिंसाकर्मा हिंसंति तन्नाश्रयसीत्यर्थः। यदा त्वं नरं तुं। नरमभ्यक्तेशावेयं स्तोतारं
कृणोषि मघवीयोयमिति यदा भावयसि तदानीं समूहसि धनादिकं तस्मै वहसि।। आदित्तं नरमेव
नेमरूद्धं धनेन स्तोत्राणि पिनितेव पालयिता जनक इव हूयसे स्तुतिभिराहूयसे। यस इत्यर्थः।।७।।
।।अर्वा सहस्रमिति नवर्चा समकं द्वितीयं सूक्तं तत्र प्रथमा।। आ त्वा सहस्रमा शतं युक्ता रथे हिरण्य
ये। ब्रह्मयुजो हरय इंद्र केशिनो वहंतु सोमपीतय इति।। हे इंद्र त्वां सहस्रं सहस्रसंख्याका हरयस्त्व
दीया अश्वाः आवहंतु आनयंत्वस्मद्यज्ञं। तथा शतं शतसंख्याकास्त्वदीया अश्वाः त्वामावहंतु
। यद्यपि द्वावेवास्य हरी तथापि तद्विभूतयोन्येपि बहवोश्वाः संति। ननु युगपदनेकैरश्वैः कथं यातुं श
क्यत इत्यत आह। युक्ता इति। हिरण्यये हिरण्मये स्वर्णविकारे हिरण्यशब्दाद्विकारार्थे विहितस्य मय वि
टः ऋत्व्यवास्त्व्येत्यादिना मलोपो निपात्यते। तादृशे रथे युक्ताः संबद्धाः बहूनामश्वानां शीघ्रगमनाय रथे
नियुक्तत्वादेकपदा एव सर्वैरश्वैर्गंतुं शक्यत इति भावः। कीदृशा हरयः ब्रह्मणा परिवृढेनेंद्रेण युक्ताः
यद्वा ब्रह्मणा मदीयेन स्तोत्रेण अस्माभिर्दत्तेन हविषा वा युक्ताः केशिनः केशाः सटास्तैर्युक्ताः कि
मर्थं इंद्रस्य वहनं तत्राह। सोमपीतये सोमस्य पानाय। यथास्मदीयं सोमं पिबेत्। तथा वहंत्वित्यर्थः
।।७।। ।।अथ द्वितीया।। आ त्वा रथे हिरण्यये हरी मयूरशेप्या।। शितिपृष्ठा वहतां मध्वो अंधसो वि

© Dharmartha Trust J&K. Digitized by eGangotri

वक्षणस्य पीतय इति ॥ पूर्वं हर्य्यौ विभूतिरूपा अश्वाः इंद्रमावहंत्विति प्रार्थितामधुनावायेवेंद्र
मावहतामिति प्रार्थ्यते ॥ हिरण्यये हिरण्मये रथे युक्तौ मयूरशेप्या मयूरशेपौ मयूरवत्सदृशशे
पौ ययोस्तौ ॥ सुपां सुलुगिति विभक्तेराकारादेशः ॥ शितिपृष्ठा श्वेतपृष्ठौ ॥ एवंभूतौ हरी अश्वौ हे
रं इंद्र त्वां मावहतां ॥ किमर्थं मध्वो मधुररसस्य विवक्षणस्य व ॥ — क्तुमिष्टस्य स्तुसस्य ॥ पद्व
वोढव्यस्य ध्यानस्य अंधसोन्नस्य सोमरूपस्य पीतायपानार्थं ॥ २५ ॥ ॥ अथ षड्विंशी ॥ पिबा
त्वस्य गिर्वणः सुतस्य पूर्वपा इव परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यत इति ॥ हे
गिर्वणः गीर्भिः स्तवनीय स्तुतिभिः संभजनीयेंद्र सुतस्याभिषुतस्यास्य सोमस्य कृपया ग्रहणं क
र्त्तव्यमिति ॥ कर्म्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ इममभिषुतं सोमं तु क्षिप्रं पिब ॥ तत्र दृष्टांतः ॥ पूर्व
पा इव ॥ पूर्वः सर्वेभ्यो देवेभ्यः प्रथमभावी सन् पिबतीति पूर्वपा वायुः ॥ स येंद्रवायवे सुरेभ्यो महे स
र्वेभ्यो देवेभ्यः पूर्वं पिबति ॥ यस्य देवरधिषे पूर्वपेयमिति निगमांतरं ॥ तादृशो वायुरिव त्वमपि सर्वेभ्यो
देवेभ्यः पूर्वं पिबेत्यर्थः ॥ कीदृशस्य सोमस्य ॥ परिष्कृतस्य अभिषवादिभिः संस्कृतस्य ॥ संपर्युपेभ्य
इति करोतेर्भूषणे सुट् ॥ परिनिविभ्य इति सुटः षत्वं ॥ रसिनो रसवतः ॥ अपि च ॥ इयमासुतिः अयमास
वो मदकरश्चारुः शोभनः सोमरसः मदाय हर्षाय हर्षजननाय पत्यते संपद्यते ॥ पतिर्गतौ ॥ यद्वा प
तिरैश्वर्यकर्म्मा ॥ मदाय मदस्य पत्यते ईष्टे ॥ मदसादनेनाक्त इत्यर्थः ॥ २६ ॥ ॥ अथ आसोतेति प्र

© Dharmartha Trust J&K. Digitized by eGangotri

119

माथात्मकंतृतीयसूक्तंतत्रप्रथमा॥आसोतापरिषिंचताश्वंनस्तोमम्अप्तुरंरजस्तुरं।वनप्रक्ष
मुदप्रुतमिति।हेऋत्विजआसोतसोमम्अभिषुणुत।षुञ्अभिषवे।लोटिश्नःस्थानेविकरणस्यलु
क्।तप्तनप्तनथनाश्चेतितस्यतथादेशः।किंचपरिषिंचतपरितस्तंवसतीवर्यादिभिःसिंचत।की
दृशं।अश्वंनअश्वमिववेगिनं।स्तोमंस्तोतव्यं।अप्तुरम्अंतरिक्षस्थितानामुदकानांप्रेरकं।रजस्तु
रंतेजसांप्रेरकं।वनप्रक्षंउदकयष्ठंनक्षरणशीलं।उदप्रुतंउदकेगच्छंतंप्लवमानंसोमम्अभिषुणुतअ
भिषिंचतवा।वनप्रक्षंवनक्रक्षमितिपाठे॥छ॥ ॥अथद्वितीया॥सहस्रधारंवृषभंपयोदुहंप्रियंदे
वायजन्मने।ऋतेनयऋतजातोविवावृधेराजादेवऋतंबृहदिति॥सहस्रधारंबहुधारोपेतंवृषभं
कामानांवर्षकंपयोदुहंक्षीरवत्सारभूतंरसंसिंचंतंप्रियंप्रीणयितारंसोमंदेवायदेवसंबंधिनेज
न्मनेदेवेभ्यस्तर्पयंअभिषुणुत।ऋतजातउदकाज्जातोयोराजासोमःऋतेनवसतीवर्याख्येनो
दकेनविवावृधेविशेषेणवर्द्धते।कीदृशः।देवोद्योतमानःस्तोतव्योवा।ऋतंसत्यभूतःबृहत्महा
न्तमास्तुनुतेतिपूर्वेणसमन्वयः।पयोदुहंपयोवृधमितिपाठे॥छ॥ ॥इतिद्वादशोऽध्यायेद्वितीयः
खंडः॥ ॥अथतृतीयखंडेअग्निर्वृत्राणीतित्र्यात्मकंप्रथमंसूक्तंतत्रप्रथमा॥अग्निर्वृत्राणि
जंघनद्द्रविणस्युर्विपन्यया।समिद्धःशुक्रआहुतइति॥विपन्ययास्तुत्यास्तूयमानाद्द्रविणस्य
द्रविणंधनंस्तोतॄणामिच्छन्।यद्वाहविर्लक्षणंधनमात्मनइच्छन्नग्निर्वृत्राण्यावरकाणिरक्षांसिप्र

© Dharmartha Trust J&K. Digitized by eGangotri

तीनितमांस्रिवाजंघनत्स्त्रिशंहंतु।कीदृशोग्निःसमिद्धःसम्यक्दीप्तःअतएवसुक्रासुल्कव
र्णःआहुतःहविर्भिरभिहुतः॥७॥ ॥अथद्वितीया॥गर्भेमातुःपितुःपिताविद्युतानोअक्ष
रेसीदन्नृतस्ययोनिमिति।अत्रमातृपितृशब्दाभ्यांभूद्यावाभिधीयते।द्यौःपितापृथिवीमा
४ मा तेतिश्रुतेः।मातुर्भूम्याःगर्भेगर्भस्थानेमध्येअक्षरेक्षरणरहितोवेद्याख्येस्थानेविद्युतानःविशे
षेणदीप्यमानःपितुःपिताद्युलोकस्यपालयिताहविषांप्रदानेन।एवंभूतोग्निःऋतस्ययज्ञस्य
योनिमुत्तरवेद्याख्यंधिष्ण्यंसदनमध्यर्ध्वेद्वितीया।आसीदन्उत्तरेयामुपविशन्अग्निर्वृत्राणि
जंघनदित्यन्वयः॥७॥ ॥अथतृतीया॥ब्रह्मप्रजावद्राभरजातवेदोविचर्षणे।अग्नेयद्दीदयद्दि
वीति।हेजातवेदःजातानांवेदितःविचर्षणेविशेषेणद्रष्टःअग्नेप्रजावत्पुत्रपौत्रसहितंब्रह्मान्नं
आभराहर।यद्ब्रह्मदिविद्युलोकेदीदयद्दीप्यतेदेवेषुयत्स्रग्रास्तमन्नंराजतेनदाहरेत्यर्थः॥७॥
अथास्यप्रेष्येतित्र्यचात्मकंद्वितीयंसूक्तंतत्रप्रथमा॥ ॥अस्यप्रेषाहेमनापूयमानोदेवोदेवेभिः
समपृक्तरसं।सुतःपवित्रंपर्येतिरेभन्मितेवसद्मपशुमंतिहोतेति।अस्यसोमस्यप्रेषाप्रेष
तिर्गत्यर्थःक्विपिरूपंसावेकाचइतिविभक्तेरुदात्तत्वंप्रेषाप्रेरकेणहेमनाहिरण्येनपूयमानः।हि
रण्यपाणिरभिषुणोतीतिहिरण्यसंबंधः।तादृशःदेवोदीप्यमानःसोमःरसमात्मीयंदेवेभि
र्देवैःसहसमपृक्तसंपर्ययतिसंयोजयति।पृचीसंपर्के।ततःसुतोभिषुतःसोमःरेभवशब्दायमा

© Dharmartha Trust J&K. Digitized by eGangotri

नः सन् पवित्रं अव्याः स्नुकेन निर्मितं पर्य्येति परिगच्छति। कथमिव होता देवानामाह्वाता नारुलिकमिते
व निर्मितान् पशुमन्ति बद्धपशून् सद्मसद्मानि यज्ञगृहान् यथा पर्य्येति तद्वत्॥छ॥ ॥अथ द्विती
या॥ भद्रा वस्त्रा समन्या वसानो महान् कविर्निवचनानि शंसन्। आ वच्यस्व चम्वोः पूयमानो विच
क्षणो जागृविर्देववीताविति॥ भद्रा भद्राणि कल्याणानि समन्या समनमिति संग्रामनाम तत्र साधुरि
ति समन्यः संग्रामयोग्यानि वस्त्रा वस्त्राणि आच्छादकानि तेजांसि वसानः आच्छादयन् महान् कविः क्रां
तदर्शी अत एव निवचनानि निन्दरां वक्तव्यानि स्तोत्राणि शंसन् विचक्षणः विशेषेण सर्वस्य द्रष्टा।
जागृविर्जागरणशीलः हे सोम एवंभूतस्त्वं देववीतौ देवानां वीतिर्भक्षणं यस्मिन् स देववीतिर्यज्ञस्त
स्मिन् चम्वोरधिषवणफलकयोरा वच्यस्व पात्राण्याविश। वचिर्गत्यर्थः व्यत्ययेन श्यन्॥छ॥ ॥अथ
तृतीया॥ समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे। अभि स्वर धन्वा पूयमा
नो यूयं पात स्वस्तिभिः सदा न इति॥ यशसां यशस्विनां मध्ये यशस्तरः अतिशयेन यशस्वी क्षैतः
क्षितौ भवः प्रियः प्रीणयिता सोमः सानौ समुच्छ्रिते अव्ये अविमये पवित्रे अस्मे अस्मदर्थं सम्मृज्य
ते ऋत्विग्भिः परिपूयते उ अवधारणे। पूयमानस्त्वं धन्व अन्तरिक्षे अभिस्वर अभितः शब्दय यूयं। यू
यं पूजायां बहुवचनं हे सोम त्वं नोऽस्मान् स्वस्तिभिः कल्याणतमैः पालनैः सदा सर्वदा पात रक्षत।
पालनेत्यर्थः॥छ॥ ॥अथैतो न्विन्द्रमिति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ एतो न्विन्द्रं स्तवाम

120

© Dharmartha Trust J&K. Digitized by eGangotri

शुद्धंशुद्धेनसाम्ना।शुद्धैरुक्थैःर्ववृध्वांसंशुद्धैराशीर्वान्ममत्त्विति।।अत्रेतिहासमाचक्षते।।पुराकिलें
द्रोवृत्रादिकान्असुरान्हत्वाब्रह्महत्यादिदोषेणात्मानःमपरिशुद्धमिवमन्यत।अतस्तद्दोषप
रिहारायइंद्रऋषीनब्रवीत्।अपूतंमांयुष्मदीयेनसाम्नाशुद्धंकुरुतेति।ततस्तेचशुद्धाशुद्धीयेनसा
म्नाशस्त्रेणचपरिशुद्धमकार्षुः।पश्चात्पूतायेंद्राययागादिकर्मणिसोमादीनिहवींषिप्रादुरिति।ए
षोर्थः।शाट्यायनकब्राह्मणेनप्रतिपादितः।इंद्रोवासुरान्हत्वापूतइवाऽमेध्योमन्यतसोऽकामयत
शुद्धमेवसामन्मंशुद्धेनसाम्नास्तुयुरितिसऋषीनब्रवीत्स्तुतमेतितनएवऋषयःसामापश्यंस्ते
नास्तुवंस्तेनेनोनिरिंदद्दिति।ततोवाइंद्रःपूतःशुद्धोमेध्योभवदिति।अथवास्यायमर्थःऋषयःप
रस्परंब्रुवंति।तुक्षिप्रंएतोआगच्छतैव।आगत्यचशुद्धेनशुद्धाशुद्धीयेनसाम्नातथाशुद्धैःशुद्धिहे
तुभिरुक्थैःशस्त्रैश्चइंद्रंशुद्धमपापिनंकृत्वास्तवामस्तुयाम।ततस्सामशस्त्रैश्चवावृध्वांसंप्राप्त
हिरण्येनवर्द्धमानंतमिममिंद्रंशुद्धैःशुद्धाशुद्धीयैर्गव्यादिभिराशीर्वान्आश्रयणवान्।छंदसीरइति
मतुपोवत्वं।तादृशःसोमःममत्तुतमिंद्रंमादयतु।माद्यतेश्छांदसःश्लुः।शुद्धैराशीर्वानशुद्धआशीर्वा
निति पाठो।।६।। ।।अथद्वितीया।।इंद्रशुद्धोनआगहिशुद्धःशुद्धाभिरूतिभिः।शुद्धोरयिंनिधारय
६८ शुद्धोममद्धिसोम्येति।।हेइंद्रशुद्धःअस्मदीयैःसामभिःशस्त्रैश्चपरिशुद्धस्त्वंनोस्मानागह्यागच्छ।
शुद्धाभिरूतिभिःरक्षणैःतयोमरुतःअवंतिसर्वत्रगच्छतीतिवानोपिसामभिःशस्त्रैश्चपरिपूताःतैर्मरु

© Dharmartha Trust J&K. Digitized by eGangotri

121

भिःसहशुद्धःपापरहितस्त्वंआगहिआगत्यचशुद्धस्त्वंरयिंधनंअस्मासुनिधारयनितरांस्थापयकिं
चाहेसोम्यसोमाहेशुद्धस्त्वंममद्धिसोमेनमाद्यमत्तोहर्षोलोटिबहुलंछंदसीतिशपःश्लुःममद्धि
सोम्यममद्धिसोम्यःइतिपाठो॥छ॥ ॥अथतृतीया॥इंद्रशुद्धोहिनोरयिंशुद्धोरत्नानिदाशुषेशुद्धो
वृत्राणिजिघ्नसेशुद्धोवाजंसिषाससीति॥हेइंद्रशुद्धःहिएवधारणेशुद्धएवत्वंनोअस्मभ्यंरयिंधनं
प्रयच्छतथाशुद्धस्त्वंदाशुषेहविर्दत्तवतेयजमानायरत्नानिरमणीयानिकनकादीनिदेहि
।ततःशुद्धःपापरहितस्त्वंवृत्राणिअपामावरकान्कर्मविघ्नकारिणःशत्रून्पापानिवाजिघ्नसे
हंसि।ततःशुद्धःशत्रुहननदोषपरिहारायअस्मदीयैःसामभिःशस्त्रैश्चपरिशुद्धस्त्वंवाजमन्न
मस्मभ्यंधनमन्नंदातुमिच्छसीत्यर्थः॥छ॥ ॥इतिद्वादशोध्यायेतृतीयःखंडः॥छ॥ ॥अथचतुर्थखं
डेअग्नेःस्तोममितित्र्यृचात्मकंप्रथमंसूक्तंतत्रप्रथमा॥अग्नेःस्तोमंमनामहेसिध्रमद्यदिविस्पृ
शः।देवस्यद्रविणस्यवइति॥द्रविणस्यवःद्रविणंधनमिच्छंतोवयंदिविस्पृशःसूर्यरूपेणआका
शंव्याप्नुवतोदेवस्यद्योतमानस्याग्नेःसिध्रंपुरुषार्थानांसाधकंस्तोमंस्तोत्रंअद्यास्मिन्नहनिम
नामहेब्रूमः॥छ॥ ॥अथद्वितीया॥अग्निर्जुषतनोगिरोहोतायोमानुषेष्वा।सयक्षद्दैव्यंजनमि
ति॥होतादेवानामाह्वाताहोमनिष्पादकोवायोग्निःमानुषेषुआवसति।सोग्निर्नोस्माकंगिरःस्तु
तीर्जुषतसेवतां।सोग्निर्दैव्यंजनंदेवसंबंधिनंजनंयक्षत्यजतु॥छ॥ ॥अथतृतीया॥त्वमग्नेसप्रथा

© Dharmartha Trust J&K. Digitized by eGangotri.

असिजुष्टोहोतावरेण्यः।त्वयायज्ञंवितन्वतइति।हेअग्नेजुष्टः सर्वदाप्रीतः वरेण्यः सर्वैर्वरणी
यः होतात्वंसप्रथाः असिसर्वतः पृथुर्भवसि।तथाहयास्कः।सप्रथाः सर्वतः पृथुरिति।किंच।
सर्वेयजमानाः त्वयासाधनेनयज्ञंवितन्वते॥ ७॥ ॥अथाभित्रिपृष्ठमितित्र्यात्मकंद्वितीयं
सूक्तंतत्रप्रथमा॥ ॥अभित्रिपृष्ठंवृषणंवयोधामंगोषिणमवावशंतवाणीः।वनावसानोव
रुणोनसिंधुर्विरत्नधायतेवार्याणीति॥त्रिपृष्ठंत्रीणिपृष्ठानिस्तोत्राणिसवनानिवायस्यस
तथोक्तंस्तंवृषणंवर्षकंवयोधांअन्नस्यदातारंअंगोषिणंआघोषवंतंसोममभिलक्ष्यवाणीः
स्तोतॄणांवावः अवावशंतशब्दयंते।वनावनानिउदकानिवसानआच्छादयन्वरुणोनावरु
णोयथासिंधूनाच्छादयतितद्वत्।सिंधुःस्यंदनशीलः रत्नधारत्नानांदातासोमः वार्याणिध
नानिदयतेप्रयच्छतिस्तोतृभ्यः अंगोषिणंआंगूषाणामितिपाठे॥ सिंधुः सिंधूमितिच॥ ८॥
॥ ॥अथद्वितीयर॥ शूरग्रामः सर्ववीरः सहावान्जेतापवस्वसनिताधनानि।तिग्मायु
धः क्षिप्रधन्वासमत्स्वषाढः साह्वान्पृतनासुशत्रून्निति॥हेसोमत्वंपवस्व।कीदृशःत्वंशूरग्रा
मः शूराणांग्रामः संघोयस्यसः सर्ववीरः सर्ववीरायस्यसतथोक्तः सहावान्सहनवान्ने
तानयशीलः सनितासंभक्ताधनानितिग्मायुधः तीक्ष्णप्रहरणसाधनः क्षिप्रधन्वाक्षिप्रस
हनशीलधन्वासमत्सुसंग्रामेषुअषाढः असोढा।साह्वानभिभवान्॥कुत्र।पृतनासुशत्रु

© Dharmartha Trust J&K. Digitized by eGangotri

सेनासुकान्शत्रून्॥छ॥ ॥अथ तृतीया॥ उरुगव्यूतिरभयानिकृण्वंत्समीचीने आपवस्वापुरं
धी॥ अपः सिषासन्नुषसः स्वर्गाः संविक्रदो महो अस्मभ्यं वाजानिति॥ हे सोम उरुगव्यूतिः
विस्तीर्णमार्गस्त्वं अभयानि स्तोतृभ्यः कृण्वन् कुर्वन् पुरंधी इदं द्यावापृथिव्योर्नाम॥ ते समी
चीने संगते कुर्वन्ना पवस्व आक्षर॥ अपः उषसः स्वरादित्यं गाश्च रश्मीश्च सिषासन् संभक्तुमि
च्छन्॥ संचिक्रदः संक्रंदसे॥ महो महतः महान्ति वाजान्यन्नानि अस्मभ्यं दातुमिति शेषः॥छ॥
॥अथ त्वमिंद्रेति षड्गायत्र्यात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ त्वमिंद्र यशा अस्यृजीषी शवसस्पतिः॥
त्वं वृत्राणि हंस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिरिति॥ हे इंद्र शवसस्पतिः शवसोन्नस्य बल
स्य वा पालयिता॥ ऋजीषी ऋजीषेणाभिषुतः सोमः तद्वांस्त्वं यशा असि यशस्वी भवसि॥ कथम
स्य यशस्वित्वं तदाह॥ अप्रतीनि बलिभिरितरैः अप्रतिगतानि वृत्राणि रक्षांसि अनुत्तः अन्यै
र्नेतुमशक्यः॥ त्वमेक इत् असहाय एव चर्षणीधृतिः रक्षात्वेन यजमानादिमशक्यः॥ त्वमेक इत्
असहाय एव चर्षणीधृतिः रक्षात्वेन यजमानादिमनुष्याणां धारकः॥ पुरु बहुलं यथा भ
वति तथा हंसि संप्रहरसि॥ अत एवास्य यशस्वित्वं॥ शवसस्पतिः शवसस्पत इति पाठे इत्पुर्व
नुत्तश्चर्षणीधृतिः॥ एक इत् अनुत्ता चर्षणीधृता इति च॥छ॥ ॥अथ द्वितीया॥ तमु त्वा नूनमसु
र प्रचेतसं राधो भागमिवेमहे॥ महीव कृत्तिः शरणा त इंद्र प्रते सुम्ना नो अश्नवन्निति॥ हे असु

122

© Dharmartha Trust J&K. Digitized by eGangotri

खलुवन्माएवन्।हेइंद्रयउक्तगुणोस्ति।तंवप्रचेतसंप्रकृष्टज्ञानंत्वा।उइस्वधारणे।पित्व
सोषकंत्वामेवराधःधर्मादिसाधनंधनंनूनमिदानीमीमहेयाचामहे।तत्रदृष्टांतः।भागमिव।
यथाकश्चित्पित्रतोभागभूतंधनंयाचतेतद्वत्इंद्रोयजमानेभ्यस्तोतृभ्यश्चधनंप्रयच्छत्येव।
तस्मात्भागभूतंधनंयष्टारोवयंयाचामहे।किंचाइंद्रमहीवकृत्तिःकृतिःकृंततेर्यशोवान्नंवा।
।कृतीछेदने।करणेक्तिन्।कृंतत्यनेनेति।ईदृशीकृत्तिरिव।तेनयशारणाशरणंगृहं।अंतरिक्षेधु
लोकेमहवर्तते।अत्रयास्कः।कृत्तिःकृंततेर्यशोवान्नंवा।महीवकृत्तिःशरणातइंद्रसुमहत्तरंश
शरणमंतरिक्षंकृत्तिरिवेति।किंच।तेनवस्वभूतानिसुम्नासुम्नानिपुत्रादिविषयसुखानिच
नोस्मान्त्राश्नवन्प्रकर्षेणाश्नुवतांव्याप्नुवंतु।अश्नोतेर्लिङ्गागमः।।छ।। ।।यजिष्ठंत्वेति
प्रगाथात्मकंचतुर्थंसूक्तं।तत्रप्रथमा।।यजिष्ठंत्वाववृमहेदेवंदेवत्राहोतारममर्त्यं।अस्ययज्ञ
स्यसुक्रतुरिति।।हेअग्नेयनिष्ठंयष्टृतमंत्वांववृमहेवृणीमहेसंभजामहे।कीदृशंत्वां।देवत्रादेवे
षुमध्येदेवं।अतिशयेनदानादिगुणकं।होतारंदेवानामाह्वातारं।अमर्त्यंमविनाशिनं।अस्ययज्ञ
स्ययागस्यसुक्रतुंसुष्ठुकर्त्तारं।।छ।। ।।अथद्वितीया।।ऊर्जोनपातंसुभगंसुदीदितिमग्निंसुश्रे
ष्ठशोचिषं।सनोमित्रस्यवरुणस्यसोअपामासुम्नंयक्षतेदिवीति।ऊर्जोन्नस्यनपातंनपातयि
तारं।यद्वाप्नप्तारंचतुर्थंहविर्लक्षणेनान्नेनआपोजायंते।अद्भ्यश्चौषधिवनस्पतयः।तेभ्यएष

© Dharmartha Trust J&K. Digitized by eGangotri

जायत इति चतुर्थ्यर्थत्वात् । नस्याच्छन्न पादादिति न त्वः भक्तिभावः।सुभगं शोभनधनं।सुदीदितिं सुष्ठुदी
प्यंतं।श्रेष्ठशोचिषं प्रशस्यतमं तेजस्कं अग्निं स्तोमीति शेषः।स नाऽस्मा ग्निर्नोऽस्मदर्थं दिवि द्योत
माने देवयजने घृलोके वा मित्रस्य देवस्य वरुणस्य च वसु धनं सुखं वा आ अभिलक्ष्य यक्षत् यजतु।त
था सोऽग्निरपां मध्ये देवतानां च वसु धनमभियजतु।।७।। ।।इति द्वादशोऽध्याये चतुर्थः खंडः।। ।।अथ
पंचमखंडे यमग्न इति त्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा।।यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः
।स यंता शश्वतीरिष इति।।हे अग्ने पृत्सु संग्रामेषु यं मर्त्यं यजमानं अवाः अवसि रक्षसि।यं पृत्सु
संग्रामेषु जुनाः प्रेरयसि।स नरो यजमानः शश्वतीरिषः नित्यान्यन्नानि यंता नियंता नियंतुं समर्थो भव
ति।पृत्स्विति पदादिषु मांस्पृत्स्नूनामुपसंख्यानमिति पृतनाशब्दस्य पृदादेशः।सावेकाच इति विभक्ते
रुदात्तत्वं।अवाः अवः।अकाराकारयोर्विपर्ययः।यद्वा लेट्याडागमः।इतश्चेति सिप इकारस्य लो
पः।जुनाः जु इति गत्यर्थः।सौत्रो धातुः।लेट्।सिप्।क्र्यादिभ्यः श्ना।बहुलं छंदस्यमाङ्योगेपीत्यडभा
वः।यद्वृत्तयोगादनिघातः।यंता तृन्नंतो नित्वादाद्युदात्तत्वं।शश्वतीः।उगितश्चेति ङीप्।।७।। ।।अथ
द्वितीया।।नकिरस्य सहंत्य पर्येता कयस्य चित्।वाजो अस्ति श्रवाय्य इति।।हे सहंत्य शत्रूणामभि
भवनशीलाग्ने अस्य त्वत्कृतस्य यजमानस्य कयस्य चित् कस्यापि पर्येतान किः।आक्रमिता ना
स्ति।किं चास्य यजमानस्य श्रवाय्यः श्रवणीयो वाजोऽस्ति।बले विशेषोऽस्ति।।७।। ।।अथ तृतीया।।स

© Dharmartha Trust J&K. Digitized by eGangotri

वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता। विप्रेभिरस्तु सनितेति॥ विश्वचर्षणिः सर्वैर्मनुष्यैरुपेतः। सो
ऽग्निरर्वद्भिरश्वैर्वाजं संग्रामं तरुता तारयितास्तु। विप्रेभिर्मेधाविभिरृत्विग्भिः सहितस्तु सोऽग्निः
सनिता फलस्य दातास्तु। विश्वचर्षणिः विश्वे चर्षणयो यस्य। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वप
दान्तोदात्तत्वं। अर्वद्भिः। ऋ गतौ। अन्येभ्योपि दृश्यंत इति वनिप्। भिसि। अर्वणस्त्रसावनञ इति य
नकारस्य तृ इत्ययमादेशः। तरुता। तॄ प्लवनतरणयोः। अस्माद्ग्रसितस्कभितेत्यादौ तृन्नंतो
निपातितः। निपातनादेवोकारस्योदात्तत्वं॥ छ॥ ॥ अथ साकमुक्ष इति त्र्यृचात्मकं द्वितीयं सूक्तं तत्र प्र
थमा॥ साकमुक्षो मर्जयंत स्वसारो दश धीरस्य धीतयो धनुत्रीः। हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं
ननक्षे अत्यो न वाजीति॥ साकमुक्षः सह युगपत्सिंचंतः। उक्ष सेचने। क्विपि रूपं। नाड्यः स्वसारः
कर्मकरणार्थं इतस्ततः सुष्ठु गच्छंत्योऽंगुलयः मर्जयंत सोमं शोधयंति। मृजूष् शौचालंकारयोः।
तथा दश दशसंख्याका धीतयोंऽगुलिनामैतदंगुलयः धीरस्य समर्थस्य प्राज्ञस्य वा देवैर्ध्यात
व्यस्य काम्यमानस्य वा सोमस्य धनुत्रीः प्रेरयित्र्यो भवंति। ततः हरिर्हरितवर्णः सोमः सूर्यस्य
जाः प्रादुर्भूताः प्रादिशः ताः पर्यद्रवत् परितो गच्छति। सूर्यस्य तेजसा हि ता आविर्भवंतीति दिशां त
स्य जायात्वं। अत्यः अतनशीलो वाजी नाश्व इव स्थितः सोमः द्रोणकलशं ननक्षे व्याप्नोति। नक्ष
तिर्व्याप्तिकर्मा॥ छ॥ ॥ अथ द्वितीयां समाह॥ सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः। म

© Dharmartha Trust J&K. Digitized by eGangotri

र्येनियोषामभिनिष्कृतंयन्संगच्छतेकलशउस्रियाभिरिति।।वावशानःस्वान्कामयमानःवृषा
कामानांवर्षकः।अतएवपुरुवारःबहुभिर्वरणीयःसोमःअद्भिर्मातृभूताभिर्वसतीवरीभिःसंर
धन्वेसंधास्यति।तत्रदृष्टांतः।मातृभिर्नशिशुः।कामयमानःपुत्रोयथामातृभिःपयःप्रदानेनसं
धार्य्यते।धविर्गत्यर्थः।कर्मणिलिटिरूपं।पर्य्येति।मनुष्योयथायोषांयुवतिमधिगच्छतितद्वत्
।निष्कृतंसंस्कृतंस्वस्थानमभियन्नभिगच्छन्कलशोद्रोणाभिधानेउस्रियाभिरस्रिर्गोविकारैः
क्षीरादिभिर्वासंगच्छते।गमेरकर्म्मकात्समोगम्यृच्छीत्यात्मनेपदं।।२।। ।।अथतृतीया।।उतप्र
पिप्यऊधरघ्न्यायाइंदुर्धाराभिःसचतेसुमेधाः।मूर्द्धानंगावःपयसाचमूष्वभिश्रीणंतिवसुभि
र्न्निनिक्तैरिति।।उतापिचअघ्न्यायाःअघ्न्येतिगोनाम।अहंतव्यायाःगोःऊधःपयःस्थानंसो
मःप्रपिप्येतुषप्यारिभुसोमःप्रविश्यप्रकर्षेणाप्याययसि।प्यायतेर्लिटिलिड्यङोश्चेतिपीभा य
वः।सुमेधाःशोभनप्रज्ञःसोयमिंदुःसोमोधाराभिःसचतेसमवेतिसंगच्छते।ततोगावःचमूषुच
मंतिभक्षयंत्यत्रसोममितिचम्वोग्रहाद्यःतेषुस्थितंमूर्द्धानंसमुच्छ्रितमिमंसोमंपयसाश्वेतेन
अभिश्रीणंतिअभितआच्छादयंति।तत्रदृष्टांतः।निक्तैःप्रक्षालितैःवसुभिर्न्नवस्त्रैःयथाआच्छाद
यंतितद्वत्।।३।। ।।अथपिबासुतस्येतिप्रगाथात्मकंतृतीयंसूक्तं।तत्रप्रथमा।।पिबासुतस्यरसि
नोमत्स्वानइंद्रगोमतः।आपिर्नोबोधिसधमाद्योवृधेस्माँअवंतुतेधियइति।।हेइंद्ररसिनोरसवतः

© Dharmartha Trust J&K. Digitized by eGangotri

गोमतो गोविकारैः पयःप्रभृतिभिः अयणाद्द्रव्यैर्युक्तस्य नोस्मदीयस्य सुतस्याभिषुतस्य न्त्रिया
ग्रहणं कर्त्तव्यमिति कर्म्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ इन्द्राशो सोमं पिब । पीत्वा च मत्सत् मो
भव । अपिब त्वं सधमाद्ये सहमाद्यितव्ये संहितैरस्माभिस्तर्प्पयितव्ये सोमे आपिराप यिता
बंधुसन्नोस्माकं वर्द्धनाय वर्द्धनाय वो धियु ध्यस्यातेत्वदीया धियो बुद्धयः अनुग्राहिकाः अस्मान्
स्तोत्रॄनवंतु रक्षंतु । सधमाद्ये सधमाद्य इति पाठे ॥ छ ॥ ॥ अपत्नतीया ॥ भूयामते सुमतो वा
जिनो वयं मानस्तर भिमातये अस्मां विन्राभिरवताद्भिष्टिभिरानः सुम्नेषु चामेन ति ॥ हे इन्द्र सु
मतो शोभनायां बुद्धो अनुग्रहात्बुद्धो वाजिनो हविष्मंतो वयं भूयाम वर्त्तमानाम वाम । अभिमात
ये अभिमन्यतः त्यभिमाति । शत्रुस्तस्मै नरध्यैनो स्मान्मासः माहिंसीः । स्तृ अहिंसायां ॥ मा डि
लुंछांदसः लेलुंकु । अपितु अभिष्टिभिरन्वेषणीयाभिः प्रार्थनीयाभिश्चित्राभिश्चायनीयाभि
र्बहुविधाभिर्व्वा वदीयाभिरूतिभिरस्मानवतात् । अव रक्ष । तथा नोस्मान् सुम्नेषु सुखेषु आ
यामय आपतान्कुरु । सर्वदा सुखिन एव कुरु ॥ छ ॥ ॥ अथ त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामा
शिरं परमे व्योमनि । चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्द्धतेति ॥ अस्मै पवमानाय
परमे उत्कृष्टे व्योमनि विविधं सोमम्अवनं गमनं देवानामत्रेति । व्योमयज्ञस्तस्मिन् स्थितायाय द्वा प
रमे व्योमनि अंतरिक्षे वर्त्तमानाय त्रिः सप्त एकविंशति संख्याकाः धेनवः प्रीणयित्र्यो गावः सत्यां च

धार्यभूतां आशिरं आश्रयणं साधनं क्षीरादि दुदुह्रे दुहंति। यद्वा त्रिः सप्त द्वादश मासाः पंचर्त्तवः त्र
य इमे लोकाः असावादित्य एकविंशाति। एतैः सर्व्वैः सह गोऽस्य पय उत साधने उद्गावो दुहंतीति। किंच। सो
मः अन्या अन्यानि चत्वारि भुवनानि उदकानि वसतीवरीः स्ति स्वस्वेकु धनाः इति। तानि चतुः संख्याका
नि चारूणि कल्याणानि उद्धानि निर्णिजे निर्णेजनाय परिशोधनाय वस्त्रे तद्या करोति। यद्वा ऋयन्तेर्य्य
ज्ञे रवर्द्धितवान् तद्या करोति। दुदुह्रे परमे व्योमनि दुदुहे पूर्व्ये व्योमनीति पाठौ॥ छ॥ ॥ अथ द्वितीया
॥ स भक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे। तेजिष्ठा अपो मंहना परि व्यत यदी दे
वस्य श्रवसा सदो विदुरिति॥ स पवमानश्चारुणः कल्याणस्य अमृतस्योदकस्य क्रियाग्रहणमिति क
र्मणि संप्रदानसंज्ञाच्चतुर्थ्यर्थे बहुलमिति षष्ठी। चारुदकं भक्षमाणः इकारलोपश्छांदसः भक्षमा
णो यष्टृभिर्याच्यमानः सन् उभे द्यावा देशास्य द्वंद्व विहितत्वात् उत्तरपदाभावेपि द्वंद्वः प्रतीयते उभे
द्यावापृथिव्यौ काव्येन। कविकर्म्मणा। विशश्रथे विवृते करोति। यद्वा स्नेन निमित्तेन भक्तेनोदकेन सपूरय
तीत्यर्थः। किंच। तेजिष्ठाः अतिशयेन दीप्ता नि अपः उदकानि मंहना महत्वेन परिव्यत वर्म्मयंति आप
रित आच्छादयति। यदि यदा ऋत्विजो देवस्य द्योतमानस्य सोमस्य सदः स्थानं श्रवसा हविषा युक्ताः सं
तः विदुर्यागार्थं जानंति लभंते। तदा परितः आवृणोतीति। विद् ज्ञाने। सिजभ्यस्तेति झेर्जुस्। भक्ष
माणो भिक्षमाण इति पाठौ॥ छ॥ ॥ अथ तृतीया॥ ॥ ते अस्य संतु केतवो ऽमृत्यवो ऽदाभ्यासो जनुषी

१२५

३२५

© Dharmartha Trust J&K. Digitized by eGangotri

उभे अनु। येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णतेति॥ अस्यैतादृशस्य सोम
स्य केतवः प्रज्ञापकाः सर्वैः श्रावणीयरश्मयः कीदृशाः अमर्त्यवो मरणधर्मरहिताः अत एव अ
दाभ्यासः दम्भयितव्या इति वा तक्तव्यमिति एपतन्। परैरहिंस्यास्तेनादृशा अस्य रश्मयः उभे जनुषी जन्मनी
स्थावरजंगमात्मके उभे अनु लक्षीकृत्य संतु रस्तं तु ओषधीनामयं सोमो रेतो निषिंचति। यश्च मनुष्या
णां च धाराः भवति खलु। सोयं येभिर्यैः क्रतुभिर्नृम्णा नृम्णानि बलानि देव्या देवार्हाणि बलानि
निपुनते प्रेरयते। आदित् अभिषवानंतरमेव राजानं सोमं मनना मननीयाः स्तुतयः अगृभ्णत प
रिगृह्णंति। मा मुवंती सर्पः। हूत्र हो रितिच्छांदसो मकारः॥७॥ ॥इति द्वादशोऽध्याये उत्तरार्ग्रंथे
पंचमः खंडः॥७॥ ॥अथ षष्ठे खंडे अभि वायुमिति त्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अभि वायुं
वीत्यर्षा गृणानो अभि मित्रावरुणा पूयमानः। अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुमिति॥
हे सोम गृणानः स्तूयमानस्त्वं वीती वीतिं सुपां सुलुगिति चतुर्थ्याः पूर्वसवर्णदीर्घः वीत्यै पानाय वायुम
भ्यर्ष आभिगच्छ। तथा पवित्रेण पूयमानस्त्वं मित्रावरुणा मित्रावरुणौ च पानायाभिगच्छ। किंच।
नरं सर्वस्य नेतारं धीजवनं बुध्यास्मं वेगं कुर्वाणं रथेष्ठां रथे तिष्ठंतं अनेनाश्विनावभिधीयते। एक
त्वं तु प्रत्येकविवक्षया समुदायविवक्षया। एतादृशावश्विनौ चाभिगच्छ। तथा वृषभं कामानां व
र्षकं वज्रबाहुं वज्रयुक्तहस्तं इंद्रं च त्वं पानायाभिगच्छ॥१॥ ॥अथ द्वितीया॥ अभि वस्त्रा सुव

© Dharmartha Trust J&K. Digitized by eGangotri

सनान्यर्षाभिधेनूःसुदुघाःपूयमानः।अभिचंद्राभर्तवेनोहिरण्याभ्यश्वान्रथिनोदेवसोमेति॥हेसोमा
स्माकंसुवसनानिसुपरिधानानिवस्त्राणि।अभ्यर्ष।अभिगमय।यद्वा।सुवसनानिशोभन
वस्त्रसहितानिवस्त्राण्याच्छादकानिधनान्यभिगमय।किंच।पूयमानःपवित्रेणत्वंसुदुघाःसुष्ठु
पयसोदोग्ध्रीःधेनूःनवप्रसूतिकागावः।अभिप्रापय।अपिच।चंद्राण्याह्लादकानिहिरण्यानिभ
र्तवेभरणायपोषणाय नोऽस्माकमभिगमय।तथाहेदेवस्तोतव्यहेसोमरथिनोरथवतोऽश्वान्
अस्माकमभिप्रापय॥७॥ ॥अथतृतीया॥ अभीनोअर्षदिव्यावसून्यभिविश्वापार्थिवापू
यमानः।अभियेनद्रविणमश्नवामाभ्यार्षेयंजमदग्निवन्नइति॥हेसोमपवित्रेणपूयमानः
स्त्वंदिव्यादिविभवानिवसूनिधनानिनोऽस्माकमभ्यर्ष।अभिगमय।तथापार्थिवापार्थिवा
निपृथिव्यांभवानिविश्वासर्वाणिधनान्यभिगमय।तथायेनत्वदीयेनसामर्थ्येनद्रविणंधनंवयमश्न
वाम।अभिव्याप्नुयाम।तत्सामर्थ्यमभिगमय।किंच।आर्षेयं।आर्षाणामृषिपुत्राणांयोग्यंधनंजम
दग्निवत्।जमदग्नेर्यथात्वंप्रापयः।एवंनोऽस्माकमपि।अभ्यर्षय।यद्वा।आर्षेयं।आर्षेयाणांयोग्यंमंत्रं
जमदग्नेःस्वभूतंमंत्रंयथास्वादुतरंमकार्षीः।एवमस्माकंतादृशंमंत्रंस्वादुतमंकुर्विति॥मंत्रद्रष्टा
स्तोताकुत्सोनामऋषिःप्रार्थयते॥७॥अथयज्जायथाइतितृचात्मकंद्वितीयंसूक्तं।तत्रप्रथमा
यज्जायथाअपूर्व्यमघवन्वृत्रहत्याय।तत्पृथिवीमप्रथयस्तदस्तभ्नाउतोदिवमिति॥हेअपूर्व्य

© Dharmartha Trust J&K. Digitized by eGangotri

तोव्यतिरिक्तेनपूर्व्येणवर्जितेहेमघवन्नूनंमंहनीयधनवन्निंद्रत्वत्तोन्यःसायत्वत्तोन्येनाययथादालंजा
यथाउसन्नःप्रादुर्भूतोसि।तत्तदानीमेवदृंपिवीप्रथमानांभूमिंअप्रथयःअप्रथितांदृढामकरोः।उ
तापिचतत्तदानीमेवदिवंद्युलोकमंतरिक्षेणअस्तभ्नाःनिरुद्धामकार्षीः।।एतादृशंवीर्यंत्वद्य
स्यनसंभवतीत्यर्थःधीतयितुमपूर्व्येतिपदं।उतोदिवंउतद्यामितिपाठौ।।७।। ।।अथद्वितीया
।।तत्तेयज्ञोअजायततदर्कउतहस्कृतिः।तद्विश्वमभिभूरसियज्जातंयच्चजंत्वमिति।हेइंद्रयद
दात्वमजायथाःतदानींतेत्वदर्थंयज्ञोअग्निष्टोमादिरजायतसोमपानार्थमभूत्।उतापिचतदा
नींहस्कृतिःहासःहसनेहासकारीप्रीत्यर्थंक्रियमाणोहर्षस्यसूचकोर्च्चनीयोयमंत्रोपिअजा
यत।किंच।तदायज्जातंभूतजातंयच्चजंत्वं।जनित्वार्थेत्वन्प्रत्ययः।जनितव्यंविश्वमस्तितत्सर्वम
भिभूरसित्वमहिम्नाअभिभूतवानसि।।७।। ।।अथतृतीया।।आमासुपक्वमैरयआसूर्यं
रोहयोदिवि।घर्मंनसामंतपतावृधुवृक्तिभिर्जुष्टंगिर्वणसेबृहदिति।हेइंद्रआमासुअप
क्वासुगोषुपक्वंपयःऐरयःप्रेरयः।तथाचमंत्रः।आमासुचिद्दधिषेपक्वमन्तरिति।किंच।किंच।
दिविद्युलोकेसूर्यमारोहयस्त्वापूर्वंपणयोनामासुराअंगिरसांगाअपहृत्यांधकारावृतेकस्मिं
श्चित्पर्वतेस्थापितवंतःततोंगिरसःइंद्रंस्तुत्वागाःपुनरस्माभ्यमाहरेतितेनइंद्रेणगवां
स्थानंतमसावृतंदृष्ट्वातत्रगोदर्शनाययद्युलोकेसर्वप्रकाशकंसूर्यमारोहितवानस्थापितवानसि।

© Dharmartha Trust J&K. Digitized by eGangotri

चाद्विलोपे विभाषेति पूर्वस्य एरयइत्यस्य न निघातः ॥ अथ परोक्षकृतो ऽर्द्धर्चः । हे स्तोतारः सुवृक्तिभिः
शोभनाभिः स्तुतिभिः तपतं इंद्रं तीक्ष्णीकुरुत । इंद्रं स्तुतिभिः प्रवर्द्धयतेत्यर्थः । तत्र दृष्टांतः । घर्म्मं न
यथा घर्म्मं दीपनशीलं प्रवर्ग्यं सामन् । स्तुवंति सुपां सुलुगिति तृतीयाया लुक् । सामभिर्यथातपं
ति तद्वत् । ततो गिर्वणसे गीर्भिर्वननीयायेंद्राय जुष्टं प्रीतिकरं पर्याप्तं वारं हन्म हे तद्वद्धारणीयं वासा
मगायत ॥ ७ ॥ ॥ अथ मत्स्यपायीति त्र्यृचात्मकं तृतीयं सूक्तं तत्र प्रथमा ॥ मत्स्य पायि ते महः पात्र
स्येव हरिवो मत्सरो मदः । वृषा ते वृष्ण इंदुर्वाजी सहस्रसातमः इति ॥ हे हरिवः हरिभ्यां तद्वन्निंद्र महो
महान् पूज्योयं सोमपात्रस्येव पात्रेणेव सोमपात्रेण यथा धार्यते सोमस्तत्सदृशेन त्वया ॥ तृती
यार्थे षष्ठी ॥ यद्वा पात्रस्येतनवत्स्वभूतो महो महान् सोम इति वा योजना । अपायि पीतः । आशंसा
या विवक्षितत्वात् भूतेर्थे प्रयोगः । यतः पिब अतो मत्सि माद्यसि माद्यस्व वा । पात्रे यथा सोमः पूर्य
ते यथाभ्यधिकं पिब पीत्वा च माद्यस्वेत्यर्थः । किंच । वृष्णो ते अभिमतवर्षित्रे तुभ्यं चतुर्थ्यर्थे षष्ठी । म
त्सरो मदसाधनः मत्सरस्तर्प्पयिता वृषा वर्षिता इंदुः क्लेदयिता आल्हादको वेत्यर्थः । वाजी वा अन्न
नू अन्नकार्यत्वात् तत्सङ्ज्ञाबाहुल्यवानित्युच्यते । सहस्रसातमः अपरिमितधनदातृतमः सहस्रशु
रुषं भजनपर्याप्तप्रापयिता योवा । एवं महानुभावः सोमः संपादितस्तं पिबेत्यर्थः ॥ ७ ॥ ॥ अथ
द्वितीया ॥ आ नस्ते गंतु मत्सरो वृषा मदो वरेण्यः ॥ सहावाँ इंद्र सानसिः पृतनाषाडमर्त्यः इति ॥ हे इंद्र

१२७

© Dharmartha Trust J&K. Digitized by eGangotri

तेत्वां मत्सरो मर्षणः साधनः सोमः आगंतु। आगच्छतु। कीदृशोयं। वृषा वर्षकः मदस्त्वर्पयि-
ता वरेण्यो वरणीयः सहावान् सहायवान्। अस्मद्दत्तेन सोमेन सहायवान् सन् स्नानसिरस्मा-
भि संसजनीयः पृतनाषाट्। शत्रुसेनायाः अभिभविता। समर्त्तेश्च भवेति॥छ॥ ॥अथ तृ-
तीया॥ त्वं हि शूरः सनिता चोदयो मनुषो रथं। सहावान् दस्युमव्रतमोषः पात्रं न शोचिषेति॥
हे इंद्र त्वं खलु शूरः शौर्योपेतः सनिता दातासि। अतो मनुषो मनुष्यस्य मे रथं रंहणं स्पंदनं म-
नो रथं वा स्वर्गगमनसाधनं यज्ञाख्यं रथं वा चोदयः प्रेरय। किंच। त्वं समहान् सोमसहायवान्
भूत्वा दस्युमुपक्षपयितारं अव्रतं अकर्माणमननुष्ठायिनं तु षः दहकि मिव। शोचिषा दीप्त्या
ज्वालया अग्निः पात्रं न स्वाधारं पात्रविशेषमिव। यागाधिकारी सन् यो न यजते तं दहेत्यर्थः
॥छ॥ ॥इति द्वादशोऽध्याये षष्ठः खंडः॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थां-
श्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥छ॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्त-
क श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रका-
श उत्तराग्रंथे द्वादशोऽध्यायः॥छ॥ ॥यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे त-
महं वंदे विद्यातीर्थमहेश्वरं॥छ॥ ॥अथ त्रयोदशोऽध्याय आरभ्यते॥ तत्र प्रथमे खंडे पवस्व वृ-
ष्टिमिति पंचर्चं प्रथमं सूक्तं तत्र प्रथमा॥ पवस्व वृष्टिमासु नो पामूर्मिं दिवस्परि। अयक्ष्मा बृहती

© Dharmartha Trust J&K. Digitized by eGangotri

128

रिषइति॥हेसोमत्वंदिवोद्युलोकात्वृष्टिंवर्षन्नोस्माकंसुसुष्टु आपवस्वसमंतात्क्षर।एतंदेव
दर्शयिति।अपामुदकानामूर्मिंतरंगंदिवःपर्यापवस्व।अपिचअयक्ष्माःयक्ष्मरहितानिअन्ना
मयानिबृहतीर्महांतीषोन्नानिआपवस्व॥७॥ ॥अथद्वितीया॥तयापवस्वधारययायागा
वइहागमन्।जन्यासउपनोगृहमिति॥हेसोमत्वंतयाताद्दश्याधारयापवस्वक्षर।कीद्दश्येत्य
त्राह॥ययायादृश्यात्वदीययाधारयाजन्यासोजन्याःशत्रुजनपदभवाःगावइहास्मिन्लोकेनो
स्माकंसंबंधिगृहमुपागमन्नुपागछंति॥७॥ ॥अथतृतीया॥घृतंपवस्वधारयायज्ञेषुदेववी
तमः।अस्मभ्यंवृष्टिमापवेति॥हेसोमयज्ञेषुदेववीतमोसंतंदेवकामस्त्वंअस्मभ्यंस्तोतृभ्योघृत
मुदकंधारयापवस्वक्षर।वृष्टिंवर्षंचापवआपयस्व॥७॥ ॥अथचतुर्थी॥सनऊर्जेव्यव्ययंपवि
त्रंधावधारया।देवासःश्रृणवन्हिकमिति॥हेसोमसुतोभिषुतस्त्वंनोस्माकंऊर्जेअन्नायअव्ययं
अविमयंपवित्रंधारयासंपातेनविधायप्राप्नुहि।देवासोदेवाअपिहिकंश्रृणवन्गमनवेलाया
मुसन्नस्त्वदीयंशब्दंशृण्वंतु॥७॥ ॥अथपंचमी॥पवमानोअसिष्यदद्रक्षांस्यपजंघनत्।प्रत्न
वद्रोचयंन्रुचइति॥रक्षांसिराक्षसान्अपजंघनत्॥अपघ्नन्रुचःआलीयादीप्तिःप्रत्नवत्पु
राणवत्रोचयन्दीपयन्पवमानःसोमोसिष्यदत्स्यंदते॥७॥ ॥अथप्रसस्माइतिचतुर्ऋचंद्वि
तीयंसूक्तंतत्रप्रथमा॥प्रस्मैपिपीषतेविश्वानिविदुषेभर।अरंगमायजग्मयेपश्चाद्ध्वनेनरइति॥

© Dharmartha Trust J&K. Digitized by eGangotri

हे अध्वर्यो निरोणेन तायद्ध्यानां त्वं अस्मा इंद्राय प्रतिभर अभिभर सोमं प्रपच्छेसर्पः। कीदृशायेंद्राय
पीषते। विश्वानि सर्वाणि वेद्यानि विदुषे जानते। अरंगमाय पर्याप्तिगमनाय। जग्मये यज्ञेषु गम
नशीलाय। अपश्चादध्वने। ददधिर्गतिकर्मा। अपश्चाद्गमनाय सर्वेषामग्रगामिनो नरोनरे इति
पारस्तो॥७॥ ॥अथ द्वितीया॥ एमेनं प्रसेतन सोमेभिः सोमपातमं। अमत्रेभिरृजीषिणमिं
द्रं सुतेभिरिंदुभिरिति॥ हे अध्वर्यवः सोमेभिः सोमैः करणभूतैः सोमपातमं अतिशयेन सोम
स्य पातारं। एनमिंद्रं आ अभिमुखं प्रसेतन प्रतिगच्छत। ईमिति निपातोनर्थकः। कीदृशमिंद्रं
। अमत्रेभिः अमत्रैः सोमपात्रैः ग्रहचमसादिभिः ऋजीषिणं। ऋजीषं शानूर्णमुपार्ज्जकं बलं त
द्वंतं। यद्वा ऋजीषिणमित्यृतत्त्वसंवंधनीयं। सुतेभिरभिषुतैरिंदुभिः सोमैः ऋजीषिणं। गत
सारः सोम ऋजीषतद्वंतं। अथवा अमत्रैरमात्रैरपरिमितैरभिषुतैः सोमैः ऋजीषिणं। ऋ
जैर्गत्यर्थस्य धर्म्मिवसाधन ऋजीषशब्दः। ततो मत्वर्थीय इनिः। संगतमित्यर्थः। एवंविधमिंद्रं प्रति
गच्छतेत्यन्वयः। अन्य आह। अमत्रेभिर्ग्रहचमसादिभिर्गीतैरभिषुतैः सोमैः ऋजीषिणं बलवं
तमिंद्रं प्रतिगच्छतेति॥७॥ ॥अथ तृतीया॥ यदी सुतेभिरिंदुभिः सोमेभिः प्रतिभूषथ॥ वे
दा विश्वस्य मेधिरो धृषत्तंतमिदेषतइति॥ अहे अध्वर्यवः सुतेभिरभिषुतैः इंदुभिरुंदनशीलैर्दी
प्तैर्वा सोमेभिस्सोमैर्यदि प्रतिभूषथ ईं इं यदि यूयं प्रतिगच्छथ। भूषा प्रासाव्यस्येतद्रूपं। तदानीमे

© Dharmartha Trust J&K. Digitized by eGangotri

धियो मे धावी मे धेयपक्षुस्त्वन्त्वा स इंद्रः विश्वस्य विश्वं सर्वं भवदीयं कामं वेदावत्ति जानाति। द्यातावक्र
षत्‌शत्रूणां धर्षकः सन् तंतमित् तं तं काममेव एषते प्रापयति॥ ७॥ ॥अथ चतुर्थी॥ अस्मा
अस्मा इदंधसो ध्वर्यो प्रभरासुतं। कुविन्समस्य जेन्यस्य शर्द्धतो भिशस्तेरवस्वरदिति॥ अ
स्मा अस्मा इत् अस्मा एवैंद्रायनान्यस्मै हे अध्वर्यो त्वं अंधसः सोमलक्षणस्यान्नस्य सुत
म् अभिषुतं रसं प्रभर प्रहर प्रयच्छेति यावत् स चैंद्रः समस्य सर्वस्य जन्यस्य जेतव्यस्य शर्द्धतः
उत्सहमानस्य शत्रोः अभिशस्तेः अभिशंसनात् तत्कृताद्धिंसनात् कुवित् बहुधाः अवस्वर
त् अस्मान पालयति स्वर्पः॥ अवस्वरत् अवस्पर दितिपाठो॥ ७॥ ॥इति त्रयोदशोऽध्यायप्र
थमः खंडः॥ ७॥ ॥अथ द्वितीयखंडे बभ्रवे न्विति षड्चं तत्र प्रथमं सूक्तं तत्र प्रथमा॥ बभ्रवे नु स्वत
वसे ऽरुणाय दिविस्पृशे। सोमाय गाथमर्चतेति॥ हे स्तोतारो बभ्रवे भ्रवर्णाय स्वतवसे स्वब
लाय अरुणाय कृतावि ऽरुणवर्णाय दिविस्पृशे दिवं स्पृशते। सोमाय गाथं स्तुतिरूपं वाक्यं
अर्चत अर्चयतेत्यर्थः॥ ७॥ ॥अथ द्वितीया॥ हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन। म
धावाधावता मधु इति॥ हे ऋत्विजो यूयं हस्तच्युतेभिः हस्तप्रच्युतैरद्रिभिरभिषवग्रावभिः सुत
म् अभिषुतं सोमं पुनीतन पवित्रेण पावयत। अपि च मधौ मदकरे सोमे मधु गव्यं पयः आधा
वत प्रक्षिपत॥ ७॥ ॥अथ तृतीया॥ नमसे दुपसीदत दध्नेदभिश्रीणीतन। इंदुमिंद्रे दध

© Dharmartha Trust J&K. Digitized by eGangotri

तनेति। हे कृत्विजो नमसेन नमस्कारेणैवोपसीदत सोममुपगच्छत। रध्वेन्तु दध्नैवाभिश्रीणी
तन सोममभिश्रीणीतन। इंद्रे इंदुं सोमं दधातन धत्त॥७॥ ॥अथ चतुर्थी॥ अमित्रहा वि
चर्षणिः पवस्व सोम शं गवे। देवेभ्यो अनुकामकृदिति। हे सोम अमित्रहा अमित्राणां शत्रू
णां हंता। विचर्षणिर्विद्रष्टा। देवेभ्यो अनुकामकृत् अभीष्टकर्त्ता त्वं गवे अस्माकं पशवे शं
सुखं पवस्व क्षर॥७॥ ॥अथ पंचमी॥ इंद्राय सोम पातवे मदाय परिषिच्यसे। मनश्चिन्मनस
स्पतिरिति॥ हे सोम मनश्चित् मनसो ज्ञाता मनसस्पतिः मनस ईश्वरस्त्वं इंद्राय इंद्रस्य पात
वे पानाय मदाय च परिषिच्यसे परितः पात्रेषु सिच्यसे॥७॥ ॥अथ षष्ठी॥ पवमान सुवीर्यं
रयिं सोम रिरीहि णः। इंद्रविंद्रेण नो युजेति॥ हे इंदो क्लिद्यमान पवमान सोम त्वं सुवीर्यं शोभ
नवीर्यमपि तं रयिं धनं नोस्माकं संबंधिनं इंद्रेण युजा सहायेन नोस्मभ्यं रिरीहि देहि॥७॥ ॥अथो
द्वेत्स्भा तितत्वात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥७॥ ॥उद्धेदभि श्रुतामघं वृषभं नर्यापसं॥
अस्तारमेषि सूर्येति॥ हे सूर्य यद्दाःश्रा सुभानुष्णु इंद्रोपि सूर्यात्मना पठितः तस्मात्सूर्यात्मक
सुवीर्य हि इंद्र श्रुतमघं सर्वहरे यत्नेन विश्रुतधनं अतएव वृषभं याचमानानां धनस्य वर्षिता
रं। नर्यापसं नरहितं नर्यं नरहितकर्माणं॥ अस्तारं दानशीलं दायवंतं। एतादृशं स्तोतारमभि
लक्ष्य उदेषि। इन्द्वधारणे। त्वमेव तस्य पक्षे सूर्यात्मना उद्गाता सिद्धोति प्रसिद्धो॥७॥ ॥अथ द्वि

© Dharmartha Trust J&K. Digitized by eGangotri

तीया॥नवयोनवतिंपुरोबिभेदबाह्वोजसा।अहिंचवृत्रहावधीदिति।यइंद्रःनवतिनवतिसंख्याकाः
ततोनवसंख्याकाःएकोनशतसंख्याकाःशंबरस्यपुरःपुरीर्बाह्वोजसास्वबाहुबलेनैवबिभेददि
वोदासायभिनत्तिस्म।तथाचमंत्रांतरंदिवोदासायनवतिंचनवेंद्रःपुरोव्यैरच्छंबरस्येति।सवृत्र
हावृत्रासुरस्यहंतासइंद्रःअहिंचकेनाप्यहंतव्यंरमेधमपामावरकंघ्नंवृत्रासुरंवाअवधीत्॥
५न सइंद्रोस्माकंधनंददात्वित्युत्तरेणसंबंधः॥छ॥ ॥अथतृतीया॥सनइंद्रःशिवःसखाश्वावद्गोम
द्यवत्।उरुधारेवदोहतइति॥सःपूर्वोक्तगुणविशिष्टःशिवःकल्याणतमःसखायष्टव्यस्तो
तृस्तुसलक्षणेनसंबंधेननोस्माकंमित्रभूतःएतादृशइंद्रःअश्ववत्अश्वयुक्तंगोमत्गवादि
सहितंयवमत्अयवादिभ्यइतिप्रतिषेधान्मतुपोवत्वाभावः।यवइतिधान्यविशेषः।धान्ययुक्तं
धनंनोस्मभ्यंदोहतेदोग्धुददातु।तत्रदृष्टांतः।उरुधारेवदोहनकालेप्रभूतपयोधारायद्वाबहूनां
पोषयित्रीगौः।यथावत्सस्यपयोदोग्धितथाप्रभूतंधनंअस्माकंदोग्धुददातु।दुहेर्लेट्यडागमः।
॥छ॥ ॥इतित्रयोदशोऽध्यायेद्वितीयःखंडः॥छ॥ ॥अथतृतीयेखंडेविभ्राडितितृचात्मकंप्र
थमंसूक्तंतत्रप्रथमा॥विभ्राड्बृहत्पिबतुसोम्यंमध्वायुर्दधद्यज्ञपतावविह्रुतं।वातजूतोयोअ
भिरक्षतित्मनाप्रजाःपिपर्त्तिबहुधाविराजतीति॥विभ्राड्विभ्राजमानःविशेषेणदीप्यमानःसू
र्यःबृहन्महान्सरविःसोम्यंसोममयंमधुपिबतु।किंकुर्वन्यज्ञपतौयजमानेअविह्रुतंअकुटिलं

130

© Dharmartha Trust J&K. Digitized by eGangotri

अकंटकं आयुर्दधत् कुर्वन् यः सूर्यो वातजूतः वातेन महावायुना प्रेर्यमाणः सन् त्मना आत्म-
ना स्वयमेव अभिरक्षति सर्वं जगदभिपश्यन् पालयति। राशिचक्रस्य वायुप्रेर्यत्वात् सूर्यस्या-
पि तत्प्रेर्यत्वं स सूर्यः प्रजाः पिपर्त्ति वृष्ट्यादिप्रदानेन पालयति बहुधा पुरुधा विराजति विशेषे-
ण दीप्यते च। पिपर्त्ति बहुधा पुपोष पुरुधेति पाठे॥ १॥ ॥अथ द्वितीया॥ विभ्राड् बृहत्सुभृतं
वाजसातमं धर्मन् दिवो धरुणे सत्यमर्पितं। अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुर-
हा सपत्नहेति॥ विभ्राट् विभ्राजमानं बृहत् प्रौढं सुभृतं सुपुष्टं वाजसातमं वाजस्यान्नस्य ब-
लस्य वा दातृतमं धर्मन् धर्मणि वायुना धारयितव्ये दिवो द्युलोकस्य धरुणे धारके सूर्यमंडले
अर्पितं निक्षिप्तं सत्यं अविनश्वरं। अमित्रहा अमित्राणामप्रियाणां हन्तृ वृत्रहा वृत्राणामा-
वरकाणां हन्तृ दस्युहंतमं दस्यूनामुपक्षपयितॄणां हन्तृतमं। असुरहा असुराणां हिंसकानां घा- श्रू
तकं। सपत्नहा सपत्नानां सहजशत्रूणामपि घातकं ईदृग्भूतं ज्योतिः सौरं तेजः जज्ञे प्रादुर्भव-
ति॥ २॥ ॥अथ तृतीया॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्। विश्व-
भ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतमिति॥ इदं सौरं तेजः श्रेष्ठं प्रशस्यत-
मं ज्योतिषामन्येषां ग्रहनक्षत्रादीनामपि ज्योतिः प्रकाशकं। अत एवोत्तमं उत्कृष्टं। विश्वजित् वि-
श्वस्य सर्वस्य जेतृ धनजित् धनस्य जेतृ बृहत् प्रभूतं उच्यते। एवं गुणविशिष्टमिति सर्वैरभिधी-

© Dharmartha Trust J&K. Digitized by eGangotri

यतो। अपि च विश्वभ्राट् विश्वस्य प्रकाशयिता भ्राजो भ्राजमानः महि महान् सूर्य्यः दिवो दर्श
नाय उरु विस्तीर्णं सहः तेमसोऽभिभवितृ अच्युतं च्युतिरहितं अविनाशं ओजस्तेजोरूपं
बलं पप्रथे विस्तारयति॥ ७॥ ॥ अथ इंद्र क्रतुमिति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥
इंद्र क्रतुं न आभर पिता पुत्रेभ्यो यथा। शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिर
शीमहीति॥ हे इंद्र नोऽस्मभ्यं क्रतुं कर्म प्रज्ञानं वा आभर आहर। अपि च। यथा पिता पुत्रेभ्यो धनं प्र
यच्छति तथा नोऽस्मभ्यं शिक्ष धनं देहि। हे पुरुहूत बहुभिराहूत यामनि यज्ञे जीवा वयं ज्योतिः सू
13 र्यमशीमहि प्रतिदिनं प्राप्नुयाम॥ ७॥ ॥ अथ द्वितीया॥ मा नो अज्ञाता वृजना दुराध्यो माशि
वासो अव क्रमुः। त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसीति॥ हे इंद्र अज्ञाता अज्ञातगम
ना वृजना हिंसकाः दुराध्यो दुष्टाभिसंधयो नोऽस्मान् माव क्रमुः मा विक्रमुः। हे शूर त्वया वयं स्तो
तारः प्रवतः प्रवणकाः संतः शश्वतीर्बह्वीः अपोऽतितरामसि अतितरामः॥ ७॥ ॥ अघा घे
ति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ अघा घा शश्वदिंद्र त्रास्व परे च नः। विश्वा च नो जरितॄ
न्सत्पते महा दिवा नक्तं च रक्षिष इति॥ अघा घ परे घ शश्वाव्यमहरस्तिन त्र सर्वत्र हे इंद्र श्व
श्वः। श्वः शश्ववाव्ये च परत्र सर्वत्र सर्वत्र त्रास्व अस्मान् रक्ष। तथा परे च परस्मिंश्च तृतीये हनि च त्रा
स्व हे सत्पते सतां पालक इंद्र विश्वा च सर्वाण्यपि अहा अहानि सर्वेष्वपि अहःसु नोऽस्मान् जरितॄन् स्तो।

© Dharmartha Trust J&K. Digitized by eGangotri

त्वं नरक्षिषो रक्षसि। तथा दिवानक्तं च रक्षिषः रक्ष॥ ७॥ ॥अथ द्वितीया॥ प्रभंगी शूरो मघ
वा तुवीमघः संमिश्लो वीर्याय कं। उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुरिति॥ अ
यं मघवा धनवानिंद्रः प्रभंगी प्रभंजनशीलः शूरो विक्रांतस्तुवीमघः प्रभूतधनः संमिश्लिष्ट
सम्यग्मिश्रयिता। किमर्थं वीर्याय वीर्यकरणाय कमिति पदपूरणः॥ एवं महानुभावो भव
ति। अपरोर्द्धर्चः प्रत्यक्षकृतः। हे शतक्रतो बहुविधकर्म्मन्निंद्र ते तव यौ उभा उभौ बाहू वृषणौ का
मानां वर्षकौ यायौ बाहू वज्रमायुधं नि मिमिक्षतुः परिगृह्णीतः॥ ७॥ ॥इति त्रयोदशोध्याये
तृतीयः खंडः॥ ७॥ ॥अथ चतुर्थखंडे जनीयंत इति एकर्चं प्रथमं सूक्तं सेषोच्यते॥ जनीयंतो न्व
ग्रवः पुत्रीयंतः सुदानवः। सरस्वंतं हवामह इति॥ जनीयंतः जायतः आत्मपत्नीनीति जनयो
जायाः॥ ता इच्छंतः पुत्रीयंतः पुत्रान् कामयमानाः सुदानवः शोभनदानाः अग्रवः उपगंता
रो वयं नु अद्य सरस्वंतं देवं मध्यमस्थानं हवामहे स्तुमहे आह्वयामहे वा॥ उत न इत्येकर्चं द्विती
यं सूक्तं सेषोच्यते॥ उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूदिति॥ उत
प्रिया नास्माकं प्रिया सुप्रियाणां मध्ये प्रियाप्रियतमा सप्तस्वसा गायत्र्यादीनि सप्तछंदांसि
स्वसारो यस्यास्ता यद्वा नदीरूपायास्तु गंगाद्याः सप्तनद्यः स्वसारः सुजुष्टा सुष्ठु पुरातनै
ऋषिभिः सेविता एवंभूता सरस्वती देवी स्तोम्या भूत् स्तोतव्या भवतु॥ ७॥ ॥अथ तत्सवितुर्व

© Dharmartha Trust J&K. Digitized by eGangotri

131

एषमितितृतीयसूक्तरूपासैषा॥तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि।धियोयोनःप्रचोदयात्
दिति॥यःसवितादेवःनोस्माकंधियःकर्माणिधर्मादिविषयावाबुद्धीःप्रचोदयात्प्रेरयेत्।तत्
स्यदेवस्यद्योतमानस्यसवितुःसर्वांतर्यामितयाप्रेरकस्यजगत्स्रष्टुःपरमेश्वरस्यवरेण्यंसर्वै
रुपास्यतयाज्ञेयतयाचसंभजनीयंभर्गः।अविद्यातत्कार्ययोर्भर्जनाद्भर्गःस्वयं।ज्योतिस्तेजःप
रब्रह्मात्मकं।तेजःधीमहिवयंध्यायामः।यद्वातदितिभर्गोविशेषणं।सवितुर्देवस्यतत्तादृशं
भर्गोधीमहिकिंतदित्यपेक्षायामाह॥इतिलिंगव्यत्ययः।यद्भर्गोधियायःप्रचोदयतितद्ध्यायामे
तिसमन्वयः।यद्वायःसवितासूर्यःधियःकर्माणिप्रचोदयात्प्रेरयति।तस्यसवितुःसर्वस्य
प्रसवितुर्देवस्यद्योतमानस्यसूर्यस्यतत्सर्वैर्दृश्यतयाप्रसिद्धंवरेण्यंसर्वैःसंभजनीयंभर्गःपापा
नांपावकंतेजोमंडलं।धीमहिध्येयतयामनसाधारयेम।यद्वाभर्गःशब्देनान्नमभिधीयते।यःस
वितादेवोधियःप्रचोदयतितस्यदेवस्यप्रसादात्भर्गोऽन्नादिलक्षणंफलंधीमहिधारयामः।
तस्याधारभूताभवेमेत्यर्थः।भर्गःशब्दस्यान्नपरत्वेचआथर्वणं।वेदाछंदांसिसवितुर्वरेण्यं
भर्गोदेवस्यकवयोन्नमाहुः।कर्माणिधियस्तनुतेप्रब्रवीमीतिप्रचोदयात्सवितायाभिरेतीतिभ
र्गः।भ्रस्जपाकेभ्रस्जुनः।भ्रस्जोरोपधयोरन्यतरस्यामितिरोपधयोर्लोपःरमागमः।न्यंक्वादित्वात्
कुत्वं।धीमहि।ध्यायतेर्लिटिबहुलंछंदसीतिसंप्रसारणं।व्यत्ययेनात्मनेपदं।यद्वाधीङ्आधारे॥

१३२

© Dharmartha Trust J&K. Digitized by eGangotri

ल लेटि बहुलं छंदसीति विकरणस्य लुक्। अचोद्यात् चोदयेत् लेटि आडागमः। यद्वृत्तयोगाद
निघातः। आगमस्यानुदात्तत्वे लेटिवैः स्वरः॥७॥ ॥ अथ सोमानं स्वरणमिति अग्न आयूं
षि पवस इति चतुर्थपंचमसूक्तात्मकयोर्द्वयोरृचोः प्रतीके तत्रान्यत्राम्नाते। अथ तानः शा
क्रमिति तृचात्मकं षष्ठं सूक्तं तत्र॥ तानः शाक्तं पार्थिवस्येति प्रथमा या ऋचः प्रतीकमिदं सा
चान्यत्राम्नाता॥७॥ ॥ अथ द्वितीया॥ ऋतमृतेन सपंतेषिरं दक्षमाशाते। अद्रुहा देवौ वर्द्ध
ते इति॥ ऋतेनोदकेन निमित्तभूतेन ऋतं यज्ञं सपंता स्पृशंतौ इषिरं एषणवंतं दक्षः प्रवृद्धं यज
मानं हविर्वा आशाते व्याप्नुतः। अद्रुहा अद्रोग्धारौ देवौ द्योतमानौ मित्रावरुणौ वर्द्धते। प्रवृद्धौ
भवतः॥७॥ ॥ अथ तृतीया॥ वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः। बृहंतं गर्त्तमाशाते इति॥
वृष्टिद्यावा वृष्टिर्यया द्यौः स्तुतिर्ययोस्तौ वृष्टिद्यावा। अथ वृष्टिर्वर्षिका द्यौरंतरिक्षं याभ्यां तौ तादृ
शौ। रीत्यापा रीतिगतिरेषणयोः। रातिः प्राप्तिः सैव आप्तिरभिमतप्राप्तिर्ययोस्तौ तादृशौ इषो
ऽन्नस्य पती स्वामिनौ। वृष्टिप्रदत्वान्नस्वामित्वं। दानुमत्याः दानवत्याः दानुमुचिताया इत्यर्थः॥
एतादृशाः विशेषणं। एवं महानुभावौ मित्रावरुणौ बृहंतं महांतं गर्त्तं रथं आशाते व्याप्नुतः। अधि
तिष्ठतो या गार्थी॥७॥ ॥ अथ युंजंतीति त्र्यात्मकं सूक्तं तत्र प्रथमा॥ युंजंति ब्रध्नमरुषं चरंतं परि
तस्थुषः। रोचंते रोचना दिवीति॥ इंद्रो हि परमैश्वर्येण युक्तः परमैश्वर्यमग्निवाय्वादिसनह्र

© Dharmartha Trust J&K. Digitized by eGangotri

त्ररूपेणावस्थानानुपपद्यते। ब्रध्नमादित्यस्वरूपेणावस्थितं। अरुषं हंसकरहिताग्निरूपे
णावस्थितं। चरंतं वायुरूपेण सर्वतः प्रसरंतमिंद्रं परितस्थुषः परितोवस्थिता लोकत्रय
वर्त्तिनः प्राणिनो युंजंति स्वकीयकर्म्मणि स्वतात्वेन संबंधं कुर्वंति। तस्यैवेंद्रस्य मूर्त्तिविशे
षरोचनानक्षत्राणि दिवि द्युलोके रोचंते प्रकाशंते। अस्य मंत्रस्योक्तार्थपरत्वं ब्राह्मणेनैतद्व्या
ख्यातं। युंजंति ब्रध्नमित्याह। असौ वा आदित्यो ब्रध्नः आदित्यमेवास्मै युनक्ति। अरुषमि
त्याह। अग्निर्वा अरुषः अग्निमेवास्मै युनक्ति। चरंतमित्याह वायुर्वै चरन् वायुमेवास्मै युन
क्ति। परितस्थुष इत्याह इमे वै लोकाः परितस्थुषः इमानेवास्मै लोकान् युनक्ति। रोचंते रोचना
135 दिवीत्याह। नक्षत्राणि वै रोचना दिवि नक्षत्राण्येवास्मै रोचयतीति॥ छ॥ अथ द्वितीया॥ ॥
युंजंत्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसेति। अस्य ब्रध्नादिरूपेण प्रतिपाद्य
स्यादित्यादिमूर्त्तिभिस्तत्र तत्रावस्थितस्यैंद्रस्य रथे हरी एतन्नामानौ द्वावश्वौ सारथयो युंजं
ति। इंद्रसंबंधिनोरश्वयोर्हरिनामत्वं हरी इंद्रस्य रोहिताग्नेरिति पठितत्वात्। कीदृशौ हरी। का
म्या कामयितव्यौ विपक्षसा विविधे पक्षसी रथस्य पार्श्वे ययोरश्वायास्तौ विपक्षसौ। रथस्य द्व
योः पार्श्वयोः योजितावित्यर्थः। शोणा रक्तवर्णौ धृष्णू प्रगल्भौ। नृवाहसा नृणां पुरुषाणा
मिंद्रतत्सारथिप्रमुखाणां वोढारौ॥ छ॥ ॥अथ तृतीया॥ केतुं कृण्वन्न केतवे पेशो मर्या अपेशसे॥

© Dharmartha Trust J&K. Digitized by eGangotri

सम्मुषद्भिरजायथा इति ॥ हे मर्या मनुष्याः इदमाश्चर्यं पश्यतेत्यध्याहारः । किमाश्चर्यमिति तदुच्य षैः
ते । आदित्यरूपोयमिंद्रः उषद्भिर्दहद्भिः केरश्मिभिः प्रतिदिनमुदितैः कालैर्वसिंभूयाजायथाः उत्पद्य
ते । अथवा सूर्यस्यैवास्मिन्मंत्रे मरणमुपवर्य व्यत्ययेन बहुवचनं कृत्वा संबोधनं क्रियते । हे मर्य प्र
तिदिनं त्वमजायथा इति योज्यं । किं कुर्वन् । अकेतवे रात्रौ निद्राभिभूतत्वेन प्रज्ञारहिताय प्रा
णिने केतुं कृण्वन् प्रातः प्रज्ञानं कुर्वन् । अपेशसे रात्रावंधकारावृतत्वेनानभिव्यक्तत्वाद्रूप
रहिताय पदार्थाय प्रातरंधकारनिवारणेन पेशः रूपनामैतत् । रूपमभिव्यज्यमानं कुर्वन्
अकेतवे पेशसे इति चतुर्थ्यौ षष्ठ्यर्थे द्रष्टव्ये ॥ छ ॥ ॥ इति त्रयोदशोऽध्याये चतुर्थः खंडः ॥ छ ॥
॥ अथ पंचमखंडे अयं सोम इति त्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा ॥ अयं सोम इंद्र तुभ्यं सु
न्वे तुभ्यं पवते त्वमस्य पाहि । त्वं ह यं चकृषे त्वं ववृष इंदुं मदाय युज्याय सोममिति ॥ हे इंद्र अयं सोमः
तुभ्यं त्वदर्थं सुन्वे सूयते । सुनोतेः कर्मणि लटि लोपस्त आत्मनेपदेष्विति तलोपः । तुभ्यं त्वद
र्थमेव पवते पूयते । त्वं चास्य सोमस्य पाहि पिब । त्वं ह यमिंदुं सोमं चकृषे करोषि । त्वं यं ववृषे वृतवान
सि । किमर्थं मदाय मदार्थं युज्याय सहायाय । सोम इंद्रस्य बलकरत्वात् सहाय इति । प्रसि
द्धं यमेवं करोषि त्वं तं पाहीति समन्वयः ॥ अथ द्वितीया ॥ छ ॥ स ईं रथो न भुरिषाडयोजि म
हः पुरूणि सातये वसूनि । आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवंतेति ॥ स ईं सोयं

© Dharmartha Trust J&K. Digitized by eGangotri

भुरिषाट् भूरिभारस्य सोढा। रथ्यो न। रथेन। रथ इव भुरिषाट् प्रभूतस्य भारस्य सोढा। अयोजि यु
ज्यते। कीदृशः सः। महः महान्। किमर्थमयोजि। पुरूणि बहूनि वसूनि धनानि सातये अस्मभ्यं
दातुं। आत् ईं गा अनंतरं विश्वा विश्वानि कर्माणि नहुषो मनुष्याः तेषां संबंधीनि जाना जातानि अ
स्मद्धिरो धीनि कुर्वन्तु। ऊर्ध्व सुखानि च वने वननीये स्वर्षाः स्वर्षातिः संग्रामनामैतत्। स्वर्गलाभयुक्ते संग्रा
मे नवं तं गच्छन्तु। नवतिर्गतिकर्मा। यद्वा असौ इमं संग्रामे युद्धार्थिनः संगच्छन्ति॥७॥ ॥अथ सप्तमी
॥शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट्। आपो न मक्षू सुमतिर्भवा नः सह
स्राप्साः पृतनाषाण्न यज्ञः इति॥ हे सोम शुष्मी बलवांस्त्वं मारुतं बलमिव पवस्व। तत्र दृष्टांतमेव
स्पष्टयति। यथा दिव्या विट् प्रजा अनभिशस्ता अनभिशस्तो निंद्या अदिनिंदिता पवते। मारुतं वै
देवानां विश इति श्रुतेः। किं च आपो न उदकानीव मक्षु क्षिप्रं पवमानस्त्वं सुमतिर्भव नो
स्माकं किंच। सहस्राप्साः अप्स इति रूपनाम। बहुरूपस्त्वं पृतनाषाट्। पृतनानामभिभविता इ
त्थंभूतो यज्ञो यष्टव्यो भवसीति॥७॥ ॥अथ त्वमग्न इति तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ त्वम
ग्ने यज्ञानां होता विश्वेषां हितः देवेभिर्मानुषे जन इति॥ हे अग्ने त्वं विश्वेषां सर्वेषां सप्तसंस्था
रूपेणाभिन्नानां यज्ञानां होता होमनिष्पादको सि। यद्वा यज्ञानां संबंधिदेवानामाह्वाता भव
सि। कुत इत्यत आह। यस्मात्त्वं मानुषे मनोः संबंधिनि मनुष्यजने यजमाने देवेभिर्देवैर्हितः स्था

कौ

१३४

© Dharmartha Trust J&K. Digitized by eGangotri

त्वेननिहितोसितस्मादित्यर्थः॥छ॥ ॥अथद्वितीया॥सनोमंद्राभिरध्वरेजिह्वाभिर्य
जामहः।आदेवान्वक्षियक्षिचेति॥हेअग्नेसत्वंनोस्माकमध्वरेयज्ञेमंद्राभिर्म्मदकरी
भिःस्तुत्याभिर्व्वाजिह्वाभिर्ज्वालाभिर्महोमहतोदेवान्यजहविर्भिस्तर्पय॥कथंतदितिचेत्॥
उच्यतेदेवान्यष्टव्यानिंद्रादीन्आवक्षिआवह।ततोयक्षिचयजचहवींषितेभ्योदेहीत्य
र्थः॥छ॥ ॥अथतृतीया॥वेत्थाहिवेधोअध्वनःपथश्चदेवांजसा।अग्नेयज्ञेषुसुक्रतोइ
ति॥हेवेधोविधातःसुक्रतोशोभनकर्मन्देवघानादिगुणयुक्ताग्नेत्वंयज्ञेषुदर्शपूर्णमासा
दियागेषुअध्वनोमहामार्गान्पथःस्वल्पमार्गांश्चअंजसार्जवेनवेत्थजानासि।हियस्मा
देवंतस्मात्यज्ञमार्गाद्भ्रष्टंयजमानंपुनस्तंमार्गंप्रापयेत्यर्थः॥छ॥ ॥अथहोतादेवइ
तित्र्यात्मकंतृतीयंसूक्तंतत्रप्रथमा॥होतादेवोअमर्त्यःपुरस्तादेतिमाययाविदथानिप्र
चोदयन्निति॥होताहोमनिष्पादकःअमर्त्योमरणधर्मरहितःदेवोद्योतमानःविदथानिवे
दितव्यानिकर्म्माणिप्रचोदयन्प्रकर्षेणप्रेरयन्।सोग्निर्माययाकर्मविषयाभिज्ञानेनयुक्तः
सन्पुरस्तात्कर्मप्रारंभकालएवएतिअस्मानागच्छति॥छ॥ ॥अथद्वितीया॥वाजीवाजेषुधी
यतेध्वरेषुप्रणीयते।विप्रोयज्ञस्यसाधनइति॥वाजीबलवानग्निर्वाजेषुयुद्धेषुधीयतेदेवैःश
त्रुहननार्थंनिधीयते।किंच।अध्वरेष्वग्निहोत्रादिषुप्रणीयतेअध्वर्य्वादिभिःप्रकर्षेणआहवनी

© Dharmartha Trust J&K. Digitized by eGangotri

यादिस्थानेषुप्रक्षिप्यते।अतएवविप्रोमेधावीसन्नग्निःयज्ञस्याग्निहोत्रादेःसाधनःसाधको
भवति॥छ॥ ॥अथतृतीया॥धियाचक्रेवरेण्योभूतानांगर्भमादधे।दक्षस्यपितरंतनेति॥यो
ग्निर्द्धियाआधानपवमानेष्टिरूपेणकर्मणाचक्रे।आहवनीयरूपतयाकृतोभूत्।अतएवव
रेण्यःसर्वैर्यजमानैःकर्मांगत्वेनवरणीयःअग्निर्भूतानांस्थावरजंगमात्मकानांभूतजाता
नांअंतर्गर्भस्थात्मानमेवगर्भरूपतयाआधेदधेसर्वत्रदधार।पितरंसर्वस्यजगतःपालकं
तमिममग्निंदक्षस्यदक्षप्रजापतेःतनातनयावेदिरूपाभूमिर्दर्शपूर्णमासाग्निहोत्रादिक
र्मसिद्ध्यर्थंधारयति।भूमेर्दक्षदुहितृत्वेमंत्रवर्णः।अदितिर्ह्यजनिष्टदक्षयादुहितातवेति॥
॥छ॥ ॥इतित्रयोदशोऽध्यायेपंचमःखंडः॥अथषष्ठेखंडेआसुतेसिंचतमितितृचात्मकंप्रथ
मंसूक्तंतत्रप्रथमा॥ ॥आसुतेसिंचतश्रियंरोदस्योरभिश्रियं।रसादधीतवृषभमिति॥सुतेदु
ग्धेगोपयसिश्रियंतंअग्निंसंयोगात्तावसर्पंतंमरुद्भिस्सर्पः।अथवातत्कालंअश्विनौद्यावापृथि
व्याविसेकइतियास्कोनोक्तत्वादश्विनोरभिश्रियमिसर्पः।सवनानंतरंरसानुसेआजेपयसि
वृषभंवर्षकमग्निंदधीतधारयेत्।अजायाआग्नेयीत्वात्क्षीरस्याप्यग्निसंयोजनमुचितं।आ
ग्नेयीवाएषायदजेतिहिब्राह्मणं॥छ॥ ॥अथद्वितीया॥तेजानतस्वमोक्यंसंवत्सासोनमातृ
भिः॥मिथोनसंतजामिभिरिति॥तेजाःगावोजानतज्ञातवत्यः।अथवासामान्याकारेणतइति

© Dharmartha Trust J&K. Digitized by eGangotri

पुन्निर्दिष्ट्राः। किंस्तं। स्वकीयं तु कं निवासं महावीरं तत्र दोग्धुमगमन्निसर्थः॥ नरेवाहवस्सासोन॥
यथावत्सा मातृभिर्जननीभिः सह तथा संगच्छंते जामिभिर्वंधुभिः सहिता गावो मिथः प्रत्येकं
संनसंनसंगच्छंते महावीरं॥ ७॥ ॥ अथ तृतीया। उपस्रक्केषु बप्सतः कृण्वते धरुणं दिवि। इंद्रे
अग्ना नमः स्वरिति॥ महावीरस्य स्रक्केषु बप्सतो हाल यामप्सयतोग्नेः अन्नं धरुणं इंद्रे अ
ग्नेति वक्ष्यमाणत्वाद्दिंद्राग्न्योर्ह्यरिकमन्नं दिवि अंतरिक्षे उपकृण्वते उपकुर्वंते। कृविजः यस्मि
न्महावीरं हृतानि। नदान दानस्योपर्युपयविधस्वीरं आस्तेवयंतीत्यर्थः। एवं महावीरे आसिंचेदं इंद्रे
अग्ना अग्नौ वस्तवः सर्वं गव्यमाजं वनमोन्नं अथवास्वः अंतरिक्षे योजयंतीति शेषः॥ ७॥ ॥
अथ तदिदास इति नवात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्र।
स्त्वेषनृम्णः। सद्यो जज्ञानो निरिणाति शत्रूननु यं विश्वे मदंत्यूमाः इति॥ तज्जगत्कारणं ब्रह्म स
र्ववेदांतप्रसिद्धं। इद्धशब्दो वधारणे। भुवनेषु। भूसत्तायां। सत्सु पृथिव्यादिषु लोकेषु मध्ये तज्ज
गत्कारणं ब्रह्मैव ज्येष्ठं प्रशस्ततमं आस बभूव। तस्य परमार्थसत्वात् तद्व्यतिरिक्तानां व्यावहा
रिकसत्वाच्च॥ यद्वा ज्येष्ठं वृद्धतमं जगत्कारणत्वेन सर्वेषामादिभूतं बभूव। आस लिटि छंद
स्युभयथेति सार्वधातुकत्वादस्तेर्भूरिति भूभावाभावः॥ यद्वा वृद्धं तदेव ब्रह्म स्वमकारादनयामा
सदिदिति। असगतिदीप्त्यादानेषु अस्मात् लिटि रूपं। यत उपादानभूतात् यस्मात् ब्रह्मणः उग्र

© Dharmartha Trust J&K. Digitized by eGangotri

उग्रः उद्गूर्णः। त्वेषनृम्णः प्रदीप्तबलः सूर्यात्मक इंद्रः जज्ञे जातो बभूव। श्रूयते हि चक्षोः सूर्यो अजाय
१३६ तेति। सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदिति च। जनिकर्तुः प्रकृतिरिति प्रकृतेरपादानसंज्ञा
यां यत इति पंचमी। जज्ञे इति लिटि गमहनेत्यादिनोपधालोपः। द्विर्वचनेचीति तस्य स्थानिवद्भा
वाद्द्विर्वचनादिषु दृत्तान्निसमिति निषेधात प्रतिषेधः। सद्यश्च जज्ञानो जायमान एव सद्यः शीघ्रं
शत्रून् स्नानपि रन्तुमं देहादीन् राक्षसान्नि रिणाति निहिनस्ति। यद्वा उपासकानां पापरू
पान् शत्रून् निहंतीति तथा च ब्राह्मणं। स घोरोग्र एष जातः पाप्मानमपहतेति। जज्ञान इति जनेर्लि
टः कानच् विरूपमेतत्। रिणाति। रीगतिरेषणयोः क्र्यादिकः। प्वादीनां ह्रस्व इति ह्रस्व
136 त्वं। विश्वे सर्वे ऊमाः अवंति रक्षंती। ऊमाः प्राणिनः। अवतेरौणादिको मन् प्रत्ययः। ज्वरत्वरेत्या
दिनावकारोपधयोः स्थाने ऊठ्। सर्वे प्राणिनो यं सूर्यात्मकमुद्यंतमिंद्रमनुलक्ष्य मदंत्यमुद्गान्म
दंत्यमुद्गादिति मदंति हृष्यंति। मदी हर्षे। व्यत्ययेन शप्। तथा च ब्राह्मणं। भूतानि वै विश्व ऊमा
स एनमनु मदंति उदगादुदगादितीति। तैत्तिरीयकं च। तस्मात्सूर्य एव मन्यते मां प्रत्युदगादिति
ति। यद्वा यं स्तुत्यादिभिराधंतमनु पश्चात् सर्वे प्राणिनः अभीष्टप्राप्त्या हृष्यंति। अनुर्लक्षण
इति। अनोः कर्मप्रवचनीयत्वात् कर्मप्रवचनीययुक्त इति। द्वितीया। सदृंशोपश्लेषेस्त्वयः॥ ७॥।
अथ द्वितीया॥ वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति। अव्यनच्च व्यनच्च सस्नि

© Dharmartha Trust J&K. Digitized by eGangotri

संतेनवंनप्रभ्रनामर्षयति॥ शवसाबलेनवावृधानोवर्द्धमानः अतएवभूर्योजाः बहुबलः
शत्रुःसानयिता॥ इंद्रः दासायउपक्षयकारिणेशत्रवेभियसंभीतिंदधातिविदधातिकरोति
अथ्यानत्विविधमनिविमसितीतिअनन्प्रमाणेकंजंगमं।नहिलक्षणेनव्यनस्थावरं।न
दुभयमपिसत्त्विसंस्कृत्यातंइंद्रेणसम्यक्प्रयोधितंभवति।स्नातेःआहगमहनइत्यस्यये
नकर्मणिकिनप्रत्ययः।यद्वाअंतर्णीतण्यर्थात्कर्तर्येवकिन्।वध्याहिनासम्यक्स्नापयि
ताधोधयिताभवति।नलोकाव्ययेतिकर्मणिषष्ठ्याःप्रतिषेधः॥शिष्टः पादःप्रत्यक्षकृतः।हेइं
द्रत्वेनवमदेष्णुहर्षेषुहविषासुसाव्वजन्मेषुसत्सुप्रभ्रंताप्रभ्रंतानिप्रकर्षेणधृतानिपोषिता।
निवासर्वाणिभूतजातानिवासंन्नवंतसंगच्छंतेस्तोतुहवींषिचदातुंसमूहीभवंतीत्यर्थः।न
वतिगतिकर्मा।प्रपूर्वात्विभर्त्तेःकर्मणिनिष्ठा।कृः छंदसिबहुलमितिशलोपः।गतिरनंत
रइतिगातःप्रकृतिस्वरत्वं॥छ॥ ॥अपत्नीया॥ लेक्रतुमपिवंजंतिविश्वेहियदितिनिर्भ
वंसूनाः।स्वादोःस्वादीयःस्वादुनास्वजासमदःसमधुमधुनाभियोधीरिति॥हेइंद्रत्वेत्वयिसु
पांसुलुणितिसमस्मैकवचनस्यशेआदेशः।विश्वेसर्वेयजमानाःक्रतुमनुष्ठेयंकर्मवंजंति
समापयंति।अपिशब्दोब्राह्मणोक्तः सर्वभूतानांसवमनसांसमुच्चयार्थः सर्वाणिपृथिव्या
दीनिभूतानिसर्वेषांप्राणिनांमनांसिसर्वेयक्षःकृतवसव्यामेलाप्यवयजमानैःपरिसमाप्यं

© Dharmartha Trust J&K. Digitized by eGangotri

तदृत्स्यर्थः। तथा च ब्राह्मणं त्वयीमानि सर्वाणि भूतानि सर्वाणि मनांसि सर्वे ऋतवो पिंषंजती
सरत इत्याहेति। यद्घस्मादेते अस्मात्स्पर्द्धकाः॥ भवते स्वर्पणं यद्वीणं दीक्षो मत्स्य सयः स्वरत्व
रेत्साधिनावकाप्यपधर्योरूढं ईस्त्रायजमानाः पूर्वमेकाकिनः संतः पश्चाद्द्विः द्विवारं स्त्रीरू
पेण पुंरूपेण च जाताः संतः पुनरपत्येन सार्द्धं त्रिः त्रिवारं जन्मना जो भवंति। एक एव आत्मा स्त्री
पुंसरूपेण जायते। अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः पुत्रो प्यात्मैव। आत्मा वै पुत्रनामा
सीति श्रुतेः। यत एवमेति भिरूढं भवंति ततो वागम्यते च ष्वेव अनुष्ठितं सर्वं कर्म परिसमापयं
137 तीति॥ तथा च ब्राह्मणं। द्वौ द्वौ संतौ मिथुनौ प्रजायेते। प्राजापत्यादिति। हे इंद्र त्वं रम्वादो प्रियाद्रूद
धनादेरस्वादीयः स्वादुतरं प्रियतरं अपत्यं स्वादुना स्वादुभूतेन मिथुनेन मातापितृरूपेणात्मके
श्री न संसृज संयोजय। यद्वा स्वादुना मिथुनभावेनोत्पन्नं तदपत्यमपि संयोजय। एतदेवाह। अ
पत्यं मधुमधुरं मधुना मधुहेतुना मिथुनांतरेण पौत्रेणाभासुष्टुप् अभियोधीः। अभियोधिय
अभितः क्रीडय। धातूनामनेकार्थत्वात् युध्यतिरत्र क्रीडार्थे वर्त्तते। मिथुनं वै स्वादु प्रजा स्वादि
त्यादि ब्राह्मणमन्त्रानुसंधेयं॥ छ॥ ॥अथ त्रिकद्रुकेष्विति मंत्रो वा सक्तं तृतीयं सूक्तं तत्र प्र
थमा॥ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृंपत् सोममपिबद्विष्णुना सुतं यथावशं।
स ईं ममाद महि कर्म कर्त्तवे महामुरुं सैनं सश्चद्देवो देवं सत्य इंदुः सत्यमिंद्रमिति॥ महिषो

© Dharmartha Trust J&K. Digitized by eGangotri

महान्पूज्यः तुविशुष्मो बहुबलः तृंपत् । तृप प्रीणने तुदादिः । तृप्यन्निंद्रः त्रिकद्रुकेषु ज्यो
तिर्गौरायुरित्येतन्नामकेष्वाभिप्लविकेष्वहस्सु सुतमभिषुतं यवाशिरं यवमयैः सक्तुभि
र्मिश्रितं । आङ्पूर्वस्य श्रीणातेः क्विपि अपस्पृधेथामित्यादिना शिरादेशः । तं सोमं वि
ष्णुना सहापिबत् । यथावशः अवशात् पूर्वं यथा तं सोमममकामयत तथापिबत् । वशकांतौ । ब
हुलं छंदसीति शपो लुगभावः । पीतः स सोमः महां महांतमुरुं तेजसा विस्तीर्णमीमेनमिंद्रं म
माद्यत् अमादयत् । किमर्थं महि महत् वृत्रहननादिलक्षणं कर्म कर्त्तुं । स स इंदुः स्रवन्दे
वो दीप्यमानः स सोमः सत्यं यथार्थभूतं देवं सोमं कामयमानमीमेनमिंद्रमश्नवत । सश्चति
र्व्याप्तिकर्मा । व्याप्नोतु तं पतत्त्वपदिति पाठे । सत्य इंदुः सत्यमिंद्रं सत्यमिंद्रं सत्य इंदुरिति । अ
स्मिन्नृचे प्रसेकमृगवसाने प्रस्यपनपाठे ।। ६ ।। ।। अथ द्वितीया ।। साकं जातः क्रतुना साकमो
जसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः । दाता राधः स्तुवते काम्यं वसु प्रचे
तन सैनं सश्चद्देवो देवं सत्य इंदुः सत्यमिंद्रमिति ।। हे इंद्र त्वं क्रतुना कर्मणा प्रज्ञया वा साकं सह
जातः साकमोजसा बलेन ववक्षिथ विश्वं वोढुमिच्छसि । वहः सन्नंतस्य लिटि मं[illegible]सादाम्नभवा
ति । किंच हे प्रचेतन प्रकृष्टज्ञ । इंद्र त्वं वीर्यैः शत्रुहननादिलक्षणैः पराक्रमैः साकं वृद्धः मृधो
हिंसकान् संग्रामान् वा सासहिः । न लोकाव्ययेति षष्ठीप्रतिषेधः । तेषामभिभविता । विचर्षणिः ।

© Dharmartha Trust J&K. Digitized by eGangotri

पुण्यकृतोपुण्यकृतेश्च विशेषेणदृष्टा।स्तुवतेस्तोत्रं कुर्वाणाय यजमानाय राधः साधकं काम्यं
प्रार्थनीयं वसुधनंदाता सन्नववक्षियेतिसमन्वयः।सेनमितिपरोक्षनिर्देशः।सिद्धार्थश्चप्रचेतने
तिछंदोगानांविशेषपाठः॥७॥ ॥अथतृतीया॥ अधत्विषीमां अभ्योजसा कृविंयुधाभवदा
रोदसीअपृणदस्यमज्मनाप्रवावृधे।अधत्तान्यंजठरेप्रेमरिच्यतप्रचेतयसेनंशाश्चद्देवोदेवंस
सइंदुःसत्यमिंद्रमि॥अथायसोमपानादनंतरं त्विषिमान्दीप्तिमानिंद्रःतुजसाबलेनत्विषिन्ना
मासुरंयुधायुद्धेन अभ्यभवत अभिभूतवान्॥किंच।सइंद्रःरोदसीद्यावापृथिव्यौ आपृणने
स्वतेजसासमंतात्पूरयामास।तथा अस्यपीतस्यसोमस्यजन्मनाबलेनप्रवावृधे।प्रकर्षेणवृद्धि
ते।यद्वा अस्यकृविः असुरस्यजन्मनासा[illegible]रोदसीअपूरयत।सइंद्रोसोमंद्विधाविभज्य
अन्यंभागंस्वकीयेजठरेअधत्तसधत्त।ईमेनमपरंभागंदेवेभ्यःप्रारिच्यतप्रारेचयत्।एते
नर्द्धिंद्रोदेवतानांभूयिष्ठभाकृतम इति।हेइंद्रत्वंप्रचेतय।एवंभूतंसोमंदेवाश्चसम्यक्‌व्याप
यप्रापयेत्यर्थः।अन्यत्पूर्ववत्।प्रचेतयेतिविशेषपाठः॥७॥ ॥इतित्रयोदशोध्यायेषष्ठःखंडः॥
॥७॥ ॥वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्।पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥७॥इ
तिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येणविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्तराग्रंथेत्रयोदशोऽध्यायः॥वायस्व

© Dharmartha Trust J&K. Digitized by eGangotri

यो

निश्वसितं वेदा वेदेभ्योखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ छ॥ ॥अथ च
तुर्दशोध्याय आरभ्यते॥ तत्र प्रथमे खंडे अभिप्रगोपतिमिति त्र्यात्मकं प्रथमं सूक्तं तत्र
प्रथमा॥ अभिप्रगोपतिं गिरेंद्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिमिति॥ हे स्तोतः गोप
तिं गवां स्वामिनं इंद्रं अभि प्रार्च प्रकर्षेण पूजय गिरा स्तुत्या। यथा विदे। स यथा स्वात्मानं
स्तुतप्रकारं जानाति। यथा वा यागं प्रति गंतव्यमिति जानाति। तथार्चेति। कीदृशमिंद्रं सत्य
स्य यज्ञस्य सत्यस्य वा सूनुं पुत्रं तत्रानुरक्तत्वात् सूनुरित्युपचर्यते। सत्पतिं सतां पालकं॥
छ॥ अथ द्वितीया॥ आ हरयः ससृज्रिरेरुषीरधि बर्हिषि। यत्राभि संनवामहे इति
॥ हरयो हरितवर्णाः अश्वाः अरुषीरारोचमाना। अधि बर्हिषि॥ अधीति सप्तम्यर्था
नुवादी। बर्हिषि यास्तत्ते आ ससृज्रिरे आसृजंतु। यत्र यस्मिन् बर्हिषि स्थितमिंद्रमभिस
न्नवामहे अभिसंस्तुमः॥ छ॥ ॥अथ तृतीया॥ इंद्राय गाव आशिरं दुदुह्रे वज्रिणे मधु।
यत्सीमुपह्वरे विददिति॥ इंद्राय गावः आशिरमाश्रयणसाधनं पय आसिक्तं मधुमत्करं दु
दुहे दुदुहते। कीदृशाय। वज्रिणे वज्रयुक्ताय। यद्यत्र उपह्वरे समीपे वर्तमानं मधु सो
मरसं सीं सत्वनो विदत् लभते तदा॥ छ॥ ॥अथा नो विश्वास्विति प्रगाथात्मकं द्वितीयं सू
क्तं तत्र प्रथमा॥ आ नो विश्वासु हव्यमिंद्रं समत्सु भूषत। उप ब्रह्माणि सवनानि वृत्रहन्प

© Dharmartha Trust J&K. Digitized by eGangotri

रमाज्या ऋजीषमेति॥ हे ऋत्विजः विश्वासु सर्वासु समत्सु असुरयुद्धेषु हव्यं सर्वैर्देवैरात्मरक्ष
णार्थमाह्वातव्यमिंद्रमुद्दिश्य नोस्माकं यज्ञे ब्रह्माणि हवींषि पाएपन्ना निवा। तथा सवनानि
प्रातःसवनादीनि त्रीणि सयसा निवउपाभूषत उपसमीपे सम्यगलंकुरुत। हे वज्रन्वज्र
स्यासुरस्य पापस्य वाहंतः परमज्याः युद्धेषु शत्रुहननार्थं परमा अविनश्वरी ज्यामौर्वी य
स्य स तथोक्तः। यद्वा परमाणबलेन प्रकृष्टान् शत्रून् जिनाति हिनस्तीति परमज्याः। हे ऋजीष
मस्तुत्यास समत्सु भिरभिमुखीकरणीय। एवंभूतं द्वं अस्मदभिलषितानि प्रयच्छेति शेषः
।हव्यमिंद्रं समत्सु भूषत हव्य इंद्रः।सम ऋभूषतु इति पाठे॥ वज्रहन्नज्या ऋजीषमवस्तद्
परमज्या ऋजीषम इतिच पाठे॥ ६॥ ॥ अथ द्वितीया॥ त्वं दाता प्रथमो राधसामस्यसि स
139 स ईशानकृत्। तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः इति॥ हे इंद्र प्रथमः सर्वे
षां मुख्यस्त्वं राधसां धनानां दातासि। यद्वा धनदातॄणां मध्ये त्वं प्रथम आदिमो भवसि। त
था ईशानकृत् तव स्तोतॄन् ईशानान् ऐश्वर्ययुक्तान् कुर्वन्। त्वं सत्यः सत्यकर्मासि। यथार्थ
कर्मा भवसि ईसी सत्यः। यस्मादेवं तस्मात् वयं तुविद्युम्नस्य बहुधनवतो वृक्णस्य वा शवसो
बलस्य पुत्रस्य अतुवधार्थं बलकारणात्वेवी सन्नत्वात् बलपुत्रस्य अत एव महो महनस्तव
युज्या योग्यानि धनानि आवृणीमहे संभजामहे॥ ६॥ ॥ अथ प्रत्नं पीयूषमिति तत्वा समं

© Dharmartha Trust J&K. Digitized by eGangotri

तृतीयं सूक्तं तत्र प्रथमा॥ अत्र पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत। इन्द्रमभि
जायमानं समस्वरन्निति॥ दिवो द्युलोकात् तत्र स्थितैर्देवैः पीयूषं पातव्यं प्रत्नं पुराणं य
त्सोमरूपमन्नं उक्थ्यं प्रशस्यमस्ति। पूर्व्यं पुरातनं तं सोमरूपमन्नं महो महतः आगाहाद्गा
हनात् द्युलोकात् निरधुक्षत आभिमुख्येन निर्दुहंति। ततो दुग्धं मित्रमिंद्रमभिलक्ष्य जा
यमानं तं सोमं समस्वरन् स्तोतारः संस्तुवंति। प्रत्नं दिव इति पाठे॥ ७॥ अथ द्वितीया॥
आदीं केचित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषता। दिवो न वारं सविता व्यूर्णुत इ
ति॥ आदनंतरं पश्यमानासः एवं पश्यंतो दिव्या दिविभवाः॥ वसुरुचो नाम केचिदाप्यं बंधु
षु साधुं इमिनं सोमं अभ्यनूषत अभ्यस्तुवन्। कस्मादनंतरमिति। उच्यते। दिवो देवः द्यो
तमानः॥ सविता सर्वस्य प्रेरकः सूर्यः वारमावरकमंधकारं न व्यूर्णुते नापगमयति। तदेनमस्तु
वन्। सूर्यदीप्तात्प्रागेव हि सोमं स्तुवंति खलु। दिवो न वारं वारं न देव इति पाठे॥ ८॥ अथ तृती
या॥ अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना। यूथे न निष्ठा वृषभो विरा
जसीति॥ हे पवमान सोम अथानंतरं यद्यदा इमे रोदसी द्यावापृथिव्यौ इमा इमानि विश्वा
विश्वानि भुवना भूतजातानि च मज्मना बलेन विराजसि विशेषेण राजयसि। स त्वं तथा भु
वनि भुवनेषु वितिष्ठसे इति शेषः। तत्र दृष्टांतः। यूथे न यथा कश्चिद्वृषभः यूथे गवां वृंदे निष्ठा

© Dharmartha Trust J&K. Digitized by eGangotri

निष्ठितः सन्सर्वगा अलंकुरुते तद्वत्। विराजसि वितिष्ठस इति पाठौ॥छ॥ ॥इममूषु
तित्र्यात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसं। अग्ने देवे
षु प्रवोचइति॥ हे अग्ने त्वमस्माकमस्मत्संबंधिनं इममू षु पुरोडाशानुष्ठीयमानमपि सनिं
हविर्दानं नव्यांसं नवतरं गायत्रं स्तुतिरूपं वचोपि देवेषु देवानामग्रे प्रवोचः प्रकर्षेण ब्रूहि॥
॥छ॥ अथ द्वितीया॥ विभक्तासि चित्रभानो सिंधोरूर्मा उपाक आ। सद्यो दाशुषे क्षरसीति
॥ हे चित्रभानो विचित्ररश्मियुक्ताग्ने विभक्ता विशिष्टस्य धनस्य प्रापयितासि भवसि॥
तत्र दृष्टांत उच्यते॥ आकार उपमार्थः। यथा सिंधोर्नद्या उपाके समीपे ऊर्मी ऊर्मिस्तरंगो प
लतं कुल्यादिरूपं प्रवाहं विभजंति। तद्वत्। दाशुषे हविर्दत्तवते यजमानाय सद्यः तदानीमे
व क्षरसि। कर्मफलरूपं वर्षं करोषि॥छ॥ अथ तृतीया॥ आ नो भज परमेष्वा वाजेषु मध्य
मेषु। शिक्षा वस्वो अंतमस्येति। हे अग्ने परमेषूत्कृष्टेषु द्युलोकेषु वर्त्तिषु वाजेष्वन्नेषु नो
स्मान् आभज सर्वतः प्रापय। मध्यमेषु अंतरिक्षलोकेषु वर्त्तिषु वाजेष्वाजेष्वाभज। अंतमस्या
तिकतमस्य भूलोकस्य संबंधी निवस्वो वसूनि शिक्ष देहि॥छ॥ ॥अहमिद्धीति त्र्यात्मकं
पंचमं सूक्तं तत्र प्रथमा॥ अहमिद्धि पितुः परि मेधामृतस्य जग्रह। अहं सूर्य इवाजनीति
॥ पितुः पालकस्य ऋतस्य सत्यस्य आवितथस्येंद्रस्य मेधामनुग्रहात्मिकां बुद्धिं अहमितः अ

© Dharmartha Trust J&K. Digitized by eGangotri

हमेवपरिजग्रहपरिगृहीतवान्ऽस्मिन्नात्मोहियस्मादेवंतस्मात्ऽअहंसूर्यइवाजनि।सूर्यो
यथाप्रकाशमानःसन्प्रादुर्भवसि।तथाजनिषंप्रादुरभूवं।जग्रहजग्रभेतिपाठौ॥छ॥अ
थद्वितीया॥अहंप्रत्नेनजन्मना।गिरःशुंभामिकण्ववत्।येनेंद्रःशुष्ममिद्दधइति॥येनस्तोत्र
सहभूतेनेंद्रःशुष्मंशत्रूणांशोषकंबलंदधत्धत्तएवधारयत्येव।यस्तोत्रमिंद्रस्यांबल
मवर्धयज्जनयतितंतस्तोत्रमलंकरोमीत्यर्थः।जन्मनामन्मनेतिपाठौ॥छ॥अथतृतीया॥
येत्वामिंद्रनतुष्टुवुरृषयोयेचतुष्टुवुः।ममेद्वर्धस्वसुष्टुतइति॥हेइंद्रयेजनास्त्वांनतुष्टुवुःन
स्तुवंति।येचऋषयोमंत्राणांद्रष्टारोजनाःतुष्टुवुस्त्वांस्तुवंति।उभयेषांमध्येममेतत्।ममैवत्व
स्तोत्रेणसुष्टुतःशोभनंस्तुतःसन्वर्धस्ववृद्धोभव॥छ॥ ॥इतिचतुर्दशेध्यायेप्रथमःखंडः॥
॥छ॥ ॥अथद्वितीयखंडेअग्नेविश्वेभिरग्निभिरितित्र्यचात्मकंप्रथमंसूक्तं।तत्रप्रथमा॥अग्ने
विश्वेभिरग्निभिर्जोषिब्रह्मसहस्कृत।येदेवत्रायआयुषुतेभिर्नोमहयागिरः॥इति॥हेसह
स्कृतसहसाबलेनकृतउत्पादितहेअग्नेविश्वेभिर्विश्वैःसर्वैर्यैस्मव्यतयास्थितैरग्निभिः
सहब्रह्मअस्माभिःक्रियमाणंस्तोत्रंहवीरूपमन्नंवाजोषिजुषस्वसेवस्व।किंच।येदेवत्रा
येग्नयोदेवेषुवर्त्तंते।देवमनुष्येतिसप्तम्यर्थेत्राप्रत्ययः।यआयुषु।येचाग्नयोमनुष्येषुवर्त्तं
तेतेभिस्तैःसर्वैरग्निभिःसहनोऽस्माकंगिरःस्तुतिलक्षणावाचःसहयपूजय॥छ॥अथद्वि

© Dharmartha Trust J&K. Digitized by eGangotri

तीया॥ आ स विश्वेभिरग्निभिरग्निः स यस्य वाजिनः। तनये तोके अस्मदा सम्यङ्वाजैः परी
वृत इति॥ यस्य वाजिनः यस्याग्नेः वाजिनो हविर्लक्षणान्नवंतः अनेके यष्टारः संति। सोग्नि
र्विश्वेभिर्विश्वैः सर्वैर्यष्टव्यतया स्थितैरग्निभिः सह। एकसूक्त ह्यनुवाकः। अस्मत् इति अस्मा
सु। सुपां सुलुगिति अम्प्रत्ययस्य लुक्। आङोरुपसर्गयोः श्रवणादुचितक्रियाध्याहारः। आगच्छतु
सम्यङ् यथावत्कालातिक्रमणेनेत्यर्थः। कथंभूतः वाजैः परिवृतः। वाद्युचितक्रियाध्याहारः। आ
गच्छतु सम्यङ् यथावत्कालानतिक्रमेणेत्यर्थः। कथंभूतः वाजैः परिवृतः। वाजैरस्मभ्यं दातव्यै
रन्नैः परिवृतः परिवेष्टितः संहित इत्यर्थः। न केवलमस्मास्वेव यज्ञादिसिद्ध्यर्थं अन्नैः परिवृतो
ग्निरागच्छतु। किं तर्हि तनये अस्मत्पुत्रे आगच्छतु। न केवलं पुत्रे तोके पुत्रपुत्रेपि। दातव्यैर्वाजैः
परिवृतोग्निरागच्छतु। इति परोक्षवत्सोग्निः स्तूयते। अस्मदृशो वाग्निसाध्यक्रियानुपरमः
प्रार्थ्यते॥७॥ अथ तृतीया॥ त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्द्धय। त्वं नो देवतातये रायो दाना
य चोदयेति॥ हे अग्ने त्वं अग्निभिस्त्वद्विभूतिभिर्भूतैरन्यैरग्निभिः सार्द्धं नोस्माकं ब्रह्म स्तोत्रं य
ज्ञं च वर्द्धय॥ तथा त्वं नोस्माकं देवतातये यजनायैतत्। यागार्थं रायो धनस्य दानाय प्रदानाय चो
दय दातृन् प्रेरय॥७॥ ॥ अथ त्वं सोमेति त्र्यात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ त्वं सोम प्रथमा
वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः। स त्वं नो वीर वीर्याय चोदयेति॥ हे सोम प्रथमाः पुरात

141

१४१

© Dharmartha Trust J&K. Digitized by eGangotri

नाःयद्वायस्त्वेनसर्वेषांज्जनानांमुख्याःत्वक्तबर्हिषःछिन्नबर्हिः।येयंशार्यमितिवृक्तब
र्हिषोयजमानाःमहेमहतेवाजायबलायअवधसेन्नायवधियंवृधितेत्वयिदधुनिहितवं
तः।तस्मात्हवीरसमर्यसोमसनाहन्नास्त्वंनोस्मानपिसंग्रामेवीर्यायसामर्थ्यायिचोदयप्र
रय।यद्वावीर्य्यायवीरपुत्रेभवायमुखायानुप्रेरय॥छ॥ ॥अथद्वितीया॥अभ्यभिहिश्रव
साततर्दिथोत्सन्नकंचिज्जनपानमक्षितं।शर्य्याभिर्नभरमाणोगभस्त्योरिति।हेसोमत्वं
अवसाअन्नेनहेतुनाअभ्यभिनततर्दिथहिपविनममभित्वस्मावानसिछिन्नवानसि।तत्र
दृष्टांतदृयं।उत्सन्न।यथाकश्चिज्जनपानंअस्मिन्जनाउदकंपिबंति।तंअक्षितमक्षीणंकंचित
कूपंवन।उत्संउत्सरणशीलंवाप्यादिकंअभित्वणत्ति।यथावाकश्चित्गभस्त्योबाह्वोःशर्य्या
भिरंगुलीभिभरमाणउदकंसंभरन्कंविदभित्वणत्ति।तद्वत्॥छ॥अथतृतीया॥अजा
जनेपचअमृतमर्त्यकन्नतस्यधर्मन्नमृतस्यचारुणः।सदासरोवाजमछासनिष्यदत्इ
ति॥हेअमृतअमरणधर्मरहितसोमत्वंऋतस्यसत्यभूतस्यचारुणःकल्याणस्यअमृतस्यो
दकस्यधर्मन्धारकेंतरिक्षेकंसूर्यंमर्त्यायमनुष्यायार्थंअजीजनः।किंचासनिष्यदत्संभजन्
देवान्सत्वंवाजेनेछसंग्राममभिलक्ष्यसदासरःसरसगछसिमर्त्यायकंमर्त्येष्वितिपाठे
॥छ॥ ॥अथेंदुमिंद्रायेतितृचात्मकंतृतीयंसूक्तंतत्रप्रथमा॥ऐंदुमिंद्रायसिंचतपिबातिसो

© Dharmartha Trust J&K. Digitized by eGangotri

म्यं मधु। मराधांसि चोदयते महित्वनेति॥ हे ऋत्विजः इंदुं स्यंदनशीलं सोमं इंद्राय यं प्रार्थना सिंच
त। आ। अयणं द्राव्यणं सेचनं कुरुत। अभिषुणुतेत्यर्थः। तत् सोम्यं सोममयं मधुमत्करं सो।
मरसं पिबामि पिबतु। पीत्वा च स इंद्रः महित्वना स्वमहित्वेनैव राधांसि धनानि स्तोतृभ्यः प्रचो
दयते प्रकर्षेण चोदयति प्रेरयति। मराधांसि मराधसेति पाठो॥ चोदयते चोदयानइति॥ १३॥ ॥
अथ द्वितीया॥ उपो हरीणां पतिं राधः पृंचंतमब्रवं। नूनं श्रुधि स्तुवतो अश्व्यस्येति॥ हरीणां ह
रितवर्णानां अश्वानां पतिं पालयितारं। राधः धनं पृंचंतं। पृची संपर्के स्तोतृषु संयोजयंतं वद
मित्यर्थः। एतादृशमिंद्रं उपो अब्रुवं अतिशयेनाहं स्तोत्रं करवाणि। अश्व्यस्य। व्यश्वो नामर्षि
रश्वशब्देनोच्यते तस्य पुत्रस्य स्तुवतः स्तोत्रं कुर्वतो मम संबंधिनीं हे इंद्र त्वद्विषयां स्तुतिं नूनं सं
प्रति श्रुधि शृणु। राधो दस्मिति पाठो॥ १४॥ ॥ अथ तृतीया॥ नह्यंग पुरा चन जज्ञे वीरतरस्त्व
त्। न की राया नैवथा न भंदनेति॥ हे इंद्र त्वत् त्वत्तः पुरा पूर्वं वीरतरः सामर्थ्यवान् कश्चिन्न हि
जज्ञे न जातः खलु। अंग प्रसिद्धौ। त्वमेव सामर्थ्यवान् जात इत्यर्थः। किंच त्वत्तोपि राया ध
नेन सामर्थ्येन किर्न कश्चिदस्ति। तथा एवथा अस्मान् पुराणि संग्रामे वा प्रतिगमनेन त्वत्तो धि
कोन जातः। यद्वा एवथा। अव रक्षणादिषु। अकारस्यैकारश्छांदसः। उणादिकोऽथप्रत्ययः
शरणागतानां रक्षणेन वा अवनेन त्वत्तोऽपि कोनास्ति। किंच। भंदना भंदतिः स्तुतिकर्मा स्तु

142

© Dharmartha Trust J&K. Digitized by eGangotri .

सश्चत्व दधिकोनजातः। नवा अस्य ह्रक्षकः स्नुसश्चत्वन्नोम्योजक्षरति॥छ॥ ॥अथनरं
वइतिचतुर्थसूक्तोक्तिकैषा॥ नरंव ३ दतीनांनरं योयुवतीनां। पतिंवोअघ्न्यानांधेनूनामि
षुध्यसीति॥नु दतीनांनुदत्युउषसः नुदतीभास्वतीतितन्नामेषुपाठात्। तासान्नरं उत्स्या
दकमिसर्पः। इंद्रेणह्यषसउसोयंतेइंद्रस्यैवसूर्यस्य। विवस्वदिंद्रयुंसइंद्रइतिद्यास्या
दिसमध्येइंद्रःपठितास्तास्यामिंद्रहेयजमानात्वायुष्मदर्थंआह्वयेइत्सर्पः। तथायोयु
वतीनांसर्वत्रमिश्रयंतीनांनदीनांमाध्ययितारंवोयुष्मदर्थंआह्वयामि। अघ्न्यानांअहंतव्या
नांगवांपतिंआह्वये। अथप्रत्यक्षकृतः। हेयजमानत्वंधेनूनांक्षीरादिनाप्रीणयित्रीणां
गवामिषुध्यस्यन्नमिच्छसि॥छ॥ ॥इतिचतुर्दशोऽध्याये द्वितीयः खंडः॥छ॥ ॥अथतृ
तीयखंडे देवोवोद्रविणोदाइतिप्रगाथात्मकंप्रथमंसूक्तं तत्रप्रथमा॥ देवोवोद्रविणोदाःपूर्णां
विवष्ट्वासिचं। उद्वासिंचध्वमुपवापृणध्वमादिद्वोदेवओहतइति॥ द्रविणोदाःधनानांदाता।
देवोग्निः वोयुष्मदीयांपूर्णांहविषाआसिचंआसिक्तांस्रुचंविवष्टु कामयतां। उन्नउत्सिंच
ध्वंवासोमेनपात्रमुपपृणध्वंवासोमं। धाराष्टोसमुच्चयार्थो। अथयदहेणहोतृत्वमसंपूरय
नवअग्नयेसोमंयच्छतत्वेत्सर्पः। आदित्यनंतरमेवदेवोग्निर्वयुष्मान्तुहतेवहति। विवष्टु
विवष्टीतिपाठौ॥छ॥ ॥अथद्वितीया॥ तंहोतारमध्वरस्यप्रचेतसंवन्हिंदेवाअकृण्वतोर

© Dharmartha Trust J&K. Digitized by eGangotri

143 सोऽग्निरदर्शि प्रादुरभूत् । किंच सुजातं सम्यक्प्रादुर्भूतं आर्यस्य उत्तमवर्णस्य वर्द्ध

धातिरस्कृद्विधते सुवीर्य्यमग्निर्जनाय दाशुषइति ॥ देवाः प्रचेतसं प्रकृष्टमनितमग्निं अध्वरस्य यज्ञस्य मध्ये स्वन्तिं वोढारं होतारं वा कृण्वत अकुर्वन् । किमर्थमित्यत आह । स त्वाग्निर्विध्यते परिचरते दाशुषे हविषां प्रदात्रे जनाय सुवीर्य्यं शोभनवीर्योपेतं रत्नं रमणीयं धनं दधाति दधात्विति ॥७॥ ॥ अस्तावीति त्र्यृचात्मकं तृतीयं सूक्तं तत्र प्रथमा ॥ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः । उपो षु जातमार्यस्य वर्द्धनमग्निं नक्षन्तु नो गिर इति ॥ यस्मिन्नग्नौ व्रतानि कर्माणि आदधुर्यजमानाः आहितवन्तः गातुवित्तमो अतिशयेन मार्गाणां ज्ञाता ।

नं वर्द्धयितारमग्निं नोऽस्माकं गिरः स्तुतिरूपा वाचः उपो नक्षन्तु उपगच्छन्तु नक्षगताविति धातुः । नक्षन्तु नक्षन्तेति पाठो ॥ अ ७ ॥ अथ द्वितीया ॥ यस्माद्रेजन्त कृष्टयः चर्कृत्यानि कृण्वतः ॥ सहस्रसां मेधसाताविव त्मनाग्निं धीभिर्नमस्यतेति ॥ यस्मात्कारणात् चर्कृत्यानि कर्त्तव्यानि कर्माणि कृण्वतः कुर्वाणा मनुष्याः कृष्टयः इतरे मनुष्याः रेजन्त कंपन्ते तस्मादिदानीं हे मदीया जनाः अयं सहस्रसां गवां धनानां वा सहस्रस्य दातारमग्निं मेधसातौ यज्ञे धीभिः कर्त्तव्यैः कर्मभिः त्मना आत्मनैव नमस्यत परिचरत । नमस्यतेति सपर्यतेति पाठो ॥७॥ अथ तृतीया ॥ प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना । अनु मातरं पृथिवीं वि वावृते तस्थौ ना

© Dharmartha Trust J&K. Digitized by eGangotri

कस्य शार्म्मणि ॥ मरेस्वो दासः दिवो घसेनाहूयमानोऽग्निः मातरं सर्वस्य लोकस्य धारणवलात् पृथि
वीमाततां पृथिवीं अनु प्रतिनप्रविवा। रते देवान्प्रतिहविर्वोढुं विशेषेण न प्रवर्त्तयति यस्मादेनम्
अ॰ ऽग्निं दिवो घसोमज्म्ना ख़्लेनाहुहाव तस्मात् यमग्निर्न किस्य स्वर्गस्य देवो घोनमानइंद्रः परमै
श्वर्ययुक्तः शार्मणि गृहे स्वायतन एव तस्थावतिष्ठत् ॥ ६ ॥ ॥ अथाग्न आयूंषीति त्र्यात्मकं तृ
तीयं सूक्तं तत्र प्रथमा ॥ अग्न आयूंषि पवस इति प्रतीकमिदं साचान्यत्राम्नाता ॥ अथ द्वितीया
॥ अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः । तमीमहे महागयमिति ॥ पांचजन्याः निषादपं
चमाश्चत्वारो वर्णाः पंचजनाः यद्वा गंधर्वाः पितरो देवा असुरा रक्षांसीत्येते पंचजनाः । अथवा दे
वमनुष्यगंधर्वाप्सरससर्प्पाः पितर इति ब्राह्मणेऽभिहिताः पंचजना गंभीरा इंद्रः अइस त्रवहिर्दे
वपंचदेवेभ्य इति वक्तव्य इति वचनात् तत्र ञ्यः प्रत्ययः ॥ तेषां हितः अभीष्टप्रदानेन स्वभूताः । ऋषिः स
र्वस्य द्रष्टा । पवमानः पवमानरूपोऽग्निः पुरोहितः कर्मार्थमृत्विग्भिः पुरतो निहितः । तं पूर्वोक्तलक्ष
णं महागयं महागृहं रयिदेवादिभिर्गंतव्यं । महांति प्रभूतानि यस्य गृहाणि यस्य वा सर्वतथोक्तं
स्तं पवमान गुणविशिष्टं ईमहे धनादीनि याचामहे ॥ ६ ॥ अथ तृतीया ॥ अग्ने पवस्व स्वपा अ
स्मे वर्चः सुवीर्यं । दधद्रयिं मयि पोषमिति ॥ हे अग्ने स्वपाः सो अस्मे नसीइ तिउत्तरपदाद्य कर्त्तुत्वं । शो
भनकर्मा त्वं अस्मे अस्मासु सुवीर्यं शोभनवीर्योपेतं वर्चो दीप्तौ । तेजः पवस्व आगमय । तथा भवा

© Dharmartha Trust J&K. Digitized by eGangotri

नरयिंधनंवापोषं।भावेकर्म्मणिवाघञ्।पुष्टंपुष्टिं।यद्वागवादिकंमपिदधतद्दधातुकरोतीत्यर्थः।।
दधातेर्लेटिअडागमेघोर्लोपोलेटिवेत्याकारलोपः।।७।। ।।अथाग्नेपावकेतित्र्यात्मकंचतुर्थं
सूक्तंतत्रप्रथमा।।७।। ।।अग्नेपावकरोचिषामंद्रयादेवजिह्वया।आदेवान्वक्षियक्षिचेति।।हे
पावकशोधकरोचिषास्वदीप्त्यामंद्रयादेवानांमादयित्र्याजिह्वयात्वंहेदेवद्योतमानाग्नेदेवानाव
क्षिआवह।यज्ञार्थंयक्षिचतान्यजः।।७।।अथद्वितीया।।तंत्वाघृतस्नवीमहेचित्रभानोस्वर्दृशं।।
देवांआवीतयेवहेति।।हेघृतस्नोघृतस्यप्रेरकयद्वाघृतेनजनितहेचित्रभानोचित्राःनानावि
धाभानवोरश्मयोयस्यासौचित्रभानुस्तस्यसंबोधनंस्वर्दृशंसर्वस्यद्रष्टारंतंत्वामामहेयाचाम
हे।अस्मतोवीतयेहविषांभक्षणाययेत्यानावह।।७।।अथतृतीया।।वीतिहोत्रंत्वाकवेद्युमंतंसमि
धीमहि।अग्नेबृहंतमध्वरइति।।हेकवेक्रांतदर्शिन्नग्नेवीतिहोत्रंक्रांतयज्ञं।यद्वाप्रिययज्ञंद्यु
मंतंदीप्तिमंतं।बृहंतंमहांतंत्वांत्वांअध्वरेयज्ञेसमिधीमहिसमिद्भिःसंदीपयामः।।७।। ।।इति
चतुर्दशोऽध्यायेतृतीयःखंडः।।७।। ।।अथचतुर्थखंडेएवानोअग्नइतित्र्यात्मकंप्रथमंसूक्तं
तत्रप्रथमा।।एवानोअग्नसमितिभिर्गायत्रस्यप्रभर्म्मणि।विश्वासुधीष्ववंद्येति।।विश्वासुधीषु
सर्वेषुकर्म्मसुवंद्यस्तुत्यहेअग्नेगायत्रस्यगायत्रसाम्नःगायत्रीछंदस्कस्यसूक्तस्यवाप्रभर्म्म
णिप्रभरणेसंपादनेनिमित्तभूतेसतिनोस्मान्समितिभिस्त्वदीपैःपालनैरवरक्ष।घ्वोतस्तिउइति

१४४

© Dharmartha Trust J&K. Digitized by eGangotri

संहितायां दीर्घत्वं ॥ छ ॥ अथ द्वितीया ॥ आ नो अग्ने रयिं भर सत्रासाहं वरेण्यं । विश्वासु पृ
त्सु दुष्टरमिति ॥ हे अग्ने रयिं धनं नोस्मभ्यम् आभर प्रयच्छ । कीदृशं सत्रासाहं सत्रा सह शत्रु
गणं सहते अभिभवति शत्रुनाशकं । वरेण्यं सर्वैर्वरणीयं । विश्वासु पृत्सु सर्वेषु संग्रामेषु दुष्टरं त्वभि
स्तरीतुमशक्यं ॥ छ ॥ अथ तृतीया ॥ आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसं । मार्डीकं धे
हि जीवसे इति ॥ हे अग्ने नोस्मभ्यं जीवसे जीवनाय सुचेतुना शोभनेन युक्तं रयिं धनम् आधेहि
। आस्थापय । कीदृशं मार्डीकं मृडीकं सुखं तद्धेतुभूतं विश्वायुपोषसं सर्वस्मिन्नायुषि देह
देः पोषकं । यावज्जीवमस्मदुपभोगं धृयादित्यर्थः ॥ छ ॥ ॥ अग्निं हिन्वंतीति पंचर्चं द्विती
यं सूक्तं तत्र प्रथमा ॥ अग्निं हिन्वंतु नो धियः सप्तिमाशुमिवाजिषु । तेन जेष्म धनं धनमिति ॥
नोस्माकं धियः कर्माणि स्तुतयो वा अग्निं हिन्वंतु प्रेरयंतु यागाय प्रयोजयंतु वर्द्धयंतु वा हि
गतौ वृद्धौ चात्र दृष्टांतः । आजिषु संग्रामेषु आशुं शीघ्रगामिनं सप्तिमिव । सर्पणशी
लमश्वं यथा योद्धारः प्रेरयंति तद्वत् । तेनाग्निना धनं धनं सर्वं धनं जेष्म वयं जयेम ॥ छ ॥ अ
थ द्वितीया ॥ यया गा आकरामहे सेनयाग्ने तवोत्या । तां नो हिन्व मघत्तय इति ॥ हे अग्ने सेन
या इनेन सह वर्त्तमानया सेनारूपया अवापयाऽनवोत्या रक्षया गा आकरामहे । आभिमुख्येन
करवामहे । लभामहा इत्यर्थः । तां मूतिं नोस्मान् हिन्व गमय । किमर्थं । मघत्तये धनस्य दानार्थं

© Dharmartha Trust J&K. Digitized by eGangotri

145

अस्माकं धनलाभायेत्यर्थः। करामहै करामह इति पाठो॥ ७॥ अथ तृतीया॥ आग्ने स्थूरं रयिं
भर पृथुं गोमंतमश्विनं। अंग्धि खं वर्त्तया पविमिति॥ हे अग्ने स्थूरं स्थूलं वृद्धं। पृथुं विस्ती
र्णं गोमंतं गोभिर्युक्तं अश्विनं अश्वैर्व्यापेतं। आभर अस्मभ्यमाहर प्रयच्छ। किंच। खं मंत
रिक्षं अंग्धि रश्मिद्रकैः सिंच। यद्वा आत्मीयैस्तेजोभिः व्यंजय प्रकाशय। पविं आयुधं वर्त्त
य अस्मद्विरोधिषु प्रवर्त्तय। पविं पणिमिति पाठो॥ ७॥ अथ चतुर्थी॥ अग्ने नक्षत्रमजरमा
सुवीर्यं रोहयो दिवि। दधज्ज्योतिर्जनेभ्य इति॥ हे अग्ने नक्षत्रं न क्षति सततं गच्छतीति नक्षत्रः
न क्षिणतो अभिनक्षीसास्त्रो अत्रन् प्रत्ययः। सततं गंतारं अजरं जरारहितं। सूर्यं सर्वस्य
प्रेरकमादित्यं दिव्यंतरिक्षे आरोहयः। उपर्यवस्थापितवानसि येद्वा नक्षत्रं कृत्तिकादिकं सू
र्यं च दिव्यारोहयः। किं कुर्वन्। रजनेभ्यः सर्वेभ्यः प्राणिभ्यः व्यवहारार्थं ज्योतिः प्रकाशं दधत्
विदधत् कुर्वन्। यथा सर्वेषां प्रकाशो भवति। तथा उन्नते देशे सूर्यमिगमय इत्यर्थः॥ ७॥ अथ
पंचमी॥ अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत्। बोधा स्तोत्रे वयो दधदिति॥ हे अग्ने विशां
प्रजानां यजमानानां केतुः केतयिता सिक्षापयिता भवसि। अत एव प्रेष्ठः प्रियतमः श्रेष्ठः प्रश
स्यतमश्च भवसि। स त्वं उपस्थसत् उपस्थाने यज्ञगृहे निषीदन्। बोध अस्मदीयं स्तोत्रमव
गतय किं कुर्वन् स्तोत्रे स्तुवते जनाय वयोन्नं दधत्। विदधत् कुर्वन् प्रयच्छन्॥ ७॥ ॥ अथाग्नि

© Dharmartha Trust J&K. Digitized by eGangotri

मूर्द्धेति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा ॥ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं । अपां
रेतांसि जिन्वतीति ॥ मूर्द्धा देवानां श्रेष्ठः दिवो द्युलोकस्य ककुत् उच्छ्रितः पृथिव्याश्च पतिरयम
ग्निरपां रेतांसि स्थावरजंगमात्मकानि भूतानि जिन्वति प्रीणयति ॥ छ ॥ ॥ अथ द्वितीया ॥
ईशिषे वार्य्यस्य हि दात्रस्याग्नेः स्वःपतिः । स्तोता स्यां तव शर्म्मणीति ॥ हे अग्ने स्वःपतिः स्वर्ग
स्य स्वामी त्वं वार्य्यस्य वरणीयस्य दात्रस्य दातव्यस्य धनस्य ईशिषे ईश्वरोसि । शर्मणि सुखे नि
मित्ते तव स्तोता स्यां भवेयं ॥ छ ॥ अथ तृतीया ॥ उदग्ने शुचयस्तव शुक्रा भ्राजंत ईरते । तव ज्योतीं
षि अर्चय इति ॥ हे अग्ने तेन तव शुचयो निर्म्मलाः शुक्राः शुक्लवर्णाः भ्राजंतो दीप्यमानाः अ
र्चयः प्रभाः तव ज्योतीषि तेजांसि उदीरते प्रेरयं ॥ छ ॥ इति चतुर्दशाध्याये चतुर्थः खंडः ॥ छ ॥ ॥
॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ छ ॥ ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे चतुर्दशोऽध्यायः ॥ छ ॥ ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्म्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ छ ॥ ॥ अ
थ पंचदशोध्याय आरभ्यते ॥ तत्र प्रथमखंडे कस्ते जामिर्जनानामिति तृचात्मकं प्रथमं सूक्तं प्र
थमा ॥ कस्ते जामिर्जनानामग्ने को दाश्वध्वरः । को ह कस्मिन्नसि श्रित इति ॥ हे अग्ने जनानां मनु

© Dharmartha Trust J&K. Digitized by eGangotri

ष्याणां मध्ये तेतव को जामिको बंधुः। त्वं सर्वैर्गुणैरधिकोसि। न वानुरूपो बंधुर्नास्तीति भावः॥
कोदाश्वध्वरः दाशुष्टो अध्वरो यज्ञो येन स तथोक्तः। त्वां पष्ठुमपि समर्थः कोपि नास्तीत्यर्थः।
कोह त्वं कथं सूतः त्वमीदृग्रूप इति सर्वैर्न विज्ञायसे इत्यर्थः। कस्मिन् स्थाने श्रित आश्रितोसि भव
सि वर्त्तसे तत्स्थानमपि न केन विज्ञायते। अतस्त्वमस्माभिर्म्मांसदृष्टिभिः कथमुपलब्धुमर्ह
स्यग्निः प्रशस्यते॥छ॥ अथ द्वितीया॥ त्वं जामिर्जनानामग्ने मित्रो असि प्रियः। सखा सखि
भ्य ईड्य इति॥ हे अग्ने त्वं उक्तप्रकारेण विश्वरूपोपि अनुगृहीत्तनया सर्वेषां जनानां जामिर्बं
धुरसि। तथा प्रियः प्रीणयिता त्वं यजमानानां मित्रः प्रमीतेस्त्राता सि। ईड्यः स्तुतिभिः स्तुत्य
स्त्वं सखिभ्यः समानख्यानेभ्यः ऋत्विग्भ्यः सखा सखिवद् त्वं तं प्रियोसि॥छ॥ अथ तृतीया
॥यजानो मित्रावरुणा यजा देवां ऋतं बृहत्। अग्ने यक्षि स्वं दममिति॥ हे अग्ने नो स्मदर्थं मित्रा
वरुणा एतन्नामकौ देवौ यज हविषा पूजय। तथा देवान् इन्द्रादीन्यज पूजय। ऋतं सत्यं यथार्थफलं
प्रदं च यजे सेव। तदर्थं बृहत् प्रौढं स्वं स्वकीयं दमं यज्ञगृहं यक्षि यजसे गच्छ स्वात्वयि अन्तर्विद्य
माने सति हि यज्ञगृहं पूज्यते॥छ॥ ॥अथ द्वितीयत्र्चे प्रथमा॥ ईड्योनमस्यस्तिरस्तमांसि
दर्शतः॥ समग्निरिध्यते वृषेति॥ ईड्यः स्तोतृभिरीड्यः अत एव नमस्यः सर्वैर्नमस्कार्यः तमां
सि तिरः। ध्वान्तानि स्वप्रभाभिस्तिरस्कुर्वन् दर्शतः कमनीयतया सर्वैर्दर्शनीयः। तादृशोग्निर्वृ

© Dharmartha Trust J&K. Digitized by eGangotri

षायजमानस्यकामानांवर्षितासमिध्यते। आहुतिप्रक्षेपेणप्रज्वाल्यते उक्तार्थेवाजसने
यकं ईडेन्योह्येषनमस्योह्येषतिरस्तमांसिदृश्यःसमिद्ध इति॥छ॥ अथद्वितीया॥ वृषो
अग्निःसमिध्यतेअश्वोनदेववाहनः। तंहविष्मंतईडतइति। वृषोवृषेवकामानांवर्षिता।
देववाहनः। देवान्हवींषिवावाहयतिप्रापयतीतिदेववाहनः। तत्रदृष्टांतः। अश्वोनयथाश्वो
राजानंवाहयति। स्वपुरंप्रापयतीतिवाहनमश्वस्तद्वत्। वाहनभूतोयोऽग्निःसमिध्यते आ
हुतिप्रदानेनसंप्रदीप्यते। तंतादृशमग्निंहविष्मंतःसंभृतहविष्कायजमानाः ईडतेकर्म
सिध्यर्थंस्तुवंति॥छ॥ अथतृतीया॥ वृषणंत्वावयंवृषन्वृषणःसमिधीमहि। अग्नेदी
द्यतंबृहदिति। वृषन्कामानांवर्षितर्हे अग्ने। वृषणोवृषाणःघृताद्याहुतीनांसेक्तारोवयं।
वृषणं आहुतिद्वाराउत्कृष्टसेक्तारंत्वां। यथावृष्टिः। अग्नौप्रास्ताहुतिःसम्यगादित्यमुप
तिष्ठते। आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति॥ दीद्यतंदीप्यमानं। बृहत्। अतएव
महांतंत्वां। इममग्निंसमिधीमहिसंप्रदीपयामः॥छ॥ ॥तृतीयत्वेप्रथमा॥ उत्तेबृहं
तोअर्चयःसमिधानस्यदीदिवः। अग्नेशुक्रासईरतइति॥ हेदीदिवोदीप्ताग्नेसमिधानस्यस
मिध्यमानस्यतेतवबृहंतोमहांतःशुक्रासोधवलंतः अर्चयःदीप्तयःउदीरतेउद्गच्छंतीति॥छ॥॥
अथद्वितीया॥ उपत्वाजुह्वोममघृताचीर्यंतुहर्यत। अग्नेहव्याजुषस्वनइति॥ हेहर्यतकामय

© Dharmartha Trust J&K. Digitized by eGangotri

147 मानाग्ने ममदीया घृताचीर्घृताचीर्घृतमंवं स्रोहुकः स्रुचः त्वात्वामुपयंतु नोस्माकं हव्या हव्या
निहुषस्व सेवस्व च ॥ ७ ॥ अथ तृतीया ॥ मंद्रं होतारमृत्विजं चित्रभानुं विभावसुं। अग्निमीळे स
उश्रवदिति ॥ मंद्रं मोदनं होतारं देवानामाह्वातारं ऋत्विजमृतौ यष्टव्यं चित्रभानुं विविधदीप्तिं
विभावसुं दीप्तिधनमग्निं ईडे स्तौमि। सो ग्निः श्रवत् अस्मदीयां स्तुतिं शृणोत्वेव ॥ ७ ॥ ॥ अथ
प्रगाथात्मके चतुर्थसूक्ते प्रथमा ॥ पाहि नो अग्न एकया पाह्युत द्वितीयया। पाहि गीर्भिस्तिसृभि
रूर्जां पते पाहि चतसृभिर्वसो इति ॥ हे अग्ने नोस्मान् एकया ऋचा गिरा पाहि रक्ष। उतापि च द्वि
तीयया ऋचा पाहि पालय। पाहीति तिसृभिर्गीर्भिः ऊर्जामन्नानां बलानां पते स्वामिन्। तथा
पाहि चतसृभिर्गीर्भिर्हे वसो वासकाग्ने ॥ ७ ॥ अथ द्वितीया ॥ पाहि विश्वस्माद्रक्षसो अराव्णः प्र
स्म वाजेषु नोव त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे इति ॥ हे अग्ने विश्वस्मात् सर्व
स्मात् सर्वस्माद्रक्षसः अराव्णः अदातुः सकाशात् पाहि रक्ष। सो स्मान् वाजेषु संग्रामेषु प्रा
व प्रकर्षेण रक्ष। स्मेति पूरणे। हि यस्मात्त्वां नेदिष्ठं अंतिकतमं आपिं बंधुभूतं त्वामित् त्वामेव देव
तातये यज्ञाय यज्ञसिध्यर्थं वृधे वर्द्धनाय नक्षामहे व्याप्नुमः। नक्षतिर्व्याप्तिकर्मा ॥ ७ ॥ ॥ इति पं
चदशोध्याये प्रथमः खंडः ॥ ७ ॥ ॥ अथ द्वितीयखंडे इनो राजन्निति त्र्यात्मके प्रथमे सूक्ते प्रथ
मा ॥ इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमां अदर्शि। चिकिद्विभाति भासा बृहतासिक्नीमे

© Dharmartha Trust J&K. Digitized by eGangotri

तिरस्तानामपाजन्निति॥हेराजन्दीप्यमानाग्नेत्वंइनःईश्वरःसर्वस्यभवसि।..॥अथपरो
क्षः।अरतिःहविरादायदेवान्प्रतिगंता।समिद्धः।संदीप्तःरौद्रःशत्रूणांभयंकरःसुषुमान
उषध्यात्मनास्थितेरस्सुःसुष्टुसूयतइतिसुषुःसोमः।तेनतद्वान्शोभनप्रसवोवासोऽग्निःद
क्षाययजमानानांधनायविध्यर्थंकिम्अरिष्यर्थंवाअदर्शिसर्वैर्दृश्यते।किंचविचिकित्सर्वंजानन्
नोऽग्निर्विभातिविशेषेणदीप्यते।तथाबृहतामहताभासातेजसा...लालक्षणेनअसिक्नीं। ज्या५
रात्रिंएति।सायंहोमसिद्ध्यर्थंएतिगच्छति।किंकुर्वन्।रुशतींश्वेतवर्णांदीप्तिंअपाजन्अपगम
यन्।सर्वतोविकिरन्।यद्वारुशतींदीप्तांउषसंअपाजन्अपक्षिपन्परित्यजन्रात्रिंगच्छति।
सामर्थ्यात्रात्रिंपरित्यजन्उषसंप्रातर्होमसिद्ध्यर्थंगच्छतीत्यर्थोलभ्यते॥६॥अथद्वितीया॥
कृष्णांयदेनीमभिवर्पसाभूज्जनयन्योषांबृहतःपितुर्जाम्।ऊर्ध्वंभानुंसूर्यस्यस्तभायन्दिवोव
सुभिररतिर्विभातीति॥सोऽग्निर्यद्यदाकृष्णांकृष्णवर्णामेनींगन्त्रींरात्रिंवर्पसाआत्मीयेनज्वा
लालक्षणेनरूपेणअभिभूःअभिभवति।किंकुर्वन्।बृहतोमहतःपितुःसर्वस्यजगतःपाल
यितुःपितृभूतात्आदित्याज्जातांजायमानांयोषामुषसंजनयन्अभिव्यंजयन्।अग्निमध्यभूत्।
तदानीमरतिर्गमनशीलोऽग्निःदिवोद्युलोकस्यवसुभिर्वासयितृभिःरश्मिभिःसंधुक्षणसम
र्थैरात्मीयैस्तेजोभिःसूर्यस्यभानुंदीप्तिंऊर्ध्वंउपरिष्टात्स्तभायन्स्तंभयन्विभातिविशेषेणदी

© Dharmartha Trust J&K. Digitized by eGangotri

प्पते॥ ६॥ ॥ अथ तृतीया॥ भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात्। सुप्रके-
तैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थादिति॥ भद्रो भजनीयः कल्याणः भद्रया
भजनीयया दीप्त्या उषसा वा सचमानः सेव्यमानः संगच्छमानो वाग्निः आगात्। आजगाम।
गार्हपत्यादाहवनीयमागच्छति॥ ततः पश्चात्॥ जारो जरयिता शत्रूणां सोग्निः स्वसारं स्वयं सा-
रिणीं भगिनीं वा। आगतामुषसमभ्येति अभिगच्छति। तथा सुप्रकेतैः सुप्रज्ञानैर्द्युभिर्दीप्तैस्ते-
148 जोभिः सह वितिष्ठन् सर्वतो वर्त्तमानः सोग्निरुशद्भिः श्वेतैर्वर्णैर्वारकैरात्मीयैस्तेजोभिः रामं
कृष्णं शार्वरं तमः अभ्यस्थात्। सायं होमकाले अभिभूय तिष्ठति॥ ६॥ ॥ अथ द्वितीयसूक्ते प्र-
थमा॥ कया ते अग्ने अंगिर ऊर्जो नपादुपस्तुतिं। वराय देव मन्यव इति॥ हे अंगिरः अंगिरसां
वरिष्ठ यद्वा अंगति सर्वत्र गच्छतीति अंगिराः। तादृश हे ऊर्जो नपात् नपादित्यपत्यनाम अन्नस्य
पुत्र हविर्भिर्वर्द्धमानत्वात्। यद्वा नपादिति नप्ता। हविर्लक्षणस्यान्नस्य नप्ता। अग्नौ प्रास्ताहुतिः
सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिरिति। वृष्टेरोषधयस्तु ओषधीभ्योग्निरिति अ-
न्नस्य नप्ता। हे देव द्योतमानाग्ने वराय सर्वैर्वरणीयाय मन्यवे शत्रूनभिमन्यमानाय ते तुभ्यं क-
या कीदृश्या वा वाचा उपस्तुतिं उपस्तोत्रं अहं भरेयं। त्वं महान्खलु। अहमल्पः तस्मात्कथं स्तुतिं कु-
र्य्यामिति ऋषिरग्निं प्रतिवदति॥ ६॥ ॥ अथ द्वितीया॥ दाशेम कस्य मनसा यज्ञस्य सहसो

© Dharmartha Trust J&K. Digitized by eGangotri

यहो। कद्वोवदस्त्नमद्विति।। ऋषिरग्निं प्रतिब्रूते हे सहसो यहो यहुरिसपत्यनाम बलेन निष्पा
घमानत्वात्। बलस्य पुत्र हे अग्ने कस्य कीदृशस्य यज्ञस्य यज्ञवाताय जनीय रेववतो वा यज
मानस्य मनसा युक्ताः संतो हवींषि तुभ्यं वयं दाशेम प्रयच्छेम। पूजायां बहुवचनं। किंच तुभ्यं इ
दं नमो हविर्नमस्कारं वा कन्नु कदा वोचे अहं वदामि। उ इति प्रश्नः ऋषिः कदा यस्मात् अमिकदा स्तोषामी
त्यग्निं पृच्छति। वोचि ब्रूञ्जादेशस्य लुङ्या लुसेनैपरुत्तमैकवचने रूपं।।६।। अथ तृतीया।। अथा
त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः। वाजद्रविणसो गिर इति।। हे अग्ने अथ अथानंतरं
त्वं हि एवधारणे त्वमेवास्मभ्यं करः कुरु। रकेहीत्सर्थः। करोतेर्लेटि अडागमः। किमित्यपेक्षायामा
ह। नो अस्मदीया गिरः त्वद्विषयाः विश्वाः सर्वाः स्तुतीः एवं कुरु। यथा सुक्षितीः क्षियंति निवसंस
न्तेति क्षितयो गृहाः शोभननिवासाः यद्वा क्षितयो मनुष्याः कल्याणपुत्रपौत्रयुक्ताः तथा वाजद्र
विणसः अन्नयुक्ता धनवतीः अथवा वाजो दीप्तिः सर्वतो दीप्त धनाध्य कुरु। त्वमस्माभिः स्तुतः
सन् गृह्ययुक्तान्नधनादीनि देहीत्यर्थः।।७।। ।।अग्न आ याहीति प्रगाथरूपे तृतीयसूक्ते प्रथमा।।
अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे। आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरास
द इति।। हे अग्ने अग्निभिर्यष्टव्यैः सह आ याहि आगच्छ तदर्थं होतारं देवानामाह्वातारं त्वा त्वां वृणी
महे। त्वाम् आगतं प्रयता अध्वर्युहस्ताभ्यां नियता हविष्मती घृतवती यजिष्ठं त्वां बर्हिषि आ

© Dharmartha Trust J&K. Digitized by eGangotri

सरेः। आसाद्य सर्वं नो नः स्रुक् सिंचतु॥ ७॥ अथ द्वितीया॥ अच्छा हि त्वा सहसः सूनो अंगिरः स्रु
चश्चरंत्यध्वरे। ऊर्जो नपातं घृतकेशमीमहे ऽग्निं यज्ञेषु पूर्व्यमिति। हे सहसः सूनो बलस्य पुत्र ब
149 लेन मथ्यमानत्वात्। हे अंगिरः अंगिरसां मध्ये मुख्य अथवा अंगतिर्गतिकर्मा सर्वं गंतस्त्वा
त्वां अध्वरे यागे अच्छाभिमुख्येन स्रुचश्चरंति गच्छंति। ऊर्जोन्नस्य नपातं न पातयितारं
रक्षकं बलस्य वा नप्तारं घृतकेशं प्रदीप्तकेशं प्रदीप्तकेशस्थानीयज्वालं पूर्व्यं पुरातनं पूरकं वा
ऽग्निं यज्ञेष्वस्मदीयेषु ईमहे स्तौमि॥ ७॥ ॥ अच्छा न इति त्र्यृचात्मके चतुर्थसूक्ते प्रथमा॥ अ
च्छा नः शीरशोचिषं गिरो यंतु दर्शतं। अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतय इति। अ
च्छाभिमुखं त्वं यं तु गच्छंतु नोस्माकं गिरः स्तुतयः। कं शीरशोचिषं। अशनशीलदीप्तिं अयनशील
ज्वालं वाग्निं दर्शतं। सर्वैर्दर्शनीयं। तथा यज्ञासो यज्ञाश्च अस्मदीया नमसा हविषा आज्यादि
लक्षणेन आभिमुख्यं यं तु गच्छंतु। कीदृशं। पुरूवसुं प्रभूतधनं पुरुप्रशस्तं बहुभिः सम्यक्
स्तुतं। किमर्थं। ऊतये अस्माकं रक्षणाय॥ ७॥ अथ द्वितीया॥ अग्निं सूनुं सहसो जातवेदसं दाना
य वार्याणां। द्विता यो भूदमृतो मर्त्येष्वा होता मंद्रतमो विशीति। अग्निं सहसः सूनुं बलस्य पुत्रं
जातवेदसं जातधनं वार्याणां वरणीयानां गवादिधनानां दानाय नो गिरोऽच्छ यंत्विति शेषोऽनुवर्तते। यो
ऽग्निरमृतोऽमरणधर्मा देवेषु भवति स मर्त्येष्वा आकारश्चार्थे मर्त्येषु मनुष्येषु वाभूदभवत् इत्येवं द्वि
१४८

© Dharmartha Trust J&K. Digitized by eGangotri

ता। द्वैधं भवति। द्विवेष मनलं अस्य प्रसिद्धं। मनुष्येषु कीदृशो भूदिति। उच्यते। विशिष्टेषु यजमा
नरूपासु प्रजासु होता होमनिष्पादकः मंद्रतमो मादयितृतमश्च भवति। न मद्यच्छंधं त्विति समन्व
यः। अथवा यः अवतो द्वितादृसं द्वैधं द्विप्रकारो भूत्। कथं मर्त्येषु सामान्येन दाहपाकादिसाध
नो भवदित्येतल्लसिद्धं विशिष्टयजमानरूपायां तु होता मंद्रतमश्चाभवदित्येवं द्वैधं।।छ।। ।।इति
पंचदशोध्याये द्वितीयः खंडः।।छ।। ।।अथ तृतीयखंडे अदाभ्य इति तृचात्मके प्रथमे सूक्ते प्रथमा
।।अदाभ्यः पुरएता विशामग्निर्मानुषीणां। तूर्णी रथः सदा नव इति मानुषीणां मनोर्जातानां।।
विशां प्रजानां पुरएता सन्मार्गदर्शनेनाग्रतो गंता। अत एव तूर्णिः। ताः प्रजा वैदिककर्म प्रवर्तने
नानुग्रहीतुं त्वरायुक्तः। आलस्यरहितः रथः हविषां वहनाद्रथसदृशः। सदा सर्वदा तत्तत्कर्मणि नवः
नूतनः। पुनर्मथनादभिनवः। एवंविधोग्निः अदाभ्यः अहिंस्यः। न केनापि तिरस्कार्य इत्यर्थः।।
छ।। अथ द्वितीया।। अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः। क्षयं पावकशोचिषः इति।।दा
श्वान् हविषां दाता मर्त्यो मनुष्यो यजमानः वाहसा हविषां वाहकेनाग्निना प्रयांसि अन्नानि अश्नो
ति अभितः सर्वतः प्राप्नोति। किंच। पावकशोचिषः शोधकदीप्तेः अग्नेः सकाशात् क्षयं गृहं चाश्नो
ति।।छ।। अथ तृतीया।। साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः। अग्निस्तुविश्रवस्तम इ
ति।। अभियुजः अभियोक्त्रीः विश्वाः सर्वाः सेनाः साह्वान् सहमानः स्वबलेन तिरस्कुर्वाणः अत एव

© Dharmartha Trust J&K. Digitized by eGangotri

150

अम्रक्तः। शत्रुभिरहिंसितः। देवानां क्रतुः कर्त्ता हविः प्रदानेन पोषकः। एवंभूतोग्निस्तु विश्रवस्त
मा। तुविशब्दो बहुवाची। श्रवः शब्दोन्नवाची। अतिशयेन बहुविधान्नोपेतो वर्त्तते। यस्मादेवं तस्मा
दस्मानपि बहुविधान्नोपेतान् करोत्विति भावः॥७॥ ॥अथ भद्रो नो अग्निराहुत इति द्वितीयतृचे
सैषा प्रथमा॥ भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः। भद्रा उत प्रशस्तय इति॥ आ
हुतो हविर्भिस्तर्पितोग्निः नोस्माकं भद्रः कल्याणो भवतु। हे सुभग शोभनधनाग्ने भद्रा कल्याणी रा
तिर्दानं चास्माकं भवतु। भद्रः कल्याणो ध्वरो यागश्च भवतु। उतापि च भद्राः कल्याणाः प्रशस्तयः प्र
शंसाः स्तुतयश्च भवंतु॥७॥ अथ द्वितीया॥ भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहिः। अ
अव स्थिरा तनुहि भूरि शर्द्धतां वनेमा ते अभिष्टय इति॥ हे अग्ने वृत्रतूर्ये संग्रामे भद्रं शोभनं मनः
कृणुष्वास्माकं कुरु। येन मनसा त्वं समत्सु संग्रामेषु सासहिः भृशं शत्रूनभिभवसि। अपि च शर्द्ध
तामभिभवितं। शत्रूणां भूरिभूरीणि बहूनि स्थिरा स्थिराणि दृढान्यपि बलानि अवतनुहि पराजि
तानि कुरु। वयं चाभिष्टिभिरन्वेषणसाधनैर्हविर्भिस्तोत्रैश्च ते त्वां वनेम संभजेमहि। यद्वा तेन वम
सादभिष्टिभिरभीष्टैः फलैर्धनैर्नमसं गछेमसि॥७॥ अथ तृतीयखंडे अग्ने वाजस्येति तृतीयतृचे
प्रथमा॥ अग्ने वाजस्य गोमत ईशानः सहसो यहो। अस्मे देहि जातवेदो महि श्रव इति॥ हे सहसो य
हो बलस्य पुत्राग्ने गोमतो बहुभिर्गोभिर्युक्तस्य वाजस्यान्नस्य ईशान ईश्वरस्त्वमसि। अतोस्मे अस्मा

© Dharmartha Trust J&K. Digitized by eGangotri

सुहे जातवेदो जातधनजातानां वेत्तिर्वाग्निमहि प्रभूतं अश्वावन्नं देहि प्रयच्छ।सहसो यहो परांग
वन्मावा द्यामंत्रितस्यचेति षष्ठ्या मंत्रितसमुदायो निहन्यते। आस्मसु पांसुलु गितिसप्तम्याः।
शो आदेशाः॥छ॥ अथ द्वितीया॥ सद्मानो वसुः कविरग्निरीडेन्यो गिरा। रेवदस्मभ्यं पूर्वणी
कदीदिहीति॥ सोऽग्निरधान्नो दीपनशीलः वसुर्निवासयिता सर्वेषां कविः क्रांतदर्शनो मेधावी।
गिरा स्तोत्ररूपया वाचा ईडेन्यः स्तोतव्यो भवति। हे पुर्वणीक अनीकं सुखं पुरुभिर्बहीभिरनी
कस्थानीयाभिर्ज्वालाभिर्युक्ताग्नेऽस्मभ्यं रेवत् धनयुक्तमन्नं यथा भवति। तथा दिदीहि॥ दीप्यस्व।
दीदेतिः छंदसो दीप्तिकर्मा॥छ॥ अथ तृतीया॥ क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः। स तिग्म
जंभ रक्षसो दह प्रतीति। हे राजन राजमानशीलाग्ने क्षपः क्षिप राक्षसादीन् स्वकीयैः पुरुषैर्बाधस्व
।उतापि त्मना। न केवलमन्यैरेव। आत्मना च तान् बाधस्व। कोऽर्थः ति च उच्यते। वस्तोः सर्वाल्पहा
नि उतापि च उषसः उषःकालोपलक्षिता रात्रीश्च। अत्यंतसंयोगे द्वितीया। सर्वेष्वहस्सु सर्वासु रात्रि
षु चेत्यर्थः। हे तिग्मजंभ तीक्ष्णमुखाग्ने रक्षसो राक्षसान् उक्तप्रकारेण क्षपयित्वा स एव त्वं प्रतिद
ह प्रत्येकं प्रतीत्य दह। न किंचिद्दग्धव्यमित्यक्त्वा स्वेत्यर्थः॥छ॥ ॥इति पंचदशोऽध्याये तृतीयः खंडः॥छ॥
अथ चतुर्थखंडे विशो विशो वो अतिथिमिति तत्र आद्ये प्रथमसूक्ते प्रथमा॥ विशो विशो वो अ
तिथिं वाजयंतः पुरुप्रियं। अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिरिति। हे ऋत्विजो जैये मानश्च

© Dharmartha Trust J&K. Digitized by eGangotri

वोयूयंवाजयंतोऽन्नमिछंतः विशोविशः सर्वस्याः प्रजायाः अतिथिं पूज्यं पुरुप्रियं बहुप्रिय
मग्निंस्तुत्याप्रस्विरतेतिशेषः॥ अहंचवोयुष्मदर्थंदुर्यंगृहाहितंअग्निंवचोऽनुस्तुषेस्तौमि
।श्रूषस्यसुखस्यलाभाय।कैःसाधनैःमन्मभिर्मननीयैःस्तोत्रैः॥छ॥ अथद्वितीया॥ यं
जनासोहविष्मंतोमित्रंनसर्पिरासुतिं।प्रशंसंतिप्रशस्तिभिरिति॥यमग्निंजनासोजना
यजमानाःहविष्मंतःसंतोमित्रंनमित्रमिवआदित्यमिवसखायमिववासर्पिरासुतिंसर्पि
रासूयतेहूयते।यस्मिंस्तादृशंप्रशंसंतिस्तुवंतिप्रशस्तिभिस्तुतिभिः॥छ॥ अथतृतीया॥
पन्यांसंजातवेदसंयोदेवतात्युद्यता।हव्यान्यैरयद्दिवीति॥पन्यांसंअतिशयेनस्तोतारंसा
धुकृतमितियजमानंस्तुवंतंजातवेदसंजातधनंवास्तुमइतिशेषः योग्निर्देवतातातिदेवताती
याज्ञेउद्यताउद्यतानिहव्यानिहवींषिदिव्यैरयन्प्रेरयतिदिविदेवेभ्यः॥छ॥ ॥अथद्वितीय
त्वेप्रथमा॥समिद्धमग्निंसमिधागिरागृणेशुचिंपावकंपुरोअध्वरेध्रुवं।विप्रंहोतारंपुरुवा
रमद्रुहंकविंसुम्नैरीमहेजातवेदसमिति॥समिद्धंसम्यक्दीप्तमग्निंसमिधासमिंधनहेतु
भूततयागिरास्तुत्यागृणेहंस्तौमि।यद्वासमिधासमिद्भिर्हविर्भिःसमिद्धंसम्यग्दीप्तंअ
पिवशुचिंस्वयंशुद्धंपावकंसर्वेषांशोधकं।ध्रुवंनिश्चलंतमग्निमध्वरेयज्ञेपुरस्करोमीतिशे
षः।तथाविप्रंमेधाविनंहोतारंदेवानामाह्वातारंपुरुवारंबहुभिर्वरणीयंअद्रुहमद्रोग्धारंस

© Dharmartha Trust J&K. Digitized by eGangotri

वैषामनुकूलंकविंक्रांतदर्शिनंजातवेदसंजातानांवेदितारमग्निंसुम्नैःसुखकरैःस्तोत्रैरीमहेसंभ
जामहे।यद्वाद्वितीयार्थेतृतीया।सुम्नानिधनानिईमहेयाचामहइति॥छ॥अथद्वितीया॥
त्वांदूतमग्नेअमृतंयुगेयुगेहव्यवाहंदधिरेपायुमीड्यं।देवासश्चमर्तासश्चजागृविंविभुंवि
श्पतिंनमसानिषेदिरइति।हेअग्नेत्वांदेवासोदेवाश्चमर्त्यासोमनुष्याश्चदूतंदधिरेविद
धिरेकृतवंतः।कीदृशंत्वाममृतममरणं।युगेयुगेकालेकालेतत्तद्यागानुष्ठानसमयेहव्यवाहं
हव्यानांहविषांवोढारंपायुंपालयितारमीड्यंस्तुत्यं।अपिचातेउभयविधाःजागृविंजागर
णशीलंविभुंव्याप्तंविश्पतिंविशांप्रजानांपालयितारं।तमग्निंनमसाहविर्लक्षणेनान्नेनन
मस्कारेणवानिषेदिरेउपसेदिरे॥छ॥अथतृतीया॥विभूषन्नग्नउभयाँअनुव्रतादूतोदे
वानांरजसीसमीयसे।यत्तेधीतिंसुमतिमावृणीमहेधस्मानस्त्रिवरूथःशिवोभवेति॥
हेअग्नेउभयानुभयविधान्देवान्मनुष्यांश्चविभूषन्विशेषेणभूषयन्अलंकुर्वन्त्व
मनुव्रताव्रतान्यनुव्रतेषुकर्मसुयागेषुदेवानांदूतःसन्रजसीद्यावापृथिव्योसमीयासेसं
चरसिदेवानांनेतुंद्युलोकंगच्छसिह।वीषिचनेतुमिमंलोकंकिंचायद्यस्मात्तेतुभ्यंत्वदर्थं।
धीतिः।कर्मसुमतिंशोभनांस्तुतिंआवृणीमहेवयंसंभजामहे।अधाउतःकारणात्त्रिव
रूथःत्रिस्थानःत्वंनोस्माकंशिवःसुखकरोभवस्मेसेतत्पदपूरणं॥छ॥ ॥अथतृतीयसूक्ते

© Dharmartha Trust J&K. Digitized by eGangotri

प्रथमा॥ उपत्वाजामयो गिरोदेदिशतीर्हविष्कृतः। वायोरनीके अस्थिरन्निति॥ हे अग्ने हवि-
ष्कृतो यजमानार्थं गिरः स्तुतयः जामयः स्वसार इव देदिशतीस्तवगुणान् दिशंतस्त्वां त्वामु
पतिष्ठंते वायोरनीके समीपे त्वां समेधंतः अस्थिरन् अतिष्ठंश्च॥ छ॥ अथ द्वितीया॥ य
स्याग्निधात्ववतं बर्हिः सूस्थावसंस्थितं। आपश्चिन्निदधापदमिति॥ यस्याग्ने त्रिधातु त्रि
152 पर्वावृतं च असंस्थितं अबद्धं वस्तरणकाले बर्हिः आरबद्धं भवति॥ बर्हिः स्वस्थावासनार्थं ति
ष्ठति। तस्मिन्नग्नावापश्चिद् आपोपि पदं निदधानि दधति। अंतरिक्षस्य माध्यमिके पदं निदध
ती स्वर्पः॥ छ॥ अथ तृतीया॥ पदं देवस्य मीढुषोनाधृष्टाभिरूतिभिः। भद्रा सूर्यइवोपदृग्
ति॥ मीढुषः कामानां सेक्तुर्देवस्य द्योतमानस्याग्नेः पदं स्थानं धृष्टाभिः शत्रुभिरबाधिता
भिः ऊतिभी रक्षणैः भजती सर्पः। तस्यैकाम्योपदृक् उपदृष्टिरपि सूर्यइव। यथा सूर्यस्त्विट्
भद्रामनुष्यैर्भजनीया भवति॥ छ॥ ॥इति पंचदशोध्याये चतुर्थः खंडः॥ छ॥ वेदार्थस्य प्र
काशेनतमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ छ॥ ॥इति श्रीम
द्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण साय
णाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे पंचदशोध्यायः॥ छ॥ यस्य नि
श्वसितं वेदा यो वेदेभ्योखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ छ॥ ॥अथ षोडशो॥

© Dharmartha Trust J&K. Digitized by eGangotri

ऽध्याय आरभ्यते॥ तत्र प्रथमखंडे अभि त्वा पूर्वपीतय इति प्रगाथात्मकं प्रथमं सूक्तं तत्र
प्रथमा॥ अभि त्वा पूर्वपीतय इंद्र स्तोमेभिरायवः। समीचीनास ऋभवः समस्वरन् रुद्रा गृ
णंत पूर्व्यमिति॥ हे इंद्र आयवो मनुष्याः स्तोतारः स्तोमिभिः स्तोमैः त्वामभिष्टुवंति। कि
मर्थं। पूर्वपीतये। सर्वेभ्यो देवेभ्यः पूर्वं प्रथमत एव सोमस्य पीतये पानाय। सवनमुखे हि च
मसगणैरिंद्रस्यैव सोमो हूयते। तथा समीचीनासः संगता ऋभवः प्रथमवाचकेन शब्देन त
योप्युपलक्ष्यंते। ऋभुर्विभ्वा वाज इत्येते च समस्वरन् त्वामेव सम्यग् स्तुवन्। रुद्रा रोप
तापयोः रुद्राः रुद्रपुत्रा मरुतश्च पूर्व्यं पुरातनं वृद्धं त्वामेव गृणंत नाम्नस्तुवन्। वज्रवधस
माय प्रहर भगवो जहि वीर जयस्येत्येवंरूपया वाचा त्वां स्तुतवंत इत्यर्थः॥ ७॥ अथ द्विती
या॥ अस्येदिंद्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि। अद्या तमस्य महिमानमायवोनु
ष्टुवंति पूर्वथेति॥ अस्येत् अस्यैव यजमानस्य वृष्ण्यं वृषत्वं वीर्यं शवो बलं च इंद्रो वावृधे वा
र्धयति। सुतस्याभिषुतस्य सोमस्य पानेन विष्णवि। व्याप्ते देहस्य व्यापके मदे हर्षे सति तस्ये
व यजमानस्य बलं वर्धयतीत्यर्थः॥ अद्यास्मिन् काले अस्येंद्रस्य तं उक्तगुणं महिमानं मह
त्वं आयवो मनुष्या अनुष्टुवंति तस्यानुपूर्व्येण स्तुवंति। पूर्वथा पूर्वस्मिन् द्वापरादियुगे प्रत्नपूर्वैः सा
दिनापास्मत् पयः। यथा पूर्वस्मिन् काले अनुस्तुवन् एवमिदानीमपि तेनैव क्रमेण स्तुवंतीत्यर्थः॥ ८॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥प्रवामर्चंत्युक्थिनइतिचतुर्ऋचं द्वितीयं सूक्तं तत्र प्रथमा॥प्रवामर्चंत्युक्थिनोनीथाविदो
जरितारः।इंद्राग्नीइषआवृणइति।हेइंद्राग्नीउक्थिनःउक्थंशस्त्रंतद्वंतःशस्त्रिणोहोत्राद्यः
वांयुवांप्रार्चंति।इहकर्म्मणिस्तुतिरूपाभिर्वाग्भिःपूजयंति।तथानीथाविदःस्तोत्राभिज्ञाःसा
मगानकुशलाजरितारस्तोतारउद्गात्रादयःअभिलषितफलावाप्तयेयुवामर्चंति।अ
हमपिइषोन्नस्यलाभार्थंइंद्राग्नीयुवामावृणेसर्वतःसंभजेपूजयामीत्यर्थः॥छ॥अथ
153 द्वितीया॥इंद्राग्नीनवतिंपुरोदासपत्नीरधूनुतं।साकमेकेनकर्म्मणेति।हेइंद्राग्नीदासप
त्नीःदासयंतिउपक्षयंतीतिदासाउपक्षपयितारःशत्रवःतेपतयःपालकायासांतादासपत्नीः
नवतिंनवतिसंख्याकाःपुरःएवंविधाःशत्रुपुरीःएकेनकर्मणाएकेनैवोद्योगेनयुवांसाकंस
हयुगपत्अधूनुतंअकंपयंतं।ताविंद्राग्नीआह्वयामीतिशेषः॥छ॥अथतृतीया॥इंद्राग्नी
अपसस्पर्युपप्रयंतिधीतयः।ऋतस्यपथ्याअन्विति।हेइंद्राग्नीधीतयःसोमस्यधातारः
पातारोहोत्रादयःऋतस्यकर्मफलस्यपथ्याःपथोमार्गाननुलक्षीकृत्यअपसोऽस्माभिःक्रि
यमाणस्यपरितःसर्वतःसमीपेप्रपर्युपप्रयंतिप्रकर्षेणवर्त्तंते।अतःसोमपानार्थंयुवाम
गच्छतमितिभावः।यद्वाधीतयःस्तुतयःऋतस्ययज्ञस्यमार्गाननुलक्षीकृत्यकर्मणःपरि
तःप्रवर्त्तंते।अतःस्तोतव्यतयायुवामागच्छतमिति॥छ॥अथचतुर्थी॥इंद्राग्नीतविषाणि

© Dharmartha Trust J&K. Digitized by eGangotri

वांसधस्थानि प्रियांसि च। युवोरग्नुर्यं हितमिति॥ हे इन्द्राग्नी वां युवयोस्तविषाणि बलानि
प्रियांस्यन्नानि धस सधस्थानि सहस्थितानि परस्परमवियुज्य वर्त्तन्ते। तथाऽप्तूर्यं रयि
ह्वाराऽपां प्रेरकत्वं युवोर्युवयोरेव हितं निहितं वर्त्तते। तस्मात् सोमपानप्रभृतिषु सर्वकर्मसु
इन्द्राग्न्योः सहैव वर्त्तमानमिति भावः। सधस्थानि स्थागतिनिवृत्तौ। आतोनुपसर्गे कः सध
मादस्थयोः छंदसीति सहस्य सधादेशः॥छ॥ ॥अथ शाग्ध्यूषु इति प्रगाथात्मकं द्वितीयं
सूक्तं तत्र प्रथमा॥छ॥ शाग्ध्यूषु शचीपत इन्द्र विश्वाभिरूतिभिः। भगं न हि त्वा यशसं व
सुविदमनुशूर चरामसीति॥ हे शचीपते इन्द्र नः शाग्धि देहि अभिमतं विश्वाभिः सर्वाभि
रूतिभिर्भिमुक्तिः सह। हे शूर वारभगं न भाग्यमिव यशसं यशस्विनं। वसुविदं धनलम्भ
कं त्वा त्वामनुचरामसि। अनुचराम परिचरामः सपर्यामः॥छ॥ अथ द्वितीया॥ पौरो अश्वस्य
पुरुकृद्गवामस्युत्सो देव हिरण्ययः। नकिर्हि दानं परिमर्धिषत्त्वे यद्यद्यामि तदाभरेति॥
हे इन्द्र त्वं अश्वस्य पौरः पूरयितासि भवसि। तथा गवां पुरुकृत् बहुकर्त्तासि। हे देव हिरण्ययः
हिरण्मयशरीरस्त्वं उत्सः उत्स इव सरूपोसि। हे इन्द्र त्वे त्वयि वर्त्तमानं दानं मह्यं दित्सितं धनं वा
नकिर्ह्यपि परिमर्धिषत्। न कश्चिद्धिनस्ति। अतो यद्यद्यामि याचे तत्तदाहर मह्यं॥छ॥ ॥अ
यत्वं हि एहीति रवद्वति प्रगाथात्मकं चतुर्थं सूक्तं तत्र प्रथमा। त्वं ह्येहि चेरवे विदा भगं वसुत्तये॥

© Dharmartha Trust J&K. Digitized by eGangotri

उद्वावृषस्व मघवन् धनवन् गविष्टय उदिंद्राश्वमिष्टय इति। हे इंद्र त्वं हि त्वं खलु सामर्थ्या
द्वृत्तेति गम्यते। अत एहि आगच्छ। आगत्य चास्मभ्यं भगं भजनीयं धनं विदाः लभस्व दत्स्व।
किमर्थं वसुत्तये। अस्माकं वसुदानाय। हे मघवन् गविष्टये गा इच्छते मह्यं उद्वावृषस्वोत्सिं
चस्व गा इति शेषः। तथा हे इंद्र अश्वमिष्टये अश्वैषणं एव ते मह्यं अश्वानुद्वावृषस्वोत्सिंचस्व
देहि॥७॥ अथ द्वितीया॥ त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे। आ पुरंदरं चकृ
म विप्रवचस इंद्रं गायंतोऽवस इति॥ हे इंद्र त्वं पुरू पुरूणि बहूनि सहस्राणि शतानि च यूथा ग
वादियूथानि दानाय यजमानविषयाय मंहसे अनुमन्यसे। यद्वा दानाय दात्रे यजमाना
य मंहसे प्रयच्छसि। मंहतिर्दानकर्मा। अथ परोक्षेण ब्रवीति पुरंदरं शत्रुपुराणां दारयिता
रं इंद्रं अवसे रक्षणाय तर्पणाय वा गायंतः स्तुवंतः विप्रवचसः विविधप्रकृष्टवचना वयं आ
गागंतारं अभिमुखं वा चकृम कुर्म्मः॥८॥ ॥अथ यो विश्वेति प्रगाथात्मकं पंचमं सूक्तं तत्र
प्रथमा॥ यो विश्वा दयते वसु होता मंद्रो जनानां। मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यंत्वग्नय
इति॥ होता देवानामाह्वाता मंद्रो मोदनो योऽग्निः विश्वा सर्वाणि वसु वसूनि धनानि जनानां जने
भ्यो दयते प्रयच्छति॥ तथा अग्नये मधोर्न मिष्टकरस्य सोमस्येव प्रथमानि मुख्यानि पात्राणि पात्रा
णि स्तोमाः प्र यंतु प्रगच्छंतु॥७॥ ॥अथ द्वितीया॥ अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यंते देव

© Dharmartha Trust J&K. Digitized by eGangotri

यवः। उभेत्तोकेतनयेदस्म विश्पते पर्षि राधो मघोनामिति॥ हे दस्म दर्शनीय विश्पते विशां
पते अग्ने यं त्वां सुदानवः शोभनदाना देवयवो देवानामिच्छंतो यजमाना रथ्यं रथस्य वो
ढारं अश्वं न अश्वमिव गीर्भिः स्तुतिभिः मर्मृज्यंते परिचरंति त्वमस्माकं यजमानानां तोके पु
त्रे तनये पौत्रे चाभे उभयस्मिन् मघोनां धनवतां राधः धनं वर्षि प्रयच्छ॥ ७॥ ॥ इति षोडशोऽध्या
ये प्रथमः खंडः॥ ॥ अथ द्वितीयखंडः। इमं मे वरुणेत्येकर्चं प्रथमं सूक्तं साक्रगेषा॥ इमं मे वरु
ण श्रुधी हवमद्या च मृळय। त्वामवस्युराचक इति॥ हे वरुण मे मदीयमिमं हवमाह्वानं श्रुधि
शृणु। श्रुणु श्रवणे। लोटो हेः श्रुशृणुपॄकृवृभ्यश्छंदसीति हेर्धिरादेशः। बहुलं छंदसीति वि
करणस्य लुक्। अन्येषामपि दृश्यत इति संहितायां दीर्घः। किंचाद्यास्मिन्नहनि मृळय अ
स्मान् सुखय। अवस्युः रक्षणेच्छुः। अवशब्दात् सुप आत्मनः क्यच्। क्याच्छंदसीत्युप्रत्य
यः। एवंविधमहं त्वां वरुणं आ आभिमुख्येन चके शब्दयामि। कै गै शब्दे। अस्माल्लिटि। आत्व
इत्यात्वं द्विर्विवुले। आतो लोप इटि चेत्याकारलोपः। तिङ्ङतिङ इति घातः। स्तौमी सर्वः॥ ७॥
॥ कया त्वं न इत्येकर्चं सूक्तं साक्रगेषा॥ कया त्वं न ऊत्याभि प्र मंदसे वृषन्। कया स्तोतृभ्य आ
भरेति॥ हे वृषन् कामानां वर्षितरिंद्र कया केन ऊत्या अवरक्षणादिसु गत्यर्थे क्तिनि ऊतियूतीत्या
दिना निपातितः। केनाभिगमनेन नोऽस्मानभितः प्रमंदसे प्रकर्षेण मादयसि। अस्मदीयं पदं॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्रतिसोमपानार्थमागमनेन वा स्वदीयस्तुतिश्रवणार्थमागमनेन वा कस्मान्नमादयसीति । किं
वा कया केनाभिगमनेन स्तोतृभ्यो ऽस्मभ्यं धनमाभर बिभर्षीति इतीन्द्रस्तोता पृच्छति ॥ ७ ॥ ॥ अमें-
द्रमिद्धनातयः इति भगाथरूपं द्वितीयं सूक्तं तत्र प्रथमा ॥ इन्द्रमिद्धनातयः इन्द्र प्रयस्यध्वरे इन्द्रं
समीके वनिनो हवामहे इन्द्रं धनस्य सातये इति । इद्धनातयः इद्धैः स्तोतृभिस्तायते विस्तार्य्यते
इति इद्धता निर्य्यज्ञास्तदर्थं इन्द्रमिद्धेषु मध्ये इन्द्रमाह्वयामहे । अध्वरे यज्ञे प्रयति प्रगच्छति उ-
पक्रान्ते सति इन्द्रं हवामहे तथा समीके सम्यग्गते संपूर्णे विपाके वनिनः संभजमानाय वयं इ-
न्द्रमेवाह्वयामहे ॥ यद्वा समीकमिति संग्रामनाम । समीके संग्रामे इन्द्रमाह्वयामहे । धनस्य सा-
तये लाभाय इन्द्रमेवाह्वयामहे । अतः शीघ्रमिन्द्रमागच्छतेत्यर्थः ॥ ७ ॥ यद्वा द्वितीया ॥ इन्द्रो मन्हा
रोदसी पप्रथच्छव इन्द्रः सूर्य्यमरोचयत् । इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे स्वानास इन्दव इति ॥ अय-
मिन्द्रः शवः शवसा आत्मीयस्य बलस्य मन्हा महिम्ना महत्त्वेन रोदसी द्यावापृथिव्यौ पप्रथत् अ-
प्रथयत् विस्तारितवान् । तथा स्वभानुनावृतं सूर्यं इन्द्रः आरोचयत् । अदीपयत् । तस्यासुरस्य
बाधनं प्रकाशितवान् । अपि चेन्द्रेण अस्मिन्नेवेन्द्रे विश्वा विश्वानि व्याप्तानि भुवनानि भूतजाता-
नि येमिरे उपरमन्ते । इन्द्रेण नियम्यन्त इत्यर्थः ॥ तथा स्वानासः स्वानाः अभिपूयमाना इन्दवः सोमाश्च
अस्मिन्नेवेन्द्रे नियम्यन्ते परमात्मन्यन्तर्भवतीत्यर्थः ॥ ७ ॥ ॥ अथ विश्वकर्म्मन् हविषेत्यर्द्धर्चं चतुर्थसूक्तं

© Dharmartha Trust J&K. Digitized by eGangotri

सात्रगेषा॥ विश्वकर्मन्हविषावावृधानःस्वयंयजस्वतन्वंस्वाहिते।मुह्यंत्वन्येअभितोजनासइ
हास्माकंमघवासूरिरस्त्विति॥ हेविश्वकर्मन्विश्वविषयकर्म्मवन्एतन्नामकपरमेश्वरहविषा
हविर्भूतेनविश्वकर्मणामयाहुतेनवाहविषावावृधानोवर्द्धमानःविश्वकर्म्मासर्वाणिभूतानि
जुह्वांचकारसआसनमप्यंततोजुहवांचकारेतिनियुक्तंपूर्वस्मिन्गृहतं।स्वयमेवतन्वाशरीरेण
स्वाहितेअग्नौ।अथवाहविर्यजस्वपूजया।अन्येमत्तोऽन्येजनासोजनाःअयष्टारोस्मद्यागविरोधि
नोवामुह्यंतुमुग्धाभवंतु।अभितःसर्वतः।अथपरोक्षकृतः।इहास्मिन्यागेअस्माकंमघवाअ
स्मत्प्रत्तेनहविर्लक्षणेनधनेनधनवान्ससूरिःस्वर्गादिफलस्यप्रेरकोस्तुभवतु।अत्रविश्वक
र्मन्हविषावर्द्धमानइत्यादिनिरुक्तंद्रष्टव्यं।तन्वंस्वाहितेपृथिवीमुतद्यामितिपाठे॥६॥ ॥आया
रुचेतिसप्तपंचमंसूक्तंतत्रप्रथमा॥ अयारुचाहरिण्यापुनानोविश्वाद्वेषांसितरतिसयुग्वभिः
सूरोनसयुग्वभिः।धारापृष्ठस्यरोचतेपुनानोअरुषोहरिर्विश्वायद्रूपापरियास्यृक्वभिःसप्तास्ये
भिर्ऋक्वभिरिति।पुनानःपूयमानःसोमःहरिण्याहरितवर्ण्णया।अया।अनयारुचारोचमान
याधारयाविश्वासर्वाणिद्वेषांसिद्वेष्टॄणिरक्षांसितरतिविनाशयति।तत्रदृष्टांतः।सूरोन।यथासू
र्यःसयुग्वभिःसहयुक्तैरश्मिभिःतमांसिहिनस्तितद्वत्।सयुग्वाभिरितिद्विरुक्तिराद्दर्शार्थी।यद्वा
धारयायुक्तःसोमःयुक्तैस्तेजोभिःसहरक्षांसितरति।तस्यपृष्ठस्यद्युस्थापवित्रस्योपरिसिक्तस्य

© Dharmartha Trust J&K. Digitized by eGangotri

156

पृषसेचन इति धातु। स्वस्य धारया रोचते दीप्यते पुनानः पूयमानः हरिर्हरितवर्णः सोमः अरुषः आ
रोचमानो भवति।। यद्यः सोमः सप्तास्येभिः रसहरणशीलैः आस्यैर्ऋक्वभिः स्तुतिमद्भिः ऋक्वभिः
स्तेजोभिः विश्वा विश्वानि यामा नि रूपाणि नक्षत्राणि परियाति गच्छति। यामेति पृष्टस्य
स्तुतस्येति पाठो।।७।। अथ द्वितीया।। प्राचीमनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो र
थो दैव्यो दर्शतो रथः।। अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन्।। वज्रश्च यद्भवथो अनपच्यु
ता समत्स्वनपच्युता।। चेकितत् जानानः सोमः प्राचीं पूर्वां प्रदिशं प्रकृष्टां दिशमनुयाति अनु
गच्छति। किं च दर्शतः सर्वैर्दर्शनीयः दैव्यः देवेषु भवः तव रथः सूर्यस्य रश्मिभिः संयतते संगच्छ
ते पुनर्दर्शतो रथ इत्यस्याः स्वार्था। ननः पुंस्या पुंस्त्वावगमानि उक्थानि स्तोत्राण्यस्मन् इन्द्रं गच्छन्ति।।
तथा जैत्राय जनार्थं तानि स्तोत्राणि इन्द्रं हर्षयन् हर्षयन्ति। तथा तस्य वज्रश्च त्वमिन्द्रं गच्छति। यद्य
दा समत्सु संग्रामेषु अनपच्युता अनपच्युतौ शत्रुभिरपराजितौ सोमस्त्वं वज्रं इन्द्रं युवां सम श्चै
त्सु संग्रामेषु सह भवथः। तदा स्तोत्रागमनादीनि भवंति पुनरनपच्युतौ सारार्थौ।।७।। अथ तृ
तीया।। त्वं ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे। परावतो न
साम तद्यत्रा रणन्ति धीतयः। त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे।। हे सोम त्वं स
त्यानि वसूनि गवादीनि धनानि पणिभिरपहृतं तद्गवाख्यं धनं विदः अविदः अलभथाः आत्म

© Dharmartha Trust J&K. Digitized by eGangotri

पिबन्नन्तस्य यज्ञस्य धीतिभिश्चन्त्रिभिर्मतिभिर्वसतीवरीभिः स्वे आसीये द्दमे गृहभूते द्रमे यज्ञे
संमर्जयसि सम्यक् शुद्धो भवसि। परावतो न। दूरस्थाद्देशान् यथा सामसाम ध्वनिः श्रूयते त
था तव तत् साम ध्वनिः सर्वैः श्रूयते। असौ सोमो मिषवाभिप्रायेणोक्तः। यत्र यस्मिन् यज्ञे धी
तयः कर्मणो धर्त्तारो यजमानाः रेणं तितनेते। रोचमानः सो यं सोमः त्रिधातुभिः त्रयाणां लो
कानां धारयित्रीभिः अरुषीरारोचमानाभिर्द्दुहिभिः वयो न्नं दधे स्तोतृभ्यः प्रयच्छति॥ पुनर्व
यो दधद् इत्याह राथो॥ ७॥ ॥ इति षष्ठेऽध्याये द्वितीयः खंडः॥ अथ तृतीयखंडे उत नो गोष
णिमित्येकर्चं प्रथमं सूक्तं तत्र सा नु गेषा॥ ७॥ उत नो गोषणिं धियमश्वसां वाजसामुत नृ
वत्कृणुहि वीतये इति। उतापि च हे पूषन् गोषणिं गवां सनित्रीं दात्रीं अश्वसां अश्वानां सनित्रीं
ज वाजसां वाजानामन्नानां सनित्रीं उतापि च नृवत् नृवतीं नरेणां च नित्रीं दात्रीं एवंभूतां धियं बु
द्धिं कर्म्म वा नो स्माकं सनातनत्स्यै उपभोगार्थं कृणुहि कुरु। सनतये वीतये इति पाठे॥ ७॥ ॥ अ
थ शशमानस्येत्येकर्चं द्वितीयं सूक्तं तत्रासे षा नु कु। शशमानस्य वा नरः स्वेदस्य सत्यशवसः।
विदुः कामस्य वेनतः इति। हे सत्यशवसः अवितथबलाः नरो नेतारो मरुतः शशमानस्य युष्मा
न् स्तुतिभिः संभजमानस्य स्वेदस्य स्वेदस्य स्तावकमंत्रोच्चारणजनितेन श्रमेण स्विद्यमानगात्र
स्य वेनतः वेनतिः कांतिकर्म्मा। कामयमानस्य वा शब्दः समुच्चये। एवंभूतस्य स्तोतुश्च कामस्य

© Dharmartha Trust J&K. Digitized by eGangotri

कामममभिलाषं विस्रंभयत् प्रयच्छतेसर्वः ।।७।। ।।उपनःसूनवइत्येकर्चं तृतीयं सूक्तं तत्रसे
षाऋक् ।उपनःसूनवोगिरःशृएवंत्वमृतस्यये।सुमृडीकाभवंतुनइति।।अमृतस्यमरणरहि
तस्यप्रजापतेर्येसूनवःपुत्राःतेदेवाःनोस्माकंगिरःस्तुतीःउपशृएवंतुनोस्माकंसुमृडीकाः
सुष्ठुमृडयितारःसुखयितारश्चभवंतुसंतु।।७।। ।।प्रवांमहीतित्र्यात्मकंचतुर्थंसूक्तंतत्रप्रथ
मा।प्रवांमहिद्यवीअभ्युपस्तुतिंभरामहेशुचीउपप्रशस्तयेइति।।हेद्यावापृथिव्यौद्यवाद्यो
तमानेवांयुवाभ्यांउपस्तुतिंस्तोत्रंहेमहीमहत्यौप्रभूतंअभिप्रभरामहेप्रकर्षेणसंपादयामः।।
किंच।शुचीशुद्धेयुवांप्रशस्तयेप्रशंसितुंउपउपस।गत्यर्थश्रुतेर्योग्यक्रियाध्याहारःउपगच्छामइ
तिशेषः।।७।।अथद्वितीया।।पुनानेतन्वामिथःस्वेनदक्षेणराजथः।जह्याथेसनादृतमिति।।
हेद्यावौतन्वास्वीययासूर्यादिदक्षेणबलेनचमिथःप्रत्येकंपुनानेशोधयंत्यौयज्ञंयजमानंवायुवां
राजथःईश्वरेभवथः।यद्वातन्वास्वशरीरैकदेशेनमिथःपरस्परंपुनानेशोधयंत्यौःद्यौःस्वीयेनोष
रेणभुवंसोचस्वकीयेनकार्मेणचंद्रमसिस्थितेनद्विमितिविवेकःसनात्सदाकालंऋतंयज्ञं
जह्याथेवहथः।।७।। ।।अथतृतीया।।महीमित्रस्यसाधथस्तरंतीपिप्रतीऋतं।परियज्ञंनि
षेदथुरिति।।महीमहत्यौद्यावापृथिव्यौमित्रस्यमित्रभूतस्यस्तोतुरभिमतंसाधथः।ऋतमन्नंत
रंतीतारयंतीतारयंत्यौपिप्रतीपूरयंत्यौयज्ञंपरिपरितोनिषेदथुःआश्रयतः।।७।। ।।अथप्र

157

© Dharmartha Trust J&K. Digitized by eGangotri

तेसमतसातित्वास्मकंपंचमंसूक्तंतत्रप्रथमा॥ अयमुतेसमतसिकपोतइवगर्भधिंके
स्तच्चिन्नुहसइति॥ हेइंद्र अयमु अयमपिइद्रयमानःसोमःतेत्वदर्थंसंपादितः। यंसोमंस
मतसिसम्यक्सानास्सनप्राप्नोषि। तत्रदृष्टांतः। कपोतइव। यथाकपोताख्यःपक्षीगर्भधिं
गर्भधारिणींकपोतींप्राप्नोतितद्वत्। तच्चित्तस्मात्कारणान्नोस्मदीयंवचनंतुहसेप्राप्नोषि।ग
र्भधिंगर्भोस्यांधीतयइतिगर्भधिः कर्मण्यधिकरणेचेतिकिप्रत्ययः॥ कृदुत्तरपदप्रकृतिस्व
रत्वं।जुहसेजुहिरदुहिरद्यर्द्दने। व्यत्ययेनात्मनेपदं॥छ॥ अथद्वितीया॥ स्तोत्रंराधानांपतेगि
र्वाहोवीरयस्यते। विभूतिरस्तुसूनृतेति॥ हेइंद्रराधानांधनानांपतेपालकगिर्वाहोगीर्भिर्वहनीयमा
नवीरशौर्योपेतयस्यतेतवस्तोत्रमीदृशंभवतितस्यतवविभूतिर्लक्ष्मीःसूनृताप्रियसत्यरू
पास्तु॥छ॥ अथतृतीया॥ ऊर्ध्वस्तिष्ठानऊतयेस्मिन्वाजेशतक्रतो।समन्येषुब्रवावहैति॥
हेशतक्रतोशतसंख्याकर्मोपेतअस्मिन्नस्मदीयेवाजेसंग्रामेनोस्माकमूतयेरक्षणायऊ
तिष्ठतीसाद्दिनात्तिनउद्यतस्त्वं। अर्द्धउन्नतःसुकत्तिष्ठभव। त्वंवाहंचमिलित्वाअन्येषुकार्येषु
संब्रवावहै। संम्यग्निवारयावः। तिष्ठद्ध्वोतस्त्विंऽइतिसंहितायांदीर्घः॥छ॥ ॥गावउपवदाव
टइतित्वंषष्ठंसूक्तंतत्रप्रथमा॥ गावउपवदावटेमहीयज्ञस्यरप्सुदा। उभाकर्णाहिरण्ययेति॥
हेगावोधर्मदुघाःयूयंअवटेमहावीरेमहावीरंउपवदउपावनतवर्णव्यत्ययः।उपागच्छत।यस्माद्घर्म

© Dharmartha Trust J&K. Digitized by eGangotri

स्पधर्म्मीयागस्यसाधनभूतेरस्युग्रहस्मुदेरिस्योः फलप्रेरेलिसोरश्विनोर्दतव्येवायह्वरपणंशष्ट
नंपरेमंत्रः। तेनसुष्टुग्रातव्ये। अथवापूर्ववत्सरणे। रपामंत्रेणस्थारणीयेदाहनीयेइदिशोगवाज
योःपयसीमहीमहतीबहुले अपेक्षिते। अतःउपावन। गोशाद्दोऽजाया। अय्यकपलस्तकः। अजा
पयसोपिमहावीरे आसेचनीयत्वात्। अपिवास्यमहावीरस्यउभाउभौकर्णिकस्थितानी॰
योद्वौरुक्मौहिरण्ययाहिरण्मायोसुवर्णरजतमयाविसर्पः॥ अवटेआवतमितिपाठो॥ ७॥
अथद्वितीया॥ अभ्यारभिदद्रपोनिषिक्तंपुष्करेमधु। अवटस्यविसर्जनइति। अद्य आद्रिय
माण। अध्वर्य्यदिघोभ्यारमित् अभिगाम्येवनिषिक्तमतिरिक्तंमधुपुष्करेवपुष्करेमवत्दउपय
मनीपात्रेसिंचंति अग्निहोत्रार्थं अवटस्यमहावीरस्यविसर्जनसमयेहोमानंतरंखलुमहावी
रमांसंघां आसादयंति। अवटस्यावनस्येतिपाठो॥ ७॥ अथतृतीया॥ सिंचंतिनमसावटमुत्त्वा
चक्रंपरिज्मानं। नीचीनवारमक्षितमिति॥ नमसानमनेनाऽवटंमहावीरंउत्त्वाचक्रंउपरिस्थित
चक्रंपरिज्मानंपरितोव्याप्तंनीचीनवारं। नीचीनद्वारं। अक्षितमक्षीणंइदृशंक्षीराघवशेषमुक्तं
। आहवनीयस्योपरिनमनेनसिंचंतिजुह्वति। महावीरेण दि आहवनीयेहूयते। अवटमवत
मितिपाठो॥ ७॥ इतिषोडशोध्यायेतृतीयःखंडः॥ ७॥ ॥ अथचतुर्थखंडेमाभेमेतिप्रगाथ्यास
कंप्रथमंसूक्तंतत्रप्रथमा॥ माभेममाश्रमिष्मोग्रस्यसख्येतव। महत्तेवृष्णो अभिचक्ष्यंकृतंपश्ये

© Dharmartha Trust J&K. Digitized by eGangotri

मनुर्वर्शाय दुमिति ॥ हे इन्द्र उग्रस्योग्रस्य बलस्य तव सख्ये सखित्वे सति वयं मा भेम मा भैष्म कुतश्चि
दपि शत्रोर्भीता मा भूम । मा श्रमिष्म श्रान्ताः पीडिताश्च मा भूम । वृष्णः कामानां वर्षितुस्तव तवसंब
धि महत्प्रभूतं कृतं वृत्रवधादि वेदिलक्षणं कर्म अभिचक्ष्यं अभितः ख्यापनीयं स्तोतव्यं अतो महानुभा
वस्य तव सख्यं प्राप्तानां भातिश्रमो न जायेत इत्यर्थः । तत्कथमवगम्यत इति चेत् उच्यते । तूर्वशं एतत्सं
ज्ञं राजर्षिं यदुं एतत्संज्ञकं च । त्वत्प्रसादात्सुखेन जीवन्तौ पश्येम दृष्टवन्तः खलु वयं । अतः कारणा
त्तव सख्यं प्राप्तस्य भयादिकं न जायत इत्येतदुपपन्नमित्यर्थः ॥ ७ ॥ अथ द्वितीया ॥ सख्यामनु स्फि
ग्यं वावसे वृषा न दानो अस्य रोषति । मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥ ८ ॥ व
षा कामानां वर्षितेन्द्रः सव्यां दक्षिणेतरां स्फिग्यां कटिप्रदेशमनुलक्ष्य तृतीयार्थे अनोः कर्मप्रवचनीय
त्वं सव्यया स्फिग्या शरीरैकदेशेन वावसे वस्ते । सर्वं भूतजातमाच्छादयति । स्वयं कृत्स्नं जगद
तीत्य वर्त्तत इत्यर्थः । अत्यन्तरं संवरणं यति । यद्वान्यया स्फिग्या क्षामवस्था इति । अपि वा दानः अव
खण्ड यिता । दानं अवखण्डने प्रवाधयद्युः सन् अस्य इन्द्रस्य ममिंद्रं न रोषति न हिनस्ति । रुषरिषि हिंसायां ॥ इन्द्रं
हिंसितुं कश्चिदपि शक्तो नास्तीत्यर्थः । यद्वा हे यजमान दानो हविषां दाता त्वं अस्येन्द्रस्य न रोषति रो
षं न जनयसीति । सर्वदा हविर्भिः परिचरसीत्यर्थः । उत्तरार्द्धं प्रत्यक्षकृतः । सारघेण सरघा म
धुमक्षिका । तत्संबन्धिना मध्वा मधुना । लुप्तोपममेतत् । मधुनेव रसवता क्षीरादिना श्रयणद्रव्येण

© Dharmartha Trust J&K. Digitized by eGangotri

159

संपृक्ताः संसृष्टाः । संस्कृता धेनुवत्प्रीतिजनकाः । अस्मदीयाः सोमाः यद्वा धिवेः प्रीणनार्थाद्धेनवः प्रा
णयितार इत्यर्थः । अपवाधेष्टपानो । धेट इत्येतस्मात् औणादिको नुप्रत्ययः । तत्संनियोगेन इकारांतादेशश्च ।
पातव्याः सोमा इत्यर्थः । यत एवमतः कारणात् हे इंद्र त्वं क्षिप्रं एहि अस्मत्समीपमागच्छ । आ
गत्य च सोमाः यस्मिन्नुत्तरवेदिलक्षणे स्थाने हूयंते तत् स्थानं शीघ्रं गच्छ । द्रुगताविति धातुः । घ्वोन
स्तिउ इति सांहितिको दीर्घः । तदनंतरं अध्वर्युणा दत्तं सोमं पिब । तेन सोमेन सम्यक् कुक्षी इंद्र पूरयेत्य
र्थः ॥ ७ ॥ ॥ इमा उ त्वेति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथमा ॥ इमा उ त्वा पुरूवसो गिरो वर्धंतु या
मम । पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषतेति ॥ हे पुरूवसो बहुधनेंद्र मम दीर्घा इमा गिरः
शास्त्ररूपा वाचः त्वां वर्धंतु वर्धयंतु । तथा पावकवर्णा अग्निसमानतेजस्काः अत एव शुचयः शु
द्धाः विपश्चितो विद्वांसः उद्गातारः स्तोमैः स्तोत्रैर्बहिष्पवमानादिभिरभ्यनूषत त्वामभिष्टुवंति ॥
नु स्तुतौ कुटादिः ॥ ७ ॥ अथ द्वितीया ॥ अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे । सत्यः
सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्य इति ॥ अयमिंद्रः सहस्रं सहस्रसंख्याकैः ऋषिभिः
अतींद्रियार्थदर्शिभिः स्तोतृभिः सहस्कृतः सहसा बलेन युक्तः कृतः स्तुत्या हि स्वतापा बलं वर्धी
ता । स च एवं स्तुतः सन् समुद्र इव उदधिरिव पप्रथे प्रथितो विस्तीर्णो बभूव । अस्येंद्रस्य सत्यो अ
वितथः प्रसिद्धो महिमा महत्त्वं शवो बलं यज्ञेषु यागेषु विप्रराज्ये । राज्ञः कर्म राज्यं । विप्राणां स्तो

© Dharmartha Trust J&K. Digitized by eGangotri

तॄणां राजेस्तुतः स्वास्त्वं संघेगणैस्तूयते॥ ७॥ ॥ अथ यस्यायमिति प्रगाथात्मकं तृतीयं सूक्तं
तत्र प्रथमा॥ यस्यायं विश्व आर्यो दासः शेवधिपा अरिः। तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो
अज्यते रयिमिति॥ यस्य यज्ञस्य अयं विश्वः सर्वलोकः आर्य्यः प्रभुरपि शेवधिपा निधिपाल
कः विधाहवैब्राह्मणम्। जगाम गोपायमाशेवधिष्टेहमस्मीति मंत्रांतरे पठितत्वात्। दासो
दस्युप्रभृतिरप्यरिः शत्रुर्भवति। स यज्ञः अर्य्ये स्वामिनि रुशमे नियंतरि पवीरवि सरस्वत्याः पि
तरि। पवीरवी कन्या चित्रायुः सरस्वतीत्युक्तेः। तिरश्चिन्नतिरोभूतो पितुभ्येत् हे इन्द्र तुभ्यमेव र
यिर्हविर्लक्षणं धनमुद्दिश्य अज्यते प्राप्तो भवति। अयमभिप्रायः॥ विप्रक्षत्रादिकः सार्वलोकः
बृहस्पतिसवराजसूयादिरूपस्य यस्य यज्ञस्य भर्त्ता स्वव वर्द्धते। स ना हत्वीय यज्ञो मंत्ररूपायाः सर
स्वत्याः पितरस्थानीये परमेश्वरस्वरूपे गूढोपि सन् हे इन्द्र त्वदर्थमेव हविर्दातुं प्रकटो भवति। त
थाविधस्तव महिमेति॥ ७॥ अथ द्वितीया॥ उरुण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः
। अस्मे रयिः पप्रथे वृष्ण्यं शवोस्मे स्वानास इन्दवः इति। उरुण्यवो यागादिकर्मसु चरणशीला वि
प्रासो मेधाविनः स्तोतारः ऋत्विजः मधुमन्तं मधुक्षीराद्याहुतियुक्तं घृतश्चुतं घृतमाज्यं श्चोतन्ते क्षरन्ति
यस्मिन्नाहुतिद्वारेणेति घृतश्चुतं अर्कमर्चनीयमिन्द्रं आनृचुः पूजयन्ति। किमर्थमिति उच्यते।
अस्मे अस्मभ्यं रयिः हविर्लक्षणं धनं पप्रथे प्रख्यातं भवतु। तथा वृष्ण्यं वर्षणशीलं सोमनिर्

© Dharmartha Trust J&K. Digitized by eGangotri

धनं शवो बलमपि प्रथतं॥ तथा अस्मे अस्मासु स्वानासः सुवाना अभिषुताः इंद्रवः सोमाः
प्रख्याता भवंतु॥ एवंरूपं फलं कामयमाना ऋत्विजः इंदुं पूजयंतीत्यर्थः॥ ७॥ ॥ अथ गोम
न्न इंद इति चतुर्थं सूक्तं तत्र प्रथमा॥ गोमन्न इंदो अश्ववत्सुतः सुदक्ष धनिव। शुचिं च वर्णमधि
गोषु धारयेति॥ हे सुदक्ष सुबल हे इंदो सोम सुतो भिषुतस्त्वं नो स्माकं गोमत् प्रशस्ताधनगो
युक्तं अश्ववत् अश्वयुक्तं धनं धनिव धन्व वर्णविकारो गमय धविर्गत्यर्थः भ्वादिः। ततो हे सु
विं भूतं दीप्यमानं वर्णं रसं च गोषु गव्येषु क्षीरादिषु अधिधारय अधिधारयामि। आश्रयामी
त्यर्थः॥ ७॥ ॥ अथ द्वितीया॥ स नो हरीणां पत इंदो देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भवति
॥ हे हरीणां पते अस्मदीयानां हरितवर्णानां पशूनां स्वामिन् हे इंदो सोम देवप्सरस्तमः अतिशये
न दीप्तरूपोपेतः सन् त्वं नर्यः कर्मनेतृभ्य ऋत्विग्भ्यो हितः सः त्वं नो स्माकं रुचे भव दीप्तिकरो भ
व। कमिव सखेव यथा सखा सख्ये मित्राय दीप्तिकरो भवति तद्वत्॥ ७॥ ॥ अथ तृतीया॥
सनेमि त्वमस्मदा अदेवं कं चिदत्त्रिणं। साह्वां इंदो परि बाधो अप द्वयुमिति॥ हे सोम त्वं सनेमि
पुराणं सख्यं अस्मदस्मासु कुरु। आ अपि च अदेवं अदेवनशीलं कं चिदपि अत्त्रिणं अद
नशीलं राक्षसं अस्मत् अस्मत्तो पगमय। किंच हे इंदो सोम साह्वान् शत्रूनभिभवं स्त्वं बाधो
बाधमानान् परिजहि। तथा द्वयुं द्वयवंतं सत्यानृते युक्तं बाह्याभ्यंतरमायाद्वयोपेतं राक्षसं

© Dharmartha Trust J&K. Digitized by eGangotri

अस्मत्तोऽपगमय॥छ॥ ॥अथाञ्जत इति पंचमं सूक्तं तत्र प्रथमा॥ अञ्जतेव्यंजतेसमंज
तेक्रतुंरिहंतिमध्वाभ्यंजते।सिंधोरुच्छ्वासेपतयंतमुक्षणंहिरण्यपावाःपशुमप्सुगृभ्णतइति॥
सोमंऋत्विजोऽञ्जतेगोभिस्तथाव्यंजतेविविधमंजंतिसमंजतेसम्यगंजंति।स्तुत्यर्थत्वाद
पुनरुक्तिः।तथाक्रतुंबलकर्त्तारंरिहंतिरिहंत्यास्वादयंतिदेवाः।तथापुनर्मध्वामधुनाग
व्येनाभ्यंजतेतमेवसोमंसिंधोरुदकस्यरसस्याधारभूतेउच्छ्वासेउच्छ्रितेदेशेपतयंतंगच्छं
तं।पत्लृगतावित्यस्मात्स्वार्थिकेणिचिवृध्यभावःछांदसः।उक्षणंसेक्तारंहिरण्यपावाः
हिरण्येनपुनंतःपशुंद्रष्टारं।पशुःपश्यतेरितियास्केनोक्तत्वात्।अप्सुवसतीवरीषुगृभ्णं
तेगृभ्णंति॥छ॥अथद्वितीया॥विपश्चितेपवमानायगायतमहीनधारात्यंधोअर्षतिअ
हिर्नजूर्णामतिसर्पतित्वचमत्योनक्रीडन्नसरद्वृषाहरिरिति॥विपश्चितेमेधाविनेपवमा
नायपूयमानायगायतस्तुतिंकुरुत।सविपश्चित्सोमःमहीनधारामहतीवर्षधारेवांध
सोऽन्नंरसात्मकंअर्षति।अहिर्न।अहिरिवजूर्णांजीर्णांत्वचमतिसर्पतिअतिसु
वतितद्वदतिसर्पतिधारयाआपवित्रात्।अभिषवादिकर्मणात्वचंविमुंचतीत्यर्थः॥अत्यो
न।अश्वइवक्रीडन्क्रीडमानःअसरत्सरतिद्रोणकलशंगच्छति।वृषावर्षकःकामानांहरि
हरितवर्णोरसः॥छ॥अथतृतीया॥अग्रेगोराजाप्यस्तविष्यतेविमानोअह्नांभुवनेष्वर्पितः॥

© Dharmartha Trust J&K. Digitized by eGangotri

।हरिर्घृतस्नुः सुदृशीको अर्ण्णवो ज्योतीरथः पवते राय ओक्य इति॥ अयं गः आग्रगंता। राजारा
जमानः अध्वापु संस्कृतः सोमस्तविष्यते श्रूयते। योन्को दिनानां विमानो निर्म्माता। चंद्रक
लात्मासस्याधीनत्वादहर्थविहारस्य निर्म्माता। भुवनेषु दृष्केषु वसतावरीसंबंधिषु पतिः ग
स्तापितः स राजात विष्यते। किंच। हरिर्हरितवर्ण्णः घृतस्नुः प्रस्रुतोदकः सुदृशीकः शोभनदर्श
नः अर्ण्णवि उदकवान्। अर्ण्ण इत्युदकनाम ज्योतीरथ ज्योतिर्म्मयरथः रायो धनस्य प्रापयिता
॥ तुक्यः उक इति निवासनाम तस्य हितः॥ ७॥ इति षोडशोध्याये चतुर्थः खंडः॥ ७॥ ॥ वेदार्थ
स्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ७॥ इति श्रीमद्रा
नाधिराजपरमेश्वरवैदिकमार्ग्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचा
र्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे षोडशोध्यायः॥ संपूर्णः॥ ७॥ यस्य नि
श्वसितं वेदा यो वेदेभ्यो खिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ७॥ ॥ अथ सप्तदशो
ध्याय आरभ्यते॥ तत्र प्रथमे खंडे विश्वेभिरग्न इत्येतत् त्र्यचं प्रथमं सूक्तं तत्र प्रथमा॥ विश्वेभिरग्ने
अग्निभिरिमं यज्ञमिदं वचः। चनो धाः सहसो यहो इति॥ हे सहसो यहो बलस्य पुत्र देवनाऽस्मा
ग्ने विश्वेभिरग्निभिः सर्वैराहवनीयादिभिर्युक्तः स्त्वं इमं मसदीयं यज्ञं इमं मसदीयं च वचः स्तोत्रं च से
वमानः चनोन्नं धाः अस्मभ्यं धेहि॥ ७॥ अथ द्वितीया॥ यच्चिद्धि शश्वता तना देवं देवं यजामहे॥

© Dharmartha Trust J&K. Digitized by eGangotri

।तेऽहूयते हविरिति॥ हे अग्ने यद्यपि द्वियघपि शश्वता शश्वतेन नित्येन तनाविस्तृतेन हविषाध
नेन वा देवं देवं अन्यमन्यं वरुणेन्द्रादिरूपं नानाविधं देवताविशेषं यजामहे। तथापि तद्धविः सर्वं त्व
य्येव हूयते। अन्यदेवतान्तरविषयो यागो पि त्वदीय एवास्तीत्यर्थः॥ तना॥ तनु विस्तारे।
क्तिः घेति क्तिपि येद्धाप चाघञ्। सुपां सुलुगिति तृतीयाया आकारः। देवं देवं नित्यवीप्सयोरिति
द्विर्भावः। तस्य परमाम्रेडितमिति उत्तरस्याम्रेडितसंज्ञायां। अनुदात्तं चेति सर्वानुदात्तत्वं
यजामहे। निपातैर्यद्यदिहन्तेति निघातप्रतिषेधः॥ त्वयि युष्मदस्मदोरस्मन्येकवचनस्य सुपां सु
लुगिति शे आदेशः। त्वमावेकवचने इति सपर्यन्तस्य त्वादेशः। शेषे लोपे अतो गुण इति पर
पूर्वत्वं। शे इति प्रगृह्यसंज्ञायां लुप्तप्रगृह्या अचि इति प्रकृतिभावः। हूयते। अकृत्सार्वधातुक
योरिति दीर्घः॥ छ॥ ॥ अथ तृतीया॥ प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः। प्रियाः स्वग्न
यो वयमिति॥ विश्पतिर्विशां प्रजानां पालकः। पूत्पावैश्वर्ये इति पूर्वपदप्रकृतिस्वरे प्राप्ते परादि
श्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वं। होता होमनिष्पादकः। मन्द्रो हृष्टः। वरेण्यो वरणीयः। वृङ्
एण्यः। वृषादित्वादाद्युदात्तत्वं। एवं विशिष्टोऽग्निर्नोऽस्माकं प्रियोऽस्तु भवतु। वयमपि स्वग्नयः
शोभनाग्नियुक्ताः। बहुव्रीहौ नञ्सुभ्यामिति उत्तरपदान्तोदात्तत्वं। एवंभूताः अतः तव प्रिया भूया
स्मेति शेषः॥ छ। ॥ अथ इंद्रं व इति तत्वं द्वितीयं सूक्तं सप्त प्रथमा॥ इंद्रं वो विश्वतस्परि ह्वाम

© Dharmartha Trust J&K. Digitized by eGangotri

हेजनेभ्यः।अस्माकमस्तुकेवलइति।हेइंद्रत्वंयजमानाविश्वतःसर्वेभ्योजनेभ्यःपर्युपरिअव-
स्थितमिंद्रंवोयुष्मदर्थंहवामहेआह्वयामः।अतःसइंद्रोऽस्माकंकेवलोऽसाधारणोऽस्तुइतरे-
भ्योप्यधिकंअनुग्रहंअस्मासुकरोत्वित्यर्थः॥इंद्रंरनूप्रसयंतोनिसाराघकरात्तः॥५॥अ-
थद्वितीया॥सनोवृषन्नमुंचरुंसत्राहावन्नपावृधि।अस्मभ्यमप्रतिष्कुतइति।हेसत्रादावन्
अस्मदभीष्टफलानांसर्वेषांसहप्रदातः।आतोमनिन्क्वनिब्वनिपश्चेतिवनिप्।आमंत्रि-
तस्यचेत्याद्युदात्तत्वं।पादादित्वान्ननिघातः।अंतःकारणात्द्वीयादिनिष्पत्त्यर्थंहेवृषन्इ-
ष्टिप्रदेंद्रआमंत्रितनिघातः।नोस्मदर्थंअमुंदृश्यमानंचरुंमेघंचरतीतिचरुः।भृमृशीसादि-
नाउप्रत्ययः।प्रत्ययस्वरेणांतोदात्तः।अपावृधिउद्घाटय।वृञ्वरणे।लोटःसिपूतस्यसेर्हि-
पिच्चेतिहिः।स्वादिभ्यःश्नुः।तस्यबहुलंछंदसीतिलुक्।श्रुशृणुपृकृवृभ्यश्छंदसीतिहेर्धिरादेशः
।तस्यङित्वात्सार्वधातुकगुणाभावः।निघातः।उद्घाटयसर्वं।तथैवास्मभ्यमस्मछब्दात्भ्यसोभ्यमि-
तिभ्यमादेशः।शेषेलोपइतिदकारलोपः।बहुवचनेझल्येदितीत्वंनभवति।अंगवृत्तेपुनर्वृत्ताव-
विधिर्निष्ठितस्येत्युक्तं।प्रातिपदिकस्वरेणास्मत्सकारस्योदात्तः।भ्यसोभ्यमित्यभ्यमादेशपक्षेशेषे
लोपइतिमपर्यंतशेषस्यादेशाद्यस्यलोपः॥तदाउदात्तनिवृत्तिस्वरेणअभ्यमआदेकारस्यउ-
दात्तत्वं।अस्मदर्थं।अप्रतिष्कुतःअप्रतिशब्दरहितःकेनचिदप्रतिशब्दितःकुङ्शब्देनिष्ठेति

162

१६२

© Dharmartha Trust J&K. Digitized by eGangotri

कर्म्मणि क्तप्रत्ययः। प्रतेः प्राक् प्रयोगः। कारस्करादेराकृतिगणत्वात् सुडागमः। सुषामादेरा
कृतिगणत्वात् षत्वं। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वं यद्यदस्माभिर्याचितं तन्न स
मासे। अव्ययपूर्वपदप्रकृतिस्वरत्वं यद्यदस्माभिर्याचितं तत्सर्वं नेतेति प्रतिशब्दं नोच्चारय
ति। अतोऽस्मद्विषयकदानविषयस्खलितः एतदेवाभिप्रेत्य यास्क आह। अप्रतिष्कुतो अप्रति
स्खलितो ऽप्रतिस्खलितो वेति॥ ६॥ अथ सप्तमी॥ वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा॥ ईशानो
अप्रतिष्कुत इति॥ वृषा कामानां वर्षितेंद्र ओजसा स्वकीयेन बलेनानुग्रहीतुं कृष्टीर्मनुष्या
न्नियर्ति प्राप्नोति। कीदृश इंद्रः ईशानः समर्थः। अप्रतिष्कुतः प्रतिशब्दरहितः याच्यमानं न
परिहरतीत्यर्थः। इंद्रस्य दृष्टांतः। वंसगो वननीयगतिर्वृषभो यूथेव गोयूथानि यथा नियमा
प्नोति तद्वत्। यूथा इव। यु मिश्रणे। मिश्रीभवंतीति यूथानि। यु मिश्रणामिश्रणयोः। निशीथपृ
थगूध यूथप्रोथाः इति थक्प्रत्ययांतो निपातितः। निपातनाद्दीर्घत्वं। प्रत्ययस्वरेण अकार उदात्तः
। शेः छंदसि बहुलमिति शेर्लुक्। इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यमिति समा
सेऽपि स एव स्वरः॥ ७॥ ॥ त्वं नश्चित्र इति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ त्वं नश्चित्र ऊत्या व
सो राधांसि चोदय। अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु न इति॥ हे वसो वासक अग्ने चित्र
दर्शनीय त्वं अस्य सारस्य यास्य राधांसि धनानि नोऽस्मभ्यं चोदय प्रेरय। अस्य लोकस्य परिदृश्यमान

© Dharmartha Trust J&K. Digitized by eGangotri

स्पराय्यो धनस्य त्वं रथीरसि रंहितानेता भवसि। अतः कारणात् अस्मभ्यं धनानि प्रेरयेत्यर्थः॥
अपि च नोऽस्माकं तुचे अपत्यनामैतत्। अपत्याय अपतनहेतुभूताय पुत्राय च गाधं प्रतिष्ठां
तुक्षि प्रवर्धय त्वं मया।७॥ अथ द्वितीया॥ पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः। अग्ने
हेडांसि दैव्या युयोधि नोऽदेवानि ह्वरांसि च॥ हे अग्ने त्वं अदब्धैः केनाप्यहिंसितैः अप्रयुत्व
भिः अपृथग्भूतैः यौतिरत्र पृथग्भावार्थः॥ सहितैः पर्तृभिः पालनसाधनैः तोकं पुत्रं तनयं
पौत्रं च पर्षि पालय पौ [redacted] वेष्टुं सं परि
वर्जनीयं परित्याज्यं विरुद्धार्थप्रतिपादकत्वात्। स्वत एव परित्यक्तमेतत्। शिष्टं समानं पूर्वे
ण। मतनुकरूपं विलक्षणं यद्देवरूपमस्ति एतद्योग्यरूपं अस्मदस्माकं मा पगूहः अपगूहं
संवृतं मा कुरु। गुहू संवरणे। अपि तु स्वरूपं प्रकटय॥ वैष्णवस्य रूपस्य गूहने कः प्रसक्ति
रिति चेत् यद्यस्मात्त्वं अन्यरूप एव रूपांतरमेव धारयन् समिथे संग्रामे बभूथ अस्माकं सहा
यो भवसि। तस्मात्त्वया इदं गूहनं न कार्यमिति। प्रशंसापक्षे तु हे विष्णो ते तव तन्नाम किं परिचक्षि प्र
ख्यातं भवति न प्रख्यापनीयं स्वत एव प्रख्यातं। अप्रख्यातं प्रख्यापनीयं किं तन्नाम शिपिविष्टो र
श्मिभिराविष्टोऽस्मीति यन्नाम प्रबृषे यत एवं प्रख्यातरूपस्त्वं अतोऽस्माकमतद्देवं रूपं संवृ
तं माकार्षीः। इदानीं गूढरूपोऽपि यद्यस्मात्त्वं समिथे संग्रामे अन्यरूपः कृत्रिमरूपाधरन्यद्दैवं र

[redacted]

© Dharmartha Trust J&K. Digitized by eGangotri

द्रूपं यो यद्विलक्षणं तादृग्रूप एव बभूथ भवसि। तस्मात्त्वं गूढो ऽपि ज्ञायस एवेति स्वर्थमिव तस्य
रूपस्य गूहनं अतो वक्तु तेजोसंकं यदन्यं रूपं तदस्माकं प्रदर्शयेति तात्पर्यार्थः॥७॥ अथ द्वि
तीया॥ प्रतत्ते अद्य शिपिविष्ट हव्यमर्यः शंसामि वयुनानि विद्वान्। तं त्वा गृणामि तवसमत
व्यान्क्षयंतमस्य रजसः पराके इति॥ हे शिपिविष्ट रश्मिभिराविष्ट विष्णो ते तव तत्प्रसिद्धं
विष्णुरिति प्रख्यातं नाम अर्यः स्वामी स्तुतीनां हविषां वा तथा वयुनानि ज्ञातव्यान्यप
ज्ञातानि विद्वान् जानन्नु यस्त्व हव्यं आक्रान्तयोग्यं नामैर्दैव्या देवसंबंधीनि व हेलांसि क्रोधान्
नोऽस्मत्तो युयोधि पृथक्कुरु मानवानि मनुष्यसंबंधीनि च ह्वरांसि हिंसनानि अस्मत्तः पृ
थक्कुरु॥७॥ ॥ अथ किमित्त इति सप्तर्चकं चतुर्थं सूक्तं तत्र प्रथमा॥ किमित्ते विष्णो परिच
क्षि नाम प्र यद्ववक्षे शिपिविष्टो अस्मि। मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभू
थेति॥ पुरा खलु विष्णुः स्वं रूपं परित्यज्य कृत्रिमं रूपांतरं धारयन् संग्राममेव वसिष्ठस्य सा
हाय्यं चकार। तं जानन्नृषिः अनया प्रत्याचष्टे। अन्वनिह्नुतं। शिपिविष्टो विष्णुरिति विष्णो
र्द्वे नामनी भवतः। कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः। किं ते विष्णो प्रख्यातमेतद्भवत्य
प्रख्यापनीयं यत्त्वं प्रब्रूषे शिपिविष्टो ऽस्मीति प्रतिपन्नरश्मिरपि वा प्रशंसानामैवाभि
प्रेतं स्यात्। किं ते विष्णो प्रख्यातमेतद्भवति अप्रख्यापनीयं यदुत प्रब्रूषे शिपिविष्टो ऽस्मीति प्रति

© Dharmartha Trust J&K. Digitized by eGangotri

पन्नरश्मिः शिपयोऽत्र रश्मयउच्यंते तैरा विष्टो भवति मा वर्पो अस्मद्रूपगूह एतद्वपुः इति रू
पनाम वरुणोक्तीति सतो यदन्यरूपः समिथे संग्रामे भवसि संयतरश्मिरिति तत्र कुत्सिता
र्थ पिविष्टे योजना हे विष्णो ते तव तन्नाम किं परिचक्ष्यं प्रख्याप्यं भवतीति शेषः । किं शब्दः क्षेप
अप्रख्याप्यमेव तत्स्वति । यन्नाम मास्मभ्यं प्रबवक्षे प्रब्रूषे शिपिविष्टो अस्मीति । अंतर्णी
तोपमानमेतत् । शेषइव निर्वेष्टितः तेजसा अनाच्छादितो भवसीति । अश्लीलार्थत्वादिदं ना
मन प्रशस्तमित्यर्थः । यद्वा परि पूर्वः चक्षिर्वर्जनार्थः । तन्नाम किं परिचक्ष्यं परि [redacted]
[redacted] अहमघेदानीं प्रशंसामि प्रकर्षेण स्तोमि तत
वसं प्रवृद्धं तं त्वां विष्णुम् अतव्यानत्वीयान् अवृद्धतरोहं गृणामि स्तोमि । कीदृशं अस्य रजसो
लोकस्य पराके दूरदेशे क्षयंतं निवसंतं ॥ ६ ॥ असपत्नीया ॥ वषट् ते विष्णवास आ कृणोमि त
न्मे जुषस्व शिपिविष्ट हव्यं । वर्धंतु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा न इति ।
हे विष्णो ते तुभ्यं आसः आस्यात् आ अभिमुखं वषट् कृणोमि । वषट्करोमि । वषट्कारेण
हविर्ह्वयामि । हे शिपिविष्ट शिपयो रश्मयः तैरा विष्ट विष्णो तद्वषट्कृतं मम दीयं हव्यं हविर्जु
षस्व सेवस्व । सुष्टुतयः शोभनस्तुत्यात्मिका गिरो वाचश्च त्वां वर्द्धयंतु । हे विष्णो यूयं बहु
वचनं पूजार्थं । यद्वा यूयं भवदादयो देवाः सर्वे देवाः स्वस्तिभिः अविनाशिभिः नोस्मान् सदा सर्वदा

१६४

© Dharmartha Trust J&K. Digitized by eGangotri

पातरस्तु॥ ७॥ इतिसप्तदशोध्यायेप्रथमःखंडः॥ ७॥ ॥ अथद्वितीयखंडेवायोसुक्तोअया
मीतित्रिचात्मकंप्रथमंसूक्तंतत्रप्रथमा॥ वायोसुक्तोअयामितेमध्वोअग्रंदिविष्टिषुआयाहि
सोमपीतयेस्पार्होदेवनियुत्वतेति॥ हेवायोतुभ्यंसुक्तोव्रतचर्यादिनादीप्तो॰हंमध्वःमधुरंसोम
रसंकर्मणिषष्ठीअग्रंइतरेभ्यःपूर्वंअयामिप्रापयामि॥ अथतिरंतर्भावितण्यर्थः॥ किमर्थंदि
विष्टिषुदिवोद्युलोकस्येषणेषुसत्सुहेदेवयोस्पार्हस्पृहणीयस्त्वंनियुत्वतानियुद्वयाःअतिनि
यतोऽश्वःतेनसाधनेनआयाहिसोमपीतयेसोमपानाय॥ ७॥ अथद्वितीया॥ इंद्रश्चवायवे
षांसोमानांपीतिमर्हथः॥ युवांहियंतीदवोनिम्नमापोनसध्र्यगिति॥ हेवायोत्वंइंद्रश्चैषांग्र
हीतानांसोमानांपीतिं॥ पानमर्हथः॥ युवामिंदवोथ्यंरकाःसोमायंतिप्राप्नुवंति॥ निम्नंखातप्रदे
शंआपोनसध्र्यक्उदकानियम्यासहैवगच्छंति॥ तद्वत्सर्वेसोमाःयुवांयंतीति॥ ७॥ अथतृती
या॥ वायविंद्रश्चशुष्मिणासरथंशवसस्पती॥ नियुत्वंतानऊतयआयातंसोमपीतयइति॥ हे
वायोत्वमिंद्रश्चशवसःबलस्यपतीपालयितारोअतएवशुष्मिणांष्मिणाबलवंतो॥ नियुत्वं
ता॥ नियुद्भिःअश्वैःअश्ववंतोयुवांसरथंसमानमेवसरथमारुह्येतिशेषः॥ नोस्माकमूतयेभक्षणाय
सोमपीतयेसोमंपीतायचआयातंआगच्छतं॥ यद्वासरथमधितिष्ठतंआरुह्यवायातमिति
चवाक्यद्वयं॥ ७॥ ॥ अथषष्ठेपतितत्र्यात्मकंद्वितीयंसूक्तंतत्रप्रथमा॥ अधक्षपापरिष्कृतोवाजां

© Dharmartha Trust J&K. Digitized by eGangotri

अभिप्रगाहसे। यदी विवस्वतो धियो हरिं हिन्वंति यातवइति॥ स्वपा सुपां सुलुगिति पंचम्या आ
कारः स्वपायाराग्नेः अथानंतरं प्रातःकाले परिस्कृतः र भूषणार्थे संपर्युपेभ्यइति करोते स्सुडाग
मः अभिरलंकृतः यद्वा स्वपयि आसेनायामलंकृतः सहने सोमत्वं वाजान्नानि बलानि वा अ
भिलक्ष्य प्रगाहसे प्रगच्छसि। विवस्वतः परिचरणवतो यजमानस्य धियः कर्मसाधनभूता अं
गुलयः हरिं हरितवर्णं त्वां मंसुं पातवे पात्राण्यभिगमनाय यदि हिन्वंति प्रेरयंति तर्हि सेवनानि
गच्छसीति॥ ७॥ अथ द्वितीया॥ तमस्य मर्जयामसि मदो य इंद्रपातमः। यं गाव आसभिर्दधुः
पुरा नूनं च सूरय इति॥ अस्य सोमस्य तं रसः मर्जयामसि मर्जयामः शोधयामः अलंकुर्मो
वा। यो मदो मदकरो रसः इंद्रपातमः इंद्रेणात्यंतं पातव्यो भवति। किंच। गावो गंतारः सूरयः स्तोता
रः पुरा च नूनमिदानीं च यं सोमरसं आसभिरास्यैर्दधुर्धारयंति पिबंतीति यावत्। यद्वा गावो धेन
वो यं सोमं तृणादि रूपेणावस्थितमासभिरास्यैर्दधुः धारयंति तृणरूपेण भक्षयंति॥ ७॥ अथ तृती
या॥ तं गाथया पुराण्या पुनानमभ्यनूषत। उतो कृपंत धीतयो देवानां नाम बिभ्रतीरिति॥ पुनानं पूय
मानं तं सोमं पुराण्या पुरातनया गाथया स्तुत्या अभ्यनूषत स्तोतारोभिष्टुवंति। नूस्तवने लुङि
रूपं। उतो अपि च नाम कर्मार्थिं नमनं बिभ्रती बिभ्राणा धीतयोंगुलयः देवानां सोमं पुरूप हविः
प्रदानाय कृपंत कल्पयंति समर्था भवंति॥ ७॥ ॥ अश्वं न त्वेति त्वा असकं त्वा अशीलसकं तृतीयं सूक्तं वै

165 १६५

© Dharmartha Trust J&K. Digitized by eGangotri

त्प्रथमा॥ अश्वंनत्वावारवंतंवंदध्याअग्निंनमोभिः। संम्राजंतमध्वराणामिति। अध्वराणां
यज्ञानांसंम्राजंतंसम्राड्रूपंत्वामग्निमग्निंत्वांनमोभिःस्तुतिभिर्हविर्भिर्वावंदध्यैवंदितुं
प्रवृत्ताइतिशेषः। अग्नेर्दृष्टांतः। वारवंतंवालयुक्तंअश्वंनअश्वमिवअश्वोयथावालेनबाध
कान्मशकमक्षिकादीन्परिहरतितथात्वमपिज्वालाभिरस्मद्विरोधिनःपरिहरसीत्यर्थः॥वा
रवंतंसकुपःपितास्नुदत्तवं। यन्नोमिलादाघ्रदत्तोवारयाश्वःकषञ्चित इतिअंतोदात्तत्वंप्रस
येननप्रवर्त्तते॥१॥ अथद्वितीया॥ सघानःसूनुःशवसापृथुप्रगामासुशेवः। मीढ्वांअस्मा
कंबभूयादिति॥ सघसएवाग्निर्नोऽस्माकंसुशेवःसुसुखोभवत्वितिशेषः। कीदृशःशवसा
बलस्यसूनुःपुत्रःविभक्तिव्यत्ययः। पृथुप्रगामापृथुप्रगमनःप्रकर्षेणगमनंप्रगामःहल
श्चेतिघञ्। पृथुःप्रगामोयस्यासौपृथुप्रगामः। सुपांसुलुगितिपूर्वसवर्णआकारः। बहुव्री
हौपूर्वपदप्रकृतिस्वरत्वं। किंचास्माकंमीढ्वान्मिहसेचनइत्यस्मात्कसुप्रत्ययांतोदाश्वान्साह्वां
श्चेतिनिपातितः। कामानांवर्षिताबभूयात्। भवतेश्छंदसस्यलिटः। तिङांतिङोभवंतीतिलिं
ङादेशः। यासुट्स्थानिवत्त्वाभावात्नाबभावश्छंदसिवचनेभवतेरहस्वत्वं। तिङ्ङतिङ इतिनिघातोभवति
स्यर्थः॥२॥ अथतृतीया॥ सनोदूराच्चासाच्चनिमर्त्यादघायोः। पाहिसदमिद्विश्वायुरिति। हेअ
ग्नेविश्वायुःइणगतावित्यस्मात्सर्वेएतोर्लिंचिवेरुसिः। विश्वमयनंगमनंगमनंयस्येतिबहुव्री

© Dharmartha Trust J&K. Digitized by eGangotri

हिः॥ बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं याहिप्यादादित्वात् निघातः॥ अघं पापमनि
ष्टं कर्तुमिच्छतो मर्त्यान्मनुष्याद्वैरिणो नो अस्मानुरक्षमि सर्वदैव निपातितरां पालय॥ ७॥
॥ त्वमिंद्र प्रतूर्त्तिष्विति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ त्वमिंद्र प्रतूर्त्तिष्वभि विश्वा अ
सि स्पृधः॥ अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यत इति॥ हे इंद्र त्वं प्रतूर्त्तिषु संग्रामे
षु विश्वाः सर्वाः स्पृधो युद्धकारिणीः शत्रुसेना अभ्यस्यभिभवसि किंच हे तूर्य शत्रूणां बाध
166 क इंद्र अशस्तिहा अशस्तीनामशस्तानां हंतासि जनिता असुरेभ्यो ऽशस्तीनां जनयिता वासि। अ
त एव वृत्रतूः सर्वस्य शत्रुवर्गस्य सर्वप्रकारेण बाहिंसिता चासि। तरुष्यतो बाधकान् अवबाधमा
नोसि॥ ७॥ अथ द्वितीया॥ अनु ते शुष्मं तुरयंतमीयतुः क्षोणी शिशुं न मातरा॥ विश्वास्ते स्पृ
वैत्रै धः श्नथयंत मन्यवे वृत्रं यदिंद्र तूर्वसीति॥ हे इंद्र ते तव शुष्मं बलं तुरयंतं शत्रून् हिंसंतं क्षोणी
द्यावापृथिव्यौ मातरा मातरौ शिशुं न शिशुमिवान्वीयतुः अनुगच्छतः गमनमात्रे दृष्टांतः॥ किंच
हे इंद्र त्वं यद्यस्मात् वृत्रं वृत्रनामानं शत्रुं तूर्वसि हिंससि॥ अतस्ते तव मन्यवे क्रोधाय विश्वाः सर्वाः
स्पृधः संग्रामकारिण्यः सेनाः श्नथिताः खिन्ना भवंति॥ ७॥ इति सप्तमस्याध्याये द्वितीयः खं
डः॥ ७॥ ॥ अथ यज्ञ इंद्रमिति त्र्यृचं प्रथमं सूक्तं तत्र प्रथमा॥ यज्ञ इंद्रमवर्धयद्यद्भूमिं व्यवर्तय
अ त्। चक्राण ओपशं दिवीति॥ यज्ञो यजमानैरनुष्ठीयमानो यागः इंद्रं देवमवर्द्धयत्। भूपते हिं

© Dharmartha Trust J&K. Digitized by eGangotri

इदृइंद्रं तविरजुषतावीवृधत महो ज्यायो कृतेति। स इंद्रो यद्यस्मात् भूमिं पृथिवीं व्यवर्त्तयत्॥
वृष्ट्यादिप्रदानेन विशेषेण वर्त्तमानामकरोत्। किं कुर्वन्। दिव्यंतरिक्षे मेघं तु पशं उपेत्य स्रा या
नं वक्ता णः कुर्वन्। यद्वा आत्मनि समवेतो वीर्यविशेष उपशः तमंतरिक्षे कुर्वन्॥ ७॥ अ
थ द्वितीया॥ व्यंतरिक्षमतिरन् मदे सोमस्य रोचना। इंद्रो यदभिनद्वलमिति॥ सोमस्य पानेन
मदे हर्षे सति रोचना रोचमानमंतरिक्षं अयमिंद्रो व्यतिरत्॥ व्यवर्द्धयत्। यद्यस्मात्कारणा
त् बलमावृत्य स्थितमसुरं मेघं वा अभिनत् व्यदारयत्॥ ७॥ अथ तृतीया॥ उद्गा आज
दंगिरोभ्य आविष्कृण्वन् गुहा सतीः। अर्वाञ्चं नुनुदे वलमिति। अंगिरोभ्य ऋषिभ्यो बलानु
चरैः पणिभिरपहृता गाः उदाजत् उद्गमयत्। किं कुर्वन्। गुहा गुहायां बिले सती विद्यमाना
यथा न दृश्यंते। तथा पाणिभिर्निगूढास्ता गा आविष्कृण्वन् प्रकाशयन्। अपि च पणीना
मधिपतिं वलमसुरमपि अर्वाञ्चमधोमुखं नुनुदे प्रेरितवान्॥ ७॥ ॥ अथ पंचात्मकं तृतीयं
सूक्तं तत्र प्रथमा॥ स सु वः सत्रासाहं विश्वासु गीर्ष्वायतं। आ च्यावयस्यूतय इति॥ यजमानः
स्तोतारं संबोध्याह। हे स्तोतः सत्रासाहं सत्रा शब्दो बहुवाची बहूनामभिभवितारं यद्वा श
त्रून् स्वबलेन संगत्य जेतारं वो युष्मदीयेषु विश्वासु गीर्षु सर्वेषु स्तोत्रेषु आयतं विस्तृतं स
तीं तं त्वमेव स्तूयते तस्मात्तेषु वितत्वं संउद्दस्व धारणे तमेवेंद्रं ऊतये रक्षणाय आच्याव

© Dharmartha Trust J&K. Digitized by eGangotri

पस्ति। च्युङ् ग्युङ् ल्युङ् गतौ। त्वदीये स्तोत्रे यज्ञे प्रत्याभिमुख्येन नागमय॥ ७॥ अथ द्वितीया॥
युध्मं संतमनर्वाणं सोमपां। अनपच्युतं। नरमवार्यक्रतुमिति॥ एवंगुणोपेतमिंद्रं आगम
येत्याह। युधं शत्रूणां संप्रहारकं संतं अत एवानर्वाणं अन्यैरप्रत्यृतं अनभिगतं तस्माद
नपच्युतं संग्रामेषु शत्रुभिरस्खलितं सोमपां सोमस्य पातारं अस्य सोमस्य मदे सति अवा
र्यक्रतुं अहैरनिवारणीयकर्माणं नरं सर्वस्य नेतारं एतादृक्गुणोपेतं तमिंद्रं आगमयेति॥
पूर्वेण सह संबंधः॥ ७॥ अथ तृतीया॥ शिक्षाण इंद्र राय आ पुरु विद्वां ऋचीषम। अवा नः पा
र्ये धन इति॥ हे ऋचीषम स्तुत्यासम। यद्वा ईष गतिहिंसादर्शनेषु अस्माद् भः प्रत्ययः॥
167 सर्वैर्गंतव्य दर्शनीय वा। उक्तगुणोपेत हे इंद्र विद्वान् सर्वविषयज्ञानवांस्त्वं आशस्तुभ्य आ
हस्य योधनानि नोऽस्मभ्यं पुरु बहु वारं शिक्ष प्रयच्छ। यद्वा पुरु इति रायो विशेषणं बहूनि धना
नि प्रयच्छ किंच पार्ये पाराः शत्रवः तत्र भवे धने आजिहीर्षिते शत्रु धनेनोऽस्मान् अव रक्ष।
शत्रून् हत्वा तद्धनेनास्मान्पालयेत्यर्थः॥ ७॥ नवस्य इति तृचात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ त
वत्य इंद्रियं बृहत्तव दक्षमुत क्रतुं। वज्रं शिशाति धिषणा वरेण्यमिति॥ हे इंद्र त्वत्संसिद्धं इंद्रि
यमिंद्रस्य लिंगं बृहत् प्रभूतं वीर्यं धिषणा स्तुतिः शिशाति निश्यति तीक्ष्णीकरोति। तथा त
व त्यदीयं शुष्मं शोषकं बलं उत अपि च क्रतुं प्रज्ञानं बलं कर्म वा वरेण्यं वरणीयं वज्रमायुधं स्तु

© Dharmartha Trust J&K. Digitized by eGangotri

तिस्तीक्ष्णीकरोति ॥ ७ ॥ अथ द्वितीया ॥ [illegible] ॥ नवद्यौरिन्द्रपौंस्यं पृथिवी वर्द्धतिश्रवः । त्वा
मापः पर्वतासश्च हिन्विरेइति ॥ हे इंद्र द्यौर्द्युलोकस्तव पौंस्यं बलं वर्द्धति वर्द्धयति । श्रवस्तदीयं
यशः पृथिवी वर्द्धयति । हिन्विरे एयंति । अत्र हिंशापिछंदस्युभयथेत्यार्द्धधातुकत्वात् णेरनिटीति णि
लोपः । तं त्वां अपउदकान्यंतरिक्षाणि पर्वताः सः पर्वतं तनो मेघाश्च गिरयश्च वा हिन्विरे प्रीणयं
ति स्वो मित्रेन माधुवंति वा ॥ ७ ॥ अथ तृतीया ॥ त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः ।
त्वां शर्द्धो मदत्यनुमारुतमिति ॥ हे इंद्र बृहन्क्षयो निवासहेतुर्विष्णुः मित्रो वरुणश्च त्वां गृणा
ति स्तौति ॥ तथा मारुतं मरुतां मरुत्संबंधि शर्द्धो बलं त्वामनुवदति । तव मदमनुलक्ष्य पश्चात्
माद्यति त्वामनुमादयति वा ॥ ७ ॥ ॥ नमस्ते अग्न इति त्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा ॥ नमस्ते
अग्न ओजसे गृणंति देवकृष्टयः । अमैरमित्रमर्द्दयेति ॥ हे द्योतमान हे अग्ने ते तुभ्यं नमो गृणंति
नमस्कारशब्दमुच्चारयंति । किमर्थं तु ओजसे बलाय के कृष्टाया मनुष्या यजमानाः अतो हम पि
गृणामीत्यर्थः । त्वं भवामैर्बलैः अमित्रं शत्रुं मर्द्दयनाशय ॥ ७ ॥ अथ द्वितीया ॥ कुविन्सु नो गवि
ष्टयेग्ने संवेषिषो रयिं । उरुकृदुरुणस्कृधीति ॥ हे अग्ने त्वं नोस्माकं गविष्टये गवामेषणाय कुवि
सुबहु रयिं धनं संवेषिषः संप्रापयः । उरुकृत् त्वं नोस्मान् उरुकृधि ॥ ७ ॥ अथ तृतीया ॥ मानो
अग्ने महाधने परावर्ग्भारभृद्यथा ॥ संवर्गं सं रयिं जयेति ॥ हे अग्ने नोस्मानस्मिन्महाधने सं

© Dharmartha Trust J&K. Digitized by eGangotri

ग्राभेमापरावर्कमापरिस्वाङ्क्षीभिरिभ्यथायाभारवाही यथा भारमंतेपरिस्वजति। तद्वत्॥ संवर्ग्र
शत्रुभ्यः सहाछ्छाघमानं रयिं धनं संजयास्मदर्थं॥ ७॥ ॥ अथ समस्यमन्यवइति त्वालकं
द्वितीयं सूक्तं तत्र प्रथमा॥ समस्यमन्यवे विशो विश्वानमंत कृष्टयः। समुद्रायेव सिंधवइति॥
विशो दिशं सो विश्वास्सर्वाः कृष्टयः प्रजा अस्येंद्रस्य मन्यवे क्रोधाय यद्वा मन्यर्मननसाधनं
स्तोत्रं तद्र्थं सन्नमंत स्यसम्यकुर्वत एव प्रह्वीभवंति उच्चारयंति वा। तत्र दृष्टांतः। समुद्राये
वयथासमुद्रमर्द्धि प्रतिसिंधवः स्यंदनशीला नद्यः स्वयमेव नमंते तद्वत्॥ ७॥ अथ तृतीया
॥ विविद्वत्रस्यदोधतः शिरो बिभेद वृष्णिना। वज्रेण शतपर्वणेति॥ विच्छेदोष्पर्थे संवभिन्न
क्रमः। वृत्रस्य वरकस्यापि दोधतः अत्यर्थं भिशं वा जगत्कंपयतो सुरस्य शिरः मूर्द्धानं शतप
र्वणा। शत संख्यापर्वाणि धारयस्य तादृशेन वृष्णिना सेचनसमर्थेना छेदनवीर्यवता व
ज्रेण इंद्रो विभेद विचिछेद॥ ७॥ अथ तृतीया॥ तुजस्तद्द्रस्य त्विषिं उभे यत्समवर्त्तयत्॥ इंद्र
श्चर्मेव रोदसी इति॥ अस्येंद्रस्य तत्तेजो बलं त्विषिं दीप्तिं। त्विषदीप्तौ। यताय नो जसा अ
पमिंद्र उभे रोदसी द्यावापृथिव्यौ चर्मेव सं मवर्त्तयत्॥ सम्यग्वर्त्तयति। यथा कश्चित्कंचित्च
र्मकदाचिद्विस्तारयति कदाचित्संकोचयति एवं तदधीने अभूतामित्यर्थः॥ ७॥ ॥ अथ सु
मन्नावस्वीति त्वालकं तृतीयं सूक्तं तत्र प्रथमा॥ सुमन्नावस्वीरंती सूनरीति॥ हदंद्र तव अश्वो

© Dharmartha Trust J&K. Digitized by eGangotri

सुमभन्माशोभनश्चानौवस्वीधनवंतौरंतीरमणीयौसूनरीसुष्टुनेतारौअतःकारणात्तूत्वमा
गहीस्यत्तरेणसंबंधः।यद्वावस्वीधनवतीरंती रमणीयासूनरीसुष्टुनेत्रीसुमन्माशोभन
मननीयाममस्तुतिःप्रवर्त्ततिशेषः।अन्यत्समानं॥छ॥अथद्वितीया॥सरूपवृषन्नागहि।
मौभद्रौधुर्य्याविभि।ताविभाउपसर्प्यतइति॥हेसरूपहेवृषन्कामानांवर्षितःइंद्रभद्रौकल्याणौ
इमौरथेयुज्यमानौधुर्य्यौवहनयोग्यावश्वौअभिआगहिआगच्छअस्मद्यज्ञंप्रतिशीघ्रंगच्छं
तामविमावश्वावुपसर्पतःतांसम्यक्सेवेत॥छ॥अथतृतीया॥नीवशीर्षाणिमृदृमध्यआ
पस्यतिष्टति।शृंगेभिर्दशभिर्दिशन्निति॥हेऋत्विक्जनाःमध्येरस्यस्यमध्येआपस्यइंद्रस्ति
ष्टति।किंकुर्वन्।दशभिर्दशसंख्याकैःशृंगेभिरंगुलिभिर्हस्ताग्रैःउभाभ्यांहस्ताभ्यांदिशन्नस्म
द्भीष्टमर्थंप्रयच्छन्यक्षेतिष्टति।हेऋत्विग्जनास्तंपश्यतेशीर्षाणिनिमृदृयूयंइंद्रागमनवि
षयश्रेयांसिशिरसाधारयधमित्यर्थः॥छ॥इतिसप्तदशोध्यायेतृतीयःखंडः॥छ॥ ॥वेदा
र्थस्यप्रकाशेनतमोहार्दंनिवारयन्।पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः।छ॥ ॥इतिश्री
मद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणा
चार्येणविरचितेमाधवीयेसामवेदार्थप्रकाशेउत्तराग्रंथेसप्तदशोऽध्यायः॥छ॥ ॥यस्यनि
श्वसितंवेदायोवेदेभ्योखिलंजगत्।निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं।छ॥ ॥अथाष्टादशे।

© Dharmartha Trust J&K. Digitized by eGangotri

ऽध्याय आरभ्यते॥ तत्र प्रथमे खंडे पन्यंपन्यमिति तृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ पन्यंप
न्यमित्सोतार आधावत मद्याय। सोमं वीराय शूरायेति॥ हे सोतारः अभिषोतारो अध्वर्यवः
मद्याय मादयितव्याय वीराय विक्रांताय शूराय शौर्यवत इंद्राय पन्यंपन्यमित्सर्वत्र स्तुत्यमे
व सोमं आधावत अभिगमयत प्रयच्छत इत्यर्थः॥ छ॥ अथ द्वितीया॥ एह हरी ब्रह्मयुजा शग्मा
वक्षतः सखायं। इंद्रं गीर्भिर्गिर्वणसमिति॥ ब्रह्मणा युजा ब्रह्मणा मंत्रेण स्तोत्रेण हविषा वा यु
ज्यमानौ शग्मा शग्मौ सुखकरौ शक्तौ वा ईदृशौ हरी अश्वौ इहास्मिन्यज्ञे सखायं समानख्या
नं मित्रभूतमिंद्रं आवक्षतः। आवहतां। कीदृशमिंद्रं गीर्भिस्स्तुतिभिः प्रख्यापितमाहात्म्यं गिर्व
णसं गिरा संभक्तारं स्तुतिभिः संभजनीयं वा॥ छ॥ अथ तृतीया॥ पाता वृत्रहा सुतमा घा गमन्ना
रे अस्मत्। नियमते शतमूतिरिति॥ सुतमभिषुतं सोमं पाता पानशीलः तच्छीलिकस्तृन नलो
काव्ययेति कर्मणि षष्ठ्याः प्रतिषेधः। वृत्रहा वृत्रस्यासुरस्य हंता इंद्रः आगमत् घेत्यवधारणे
। आगच्छत्वेव। अस्मदस्मत्तः आरे दूरदेशे मा भवतु। आगत्य च शतमूतिर्बहुविधरक्षण इंद्रः निय
मते अस्मद्द्वेष्याञ्छत्रून् नियच्छतु तिरस्करोतु। यद्वा धनान्यस्मभ्यं नियच्छतु ददातु॥ छ॥ ॥ छ॥
अथ आ त्वा विशंत्विति तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ आ त्वा विशंत्विंदवः समुद्रमिव सिंधवः
। न त्वामिंद्राति रिच्यत इति॥ हे इंद्र इंदवः स्रवंतः सोमास्त्वा त्वामाविशंतु सर्वतः प्रविशंतु तत्र दृष्टां

© Dharmartha Trust J&K. Digitized by eGangotri

नः।समुद्रमिवसिंधवः।निंद्रातिरिच्यतइ।स्यंदनशीलानद्योयथासमुद्रंजलाशयंसर्वतःप्रवि
शंतितद्वत्।यतएवंतस्मात्।हेइंद्रत्वांकश्चिदपिदेवोबलेनधनेनवानातिरिच्यतेनातिरिक्तो
भवति।सामर्थ्येनत्वत्तोधिकोनास्तीत्यर्थः॥७॥अथद्वितीया॥विव्यक्थमहिनावृषन्भक्षं
सोमस्यजागृवे।यइंद्रजठरेषुतइति॥हेवृषन्कामानांवर्षितःहेजागृवेजागरणशीलेंद्रत्वं
तस्यसोमस्यभक्षंपानंप्रतिमहिनास्वमहिम्नाविव्यक्थसर्वतोव्याप्तवानसि।व्यचेर्लिटिथलि
अभ्यासस्योभयेषामितिसंप्रसारणं।हेइंद्रयःसोमस्तेतवजठरेषूदरेषुप्रविशतित
स्यपानंव्याप्तवानसीतिशेषः॥७॥अथतृतीया॥अरंतइंद्रकुक्षयेसोमोभवतुवृत्रहन्।
अरंधामभ्यइंदवइति॥हेवृत्रहन्वृत्रस्यपापावरकस्यासुरस्यमेघस्यपापस्यवा
हंतर्हेइंद्रसोमोऽस्माभिर्दीयमानःतेतवकुक्षयेअरमलंपर्याप्तोभवतु।किंचइंदवःसर्वतःक्ष
रणशीलाःसोमाःतवधामभ्यःनानाविधेभ्यःशरीरेभ्यःतवतेजोभ्योवाअरमलंपर्याप्ताभ
वंतु।अनेनतेजसांहविर्भाक्त्वमस्तीतिसूचितं।अस्मदीयाःसोमाःएवतवशरीरभूतेभ्योदेवे
भ्यइतिपर्याप्ताभवंतु।नान्यदीयाइतिभावः॥७॥ ॥अथजराबोधेतित्र्यृचात्मकंतृतीयंसूक्तं
तत्रप्रथमा॥जराबोधतद्विविड्ढिविशेविशेयज्ञियाय।स्तोमंरुद्रायदृशीकमिति॥हेजराबोध
जरयास्तुत्याबोध्यमानहेअग्नेविशेविशेतत्तद्यजमानरूपप्रजानुग्रहार्थंयज्ञियाययज्ञसंबं

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यनुष्ठानसिद्ध्यर्थं तद्देवयजनं विविड्ढि प्रविश यजमानोपि रुद्राय क्रूरायाग्नये तुभ्यं दृशीकं द
र्शनीयं समीचीनं स्तोमं स्तोत्रं करोतीति शेषः। अत्र यास्क एवं व्याख्यातवान् जरा स्तुतिः ज
रतेः स्तुतिकर्मणः तां बोधतया बोधयितरिति वा तद्विविड्ढि मनुष्यस्य मनुष्यस्य यज्ञियाय
स्तोमं रुद्राय दर्शनीयमिति ॥७॥ अथ द्वितीया ॥ स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः।
धिये वाजाय हिन्वतु ॥ सोऽग्निर्नोऽस्मान् धियै कर्मणे वाजायान्नाय च हिन्वतु। प्रीणयतु।
कीदृशः महान् संहितायां नकारस्य रुत्वानुनासिकावुक्तौ। गुणाधिकः। अनिमानः। न विद्यते
निमानोऽस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं। निमानवर्जितः अपरिच्छिन्न इत्य
र्थः। धूमकेतुः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। धूमेन ज्ञाप्यमानः पुरुश्चन्द्रः बहुभिराह्लाद
नो वा। अस्मात्स्फायितञ्चिवञ्चीत्यादिना कर्तरि रक्। पुरुश्चासौ चन्द्रश्चेति समासान्तोदात्तत्वं। ह्र
स्वाच्चन्द्रोत्तरपदे मन्त्र इति सुट् तस्य श्चुत्वेन शकारः बहुदीप्तिरित्यर्थः। धिये सावेकाच इति चतुर्थ्या
उदात्तत्वं। हिन्वतु। हिवि प्रीणनार्थः। इदितो नुम् धातोरिति नुम् ॥७॥ अथ तृतीया ॥ स रेवाँ
इव विश्पतिर्दैव्यः केतुः शृणोतु नः। उक्थैरग्निर्बृहद्भानुरिति ॥ सोऽग्निरुक्थैः स्तोत्रैर्युक्तान्नो
ऽस्मान् शृणोतु। तत्र दृष्टान्तः। रेवानिव यथा लोके धनवान् राजा बन्दिनां स्तोत्रं शृणोति ॥ तं
द्वत्। एतत्तदोरिति सोर्लोपः। रयेर्मतौ बहुलमिति संप्रसारणं। परपूर्वत्वं आद्गुणः छन्दसी

© Dharmartha Trust J&K. Digitized by eGangotri

रइति मतुपो वक्तं। आरेशब्दाद्बमतुप उदात्तत्वं वक्तव्यमिति मतुप उदात्तत्वं कीदृशः विशतिः
परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। प्रजापालकः। देव्यः देवानां संबंधी। अग्निर्वै
देवानां होतेति। अस्मत्संतरात्। केतुः दूतवत्ज्ञापकः। अग्निर्वै देवानां दूत आसीदिति श्रुतेः।
बृहद्भानुः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं प्रोढरश्मिः॥ ७॥ ॥ अथ तद्वो गायेति त्वासकं
चतुर्थसूक्तं तत्र प्रथमा॥ तद्वो गाय सुते सचा पुरुहूताय सत्वने। शं यद्गवे न शाकिन इति॥ हे
स्तोतारो वो यूयं सुते अभिषुते सोमे सति पुरुहूताय बहुभिर्यजमानैराहूताय सत्वने श
त्रूणां सादयित्रे पद्वाधनानां वा सनित्रे दात्रे इंद्राय तत् स्तोत्रं सचा सह संहता भूत्वा गायत गाय
त यं स्तोत्रं शाकिने शक्तिमते इंद्राय शं सुखकरं भवति गवे न यथा गवे यवसं सुखकरं तद्वदि
त्यर्थः॥ ७॥ अथ द्वितीया॥ न घा वसुर्नि यमते दानं वाजस्य गोमतः। यत्सीमुप श्रवद्गिर इति॥
वसुर्वासयिता स इंद्रः गोमतो बहुभिर्गोमतो बहुभिर्गोभिर्युक्तस्य वाजस्यान्नस्य बलस्य वा दा
नं प्रदानं न घ न खलु नियमति नियच्छति उपरतं करोति। यद्यदि सीं गिरः अस्मदीयाः स्तुतीः उप
श्रवत् उपशृणुयात् स्तोत्रश्रवणे सति सर्वं ददातीत्यर्थः॥ ७॥ अथ तृतीया॥ कुवित्सस्य प्र
हि व्रजं गोमंतं दस्युहा गमत्। शचीभिरप नो वरदिति। कुवित्सस्य कुवित् बहुशः स्यति हिनस्ती
ति कुवित्सो नाम कश्चित् तस्य स्वभूतगोमंतं बहुभिर्गोभिर्युक्तं व्रजं गोष्ठं दस्युहा दस्यूनां उपक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

पयित्वएणं हे तेंद्रः अगमत् अकर्षेण गच्छति॥ हियस्मादेवं तस्मात्त्वमेभिरास्मीयैः कर्म्मभिः
प्रशस्ताभिर्वाणीभिरस्माकं ता गाः अपवृत्य निगूढास्ताः अपावृणोत्॥ ७॥ इत्यष्टादशोऽध्याये प्रथमः
खंडः॥ ७॥ ॥ अथ द्वितीये खंडे अथेदं विष्णुरिति षडृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ इदं विष्णु
र्विचक्रमे त्रेधा निदधे पदं। समूढमस्य पांसुल इति॥ विष्णुस्त्रिविक्रमावतारधारी इदं प्रतीय
मानं सर्व्वं जगदुद्दिश्य त्रेधा त्रिभिः प्रकारैः पदं निदधे स्वकीयं पादं प्रक्षिप्तवान्। अस्य विष्णोः
पांसुले धूलियुक्ते पादस्थाने समूढं इदं सर्व्वं जगत् सम्यगंतर्भूतं सेयमन्यास्त्वेनैवं व्याख्या
तो॥ विष्णुर्विशतेर्व्याप्नोतेर्वा यदिदं किंचिद्विक्रमते विष्णुस्त्रेधा निधत्ते पदं त्रेधाभावाय पृथि
व्यामंतरिक्षे दिवीति शाकपूणिः समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः समूढमस्य पां
सुले धायनेंतरिक्षे पदं न दृश्यते अपि वोपमार्थस्यात् पांसुरइव पदं न दृश्यत इति पांसवः पादैः
सूयंत इति वा पन्नाः शेरत इति वा पिंशनीया भवंतीति वेति॥ ७॥ अथ द्वितीया॥ त्रीणि पदा वि
चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्म्माणि धारयन्निति॥ अदाभ्यः दभेः कृत्यल्यो र्ब्व इति ण्य
त्। नञ्समासः। अस्य च पूर्वपदप्रकृतिस्वरत्वं। केनापि हिंसितुमशक्यः। गोपाः सर्वस्य जगतो
रक्षको विष्णुः पृथिव्यादिस्थानेषु अत एतेषु त्रीणि पदानि विचक्रमे। किं कुर्वन् धर्माण्य
ग्निहोत्रादीनि धारयन्। गोपाः पिबादेनुदात्तत्वं॥ धात्त्वच्चलसार्वधातुकस्वरेण णिच एव स्वरः

© Dharmartha Trust J&K. Digitized by eGangotri

शिष्यतेपोषयन्॥७॥ अपत्नीया॥ विष्णोः कर्माणिपश्यतयतोव्रतानिपस्पशे। इन्द्रस्य युज्यः सखेति॥ हेऋत्विगादयः विष्णोः कर्माणिपालनादीनिपश्यतयतोयैः कर्मभिः व्रतान्य ग्निहोत्रादीनिपस्पशे। सर्वोयजमानः स्पृष्टवान्। स्पशबाधनस्पर्शनयोः लिटिछंदसिविशपू र्वः। स्वयइतिपकारः शिष्यते। सकारोलुप्यते। यद्वृत्तयोगात् नघातः। विष्णोरनुग्रहाद नुतिष्ठतीत्यर्थः। तादृशोविष्णुरिंद्रस्ययुज्योजोज्यः। युजेर्बाहुलकात् क्यप्। कित्वाद्गुणाभावः। क्यपः पित्वात् अनुदात्तत्वं। धातुः स्वरः अनुकूलः सखाभवति। विष्णोरिंद्रानुकूल्यंचत्वष्टाहत पुत्रइत्यनुवाके अथवैतर्हिविष्णुरित्यादिनाबहुनाप्रपंचेनतैत्तिरीयाआमनेति॥७॥ अथ चतुर्थी॥ तद्विष्णोः परमंपदंसदापश्यंतिसूरयः। दिवीवचक्षुराततमिति॥ सूरयोविद्वांसऋत्विगादयः। विष्णोः संबंधिपरमम् उत्कृष्टंतच्छास्त्रप्रसिद्धंपदंस्वस्थानंशास्त्रदृष्ट्यासदास र्वकालमिति। द्वात्यः सर्वस्मिन्सोन्यतरस्यां दाइतिसर्वशब्दस्यसभावः। प्रत्ययेनाद्युदात्तत्वंस र्वदेत्यर्थः। पश्यंतितत्रदृष्टांतः। दिवीवद्युनिर्वर्तमिसादिनि। उभक्ते ऊदात्तत्वं इवेनविभक्त्यलोपः पू र्वपदप्रकृतिस्वरत्वंचेतितस्वशिष्यते। आकाशेयथा आततं। तनोतेः कर्मणिक्तः। तस्यविभा षेतीट्प्रतिषेधः। अनुदात्तोपदेशेत्यादिनानलोपः। कृदुत्तरपदप्रकृतिस्वरत्वेप्राप्तेगतिरनंतर इतिगतिरुदात्तत्वं। सर्वतः प्रसृतंचक्षुर्विरोधाभावेनविशदंपश्यंतितद्वत्॥७॥ अथपंचमी॥

© Dharmartha Trust J&K. Digitized by eGangotri

तद्विप्रासो विपन्यवो जागृवांसः समिंधते। विष्णोर्यत्परमं पदमिति॥ पूर्वोक्तं विष्णोर्यत्परमं पदम
स्ति तत्सर्वं। विप्रासः आज्ञसेरस्सुक् मेधाविनः समिंधते सम्यग्दीपयंति। कीदृशा विपन्यवः।
स्तुत्यर्थस्य पनेर्बहुलकत् अण्यादिको युप्रत्ययः। तत्र प्रत्ययस्वरः विशेषेण स्तोतारः जागृवांसः
जागृ निद्राक्षये लिटः क्वसुः। क्रादिनियमात्प्राप्तस्येटो वस्वेकाजाद्घसामिति नियमान्नि
वृत्तिः। शाश्वत्कर्मणोः प्रमादराहित्येन जागरूका इत्यर्थः॥ ७॥ ॥ अथ षष्ठी॥ अतो देवा अ
वंतु नो यतो विष्णुर्विचक्रमे। पृथिव्या अधिसानवीति॥ विष्णुः परमेश्वरः यतः पृथिव्याः प्र
देशात्तस्मात्प्रदेशान्नोस्मान्देवा विष्णुमुखाः अवंतु पापात्त्रायंतां रक्षंत्वित्यर्थः॥ ७॥ ॥ अथ मो
षु त्वेति प्रगाथात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन्। आ
रात्ताच्चित्सधमादं न आ गहीह वा सन्नुप श्रुधीति॥ हे इंद्र त्वा वाघतश्चन ऋत्विजोपि ते अस्म
द्यस्मत्त आरे दूरे मा नि रीरमन् नितरां रमयंतु। अतस्त्वम् आरात्तात् दूरेपि वर्तमानोऽस्मदीयं
सधमादं यज्ञम् आगहि आगच्छ। इह वा अत्रापि वा सन् विद्यमान उपश्रुधि अस्मदीयं स्तोत्रमुपशृणु॥ ७॥
॥ ७॥ अथ द्वितीया॥ इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते। इंद्रे कामं जरितारो वसू
यवो रथे न पादमा दधुरिति॥ हे इंद्र ते तव इमे सुते अभिषुते सोमे ब्रह्मकृतः स्तोत्रकृत ऋत्विजः मधौ
न मधुनीव मक्षा मक्षिकाः समानं आसते उपविशंति। अथ परोक्षस्तुतिः। वसूयवो धनका

© Dharmartha Trust J&K. Digitized by eGangotri

माः उरितारः स्तोतारः काममिष्टं इंद्र रथेन पारं रयेपारमिव आदधुः । समर्पयंतीत्यर्थः ॥
७ ॥ ॥ अथ अस्तावीति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा ॥ अस्तावि मन्म पूर्व्यं ब्र
ह्मेंद्राय वोचत । पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥ (स इंद्रः अस्तावि ।
अस्मदीयैः स्तोत्रैर्ऋत्विग्भिर्वा स्तूयत इति) स इंद्रः अस्तावि अस्मदीयैः स्तोत्रैर्ऋत्विग्भिर्वा
स्तूयते अस्मा इंद्राय पूर्व्यं अनादित्वात्पूर्वस्मिन्भवं मन्म मननीयं ब्रह्म स्तोत्रं वेदं वा वोच
त हे ऋत्विजो यूयं पठत । किंच पूर्वीः पूर्वकालीना ऋतस्य यज्ञस्य संबंधिन्यः बृहतीर्बृहती
छंदस्का बृहतीः सामानि वा अनूषत सुवत पठंतेत्यर्थः । स्तोतुर्मम मेधाः एवंविधाः प्रज्ञावि
शेषा असृक्षत । ऋत्विग्भिर्विसृज्यंतां । यद्वा ईश्वरेण ॥ ७ ॥ अथ द्वितीया ॥ समिंद्रो रायो बृह
तीरधूनुत सं क्षोणी समु सूर्यं । सं शुक्रासः शुचयः सं गवाशिरः सोमा इंद्रममंदिषुरिति ॥ स
इंद्रः बृहतीर्महतीरायो धनान्यन्नानि वा समधूनुत । मां प्रापयत्वित्यर्थः ॥ धूञ् कंपने । धातू
नामनेकार्थत्वात् । किंच । क्षोणी भूमीः समधूनुत मां सम्यक् प्रापयतु । अपि च सूर्यं समु सूर्यस्य
दीप्तिं समधूनुत तच्छुचयो निर्मलाः शुक्रासः शुक्रग्रहाः इंद्रं सममंदिषुर्हर्षयंति । किंच
। गवाशिरः गोश्रयणैः सहिताः सोमाः इंद्रं सममंदिषुर्हर्षवंतं चक्रुरित्यर्थः ॥ ७ ॥ ॥ अथ इंद्राय सो
मपातव इति त्र्यात्मकं चतुर्थं सूक्तं तत्र प्रथमा ॥ इंद्राय सोमपातवे वृत्रघ्ने परि षिच्यसे । नरे च

© Dharmartha Trust J&K. Digitized by eGangotri

173

दक्षिणावतेवीरायसदनासदइति॥हेसोमवज्रघ्नेवृत्रस्यहंत्रेइंद्रायवषट्सर्वेवतुष्टी॥इंद्रस्य
पातवेपानार्थंपरिषिच्यसेपरितःपात्रेषुसिच्यसे॥वसतीवरीभिर्वा॥किंच॥दक्षिणावतेअ-
त्विग्भ्योदक्षिणादानेनतद्वतेवीरायवीर्ययुक्तायेंद्रार्थंहविर्वाघृतंसदनासदेयज्ञगृहेसी-
दतेनरेमनुष्याययजमानायतस्मैफलप्रदानार्थंपरिषिच्यसे॥७॥अथद्वितीया॥तंस-
खायःपुरुरुचंवयंयूयंचसूरयः॥अश्यामवाजगंध्यंसनेमवाजपस्त्यमिति॥हेसखा-
यःस्तोतारःसूरयःप्राज्ञाःयूयंवयंचयजमानाःपुरुरुचंबहुदीप्तिंवाजगंध्यंबलकरसाधु-
गंधोपेतंतंनभवंनासोमंअश्यामअश्नीमपिबेम॥किंचवाजपस्त्यंअन्नयुक्तगृहसहितं
यद्वाबलकरंसोमंसनेमसंभजेमहि॥सोमेनबलान्नगृहादीनिभवंतीत्यर्थः॥८॥अथतृती-
या॥परित्यंहर्यतंहरिमितीयमृक्पूर्वमेवव्याख्याता॥९॥ ॥अथकस्तमिंद्रेतिप्रगाथात्म-
कंपंचमंसूक्तंतत्रप्रथमा॥कस्तमिंद्रत्वावसवामर्त्यइत्यस्यवःप्रतीकंतस्याइतिव्याख्यातमन्यत्र
द्रष्टव्यं॥७॥अथद्वितीया॥मघोनःस्मवृत्रहत्येषुचोदययेददतिप्रियावसु॥तवप्रणीतीहर्य-
श्वसूरिभिर्विश्वातरेमदुरितेति॥हेइंद्रमघोनोधनवतःस्तवत्संयंप्रियाप्रियाणिवसूनि
हविर्लक्षणानिधनानियेजनाददतिप्रयच्छंतितान्जनान्वृत्रहत्येषुयज्ञेषुसंग्रामेषुवाचोदयप्रे-
रय॥हेहर्यश्वहरिनामाश्ववन्इंद्रतवप्रणीतीप्रणीत्याप्रणयनेनसूरिभिःस्तोतृभिःपुत्रादिभिः

© Dharmartha Trust J&K. Digitized by eGangotri

साढ्वं विश्वा विश्वानि दुरिता दुरितानि तरेम तीर्णमभिवेम ॥ छ ॥ ॥ इत्यष्टादशोऽध्याये द्वितीयः
खंडः ॥ अथ एदु मध्वो मदिंतरमिति त्र्यात्मकं प्रथमं सूक्तं तत्र प्रथमा ॥ एदु मध्वो मदिंतरं सिंच वाध्वर्यो
अंधसः । एवा हि वीरः स्तवते सदावृध इति ॥ हे अध्वर्यो स्पनेतः ऋत्विक् मध्वो मदकरस्य अंध
सः सोमलक्षणस्यान्नस्य मदिंतरं अतिशयेन मादयितृतमं सोमरसमेव आसिंच इंद्राभिमा
भिमुख्येन क्षर । इत् । उ इत्यवधारणे । वीरः समर्थः सदावृधः सर्वदा हविर्भिर्वर्द्धनीयः । यद्वा
सर्वदा स्वबलस्य वर्द्धकः अयमेवेंद्रः स्तवते हि स्तोतृभिः स्तोत्रशास्त्रादिभिः स्तूयते खलु । अतः कारणा
त् स्तुतायेंद्राय सोमो दातव्य इति शेषः एतस्मादासिंचेति पूर्वेण संबंधः ॥ छ ॥ अथ द्वितीया ॥ इंद्र
स्थातर्हरीणां न किष्टे पूर्व्यस्तुतिं उदानंश शवसा न भंदनेति ॥ हे हरीणां स्थातः हरिनामका
नामश्वानामधिष्ठातः यद्वा हरिनामकैरश्वैः प्रापयितरिंद्र ते त्वदीयां पूर्व्यस्तुतिं पूर्वैश्चिरंतनै
र्ऋषिभिः कृतां स्तुतिं उपलक्षणं । इदानींतनैः क्रियमाणामपि स्तुतिं न किर्न कश्चित् शवसा बले
न उदानंश सम्यग्व्याप्नोति । अशू व्याप्तौ । अस्माल्लिटि अश्नोतेश्चेति नुट् । छांदसो द्वितीयो
नुडागमः । कश्चिन्नातिक्रामतीत्यर्थः । किंच भंदनो असर्वैः प्रार्थनीयत्वात् पूजनीयेन धनेन
स्तुत्या वा त्वदीयां स्तुतिं न कश्चिदतिक्रामति । त्वत्तो बलवान् धनी स्तुत्यो वा अन्यो नास्तीत्यर्थः
॥ छ ॥ ॥ अथ द्वितीया ॥ तं वो वाजानां पतिमहूमहि श्रवस्यवः । अप्रायुभिर्यज्ञेभिर्वावृधेन्य

© Dharmartha Trust J&K. Digitized by eGangotri

मिति॥ अध्रायुभिः कर्मसु अप्रमाद्यद्भिर्मनुष्यैर्युक्तैः अप्रयुत्वा अप्रमत्ताः ताः एकत्र स्थित्वैव क
र्म कुर्वंति। कर्मभारस्य नान्यं देशं गच्छंतीत्यर्थः॥ एवंविधमनुष्ययुक्तैर्यैरश्विभिर्यद्भिरेतादृशम
नुष्यैर्यद्भिरश्ववद्भिर्धेनुभिर्वर्द्धनीयं वाजानामन्नानां पतिं स्वामिनं वायवस्य यष्टव्यसंबंधनयुष्मदी
यं तं तादृशमिंद्रमवस्यवः वयमन्नकामाः संतः आहूमहि आह्वयामः। हूयतेर्लुङि बहुलं छं
दसीति संप्रसारणं॥ ७॥ ॥ अथ तं गूर्धयेति प्रगाथात्मके द्वितीये सूक्ते तत्र प्रथमा॥ ७॥॥
तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे। देवत्रा हव्यमूहिषे इति॥ हे स्तोतः तं प्रसिद्धमग्निं
गूर्धय स्तुहि। गूर्धयतिः स्तुतिकर्मा। किंभूतं स्वर्णरं सर्वस्य नेतारं सार्वैर्यजमानैः कर्मार्थं ने
तव्यं वा। अथ वा स्वर्गं प्रति हविषां नेतारं। देवासः दीव्यंति स्तुवंतीति देवा ऋत्विजः देवं दानादि
गुणयुक्तमरतिमर्यं स्वामिनं यद्वा अभिप्राप्तारं द्रव्यं दधन्विरे धन्वंति गच्छंति स्तुत्यादिभिः
प्राप्नुवंति। धविर्गत्यर्थः। अथ प्रत्यक्षस्तुतिः॥ देवत्रा देवेषु मध्ये यद्वा देवमनुष्येत्यादिना द्विती
यार्थे त्रा प्रत्ययः देवानित्यर्थः। हव्यं चरुपुरोडाशादिलक्षणं हविः आ आभिमुख्येन ऊहि
षे आवह। अग्ने अभितो वा प्रापयसि। वहेर्लिटि यजादित्वात् संप्रसारणं। ऊहिषे ओहिरे इति
पाठे॥ ७॥ अथ द्वितीया॥ विभूतरातिं विप्र चित्रशोचिषमग्निमीळिष्व यंतुरं। अस्य मेधस्य सो
म्यस्य सोभरे प्रेमध्वराय पूर्व्यमिति॥ ऋषिरात्मानं संबोध्य स्तुतौ प्रेरयति। हे विप्र मेधावि न्

174

© Dharmartha Trust J&K. Digitized by eGangotri

सोभरे एतत्संज्ञक ऋषे अध्वराय यागार्थं ईं इमम् अग्निं प्रेडिष प्रकर्षेण स्तुहि। कीदृशं विभूतरा
तिं व्याप्तधनं प्रभूतदानं वा चित्रशोचिषं चायनीयतेजस्कं विचित्रदीप्तिकं वा सोम्यस्य सोम
साध्यस्यास्य मेधस्य यज्ञस्य यंतुरं नियंतारं पूर्व्यं चिरंतनमिति॥ ७॥ ॥ अथ आ सोमस्वा
न इति प्रगाथात्मकं तृतीयं सूक्तं तत्र प्रथमा॥ आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिष इति। हे सोम अद्रिभिर्ग्रावभिः स्वानोभिषूय
माणस्त्वं अव्यया अविमयानि वाराणि वालानि दशापवित्राणि तिरस्कुर्वन् व्यवधायको
भिकुर्वाणः सन् आ पवस्व इति शेषः। हरिर्हरितवर्णः स सोमश्चम्वोरधिषवणफलकयोर्वि
शत्। प्रविशति। तत्र दृष्टांतः। जनो न यथा जनः पुरि पुरे प्रविशति। स त्वं वनेषु काष्ठनिर्मिते
षु पात्रेषु वसतीवरीषु वा सदः स्थानं दधिषे करोषि। दधिषे दधिष इति पाठे॥ ७॥ अथ द्वि
तीया॥ समामृजे तिरो अण्वानि मेष्यो मीढ्वान्त्सप्तिर्न वाजयुः। अनुमाद्यः पवमानो म
नीषिभिः सोमो विप्रेभिर्ऋक्वभिरिति। वाजयुरन्नकामः अण्वानि अणूनि सूक्ष्माणि मेष्यो मे
ष्याः अवेरोमाणि पवित्राणि तिरस्कुर्वन् स सोमः मर्मृजे परिशोध्यते अलंक्रियते वा तत्र दृष्टांतः
मीढ्वान् सेचनसमर्थः। सप्तिर्न अश्व इव यथा जयकामोश्वः संग्रामे अलंक्रियते तद्वत्। कीदृशः
अनुमाद्यः अनुमोदनीयः सर्वैः पवमानो मनीषिभिर्मेधाविभिः पूयमानः तथा ऋक्वभिः॥

© Dharmartha Trust J&K. Digitized by eGangotri

छं रसीव निपाविति वनिपूः स्तुतिमद्भिर्विवैर्मेधाविभिरभिष्टुतो मृज्यते ॥ छ ॥ ॥ अथ वयमे
नमिदा ह्य इति प्रगाथात्मकं चतुर्थं सूक्तं तत्र प्रथमा ॥ वयमेनमिदा ह्योपीपेमेह वज्रिणं ।
तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते इति ॥ वयं यजमाना एनमिंद्रं वज्रिणं इदा इदा
नीं ह्यश्च अतीतेऽन्हि इह अत्र अहर्गणे अपीपेम आप्याययाम सोमेन । तस्मा उ तस्मा एवा
द्यास्मिन्सवने संग्रामार्थे सुपां सुलुगित्यादिना शे आदेशः । सुतमभिषुतं सोमं भराहर । नूनमि
दानीं श्रुते स्तोत्रे श्रुते सति आभूषत आभवत धृष्ण्वादिना गछतु ॥ छ ॥ अथ द्वितीया ॥ वृक
श्चिदस्य वारण उरामथिरा वयुनेषु भूषति । सेमनः स्तोमं जुजुषाण आगहींद्र प्र चित्रया
धियेति ॥ वृकश्चित् स्तेनोपि वारणो वारयिता सर्वस्य सन्नपि उरामथिः शत्रूणां मार्गगन्तुतां
मथिना सन्नपि अस्येंद्रस्य वयुनेषु मार्गेषु प्रज्ञानेषु वा आभूषति आनुकूल्यमेव भजते । अ
तीव हिंस्रोपींद्रस्यानुकूलो भवतीत्यर्थः ॥ यद्वा अस्येति कर्मणि षष्ठी । अमुमिंद्रं उक्तरूपः
क्रूरेषु वयुनेषु स्तोत्रेष्वाभूषति । हे इंद्र स त्वमिमं नोऽस्मदीयं सोमं स्तोमं स्तोत्रं च जुजुषाणः प्री
यमाणः सेवमानः सन् चित्रया चायनीयया नानाविधफलरूपया धिया युक्तः सन् प्र गह्याग
छ ॥ ॥ अथेंद्राग्नी रोचने द्विवतितत्वात्मकं पंचमं सूक्तं तत्र प्रथमा ॥ इंद्राग्नी रोचना दिवः परि
वाजेषु भूषथः । तद्वां चेति प्र वीर्यमिति । हे इंद्राग्नी दिवो रोचना स्वर्गस्य रोचकौ प्रकाशकौ युवां वाजे

© Dharmartha Trust J&K. Digitized by eGangotri

षु संग्रामेषु परिभूषथः परितः सर्वतः अलंकृतौ भवथः । शत्रून् पराजित्य सर्वतो विजय
मानौ वर्त्तेथे । वां युवयोर्वीर्यं सामर्थ्यमेव तु तादृशं संग्रामविजयं प्रवेति । प्रकर्षेण प्राप
यति । यद्वा युवां वाजेषु संग्रामेषु परिभूषथः शत्रून् परिभवथः । शेषं पूर्ववत् ॥ ७ ॥ अथेंद्राग्नी
अपसस्परेति द्वितीया ॥ इंद्राग्नी नविषाणि वां मिति तृतीया ॥ तयोर्ऋचोः प्रतीकेन तयोर्व्या
ख्यानमन्यत्र द्रष्टव्यं ॥ ७ ॥ ॥ अथ कईं वेदेति त्र्यात्मकं षष्ठं सूक्तं तत्र प्रथमायाः कईं वेद
सुते सचेति ऋचः प्रतीकं तस्या इतो व्याख्यानमन्यत्र द्रष्टव्यं ॥ ७ ॥ अथ द्वितीया ॥ दाना मृगो
न वारणः पुरुत्रा चरथं दधे । नकिष्ट्वा नियमदा सुते गमो महांश्चरस्योजसेति ॥ मृगः शत्रूणा
मन्वेषको वारणो गजो दानां मदजालानीव पुरुत्रा बहुषु यज्ञेषु यज्ञेषु चरथं चरणशीलं मे
दं दधे धारयति । अथ प्रत्यक्षस्तुतिः । हे इंद्र त्वां त्वां न किर्नियमत न कश्चिन्नियच्छति । सु ते
भिषुते सोम आगम आगच्छ महान् नृज्योन स्त्वं ओजसा बलेन सर्वत्र चरसि गच्छसि ॥ ७ ॥ अ
थ तृतीया ॥ य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः । यदि स्तोतुर्मघवा शृणवद्धवं नें
द्रो योषत्यागमदिति ॥ य उग्र उद्गूर्णः उजस्वी वा सन् भवन् अनिष्टृतः शत्रुभिरहिंसितः ॥
स्थिरो ऽचालो रणाय युद्धाय संस्कृतः शस्त्रैरलंकृतः सोमैर्वा संस्कृतः स इंद्रो मघवान् ध
नवान् यदि स्तोतुर्हवमाह्वानं शृणवत् शृणोति । तर्हि न्यपतनं योषति न गच्छति । किंतु आग

© Dharmartha Trust J&K. Digitized by eGangotri

मततन्नैवागच्छति॥छ॥ ॥इत्यष्टाहत्रेऽध्यायेतृतीयःखंडः॥छ॥ अथचतुर्थखंडेपवमाना
असृक्षतेतितृचात्मकंप्रथमंसूक्तंतत्रप्रथमा॥पवमानाअसृक्षतसोमाःशुक्रासइंदवः॥
अभिविश्वानिकाव्येति॥शुक्रासउज्ज्वलाइंदवोदीप्ताःपवमानाःपूयमानाःसोमाःविश्वावि
श्वानिकाव्याकाव्यानिस्तोत्राण्यभ्यसृक्षतअभिलक्ष्यस्तृज्यंते॥छ॥ अथद्वितीया॥
पवमानादिवस्पर्यंतरिक्षादसृक्षत।पृथिव्याअधिसानवीति॥पवमानाःपूयमानाःसोमाः
दिवोद्युलोकादंतरिक्षाच्चपृथिव्याभूम्याअधिसानवि।समुच्छ्रितेदेशेदेवयजनेपर्यसृज्यंते
॥छ॥ अथतृतीया॥पवमानासआशवःशुभ्राअसृग्रमिंदवः।घ्नंतोविश्वाअपद्विष
इति॥आशवःशीघ्राःशुभ्राःशोभनाःपवमानासःपवमानाःइंदवोदीप्ताःसोमाविश्वाःसर्वानि
द्विषोद्वेष्टान्शत्रून्नपघ्नंतोमारयंतोऽसृग्रंसृज्यंते॥छ॥ ॥अथतोशावृत्रहणेतितृचात्मकं
द्वितीयंसूक्तंतत्रप्रथमा॥तोशावृत्रहणाहुवेसजित्वानापराजिता।इंद्राग्नीवाजसातमेति॥
तोशाशत्रूणांबाधकौवृत्रहत्रहणावृत्रस्यपापस्यहंतारौसजित्वानासमानजेतारौपरस्प
रापेक्षयाजेयशीलौ।अपराजितौकेनाप्यतिरस्कृतौवाजसातमाअन्नस्यातिशयेनदातारौ
इंद्राग्नीयुवांहुवेइहकर्मणिसोमपानार्थमहमाह्वयामि॥छ॥ अथद्वितीया॥प्रवामर्चंत्युक्
थिनः।इंद्राग्नीनवतिंपुरदस्येताद्योःप्रतीकेतरयारादितोव्याख्यानमन्यत्रापिद्रष्टव्यं॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अथ उपत्वा रण्व संदृशमिति तृचात्मकं तृतीयं सूक्तं तत्र प्रथमा ॥ उप त्वा रण्वसंदृशं प्रयस्वं
तः सहस्कृत । अग्ने ससृज्महे गिर इति । हे सहस्कृत सहसा बलेनोत्पन्नाग्ने प्रयस्वंतः हविर्ल
क्षणान्नवंतो वयं रण्वसंदृशं रमणीयसंदर्शनं त्वां उपप्रति गिरः स्तुतीः ससृज्महे विसृजा
म उच्चारयाम इत्यर्थः ॥ ७ ॥ अथ द्वितीयमाह उप छायामिव घृणेरगन्म शर्म ते वयं । अग्ने हिर
ण्यसंदृशमिति ॥ हे अग्ने हिरण्यसंदृश हितरमणीयतेजसः हिरण्यवद्दीप्यमानतेजसो
वा घृणेर्दीप्तस्य तेतव शर्म शरणं आश्रयणं सुखं वा उपागन्म उपागच्छाम । तत्र दृष्टांतः ॥
छायामिव यथा सुसंतप्ताः छायां सुपागच्छंति तद्वत् ॥ ७ ॥ अथ तृतीया ॥ य उग्र इव शर्यहा
तिग्मशृंगो न वंसगः । अग्ने पुरो रुरोजिथेति ॥ योग्निरुग्र इव उद्गूर्णबलो धन्वीव शर्यहा शार्व्य
बलैः शत्रूणां हंता तिग्मशृंगो न वंसगः । तीक्ष्णशृंगो वननीयगतिर्वृषभ इव हे अग्ने स त्वं पुरः
आसुरीस्तिस्रः पुरीः रुरोजिथ भग्नवानसि ॥ रुद्रो वा एष यदग्निरिति श्रुतेः । रुद्रकृतमिति
त्रिपुरदहनं अग्निकृतमेवेत्यग्निः स्तूयते । यद्वा त्रिपुरदहनसाधनभूते बाणे अग्नेरनीकत्वेना
वस्थानाग्निदग्निः पुराणि भग्नवानित्युच्यते । देवासुरा वा एषु लोकेषु समयंतेत्यादिकं ब्राह्मण
मत्रानुसंधेयं ॥ ७ ॥ ॥ अथ ऋतावानं वैश्वानरमिति तृचात्मकं चतुर्थं सूक्तं तत्र प्रथमा ॥ ऋता
वानं वैश्वानरमृतस्य ज्योतिषस्पतिं । अजस्रं घर्ममीमह इति । हे अग्ने ऋतावानं यज्ञवंतं स

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वंतंवा।कृतस्ययज्ञस्यसङ्घस्यवासंबंधितंवैश्वानरंविश्वेषांनराणांहितकारिणं।ज्यो
तिषःपतिंज्योतिषःस्तेजसःपतिंपालकं।अजस्रंअनादित्वादविछिन्नं।धर्मंदीप्तंवैश्वान
रारव्यंत्वाईमहेअभीष्टंयाचामहे॥छ॥अथद्वितीया॥यइदंप्रतिपप्रथेयज्ञस्यस्वरुत्तिरन्।
ऋतूननुसृजतेवशीति॥योग्निःइदंजगत्यज्ञस्यअनुष्ठीयमानस्ययागस्यस्वःसर्वंवर्ग
विघ्नंउत्तिरन्उत्तारयन्।यद्वास्वःस्वर्गफलंसंबंधिमहाफलंउत्तिरन्प्रयच्छन्प्रतिपप्रथे।
सर्वत्रप्रसव्यातोभवति॥वशी।परमात्मतयाजगद्वशीकर्त्ता।सोग्निर्ऋतून्वसंतादीननुसृज
तेअनुष्ठानार्थंसम्यक्सृजति।तेषुस्वयमाधीनमानःसन्तदंगत्तयावसंतादीनुत्तमान्कु
रुतइत्यभिप्रायः॥छ॥अथतृतीया॥अग्निःप्रियेषुधामसुकामोभूतस्यभव्यस्य।सम्राडे भै
कोविराजतीति॥भूतस्यअतीतकालीनस्यभूतजातस्यभव्यस्यआगामिनःभविष्यत्का
लीनस्यजगतःकामःकाम्यमानस्तत्तैःपुरुषैःसम्राट्सम्यग्राजमानः।यद्वासम्राट्ईश्व
रःयस्यपरमात्मस्वरूपस्याग्नेराज्ञाअनुष्ठानान्यनुशास्तिसम्राट्।एकोअद्वितीय
त्वेनप्रियेषुआहवनीयादिषुधामसुस्थानेषुयद्वात्रिषुपृथिव्यादिलोकेषुविराजतिविशे
षेणदीप्यते॥छ॥॥इत्यष्टादशोऽध्यायस्यचतुर्थःखंडः॥वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्।
पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥छ॥इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्र

© Dharmartha Trust J&K. Digitized by eGangotri

वर्त्तिश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेसामवेदार्थ
प्रकाशेउत्तराग्रंथेअष्टादशोऽध्यायः॥ ७॥ यस्यनिश्वसितंवेदायोवेदेभ्योऽखिलंजगत्।नि
र्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥ ७॥ ॥अथएकोनविंशोऽध्यायआरभ्यते।तत्रप्रथमखं
डेअग्निःप्रत्नेनेतित्र्यात्मकंप्रथमंसूक्तंतत्रप्रथमा॥ अग्निःप्रत्नेनजन्मनाशुंभानःस्तन्वं
स्वां।कविर्विप्रेणवावृधइति॥कविःक्रांतकर्माअग्निःप्रत्नेनपुराणेनजन्मनाजननीयेनस्तोत्रे
णस्वांस्वकीयांतन्वंतनुमंगंशुंभानःशुंभयन्विप्रेणमेधाविनास्तोत्रावावृधेप्रवृद्धोभवति॥
॥ ७॥ अथद्वितीया॥ऊर्जोनपातमाहुवेग्निंपावकशोचिषं।अस्मिन्यज्ञेस्वध्वरइति॥ऊर्जो
न्नस्यनपातंपुत्रंपावकशोचिषंशोधकदीप्तिमग्निंस्वध्वरेअस्तुरैरस्यंतमहिंसितेऽस्मिन्यज्ञे
आहुवेआह्वयामि॥ ७॥ अथतृतीया॥सनोमित्रमहस्त्वमग्नेशुक्रेणशोचिषा।देवैरासत्सिब
र्हिषीति॥हेमित्रमहोमित्राणांपूजनीयाग्नेसत्वंशुक्रेणक्षालावताशोचिषातेजसादेवैःसह
बर्हिषियाज्ञआसत्सिआसीद॥ ७॥ ॥अथपउत्तेशुष्मासइतिचतुर्ऋचंद्वितीयंसूक्तंतत्रप्र
थमा।उत्तेशुष्मासोअस्थूरक्षोभिंदंतोअद्रिवः।नुदस्वयाःपरिस्पृधइति॥हेअद्रिवोग्राव
न्सोमतेतवशुष्मासःशुष्मासःशुष्मावेगाःबलानिवारक्षोराक्षसान्भिंदंतोविदारयंतःउद
स्थुःउत्तिष्ठंति।याःस्पृधःस्पर्द्धमानाःशत्रुसेनाअस्मान्प्रतिबाधंतेतास्त्वंनुदस्वनेरपबाधस्व

© Dharmartha Trust J&K. Digitized by eGangotri

सर्पः॥७॥अथद्वितीया॥अयानिजघ्निरोजसारथसंगेधनेहिते।स्तवाअबिभ्युषाहृदेति
॥हेसोमत्वंअयाअनेनप्रकृतेनौजसाबलेननिजघ्निःशत्रून्हंतुशीलवान्।तंत्वामबिभ्यु
षाहृदाभीतेनभीतिरहितेनहृदामनसायुक्तोहंरथसंगेस्माकंरथानांसंगेहितेशत्रुषुनिहिते
धनेचनिमित्तेस्तवैस्तौमि॥७॥अथतृतीया॥अस्यव्रतानिनाधृषेपवमानस्यदूढ्या।रुज
यस्त्वापृतन्यतीति॥हेसोमपवमानस्यरक्षतोयस्मात्तवव्रतानिकर्माणिदूढ्यादुर्बुद्धिना
राक्षसेननाधृषेआधर्षयितुमशक्यानि।सत्वंत्वात्वयासहसुपांसुलुगित्याडिनात्तीयये
कश्चनस्माकारः।योदुर्बुद्धिःशत्रुःपृतन्यतियोद्धुमिच्छतितंरुजबाधस्व॥७॥अथचतुर्थी
॥तंहिन्वंतिमदच्युतंहरिंनदीषुवाजिनं।इंदुमिंद्रायमत्सरमिति॥मदच्युतंमदस्यच्यावयि
तारंहरिंहरितवर्णंवाजिनंबलिनंमत्सरंमदकरमिंदुंतंसोमंनदीषुवसतीवरीष्विंद्रायेंद्रार्थं
हिन्वंतिऋत्विजःप्रेरयंति॥७॥ ॥अथामंद्रैरितितृचात्मकंतृतीयंसूक्तंतत्रप्रथमा॥आमं
द्रैरिंद्रहरिभिर्याहिमयूररोमभिः।मात्वाकेचिन्नियेमुरिंनपाशिनोतिधन्वेवतांइहीति॥
विश्वामित्रोयज्ञार्थमिंद्रमाह्वयति।हेइंद्रमंद्रैर्मदयितृभिर्मयूररोमभिर्मयूररोमसदृश
रोमयुक्तैर्हरिभिरेतन्नामकैरश्वैरुपेतस्त्वमायाहियज्ञंप्रत्यागच्छ।केचिदपिजनास्त्वांमानि
यमुर्मानियंतु।गमनप्रतिबंधंबंधंमाकुर्वंत्वित्यभिप्रायः।प्रतिबंधदृष्टांतः॥पाशिनोनपाश

© Dharmartha Trust J&K. Digitized by eGangotri

हस्ता।आधय यथा पक्षिणं नियच्छंतितद्वत्तां सा नियच्छत्येव।किंच धन्वेव यथा पांथाः धन्व मरु
देशं शीघ्रमतिगच्छंति तद्वत् आगमनप्रतिबंधकारिणः स्थानानीसशीघ्रमागच्छ।।७।। ।।अथ द्वि
तीया।।वज्रहस्तावृत्रं वलं रुजः पुरां दर्मो अपामजः।स्थाता रथस्य हर्योरभिस्वर इंद्रो दृढा
चिदारुजः इति।।सोममिंद्रो वज्रहस्तः।हस्ते वज्रं यस्य इत्यस्मात् कर्मण्यणि।ऊरुत्तरपदप्रकृति
स्वरः।वज्रं हस्तान्ते तिहिनस्तीति वज्रहस्तः।बलं भजः।रुजो भंगे।कर्मण्युपपदे मूलविभुजादि
त्वात्।कप्रत्ययः।तत्पुरुषे कृति बहुलमिति द्वितीयाया अलुक्।थाथादिस्वरः।आवृणोत्याका
रमितिवलो मेघः।तस्य भंजकः।तथा मंत्रवर्णः।बिभेद वलमिति।ततो दर्मा भजः।अजराति
क्षेपणयोरित्यस्मात्।पचाद्यच्।विच्छरः मेघभेदनद्वारा पां प्रेरकः।पुरां शत्रुसंबंधिनां पुराणां
दर्मा दारकः।तथा च मंत्रवर्णः।इंद्रः पूर्भिदिति।तथा हर्योरश्वयोः अभिस्वरः अस्मदभिमु
ख्येन प्रेरणे निमित्तभूते सति रथस्य स्थाता रथमधिष्ठाता।तथा दृढा चिद्दृढानामपि बल
वतां शत्रूणामपि आरुजः।रुजो भंगे इत्यस्मात् इगुपधलक्षणः कः समासे थाथादिस्वरः
आसमंतात् भंजको भवति।।८।। अथ तृतीया।।गंभीरां उदधींरिव क्रतुं पुष्यसि गा इव।
प्रसुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत इति।।हे इंद्र त्वं गंभीरान्महाकाशानुदधीन्।।
समुद्रानुदकैर्यथा पोषयसि तद्वत् क्रतुं यज्ञस्य कर्तारं अमुं यजमानमभिमतफलप्रदाने

© Dharmartha Trust J&K. Digitized by eGangotri

नपुष्यसि पोषयसि। तत्र दृष्टांतः। यथा खलु गोपाः समीचीनो गोपालः यवसेन गाः पोषयसि
तद्वत्। यथा धनवो बलयस्तन्तृणादिकं प्राप्नुवंति तद्वत्त्वं सोमान्प्राप्नोषि। तत्र च सोमाः कुल्याः कु
ल्या इव सरितो ह्रदं महाजलाशयं यथा प्राप्नुवंति तद्वत्त्वां आगत्य प्राप्नुवंति॥ ७॥ ॥ अथ यथा
गौरो अपाकृतमिति प्रगाथात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ यथा गौरो अपाकृतं तृष्यन्नेत्य
वेरिणं। आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब॥ गौरो गौरमृगः तृष्यन्पिपा-
सन् अद्भिरुदकैर्व्यत्ययेनैकवचनं। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। कृतं पूर्णत्वं नीतं इ
179 रिणं निस्तृणं तटाकदेशं यथा येन प्रकारेण अवैति अवगच्छति। अवशब्दो भिशब्दस्यार्थे।
अभिमुखः सन् शीघ्रं गच्छति। तथा आपित्वे बंधुत्वे प्रपित्वे प्राप्ते सति हे इंद्र त्वं नोस्मान् तूयं
क्षिप्रनामैतत्। शीघ्रमागहि आगच्छ। आगत्य च कण्वेषु कण्वपुत्रेष्वस्मासु सचा सह एकयत्ते
नैव विद्यमानं सर्वं सोमं सुष्ठु पिब॥ ७॥ अथ द्वितीया॥ मंदंतु त्वा मघवन्निंद्रेंदवो राधोदेयाय
सुन्वते। आमुष्या सोमम पिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः॥ इति॥ हे मघवन् धनवन्निंद्र इंदवः
क्लेदनाः सोमाः त्वां मंदंतु हर्षयंतु। मंदेर्व्यत्ययेन परस्मैपदं। किमर्थं सुन्वते सोमाभिषवं कुर्व
ते यजमानाय राधोदेयाय राधसो धनस्य दानार्थं दातरि त्वायदिति भावयत्। ई घतीतीकारः।
यतो नावद्यस्याध्यदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं। आ चमुरन्तुमद इति सुन्वत्स्वष्टायाः सरा विभक्तिरु

१७५

© Dharmartha Trust J&K. Digitized by eGangotri

घात्ता। अपिबत्त्वं सोमं आमुख्य आमोषणं कृत्वा अदत्तमपिबत्। घाहस्य अपिबः पीतवान्
सि। सयज्ञवेशासं कृत्वा प्रासहा सोममपिबदिति श्रुतेः। कीदृशं सोमं चमूचम्वोरधिषवणफ
लकयोस्सुतमभिषुतं। यद्वा चमूभ्यां चमसाभ्यां होतृमैत्रावरुणस्य च संबंधिभ्यां संस्कृ
ताभिर्वसतीवरीभिः सुतमभिषुतं यस्मात्त्वं तस्मात्कारणात् ज्येष्ठं प्रशस्यतमं वृद्धतमं वा सं
होबलं दधिषे हे इंद्र त्वं धारयसि। अतो मदीया अपि सोमास्त्वां मादयंत्विति प्रार्थ्यते॥७॥
अथ त्वमंग प्रशंसिष इति प्रगाथात्मकं पंचमं सूक्तं तत्र प्रथमा॥ त्वमंग प्रशंसिषो देवः शवि
न्यौ ष्ठ मर्त्यं। न त्वदन्यो मघवन्नस्ति मर्डितेंद्र ब्रवीमि ते वचः इति॥ अंगेत्यभिमुखीकरणे। अंग श
विष्ठ बलवत्तमेंद्र देवो द्योतमानस्त्वं मर्त्यं मरणधर्माणं त्वां स्तुवंतं पुरुषं प्रशंसिषः स
म्यग्गनेन स्तुतमिति प्रशंसा हे मघवन् धनवन्निंद्र त्वदन्यस्त्वत्तोन्यः कश्चिन्मर्डिता सुखयि
ता नास्ति। अतः कारणात्ते तुभ्यं इंद्र स्तुतिलक्षणं वचो ब्रवीम्युच्चारयामि। शंसिषः। शंसस्तु
तौ। लेटि सिप्यडागमः। सिपू बहुलं लेटीति विकरणः। सिपतेस्यार्द्धधातुकत्वादिडागमः॥१॥
अथ द्वितीया॥ मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदाचना दभन्। विश्वा च न उपमिमी
हि मानुष वसूनि चर्षणिभ्य आ॥ हे वसो निवासयितरिंद्र ते तव संबंधीनि राधांसि तिरितिरा
धांसि भूतानि। अस्मान्कदाचन कदाचिदपि मा दभन् मा विनाशयंतु। तथा ऊतयो गंतारः य

© Dharmartha Trust J&K. Digitized by eGangotri

द्धधूतयइत्यत्रवर्णलोपः।धूतयःकंपयितारःतेत्वदीयामारुतश्चमाइमन्तू।हेमानुषमनुष्य
हितंइचर्षणिभ्यामंत्रइत्यस्मभ्योनोस्मभ्यंविश्वाविश्वानिवसूनिधनानिवः आउपमिमीहि।सा
वेतश्चा।हस्यःअस्मत्समीपेकुरु।सर्वत्रभवर्त्तमानंधनंअस्मभ्यंप्रयच्छेत्यर्थः।।कदाविशाष्टान्स
वैकान्पकियत्तरःकालेइतिराप्रस्यः।किमःकइतिकादेशः।व्यत्ययेनाद्युदात्तत्वं।इमन्नाइं
भुक्तो।लेंड्यर्थेछांदसेलङि।बहुलंछंदसीतिविकरणस्यलुक्।नमाङ्योगइत्यडभावः।मि
।।छ।।मीहि।माङ्मानेशब्देचव्यत्ययेनपरस्मैपदं।जुहोत्यादिभ्यःश्लुः।भृञामित्यभ्यास
स्येत्वं।हेर्ङित्वात्घुमास्थेतीत्वं।।इत्येकोनविंशोध्यायेप्रथमःखंडः।।छ।।अथद्वितीयखंडे
प्रतिष्यासूनरीतित्र्यात्मकंप्रथमंसूक्तंतत्रप्रथमा।।प्रतिष्यासूनरीजनीव्युच्छंतीपरिस्व
सुः।दिवोअदर्शिदुहिता।नेति।।स्यासाप्रसूयमानासूनरीसुष्टुप्राणिनांनेत्रीजनीजनयित्री
फलानां।स्वसुः।स्वसरस्थानीयायारात्रेः।परिउपरिभागेरात्रिपर्यवसानकालेव्युच्छंतीतमो
विवासयंती।स्वसास्वसेज्यायास्याइत्युक्तं।दिवोद्योतमानस्यादित्यस्यदुहितोषाःप्र
त्यदर्शिसिद्धैःप्रतिदृश्यते।।छ।।अथद्वितीया।।अश्वेवचित्रारुषीमातागवामृतावरी।।स
खाभूदश्विनोरुषाइति।।अश्वेवचित्राव्यापनीयाअरुषीआरोचमानागवांरश्मीनांमा
तानिर्मात्रीऋतावरीयज्ञवत्युषाः।अश्विनोःसखासमानख्यानासहस्तूयमानाभूत्भवति।

© Dharmartha Trust J&K. Digitized by eGangotri

अश्विनोः उपसा सह स्तूयमानत्वात् सखित्वं परस्परं ॥७॥ अथ तृतीया ॥ उत सखास्य
श्विनोरुत माता गवामसि ॥ उतोषो वस्व ईशिष इति ॥ उतापि च अश्विनोः सखा उतापि
च गवां रश्मीनां माता निर्मात्री असि ॥ उतापि च हे उषः वस्वो धनस्य ईशिषे ईश्वरी भवसि
॥७॥ ॥ अथैषो उषेति त्र्यृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा ॥ एषो उषा अपूर्व्या व्युच्छ
ति प्रिया दिवः ॥ स्तुषे वामश्विना बृहदिति ॥ एषो एषा एवास्माभिः परिदृश्यमाना प्रिया
सर्वेषां प्रीतिहेतुः अपूर्व्या पूर्वेषु मध्यरात्रिकालेषु विद्यमाना न भवति ॥ किं त्विदानीं त
नी उषाः उषोदेवता दिवो द्युलोकस्य सकाशादागत्य व्युच्छति तमो वर्जयति ॥ हे अश्विनौ
वां युवां महत् प्रभूतं यथा भवति तथा स्तुषे स्तौमि ॥७॥ अथ द्वितीया ॥ या दस्रा सिंधुमात
रा मनोतरा रयीणां ॥ धिया देवा वसुविदेति ॥ या देवा यावुभावश्विनौ वक्ष्यमाणगुणयुक्तौ ॥
तौ स्तुष इति पूर्वत्रान्वयः ॥ कीदृशौ दस्रा दर्शनीयौ ॥ सिंधुमातरा समुद्रमातृकौ ॥ यद्यपि सू
र्याचंद्रमसावेव समुद्रजौ ॥ तथाप्यश्विनोः केषांचिन्मतेन तद्रूपत्वात् तथात्वं ॥ रयीणां धनानां
मनोतरा मनसा तारयितारौ ॥ धिया कर्मणा वसुविदा निवासस्थानस्य लंभयितारौ ॥ मनो
तरा मनसा तरन्निति मनोतरौ ॥ नरतेरंतर्भावितण्यर्थाद्विहितोरविसप् ॥ पूर्वपदे दीस्य सकारस्य
कृत्वे तिच्छांदसमुत्वं ॥ रयीणां नामन्यतरस्यामिति नाम उदात्तत्वं ॥ धिया सावेकाच इति विभक्तेरु

© Dharmartha Trust J&K. Digitized by eGangotri

181

दात्तत्वं। वसुविदा वसूनि निवासस्थानानि विंदत इति वसुविदौ। क्विप्चेति क्विप्॥७॥ अथ त
तीया॥ वक्ष्यंते वां ककुहासो जूर्णायामधि विष्टपि। यद्वां रथो विभिष्पतादिति॥ हे अश्विनौ
वां युवयोः संबंधी रथः जूर्णायां नानाशास्त्रैः स्तुतायां अधि विष्टपि स्वर्गलोके यद्यदा वि
भिरश्वैः पतात् पतति गच्छति तदानीं त्वां युवयोः ककुहासः स्तुतयः वक्ष्यंते अस्माभिरुच्य
ते। ब्रवीतेर्यक्। ब्रूवोवचिरिति वच्यादेशः॥ ककुहासः ककुभं शृंगे विदुः। प्रधानेचेत्यभिधा
नात्। वचिस्वपीयजादीनां संप्रसारणं। संप्रसारणाच्चेत्यत्र वाछंदसीत्यनुवृत्तेः परपूर्वत्व
स्य पाक्षिकत्वाद्यणादेशः। प्रत्ययस्वरः। ककुहासः ककुभं शृंगे विदुः। प्रधानेचेत्यभिधा
नात्। वचिस्वपीयजादीनां संप्रसारणमिति संप्रसारणाच्चेत्यत्र वाछंदसीत्यनुवृत्तेः परपूर्वत्वस्य
पाक्षिकत्वाद्यणादेशः। प्रत्ययस्वरः। ककुहासः। ककुभं शृंगे विदुः प्राधानेचेत्यभिधानात्
प्राधान्याभिधायिना ककुप्शब्देन तत्प्रतिपादिकाः स्तुतयो लक्ष्यंते॥ हत्वं छांदसं। आज्
सेरसुगित्यसुक्। जूर्णायां। जॄष् वयोहानौ। अत्र स्तुत्यर्थः। धातूनामनेकार्थत्वात्। निष्ठायां
श्र्युकः कितीतीटः प्रतिषेधः। बहुलं छंदसीत्युक्तत्वं। हलि चेति दीर्घः। रदाभ्यामिति निष्ठा त्रि
नत्वं। प्रत्ययस्वरः। विभिः। वी गत्यादौ। वियंति गच्छंतीति वयो अश्वाः। अण्णादिको डि प्रत्ययः।
प्रतात्। पत्लृ गतौ। लेट् आडागमः। इतश्च लोप इतीकारलोपः॥७॥ ॥ अथोषस्तत्रिमितित्वं

© Dharmartha Trust J&K. Digitized by eGangotri

तृतीयं सूक्तं तत्र प्रथमा॥ उषस्तच्चित्रमाभरास्मभ्यं वाजिनीवति। येन तोकं च तनयं च धामहे
इति॥ हे वाजिनीवति वाजो हविर्लक्षणमन्नं तद्युक्ता क्रिया वाजिनी तया क्रियया युक्ते उषः उषो
देवते अस्मभ्यं चित्रं चायनीयं तद्धनं आभर आहर प्रयच्छ। येन धनेन तोकं पुत्रं तनयं तत्पुत्रं च
धामहे दध्महे धारयामः। अत्र निरुक्तं॥ उषस्तच्चित्रं चायनीयं धनमाहरास्मभ्यमन्नवती
येन पुत्रांश्च पौत्रांश्च दधामहीति। धामहे। दधातेर्लटि बहुलं छंदसीति शपो लुक्। व्यत्ययेना
द्युदात्तत्वं। यद्वा लोटि आडुत्तमस्य पिच्चेत्याडागमः। प्रत्ययस्य पित्त्वात्सार्वे च। अतः प्रत्यय
स्य पित्त्वादनुदात्तत्वे धातुःस्वरः शिष्यते। अस्मिन् पक्षे एत ऐ इति एत्वाभावो व्यत्ययेन द्रष्ट
व्यः। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः॥ छ॥ अथ द्वितीया॥ उषो अद्येह गोमत्यश्वाव
ति विभावरि। रेवदस्मे व्युच्छ सूनृतावति॥ हे गोमति अस्मभ्यं दातव्यगोभिर्युक्ते। तथा
अश्वावति अश्वैर्युक्ते विभावरि विशिष्टप्रकाशोपेते। सूनृता प्रियसत्यात्मिका वाक् सूनृता
तादृशया वाचा युक्ते एवंभूते हे उषः उषो देवते अद्य इदानीं प्रभातसमये इह अस्मिन् देशे अस्मे
अस्मा अस्माकं रेवत् रैयमत्॥ वहुलमिति संप्रसारणं। छंदसीर इति मतुपो वत्वं। रैशब्दा
च्च मतुप उदात्तत्वं वक्तव्यमिति मतुप उदात्तत्वं धनयुक्तं कर्म यथा भवति तथा व्युच्छ नैशं तमो
निवारय॥ उछी विवासे। विवासो वर्जनं॥ छ॥ अथ तृतीया॥ युंक्ष्वा हि वाजिनीवत्यश्वां अद्यारुणां॥

© Dharmartha Trust J&K. Digitized by eGangotri

182

उषः। अथानो विश्वसौभगान्यावहेति॥ हे वाजिनीवति हविर्लक्षणेनान्नवति उषः उषो देवते
अरुणान् अरुणवर्णान् अश्वान् अश्वस्थानीयान् गोविशेषान् दीर्घादटि समानपादे इति संहिता
यां नकारस्य रुत्वं। आतोटि नित्यमिति स्यानुनासिक आकारः। एवंभूतान् अद्यास्मिन् के
ले युंक्ष्वादित्ये योजयेव। हिरण्यवधरणे। अथानंतरं रथमारुह्य विश्वा सर्वाणि सौभगानि सु
भगान्मेत्र द्रुत्काज्ञानादिषु पाठात्। भावकर्मणोरर्थयोः प्राणभृज्जातिवयोवचनोद्गात्रा
दिभ्यो ञ्नित्यंसप्रसयः। हृद्भगसिंध्वंते पूर्वपदस्य चेत्युभयपदवृद्धौ प्राप्तोयां सर्वविधीनां छं
दसि विकल्पितत्वात् उत्तरपदस्य वृद्धिर्न भवतीत्येकं। सौभगानि सर्वाणि सौभाग्यानि नोस्म
भ्यमावह आनय॥ ६॥ ॥ अथ आश्विनावर्त्तिरिति त्र्यंचं तृतीयं सूक्तं तत्र प्रथमा॥ आश्विना
वर्त्तिरस्मदा गोमद्दस्रा हिरण्यवत्। अर्वाग्रथं समनसा नियच्छतमिति। उषसा साहचर्या
द्बुद्धिस्थावश्विनाविदमादिके तृचे तत्वेन स्तूयेते। हे अश्विना अश्ववंतौ व्यापनशीलौ। वा देवौ दस्रा
शत्रूणामुपक्षपयितारौ। अस्मदस्माकं वर्त्तिर्वर्त्तनहेतुभूतं गृहं आसमंताद्गोमत् बहुगोभि
र्युक्तं हिरण्यवत् हितरमणीयधनयुक्तं च यथा भवति। तथा समनसा समानमनस्कौ संतौ यु
वां युष्मदीयं रथं अर्वाग् अर्वाचीनम् अस्मदभिमुखं नियच्छतं आवर्त्तयतं। अस्मत् सुपां सुलुगि
ति षष्ठ्या लुक्॥ ७॥ अथ द्वितीया॥ एह देवा मयोभुवा दस्रा हिरण्यवर्त्तनी। उषर्बुधो वहंतु सोम

© Dharmartha Trust J&K. Digitized by eGangotri

पीतयइति।।उषर्बुधः उषसिप्रबुद्धा अश्वाइहास्मिन्यागेसोमपीतयेसोमपानाय दस्राशत्रूणा
मुपक्षिपयितारावश्विनौ आवहंतु आनयंतु कीदृशौ।देवादेवनशीलौ।दानादिगुणयुक्तौवा।।
मयोभुवा।मयस आरोग्यस्यसुखस्यभावयितारौ।अश्विनौवैदेवानांभिषजावितिश्रुतेः।
हिरण्यवर्त्तनी।वर्त्ततेत्रेतिवर्त्मुसस्यावर्त्तनिशब्देनरथउच्यते।सुवर्णमयोवर्त्तनिर्ययोस्तौ।देवे
त्यादिषुत्रिषु।सुपांसुलुगित्याकारः।।छ।।अथतृतीया।।यावित्थाश्लोकमादिवोज्योतिर्जना
यचक्रथुः।आनऊर्जंवहतमश्विनायुवमिति।।हेअश्विनौयौयुवांदिवोद्युलोकात्श्लोकंउ
पश्लोकनीयंप्रशंसनीयंज्योतिस्तेजःइच्छाइच्छमस्माभिरनुभूयमानेनप्रकारेणचक्रथुः।।कृ
तवंतौकेषांचिन्मतेनसूर्याचंद्रमसावश्विनावित्याचक्षते।तदुक्तंयास्केनतत्कावश्विनौद्यावापृथि
व्यावित्येकेअहोरात्रावित्येकेसूर्याचंद्रमसावित्येकइति।तथाचप्रकाशकत्वंतयोरुपपन्नं।तौयुवं
युवीनोस्मभ्यंऊर्ज्जंबलप्रदमन्नं आवहतमानयतंप्रयच्छतं।श्लोकं।श्लोकं।श्लोकसंघातौ।
आयंस्तुस्पर्धापिकर्मणिघञ्।जिलादायुदात्तत्वं।।छ।। ।।इत्येकोनविंशोऽध्यायेद्वितीयःख
ण्डः।।छ।। ।।अथतृतीयखंडेअग्निंतंमन्येयोवसुरस्तंयंयंतिधेनवः।अस्तमर्वंत आशवो।
स्तंनित्यासोवाजिनइषंस्तोतृभ्य आभरेति।।तमग्निंमन्येस्तौमि।योग्निर्वसुर्वासयिता।यम
स्तंसर्वेषांगृहंवदाधारभूतत्वेनवागावोयंतिगच्छंतिप्रीणयितुमस्तमुक्तलक्षणं।मर्वंतो।

© Dharmartha Trust J&K. Digitized by eGangotri

187

रणावंतः अश्वाः आशवः शीघ्रगामिनो यंति तथा नित्यासो नित्यप्रवृत्तयो वाजिनो हविर्लक्ष
णान्नवंतो यजमानाः। यमस्तं यंति। तं मन्ये। इषमन्नं स्तोतृभ्यो स्मभ्यं आभर हे अग्ने आ
हर॥छ॥ अथ द्वितीया॥ अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः। अग्नी राये स्वाभुवं
स प्रीतो याति वार्यमिषं स्तोतृभ्य आभरेति॥ अग्निर्हि अयमग्निः खलु विशे यजमानाय
वाजिनमन्नवंतं पुत्रमश्वमन्नं वा ददाति प्रयच्छति। विश्वचर्षणिः विश्वचर्षणयो मनुष्या र
क्षणीया अस्य केवा यस्य स तथोक्तः। यद्वा पश्यति कर्मेति सर्वस्य द्रष्टा अग्निः राधये धनार्प
न अथ वा द्वितीयार्थे चतुर्थी। धनं स्वाभुवं सुष्ठु सर्वत्र व्याप्तं। वार्यं। सर्वैर्वरणीयं प्रीतः सन् याति
यामयति। ददातु वा गच्छति। इषमित्यादि पूर्ववत्॥छ॥ अथ तृतीया॥ सो अग्निर्यो वसुर्गृणे
संयमायंति धेनवः। समर्वंतो रघुद्रुवः। संसुजातासः सूरय इषं स्तोतृभ्य आभरेति॥ सो ग्नि
स खल्वग्निः यो वसुर्वासको गृणे स्तूयते। यं धेनवः समायंति होमार्थं प्रापयंति। अर्वंतो श्वा र
घुद्रुवो रघुगमनाः समायंति। सुजातासः शोभनं प्रादुर्भूताः सूरयो मेधाविनश्च समायं
ति। स खल्वग्निरिति। शेषं पूर्ववत्॥छ॥ ॥अथ महेनो अद्येति तृचं द्वितीयं सूक्तं तत्र प्रथमा॥
महे नो अद्य बोधयोषो राये दिवित्मती। यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्व
सूनृते॥ इति। अथास्मिन्याग दिने हे उषः उषो दिवि दिवित्मती दीप्तिमती त्वं नोऽस्मान् महे महते रा

© Dharmartha Trust J&K. Digitized by eGangotri

येधनप्राप्तयेबोधनायप्रज्ञापयप्रकाशयेत्यर्थः।सतिहिप्रकाशेक्रतुद्वाराद्रव्यस्यार्जयितुं
शक्यत्वात्॥यथाचिद्यथैवपूर्वंनोस्मान्नबोधयः।अतीतेषुदिनेषुयथाबोधितवतीतद्वद्धा
पीत्यर्थः।हेसुजातेशोभनप्रादुर्भूतेअश्वसूनृतेअश्वापाप्रियसत्यात्मिकास्तुतिर्वाग्यस्याः
साःहेतादृशिदिविवाय्येवय्यपुत्रेसत्यश्रवसिमय्यनुग्रहाणेत्यर्थः॥१॥अथद्वितीया॥
यासुनीथेशौचद्रथेव्यौच्छोदुहितर्दिवः।साव्युच्छसहीयसिसत्यश्रवसिवाय्येसुजातेअश्व
सूनृतेइति॥हेदिवोदुहितःदिवःसूर्यस्यपुत्रिउषःयात्वंसुनीथेएतन्नामकेशौचद्रथेशुचद्र
थस्यापत्येपूर्वंव्यौच्छो।व्यवासयस्तमांसि।सात्वंसहीयसिअतिशयेनबलवति।वाय्येवय्य
पुत्रे।सत्यश्रवसिमयिव्युच्छ।तमोविवासय।उछीविवासे॥विवासोवर्जनं॥शिष्टंसमानं॥२॥
अथतृतीया॥सानोअद्याभरद्वसुर्व्युच्छादुहितर्दिवः।योव्यौच्छःसहीयसिसत्यश्रवसि
वाय्येसुजातेअश्वसूनृतेइति॥हेदुहितर्दिवःआभरद्वसुःआहृतधनासाप्रसिद्धात्वंनोस्मा
कमद्यास्मिन्नपिदिनेव्युच्छतमोविवासय।सहीयसिथोया।उकारोनर्थकःयात्वंपूर्वंव्यौच्छःसा
द्यापीति॥शिष्टंसमानं॥३॥ ॥अथप्रतिप्रियतममितित्वासकंद्वितीयंसूक्तंतत्रप्रथमा॥प्रति
प्रियतमंरथंवृषणंवसुवाहनं।स्तोतावामश्विनावृषिस्तोमेभिर्भूषतिप्रतिमाध्वीममश्रुतं
हवमिति॥हेअश्विनौ।एकःप्रतिशाखेनुवाकः।वांयुवयोःप्रियतमंरथंस्तोताऋषिःस्तोमेभिः

© Dharmartha Trust J&K. Digitized by eGangotri

स्तोमैः प्रतिभूषति अलंकरोति। कीदृशं रथं। वृषणं वर्षितारं फलानां। वसुवाहनं धनानां वा
हकं। ईदृशं रथमागमनाय स्तोतीत्यर्थः। तस्माद् माध्वी मधुविद्यावेदितारौ मम हवमाह्वानं श्रु
तं शृणुतं।। ७।। अथ द्वितीया।। आमात्या यातमश्विना तिरो विश्वा अहं सना। दस्रा हिरण्य
वर्त्तनी सुषुम्णा सिंधुवाहसा।। माध्वी मम श्रुतं हवमिति।। हे अश्विनाऽश्विनौ अस्माय यातं स
वनि यजमानान् तिरः प्रागच्छतं। अहमृषिर्यथा विश्वाः सर्वा अस्माद् द्विरोधि प्रजाः सना
सदा तिरस्करोमि। अथवा अहं तिरः। तिरस्सनदिति प्राप्तस्येति निरुक्तं। प्राप्ता विश्वाः सर्वाः
क्रियास्तुं ष्मरी या अनुतिष्ठेयमित्यर्थः। सना सनातनौ दस्रौ शत्रूणामुपक्षिपयितारौ। हिर
ण्यवर्त्तनी हिरण्यरथौ। सुषुम्णा सुधनौ सिंधुवाहसा नदीनां प्रवाहयितारौ। वृष्टिप्रेरणेन त
दृशौ युवामस्माय यातं।। ७।। अथ तृतीया।। आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवं। रुद्रा
हिरण्यवर्त्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवमिति।। हे अश्विनावश्विनौ युवं युवां नो
स्मभ्यं रत्नानि रमणीयानि धनानि बिभ्रता बिभ्राणौ धारयंतौ संतावस्मानागच्छतं। हे रुद्रा
रुद्रपुत्रौ स्तुत्यौ वा। वाजिनीवसू वाजिनधनौ युवां हिरण्यवर्त्तनी हिरण्यरथौ जुषाणा य
ज्ञं सेवमानौ संतौ आगच्छतमिति। माध्वीत्यादि गतं।। ७।। ।। इत्येकोनविंशोध्याये तृतीयः
खंडः।। ७।। ।। अथ चतुर्थखंडे अबोध्यग्निः समिधेति त्र्यासकं प्रथमं सूक्तं तत्र प्रथमा।। अ

© Dharmartha Trust J&K. Digitized by eGangotri

बोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं।यह्वाइवप्रवयामुज्जिहानाःप्रभा
नवःसस्रतेनाकमच्छति॥अयमग्निर्जनानामध्वर्य्वादीनांसमिधासमिद्भिरबोधिप्रबु
द्धोभूत्।धेनुमिव।अग्निहोत्रार्थंधेनुंप्रतियथाप्रातर्बुध्यतेतद्वदायतीमागच्छंतीमुषसंप्र
ति।उषःकालइत्यर्थः।अथप्रबुद्धस्याग्नेर्भानिवारश्मयोज्वालाजिह्वामहांतोवयांशाखां
ग प्राजिहानाःप्रोत्क्रमयंतोयह्वाइव।यह्वामहांतःप्रोजिहानाःस्वाधिष्ठानंत्यजंतोभान
वोनाकमंतरिक्षमच्छाभिमुख्येनप्रसस्रतेप्रसरंति।सस्रतेसिस्रतइतिपाठौ॥७॥अथ
द्वितीया॥अबोधिहोतायजथायदेवानूर्ध्वोअग्निःसुमनाःप्रातरस्थात्।समिद्धस्यरुशद
दर्शिपाजोमहान्देवस्तमसोनिरमोचीति॥अयंहोताहोमनिष्पादकोदेवान्यष्टव्यान्य ग्नि
जथाययष्टुमबोधिबुध्यते।सोग्निःप्रातःकालेसुमनाःशोभनमनस्कोयजमानानुग्रहबु
द्धिःसन्नूर्ध्वःअस्थादुत्तिष्ठति।समिद्धस्यास्यरुशद्दीप्यमानंपाजोबलंलक्षणमद
र्शिदृश्यते।अथतथाभूतोमहान्देवःतमसोंधकाराद्भिनिरमोचिसर्वंजगन्निरमोचयत्॥अ
थतृतीया॥यदींगणस्यरशनामजीगःशुचिरंक्तेशुचिभिर्गोभिरग्निः।आद्दक्षिणायुज्यते
वाजयंत्युत्तानामूर्ध्वोअधयज्जुहूभिरिति॥यद्यदाईमयमग्निःगणस्यसंघात्मकस्यजगतः
रशनांरज्जुरिवव्यापारप्रतिबंधकंतमः अजागःजिरतिगच्छतीतिवा।समिद्धोभवतीत्यर्थः॥

© Dharmartha Trust J&K. Digitized by eGangotri

पदार्थवत्सु विदितोग्निः स्रुग्भिर्गोभिर्दीप्तै रश्मिभिरंक्ते व्यनक्ति। विश्वं जगत्। आदनंतरमेव
दक्षिणा प्रवृद्धा वाजयंती हविर्लक्षणमन्नं प्रदातुमिच्छंती जुहूर्युज्यते युक्ता भवति। अ
थवा दक्षिणा प्रवृद्धा ज्यधारा युज्यते। तां धारामुत्तानां ऊर्ध्वतानां सुपरिविस्तृतां अर्ध्वमुन्न
तः सन् जुहूभिरधयत् पिबति॥६॥ ॥ अथेदं श्रेष्ठमिति तत्वात्मकं द्वितीयं सूक्तं तत्र प्रथ
मा॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा। यथा प्रसूता सवितुः स
एवा रात्र्युषसे योनिमारैगिति। ज्योतिषां ग्रहनक्षत्रादीनां द्योतमानानां मध्ये रवमुख
आख्यं ज्योतिः श्रेष्ठं प्रशस्यतमं। अस्य कोतिशय इति चेत् उच्यते। नक्षत्रादिकं ज्योतिः
स्वात्मानमेव प्रकाशयति नान्यत्। चंद्रस्तु यद्यप्यन्यत्प्रकाशयति। तथापि न विस्पष्टप्रका
शः॥ उषसंतु ज्योतिर्युगपदेव सर्वस्य जगतोंधकारं निराकरणेन विशेषेण प्रकाशकं॥
अतः प्रशस्यतममित्यर्थः। तादृशं ज्योतिरागात् पूर्वस्यां दिश्यागमत्। आगते च तस्मिंश्चि
त्रश्चायनीयः प्रकेतः। अंधकारावृतस्य सर्वस्य पदार्थस्य प्रज्ञापकः तदीयो रश्मिर्विभ्वा वि
भुर्व्याप्तः सन्नजनिष्ट प्रादुरभूत्। किंवा यथा रात्री रात्रिः स्वयं सवितुः सूर्यसकाशात् प्रसूता
उत्पन्ना सूर्ये ह्यस्तं गच्छन् रात्रिं जनयति। तस्मिन्ननस्तमिते रात्रेः उत्पत्त्यभावात्। एवमेव रा
त्रिरपि उषसे सवाय उषस उत्पत्तये तदीयं योनिस्थानं स्वकीयापरभागलक्षणं आरैक् आ

185

१८५

© Dharmartha Trust J&K. Digitized by eGangotri

रेचितवती कल्पितवतीत्यर्थः। यद्वा प्रसूता रात्रिसकाशात् प्रसन्ना उषाः सवितुः सूर्यस्य स
वाय प्रसवाय जन्मने यथा भवति एवं रात्रिरपि उषसे उषसो यज्जन्म तदर्थं योनिं स्वापरभाग
लक्षणं स्थानं कृतवती। अत्र निरुक्तं। इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञानत
ममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिं
अरिचत् स्थानमिति। श्रेष्ठं। प्रशस्यशब्दादिष्ठनि प्रशस्यस्य श्र इति श्रादेशः। प्र
कृत्यैकाजिति प्रकृतिभावाट्टिलोपाभावः। अगात्। एतेर्लुङि इणो गा लुङीति गादेशः। गाति
स्थेति सिचो लुक्। प्रकेतः। कित ज्ञाने। अन्तर्भावितण्यर्थात् कर्मणि घञ्। थाथादिनोत्तरप
दान्तोदात्तत्वं। अजनिष्ट। जनी प्रादुर्भावे। लुङि सिच इडागमः। विभ्वा। विप्रसंभ्यो ड्वसंज्ञाया
मिति भवतेर्डुप्रत्ययः। सुपां सुलुगिति सो राकारादेशः। ओः सुपीति यणादेशस्य न भू
सुधियोरिति प्रतिषेधे प्राप्ते छंदस्युभयथेति यणादेशः। व्यत्ययेनाद्युदात्तत्वं। यद्वा विभू
र्वस्वितेरौणादिको डुन् प्रत्ययः। नित्त्वादाद्युदात्तत्वं। प्रसूता। सुनुतेः कर्मणि निष्ठा। गतिरनं
तर इति गतेः प्रकृतिस्वरत्वं। सवाय। छंदसि जवसवौ वक्तव्याविति निपातनात्। अव। विस्वरः
। रात्री। रात्रेश्चाजसाविति ङीप्। यस्येति चेति इकारलोपः। आरैक्। रिचिर् विरेचने। लङि बहुलं
छंदसीति विकरणस्य लुक्। लघूपधगुणे हल्ङ्याब्भ्य इति तिलोपः। वर्णव्यापत्त्या व्यत्ययेन ए

© Dharmartha Trust J&K. Digitized by eGangotri

कारस्यैकारः॥छ॥अथद्वितीया॥रुशद्वत्सारुशतीश्वेत्यागादारैगुकृष्णासदनान्यस्याः।
समानबंधूअमृतेअनूचीद्यावावर्णंचरतआमिनानेइति॥श्वेत्येत्युषसोनामधेयं।रुश
तीदीप्यमानाश्वेत्याश्वेतवर्णाभिषाः।रुशद्वत्सारुशद्दीप्तःसूर्यवत्सोयस्याःसातथोक्ता।यथामा
तुःसमीपवत्सःसंचरतिएवमुषसःसमीपेसूर्यस्यनित्यमेवस्थानात्तद्वत्सत्वं।अथवा
यथावत्सोमातुस्तन्यंरसंपिबन्हरतिएवमुषसोवत्सपायाःस्वंरसंपिबन्वत्सइत्युच्यते।
ताद्दशीसतीआगात्आगतवती।आगतायाअस्याउषसःकृष्णाकृष्णवर्णारात्रिःस
मानानिस्थानानिस्वकीयांस्थानद्वयामलक्षणानिआरैकुआरेचितवती।कल्पितवतीत्य
र्थः।उइत्येतत्पूरणः।अपिवातकल्पितवतीत्यर्थः।उइत्येतत्पूरणः।अपिचैतेरात्र्युषसे
समानबंधू।समानेनएकेनसूर्यरूपेणबंधुनासख्यायुक्ते।यद्वासूर्येणसहसंबद्धे।यथा
उषाउदेष्यतासूर्येणसंबद्धाएवंरात्रिरपिअस्तंयतासूर्येणसंबद्धा।अमृतेमरणरहिते
।कालात्मकतयानित्यत्वात्।अनूचीअनुअंचंत्यौ।प्रथमंरात्रिःपश्चादुषाइत्येवमनुक्रमे
णगच्छंत्यौ।यद्वासूर्यगत्यनुसारेणगच्छंत्यौ।एवंभूतवर्णंसर्वेषांप्राणिनांरूपंराम्या।एवं
विधसत्यौद्यावाद्योतमानेचरतःप्रतिदिवसमावर्त्तेते।यद्वाद्यावानभसोंतरिक्षमार्गेणाच
रतःप्रतिदिवसंगच्छतः।अत्रनिरुक्तं।रुशद्वत्सासूर्यवत्सारुशदितिवर्णनामरोचतेर्ज्वलति

© Dharmartha Trust J&K. Digitized by eGangotri

द्रुशद्रूपातीश्वेत्यागात् श्वेत्या श्वेतनेरतिवत् कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः कृष्णं
कृष्यते निकृष्टो वर्णो येने संस्तौति समानबंधू समानं बंधनं अमृते अमरणधर्माणा
वसूची अनूच्या वितरेतरमभिप्रस्थाद्यावावर्णं चरतः नतेपवघद्यावोद्योतनादपिवाधा
वावरेतः तयोसहचरतइतिस्यात्॥ आमिनाने अन्योन्यस्याध्यासं कुर्वाणे इति श्वेत्या॥
श्विता वर्णे। अस्मादेवं तादृवायदिति भावयत्। णिलोपः। अर्धश्चादित्वान्मत्वर्थीयो अ
चू। अमृते। मृतं मरणमनयोर्नास्तीति बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्त
त्वं। अनूची। अनुपूर्वादंचतेः ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। अंचतेश्चो
पसंख्यानमिति ङीप्। अच इत्यकारलोपे चाविति दीर्घः। अनुदात्तस्य च यत्रोदात्तलोप इ
ति ङीप उदात्तत्वं। सुपां सुलुगिति विभक्तेर्लुक्। मीनातेः क्र्यादिकस्य शानचि मीनातेर्नि
गम इति ह्रस्वत्वं॥ २॥ अथ तृतीया॥ समानो अध्वा स्वस्रोरनंतस्तमन्यान्या चरतो देवशि
ष्टे। न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे इति॥ स्वस्रोर्भगिन्योरात्र्युषसोः
अध्वा संचरणसाधनभूतो मार्गः समान एक एव। येनैवाकाशमार्गेण उषा निर्गच्छति। तेनैव रा
त्रिरपि। स च मार्गो नंतः अवसानरहितः। संमार्गं देवशिष्टे द्योतमानेन सूर्येणानुशिष्टे
शिक्षिते सत्यौ अन्यान्या एकैकापरतः क्रमेण गच्छतः। अपि च सुमेके। शोभनमेहने सर्वेषा

© Dharmartha Trust J&K. Digitized by eGangotri

मुसाहकत्वाच्छोभनं प्रजनने। नक्तोषासा। रात्रिरूपाश्च विरूपे तमः प्रकाशलक्षणाभ्यां विरुद्ध-
रूपाभ्यां युक्ते अपि समनसा समानमनस्के एकमत्यं प्राप्ते सत्यौ न मेथेते परस्परं न हिंस्तः।
तथा न तष्ठतुः। क्वचिदपि न तिष्ठतः। सर्वदा लोकानुग्रहार्थं गच्छत इत्यर्थः। अन्यान्याकर्मव्य-
तिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं। समासवच्च बहुलमिति अन्याः शब्दस्य द्विर्भावः। तस्य
परमाम्रेडितमित्याम्रेडितसंज्ञायामनुदात्तं चेत्याम्रेडितानुदात्तत्वं। देवशिष्टेः शासु अनुशि-
ष्टौ। शास्तेः कर्मणि निष्ठा। यस्य विभाषेतीट्प्रतिषेधः। शास इदङ्हलोरित्युपधाया इत्वं। शा-
सिवसिघसीनां चेति षत्वं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। मेथेते मेथतिः हिंसार्थो
भौवादिक अनुदात्तेत् सुमेके मिहा सेचने। भावे घञ्। शोभनो मेहो ययोस्ते। व्यत्ययेन ककारः। उ-
त्तरपदस्य ञ्नित्स्वरेणाद्युदात्तत्वात् आद्युदात्तत्वं ह्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। नक्तोषासा। सु-
पांसुलुगिति विभक्तेराकारः॥७॥ ॥ आ भात्यग्निरिति त्र्यृचात्मकं तृतीयं सूक्तं तत्र प्रथमा॥
आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः। अर्वाञ्चा नूनं रथ्येह यातं पीपिवां-
समश्विना घर्ममच्छ इति। उषसामनीकं अनाकभूतः। अनीकं मुखं। उषसि प्रबुध्यमान इत्यर्थः
। तादृशोऽग्निरा भाति दीप्यते। यद्वा उषसां मुखमाभाति वापयति। उषः काले ह्यग्नयः प्रतिबोध्यंते।
किंच। विप्राणां मेधाविनां स्तोतृणां देवयाः देवकामाः वाचः स्तोत्राणि उदस्थुः उत्तिष्ठंति। य

© Dharmartha Trust J&K. Digitized by eGangotri

स्मादेवंतस्मात्हेरथ्यारथपस्वामिनावश्विनौ अर्वाञ्चा अस्मदभिमुखावश्विनौ नूनमद्यास्मि
न्यागदिनेइहयागे आयातंकं प्रतिपीपिवांसंस्वांगैः परिवृढंधर्म्मप्रदीप्तंतयज्ञं।यद्वापीपिवांसं
अप्याययितंधर्म्मंक्षीरस्वरूपंसोमरसं॥अथवाघृतादिनापीपिवांसंधर्मंप्रवर्ग्यंअच्छआभिमुख्ये
नयातं।प्रवर्ग्यस्यसूक्तस्यविनियोगःबह्वृचानां॥छ॥अथद्वितीया॥नसंस्कृतंप्रमिमीतोग
विष्ठांतिनूनमश्विनोपस्तुतेह।दिवाभिपित्वेवसागमिष्ठाप्रत्यवर्त्तिंदाशुषेशंभविष्ठेति॥हेअ
श्विनौसंस्कृतंधर्म्मंनप्रमिमीतंनहिंस्तं।किंतुअंतिअंतिकेधर्म्मसपीयेनूनमिदानीमिहय
ज्ञेगमिष्ठागंतृतमौयुवांआश्विनाअश्विनौउपस्तुताउपस्तुतौभवत।दिवाभित्वे।दिवसस्या
भिपतनेप्रातःकालेअवसारक्षणेननिर्दिष्टेनान्नेनसहअवर्त्तिंवृत्तिर्जीवनंतदभावोअवर्त्तिः
स्तद्युक्तंयथान्नंआगमिष्ठाआगंतृतमौ।आगसंवदाशुषेहविर्दत्तवतेयजमानायसंभवि
ष्ठासुखस्यभावयितारोभवतः।छ॥अथतृतीया॥उतायातंसंगवेप्रातरह्नोमध्यंदिनउदि
तासूर्यस्य।दिवानक्तमवसाशंतमेननेदानींपीतिरश्विनाततानेति॥अह्नोद्व्युपात्रेधापंचधा
पंचदशधेतिनानाधिभागाःसंति।इहपंचधाविभागआत्तः।उतापिवायातमागच्छतंकदा।संग
वेसंगवकाले।संगच्छंतेगावोदोहभूमिंयस्मिन्कालेससंगवः।रात्र्यपरकालेगावोवनेहिमतृणा
निभक्षयंतिभक्षयित्वापुनर्दोहायसंगवप्रतिनिवर्त्तंते।तथाप्रातःप्रातःकालेपितथामध्यंदिने

© Dharmartha Trust J&K. Digitized by eGangotri

अन्हो मध्यकाले। सूर्यस्य उदिता उदितौ। अस्तमये अस्तंगमनवेलासमये। अपराह्न इत्यर्थः
एतत्सायाह्नस्याप्युपलक्षणं। न केवलमुक्तेष्वेव कालेषु। किं तर्हि। दिवानक्तं सर्वदा शंतमेन
सुखतमेन अवसा रक्षणेन हविषा वा निमित्तेन आयातं। किमर्थमागम्यते। पूर्वमेवास्मै हविःसी
कृतत्वात्। नेत्सा हाइद्यानीमपि पीति। इतरदेवानां पानं नातनतानि ननतनोति। अश्विना अश्विनौ
विहायातिशेषः॥ ७॥ ॥ इत्येकोनविंशोऽध्याये चतुर्थः खंडः॥ ७॥ ॥ अथ पंचमखंडे एता
उत्या इति त्रयोदशर्चं प्रथमं सूक्तं तत्र प्रथमा॥ एता उत्या उषसः केतुमक्रत पूर्वे अर्द्धे रजसो भा
नुमंजते॥ निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोरुषीर्यंति मातरः इति। उ इत्येतत्सम्
रणं। त्यास्ता एता उषसः प्रभातकालाभिमानिन्यो देवताः केतुं अंधकारावृतस्य सर्वस्य जगत
प्रज्ञापकं प्रकाशकं आक्रत अकृषत कृतवत्यः। यस्मादेवं तस्मादुषसः रजसोंतरिक्षलोकस्य
पूर्वे अर्द्धे प्राचीने दिग्भागे भानुं प्रकाशं अंजते व्यक्तीकुर्वंति। धृष्णवो धर्षणशीला योद्धारः आ
युधानीव। यथा असिप्रभृतीन्यायुधानि संस्कुर्वंति। एवं निष्कृण्वानाः स्वभासा जगत्सं[illegible]स्कुर्वा
णा गावो गमनस्वभावा अरुषीः आरोचमाना मातरः सूर्यप्रकाशस्य निर्मात्र्यः जगज्जनन्यो वा
उषसः प्रतियंति प्रतिदिवसं गच्छंति एवंविधा उषसो स्मान्रक्षंत्वित्यर्थः। अत्र निरुक्तं। एता
स्ता उषसः केतुमकृषत प्रज्ञानमेकस्या एव पूजार्थे बहुवचनं पूर्वे[illegible]तरिक्षलोकस्य समंजते ते

© Dharmartha Trust J&K. Digitized by eGangotri

भानुना निष्कृण्वाना आयुधानीव धृष्णवः। निरित्येष समित्येतस्य स्थाने। एमीषां निष्कृतं जारि
णीवेत्यपि निगमो भवति। प्रतियंति गावो गमना रुषीरारोचना मातरो भासो निर्मिमत इति। अ
क्रत। करोतेर्लुङि मंत्रे घसेति च्लेर्लुक्। निष्कृण्वानाः। कृवि हिंसाकरणयोश्च। अस्मात्ताच्छीलि
क्यानश्। धिन्विकृण्व्योरच्चेत्युप्रत्ययः। इदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य षत्वं। कृदुत्तर
पदप्रकृतिस्वरत्वं॥ ७॥ अथ तृतीया॥ उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अ
युक्षत। अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुरिति॥ अरुणा आरो
चमानाः भानवः अपस्योरीतयः वृथा अनायासेन स्वयमेवोदपप्तन् उद्गमन्। तदनंतर
मुषसश्च स्वायुजः सुखेन रथेन आयोक्तुं शक्याः। अरुषीः शुभ्रवर्णा गाः पूर्वमुच्छ्रितान् रश्मी
न् रुशतीः स्ववाहनभूतास्ताश्च पुरीगा एव अयुक्षत। स्वरथे अयोजयन्। उक्तं च। अरुण्यो गाव उ
षसामिति। एवं गोभिर्युक्ते रथमारुह्य उषसः पूर्वथा पूर्वेष्वतीतेष्वहःसु इव वयुनानि सर्वेषां प्रा
णिनां ज्ञानानि अक्रन् अकार्षुः। उषःकाले जाते हि सर्वे प्राणिनो ज्ञानयुक्ता भवंति। तदनंतर
मरुषीरारोचमानास्ता उषसः रुशन्तं रुशदिति। वर्णनाम रोचतेर्ज्वलतिकर्मण इति यास्कः॥ शुभ्र
वर्णं भानुं सूर्यं अशिश्रयुः। असेवंत। तेन सहैकीभवंतीत्यर्थः॥ ७॥ अथ तृतीया॥ अर्चंति ना
रीरपसो न विष्टिभिः समानेन योजनेना परावतः। इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमा

नायसुन्वनइति॥ नारीर्नैअउषसः विष्टिभिर्निवेशकैः स्तकीयैस्तेजोभिः समानेन योजनेन एवैने॰
वोघोगेन आपरावतः आहृदेशात् आपश्चिमदिग्भागात् अर्द्धतेन भः प्रदेशं पूजयंति। हस्त्वं
जगत्युगपात्स्वव्याप्नुवंतीत्यर्थः। तत्र दृष्टांतः। अपसोन। युद्धकर्मणोपेताः पुरुषाः यथास्वकी
यैरायुधैर्धाहीमुखेन सर्वदिशां व्याप्नुवंति तद्वत्॥ किंकुर्वंसः। सुकृते शोभनस्य कर्मणः कर्त्रे सुन्व
ते सोमाभिषवं कुर्वते। सुदानवे कल्याणीर्दक्षिणा ऋत्विग्भ्यो ददते यजमानाय विश्वेदह। सर्वमेवै
यै षमन्नं वहंती रावहंत्यः। अरुद्धं छंदस्यर्थः। नारीः नन येस्रृदोरप्॥ न नरो योर्दैर्दीर्घ इति शार्ङ्गरवादि
189 षु पाठान् ङीन्। जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं। अपसः अपः शब्दात् अर्शआदिभ्यो जि
सत्व्॥ सुपां सुलुगिति जसः सुः। व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वं। विष्टिभिः विशप्रवेशने क्तिं
ति प्रविशंतीति विष्टयः किरणाः॥ क्तिच् क्तौ च संज्ञायामिति क्तिच्॥ विश्वा। सुपां सुलुगित्याकारा
देशः॥ ७॥ ॥ अथ अबोध्यग्निर्ज्म इति तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ अबोध्यग्निर्ज्म
उदेति सूर्यो व्युषाश्चंद्रा मह्यावो अर्चिषा। आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सवि
ता जगत्पृथगिति॥ अयमग्निर्विहितः सन् ज्मः ज्मायाः पृथिव्याः स्वलक्षणयाः संबंधीसन्
अबोधि प्रबोधितः। किंच। सूर्य उदेति। तता मही महती उषाः अर्चिषा प्रकृष्टेन तेजसा चंद्रमा
णीनामाह्लादनी सती व्यावः व्यवर्णोत्॥ तमांसि निवारयति स्म। आवरणोतेर्लुङि मंत्रे घसेति

© Dharmartha Trust J&K. Digitized by eGangotri

ब्धेर्लुङ्। छंदस्यपि दृश्यत इत्यडागमः। यतश्च उषा उदेति यतश्च सूर्य्यः। यतश्चा
यमग्निः प्रबुद्धो भवति। अतः कारणाद्धे अश्विनौ युष्मत्संबंधिनं रथं पातवे देवयजमान
गमनाय रासभाभ्यामयुक्षातां युंजाथां। तथा सविता सर्व्वकर्मणोनुज्ञाता देवो जगत्॥
संगमं प्राणिजातं पृथक् स्वस्वकर्मानुरोधेन प्रासावीत् प्रसुवतु अनुजानातु॥१॥ अथ द्वि
तीया॥ यद्युंजाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतं। अस्माकं ब्रह्म पृतनासु
जिन्वतं वयं धना शूरसाता भजेमहीति॥ हे अश्विना अश्विनौ यद्यदा वृषणं वृष्ट्या इष्टवर्षकं
रथं युंजाथे योजयथः। तदा नः क्षत्रं अस्मदीयं बलं क्षत्रियजातिं वा घृतेनोदकेन मधुना म
धुरेण उक्षतं सेचयं प्रवर्द्धयतमित्यर्थः। यद्वा घृतेन क्षरणरूपेण मधुनामृतेनोक्षतं। यु
ष्मद्रथस्थेनामृतेनास्मदीयं बलं प्रवर्द्धयतमित्यर्थः। अश्विनो रथस्य मधुपूर्णत्वं मधु
वाहना इत्यादिषु प्रसिद्धं। किंच। अस्माकं पृतनास्वस्मदीयासु पुत्रभृत्यादिमनुष्यरूपा
सु प्रजासु ब्रह्म ब्राह्मं तेजो जिन्वतं। यद्वा पृतनासु परकीयासु ब्रह्मलनासां परिवृढमन्नं
अस्माकं जिन्वतं प्रीणयतं वयं च शूरसातौ शूराणां प्रहारादिदानयुक्ते। संग्रामे धना। त
दीयानि धनानि बहुविधानि भजेमहि लभेमहि॥२॥ अथ तृतीया॥ अर्व्वाङ्त्रिचक्रो म
धुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः। त्रिबंधुरो मघवा विश्वसौभगः शन्न आ

© Dharmartha Trust J&K. Digitized by eGangotri

वक्ष द्विपदे चतुष्पद इति॥ अर्वाङ् अस्मदभिमुखः अश्विनो रथः यातु अस्मदभिमुखो ग-
च्छतु। कीदृशः त्रिचक्रः अश्वत्रयेयुक्तः। मधुवाहनो मधुवोढा। जीराश्वः शीघ्रगाम्यश्वो-
पेतः। सुष्टुतः। अत एवास्माभिः स्तूयमानः त्रिवंधुरः। निम्नोन्नतकाष्ठत्रयोपेतः। सारथ्या-
श्रयस्थानं बंधुरं तद्युक्तं। मघवा धनवान् विश्वसौभगः सर्वसौभाग्योपेतः ईदृशोऽश्विनोर-
थो नोऽस्माकं द्विपदे पुत्राय प्रजायै चतुष्पदे पशवे च शं सुखं आवक्षत्। आवहतु। वहेर्ले-
190 टि अडागमः॥ ६॥ ॥ अथ प्र ते धारा असश्चत इति चतुर्ऋचं तृतीयं सूक्तं तत्र प्रथमा॥ प्र
ते धारा असश्चतो दिवो न यंति वृष्टयः। अच्छा वाजं सहस्रिणमिति॥ हे सोम ते तव अस-
श्चतः संगरहिता धाराः सहस्रिणमपरिमितसंख्याकं वाजमन्नमच्छास्मदर्थं प्रयंति प्रग-
च्छंति॥ तत्र दृष्टांतः। दिवो न वृष्टयः। यथा द्युलोकाद्वर्षधारा निस्संगाः प्रजानामपरिमितम-
न्नं प्रतियंति तद्वदित्यर्थः॥ ७॥ अथ द्वितीया॥ अभि प्रियाणि काव्या विश्वा चक्षाणो अर्ष-
ति। हरिस्तुंजान आयुधेति॥ हरिर्हरितवर्णः सोमो विश्वा विश्वानि प्रियाणि देवानां प्रीतिक-
राणि काव्या कविकर्माणि चक्षाणः पश्यन् आयुधा स्वकीयान्यायुधानि तुंजानो राक्षसान्
प्रति प्रेरयन् अभ्यर्षति। यागं प्रतिगच्छति॥ ८॥ अथ तृतीया॥ स मर्मृजान आयुभिरि-
भो राजेव सुव्रतः। श्येनो न वंसु षीदतीति॥ सुव्रतः सुकर्मासि सोमः आयुभिः मनुष्यैर्मर्दलि

गिभिः मर्मृज्यमानः शोध्यमानः इभोगतभयो राजेव। यथा राजा। श्येनो न। यथा श्येनः तथा
वं सूद्केषु वसती वरीषु सीदति॥ ७॥ ॥अथ चतुर्थी॥ स नो विश्वा दिवो वसूतो पृथिव्या अ
धि। पुनान इंदवा भरेति॥ हे इंदो सोम पुनानः पूयमानः सः त्वं दिवो धि दिवि स्थितानि उतापि
च पृथिव्या अधि पृथिव्यां स्थितानि। अधीति सप्तम्यर्थानुवादः। विश्वा विश्वानि वसूनि वसू
निधनानि नोस्मभ्यमाभर आहर॥ ७॥ ॥इत्येकोनविंशेऽध्याये पंचमः खंडः॥ ७॥ ॥वेदार्थस्य
प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ७॥ इति श्रीमद्रा
जाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणा
चार्यविरचिते माधवीये सामवेदार्थप्रकाशे उत्तराग्रंथे एकोनविंशोऽध्यायः॥ यस्य नि
श्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ७॥ ॥अथ विं
शोऽध्याय आरभ्यते॥ तत्र प्रथमखंडे प्रास्य धारा इति द्वे बालकं प्रथमं सूक्तं तत्र प्रथमा
प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा। देवाँ अनु प्रभूषत इति॥ अस्य सोमस्य धारा
अक्षरन् ओजसा बलेन अक्षरन् असिच्यन्त। कीदृशस्य एतस्य। वृषकस्य सुतस्य अभिषुत ३
स्य देवाननु प्रभूषतः प्रभवितुमिच्छतः॥ ७॥ ॥अथ द्वितीया॥ सप्तिं मृजंति वेधसो गृणं
तः कारवो गिरा। ज्योतिर्जज्ञानमुक्थ्यमिति॥ सप्तिं अश्वस्थानीयं सर्पणस्वभावं वा सा

© Dharmartha Trust J&K. Digitized by eGangotri

मर्मृजेति शोधयंति। के। गृणंतः कारवो गिरा ज्योतिर्जज्ञानमुक्थ्यमिति॥ स्तुवंतः॥
कारवः कर्मकर्त्तारो ध्वर्य्यादयो गिरा स्तुत्या साधनेन। कीदृशं सन्तं ज्योतिर्दीप्यमानं
सोमं जज्ञानं जायमानं प्रवृद्धमित्यर्थः। अथ वा ज्योतिर्जयमानं अयं वै ज्योतिर्य
ज्ञो मह इति श्रुतेः। उक्थ्यं स्तुत्यं॥ छ॥ अथ तृतीया॥ सुषहा सोम तानि ते पुनानाय प्र
भूवसो। वर्द्धा समुद्रमुक्थ्येति॥ हे सोम उक्थ्य स्तुत्य प्रभुवसो प्रभूतधन पुनानाय पूय
191 मानस्य ते तव तानि तेजांसि सुषहा शोभना अभिभावुकानि। यस्मादेवं तस्मात्समुद्रं स
मुद्रस्थं द्रोणकलशं प्रभुतं वर्द्ध वर्द्धय रसेन पूरयेत्यर्थः॥ छ॥ ॥ अथैष्य ब्रह्मेति
षट्पदं द्वितीयं सूक्तं॥ एन्द्र ब्रह्मा यरुत्विय इंद्रो नाम श्रुतो गृणे इति। यः इंद्र इति नामा
श्रुतः देवसमूहे प्रख्यातः एष ऋत्वियः। ऋत्वो वसंतादौ काले भवः य एष ब्रह्मा सर्व
तः परिवृढः तमहं गृणे स्तौमि॥ छ॥ अथ द्वितीया॥ त्वामिच्छवसस्पते यंति गिरो न
संयतः इति। हे शवसो बलस्य पते पालक इंद्र त्वामिति शायेन बलवन्नित्यर्थः। तथा शाखांत
रे बलेनो सत्ति त्वं श्रूयते। उरसो बाहुभ्यां पंचदशं निरमिमीत तमिंद्रो देवतान्वभज्यत
स्मारभ्य तस्मात्ते वीर्य्यविं न इति श्रुतेः। त्वामित्त्वामेव संयतो न सम्यक्प्रियच्छं त इति वृ। सम्य
ग्यजमाना इव वा। अथ वा संयत्तो नासम्यग्लियच्छतः। पुरुषस्येव वेदस्य संबंधिनो गि

© Dharmartha Trust J&K. Digitized by eGangotri

यंतिसाम्नवंति: अथ तृतीया। यामिश्रुग्रशोयशापयइ स्य-१

रस्तुतयः प्रतीकं तस्या इतो व्याख्यानं छंदसि द्रष्टव्यं॥ ७॥ आलारपंयथोतयइतिप्रती
कमत्रपठ्यते। यथापिव्याख्याता। हे इंद्र त्वां वयमावर्त्तयामसि आवर्त्तयाम। किमर्थं ऊत
ये अस्माकं रक्षणाय सुम्नाय सुखाय च। किमिव। रथंयथा ऊतये सुखाय वर्त्तयति तद्व
२४ त्। कीदृशं त्वां तुविकूर्मिं बहुकर्माणं। ऋतीषहं। हिंसकानामभिभवितारं। हे इंद्र शविष्ठ अ
तिशयेन बलवान् हे सत्पते सतां पालक त्वामिति समन्वयः॥ ७॥ अथ द्वितीया॥ तुविशु
ष्म तुविक्रतो शचीवो विश्वया मते। आपप्राथ महित्वनेति॥ हे तुविशुष्म प्रभूतबल अत एव
तुविक्रतो बहुविचित्रकर्मवित्। अथवा उबहुप्रज्ञा। कर्मणः पृथग्विधानात्। हे शचीवः बहु
कर्मपितनपूजनीयेंद्र विश्वया मतेन महित्वना महत्वेन आपप्राप्य आपूरितवानसि। अ
विशेषाद्विश्वेभिः स्पर्धः॥ ७॥ अथ तृतीया॥ यस्यते महिना महः परि ज्मायंतमीय
तुः॥ हस्ता वज्रं हिरण्ययमिति॥ स हो महतो न यस्य ते तवा य छंदः प्रकृतपरामर्शि
प्रकृतं रूपमगृह्यं त त्र सतु विकूर्म्मिमिती बहुभिस्साधकलक्षणस्य तव महिनाम
हत्वेन हस्ता न वहस्तो ज्मायंतं पृथिव्यां सर्वतो व्याप्नुवत्तं हिरण्ययं हिरण्मयं वज्रं हस्ता
वीयतुः परिगृह्णीतः। सर्वदाऽस्माकं भयनिवारणायेति भावः॥ ७॥ ॥ आयः पुरमिति
त्वाष्ठकं पंचमं सूक्तं तत्र प्रथमा॥ आयः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो नार्वा।

© Dharmartha Trust J&K. Digitized by eGangotri

पूः सूरो न रुरुक्वां छतात्मेति ॥ यो अग्निर्नर्म्मिणीं नर्यवतां यजमानानां संबंधिनामुत्तरवेदिं ।
यद्वा पृणं मनसि स्थितां यजमानानां यज्ञार्थं भूमिं प्रसग्भागमन मनीषा विघते तत्पु
रं तस्थाने अतिरेत दीपयति । कीदृशो यं अत्रसः । अपेक्षितनरैर्यं प्रसवमशीला । कौ विः अ्कां
नद्दर्शी । तत्र दृष्टांतः । अर्वा अश्वरणकुशलो । नु भस्त्योभिभन नभस्याकाशे भवः नभस्वान् वा
युरिव । किंच ॥ शतात्मा । यजमानगृहापेक्षया आहवनीयगार्हपत्याद्यपेक्षया अपरिमितरू
पत्वं । अथवा मित्रवरुणादिरूपभेदेन अग्ने मित्रादिरूपत्वं त्वमग्ने वरुणो जायसे यदिति ।
192
हे अग्ने त्वं वरुणो जायसे वरुणो भवसि । यद्यस्माद्यद्रं मित्रं वरुणमग्निमाहुरित्यादिश्रुतिषु
प्रसिद्धं । अग्निमेवं द्वाघात्मकमाहुरिति द्वितीयमंत्रस्यार्थमाहुः । तादृशो यं सूरो न सूर्य इव ।
रुरुक्वान् दीप्यमानः । रुचदीप्तो । छंदस्सस्य लिटः क्वसुः । अतः । स्तादृशो ग्निरस्तु ॥ उक्तो विवर्त
त इति पूर्वेणान्वयः ॥ ७ ॥ अथ द्वितीया ॥ अभि द्विजन्मा त्री रोऽचनानि विश्वा रजांसि शुशुचानो
अस्थात्होता यजिष्ठो अपां सधस्थे इति ॥ अयमग्निर्द्विजन्मा द्वाभ्यामरणीभ्यां जायमा
नः । यद्वा मंथनात्प्रथमं जन्म उत्पत्समंतरं आधानपवमानेष्ट्यादि संस्काररूपं द्वितीयं जन्म
। एवं द्विजन्मत्वं । अथवा द्यावापृथिवीभ्यामुत्पन्नत्वात्तादृशो ग्निस्त्री रोचनात्रीणि रोचमानानि
क्षित्यादिस्थानानि गार्हपत्यादीनि वा अभि शुशुचानः प्रकाशयन् । न केवलं त्रीण्येव । किंतु विश्वार

© Dharmartha Trust J&K. Digitized by eGangotri

जोसिसर्वाण्येवचिरंजनात्मकानिसिस्याहिलोकान्सुमुखानोदीपयन्।होतादेवानामा
ह्वातायजिष्ठोयष्टृतमःसन्।अपांप्रोक्षण्याध्वरकानांसधस्थेसहस्थानेयागदेशे
अस्थात्तिष्ठति॥७॥अथत्रितीया॥अयंसहोतायोद्विजन्मानांसधस्थेसहस्था
नेयागदेशेअस्थात्तिष्ठति।अथत्रितीया॥अयंसहोतायोद्विजन्माविश्वादधेवा
र्याणिश्रवस्या।मर्त्तोयोअस्मैसुतुकोददाशेति॥योद्विजन्मासएवहोताहोमनिष्पादकः
आह्वातावादेवानां।अरणीभ्यांप्रसुसन्नस्सैवगार्हपत्यद्वाराआहवनीयत्वात्।सो
यंविश्वाविश्वानिवार्याणिवरणीयानिकर्माणिईडवंदरधेसदुहाण्यनइस्याधुरात्तत्वात्।श्र
वस्याश्रवस्यणस्यया।अवोन्नेहविर्लक्षणंयशोवानदिच्छया।श्रवःशब्दात्क्यजंतादिश्र
स्ययादितिभावेसप्रत्ययः।अन्नाययशसेवादधेधारयति॥अस्मैउक्तस्वरूपायाग्नये
योमर्त्योद्विद्व्याद्ददातिससुतुकःशोभनपुत्रोभवति॥७॥ ॥अथअग्नेतमद्याश्वमितित्र
चात्मकंषष्ठंसूक्तंतत्रप्रथमा॥अग्नेतमद्याश्वन्नस्तोमैःक्रतुंनभद्रंहृदिस्पृशं।ऋध्यामात
उहेरिति॥हेअग्नेअद्यास्मिन्नहनिवयमृत्विगादयस्तुहेरिंद्रादिप्रापकैरस्माकंस्तोमैस्त्वा
समूहेस्तंप्रसिद्धंत्वांऋध्यानसमर्धयामः।कीदृशंत्वां।अश्वंनवोनवोढारमश्वमिव।तथाहवि
षोवाहकं।क्रतुंनकर्त्तारमिव।उपकारिणमित्यर्थः।तथाभद्रंभजनीयं।हृदिस्पृशंहृदयंगमं

© Dharmartha Trust J&K. Digitized by eGangotri

अतिशयेनप्रियमसिसर्पः॥७॥ ॥अथद्वितीया॥ अथाह्यग्नेक्रतोर्भद्रस्यदक्षस्यसाधोधा
रारथीर्ऋतस्यबृहतोबभूथेति। अधाहिइदानीमेवहेअग्नेत्वंक्रतोरस्मदीययागस्यस्थी
193 र्न्नेताबभूथभवसि छंदसि लुङ्लिटइतिभवतेर्वर्त्तमानार्थेलिट्।सिपस्थल्।आर्धधातु
कस्येड्वलादेरितीडागमप्राप्तेबभूथाततंथेतिनिपातनान्निड्भावः।कीदृशस्ययागस्यभ
द्रस्यभजनीयस्यदक्षस्यप्रवृद्धस्यसाधोरभीष्टफलानांसाधकस्यऋतस्यबृहतोमहतः॥
॥७॥ ॥अथतृतीया॥ एभिर्नोअर्कैर्भवानोअर्वाङ्स्वर्णज्योतिः।अग्नेविश्वेभिःसुमनाअ
नीकैरिति॥ हेअग्नेज्योतिर्ज्योतिष्मान्स्वर्णसूर्यइवतथाविश्वेभिर्विश्वैःसमस्तैरनीकैस्ते
जोभिःसुमनाःशोभनमनस्कस्त्वंनोअस्मदीयैरेभिरेतैरर्कैरर्चनीयैःस्तोत्रैरनेनाविधैर्हवि
र्लक्षणैरन्नैर्वाअथएवंप्रादिदैवैःसहनोस्माकंअर्वाङभिमुखोभवति॥७॥ ॥इतिविंशोऽध्या
येप्रथमःखंडः॥७॥ ॥अथद्वितीयखंडे अग्नेविवस्वदितिप्रगाथात्मकंप्रथमंसूक्तंतत्रप्र
थमा॥ अग्नेविवस्वदुषसश्चित्रंराधोअमर्त्य।आदाशुषेजातवेदोवहात्वमद्यादेवाँउषर्बुध
इति॥ हेअग्नेत्वंउषसःउषोदेवतायाःसकाशात्राधोधनंदाशुषेहविर्दत्तवतेयजमानाय
आवहआनीयप्रापय।सोऽग्निर्विशिष्यते।अमर्त्योमरणरहितःजातवेदःजातमाविदितः।त
मेतंशब्दंयास्कोव्याचष्टे।जातवेदाःकस्मात्जातानिवेदजातानिवैनंविदुर्जातेजाते

© Dharmartha Trust J&K. Digitized by eGangotri

विद्यत इति वा जातवित्तो जातधनो वा जातविद्यो वा जातप्रज्ञो वा यज्जातः पशून्विंदतेति त
ज्जातवेदसो जातवेदस्त्वमिति हि ब्राह्मणं तस्मात्सर्वानृतून्पशवोग्निमभिसर्पंतीति
ति चेति। चित्रं राधः। विवस्वत्। विशिष्टनिवासोपेतं। चित्रं नानाविधं। किंच। अद्यास्मिन्दि
ने उषर्बुधः उषःकाले प्रबुद्धान्देवानावह। विवासनं तद्धक्त विवस निवासो विपूर्वादंतर्भावित
ण्यर्थात्संपदादिलक्षणो भावे क्विप्। तदस्यास्तीति मतुप्। मादुपधायाः इति वत्वं। नसोमत्व
र्थः इति भत्वेन पदत्वाभावाद्रुत्वाभावः। वषाद्वित्वाद्याद्युदात्तत्वं। जातवेदः। जातानि वेत्तीति जा
तवेदाः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च वसमुन्। यद्वा वेद इति धननाम। जातं धनं
यस्य स तादृशः। आमंत्रितनिघातः। वह। द्व्यचोतस्तिङ इति संहितायां दीर्घत्वं। उषर्बुधः। उष
सि बुध्यंत इत्युषर्बुधः। बुध अवगमने क्विप् चेति क्विप्। रुत्वाभावः। छांदसः। कृदुत्तरपदप्रकृ
तिस्वरत्वं॥ १॥ अथ द्वितीया॥ जुष्टो हि दूतो असि हव्यवाहनोग्ने रथीरध्वराणां। सजूरश्वि
भ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत्॥ हे अग्ने त्वं जुष्टत्वादिविशेषगुणयुक्तो २
सि जुष्टो नित्यं मंत्र इत्याद्युदात्तत्वं। सेवित इत्यर्थः। असि। सिपि तास्यसोर्ल्लोपः इति सलोपः।
हि च इति निघातप्रतिषेधः। दूतः देवानां विशेषवार्ताहारः। अत एव हव्यवाहनः। हव्यं वहतीति
हव्यवाहनः। हव्येनंतः पादमिति स्युप्रत्ययोरनादेशः। लित्स्वरेणाद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्व
© Dharmartha Trust J&K. Digitized by eGangotri

रत्वं। हविषो वोढा। अध्वराणां क्रतूनां रथी। रथस्थानीयः। तथा च मंत्रांतरं ब्राह्मणं नैवं
व्याख्यातं। रथीरध्व॥ राणामित्याह। एष हि देवरथ इति। ब्राह्मणं तं स्वरथीरध्वराणामि-
त्याह रथो ह वा एष भूतो देवेभ्यो हव्यं वहतीति। तादृशस्त्वमग्निभिर्देवाभ्यां उषसा देवेन याव
सजूः सहितो भूत्वा सुवीर्यं शोभनवीर्योपेतं बृहत प्रभूतं श्रवोन्नं अस्मे धेहि अस्मासु प्र
क्षिपः॥४॥ ॥अथ विधुं दद्राणमिति तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ विधुं दद्राणं ऽस
मने बहूनां युवानं ऽ संतं पलितो जगार। देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः सम
194 नेति॥ अनया कालात्मक इंद्रः स्तूयते। विधुं विधारकं सर्वस्य युद्धादेः कर्तारं विपूर्वो दधातिः
करोत्यर्थे तथा समने। अननमनः प्राणनं सम्यगननानापेते संग्रामे बहूनां शत्रूणां दद्राणं
द्रावकं ईदृक्सामर्थ्योपेतं युवानं संतं पुरुषं पलितो जरया जगार निगिरति द्राक्ष्यया। एवमुक्त-
लक्षणं वक्ष्यमाणलक्षणं च देवस्य कालात्मकस्येंद्रस्य महित्वा महत्वेनोपेतं काव्यं सामर्थ्यं
पश्य पश्यत हे जनाः। तथा जरसा प्राप्तो ऽद्य ममार म्रियते स ह्यः परेद्युः समानः सम्यगनं चेष्टते पु-
नर्जन्मांतरे प्रादुर्भवतीत्यर्थः। नरदेवं चत्वारि नामानि शरीराण्येकत्वानि बद्धं च मंत्रेषु॥५॥ ॥
अथ द्वितीया॥ शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीडः। यच्चिकेत सत्-
यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दातेति॥ शाक्मना। शाकेभवश्शाक्मः शाक्मनां बलेन शाकः

© Dharmartha Trust J&K. Digitized by eGangotri

शक्तः स्वयमेवैव सर्वं कर्तुं शक्त इत्यर्थः। नहीन्द्रस्य सहायांतरापेक्षास्तीत्युक्त्वा देवान्मरुतः
अरुणवर्णः। सुपर्णः कश्चित्। श्येनः पर्णः पत्नी। आगच्छतीत्यध्याहारः। उपसर्गश्रुतेः
योग्यक्रियाध्याहारः। यो महो महान् शूरो विक्रांतः सन्नासुराणां। अनीजनी इत्यस्याकर्त्तनि
हीं द्रोग्निवत्कुत्रचिदपि यज्ञे निकेतनं करोति। एवं सुपर्णरूपकाणां इमा हस्पर्शीक्षेय यत्रि
केतकर्त्तव्यत्वेन जानाति तन्न सत्समिन्नपत्समेवनतुमोघं व्यर्थं भवति। सस्याहं स्पृहणीयं व
सुधनं जेता जयति शत्रुभ्यः सकाशात्। उत अपि च दाता स्तोतृभ्यः प्रयच्छति न लोका मयेत्या
दिना षष्ठी प्रतिषेधः॥६॥ अथ तृतीया॥ एभिर्द्धिस्व वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय व
ज्री। ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायंत देवा इति। इंद्र एभिर्नृभिः सह वृष्ण्या
नि पौंस्यानि बलान्यादस्व आदत्स्व। येभिर्नृभिः सहितो वृत्रहत्याय प्राणापकारकवृत्रस्या
वरकत्वाद्वृत्रः पापं तस्य हत्याय मनुष्याणामुपद्रवशमनायेत्यर्थः॥ तथा च वज्रा वज्रा घा
निं इज्जनसद्दर्षिति। येन च मरुतो देवाः मह्ना महत्ताऽनेन क्रियमाणस्य वर्षप्रदानलक्षणस्य
कर्मणस्साहाय्यार्थं ऋते कर्मं क्षितकर्म वर्षप्रदानकर्म प्रति उदजायंत उन्मुखा जायंते। स्व
यमेव तैरेभिर्वर्धस्वेति समन्वयः॥७॥ ॥ अथास्ति सोम इति त्रिचात्मकं तृतीयं सूक्तं तत्र प्रथमा
॥ अस्ति सोमो अयं सुतः पिबंत्यस्य मरुतः उत स्वराजो अश्विनेति। अयं पुरोवर्त्ती सोमः सु

© Dharmartha Trust J&K. Digitized by eGangotri

195

तोमरुद्भिरस्माभिरभिषुतः अस्ति विद्यते तस्मात् स्थानाद्देशो एनं सुतं सोमं स्वराजः स्वयं दी
प्यमानाः स्वतेजसा नान्यदीयेनेत्यर्थः । तादृशा मरुतः पिबंति । उतापि । अश्विना अश्विनौ वसो
मं पिबतः ॥ ७ ॥ अथ द्वितीया ॥ पिबंति मित्रो अर्यमा तना पूतस्य वरुणः ॥ त्रिषधस्थस्य जा
वत इति ॥ न केवलं मरुत एव सोमपातारः किंतु एते पि इत्याह । मित्रः सर्वेषां स्वस्वकर्मणि प्र
वर्त्तकत्वात् सखिभूतः । यद्वा यज्ञसंबंधिनः प्रमीतेस्त्राता एतन्नामको देवः । अर्यमा च वरुणः
दुःखादीनां शत्रूणां वा वरिता निवारकः । एतन्नामकास्त्रयो देवाः तना तनं सर्व्वीस्त्वकेतेति तनं
दशापवित्रं सुपां सुलुगिति तृतीयायाः आकारादेशः । तेनाध्वरात्तः । तना पूतस्य परिशोधित
त्रिषधस्थस्य सह तिष्ठंत्यत्रेति सधस्थं स्थानं । सधमादस्थयोः छंदसीति सहशब्दस्य सधा
देशः । इति द्रोणकलशाधवनीयपूतभृदात्मकानि त्रीणि स्थानानि यस्य तत्तथोक्तं तादृशं जी
वतः स्तुसाजनवंतमिमं सोमं पिबंतीति द्वितीयार्थे षष्ठी ॥ अथ तृतीया ॥ ७ ॥ उतो न्वस्य जोषमाँ इंद्रः
सुतस्य गोमतः । प्रातर्होतेव मत्सतीति ॥ उतो पि चेंद्रः सुतस्यास्माभिरभिषुतस्य गोमतो गव्यैर्मि
श्रणवतः अस्यात्वादेशाः पूर्ववद्दशापवित्रे पूतस्य सोमस्य जोषं तेपानरूपां सेवां प्रातःसवने
नु क्षिप्रमामत्सति मदिक्षुस्साहिष्णु अस्माभिसुखेन स्तौति । यद्वा सोमसेवां कामयते । तत्र दृष्टांतः
। होतेव यथा होता प्रातःसवने देवानभिष्टौति देवान् स्तोतुं वा अभिवांछति तद्वत् ॥ ७ ॥ ॥ अथ बण्महां

१९५

© Dharmartha Trust J&K. Digitized by eGangotri

असीति प्रगाथात्मकं चतुर्थं सूक्तं तत्र प्रथमा ॥ बण्महां असि सूर्य बडादित्य महां असि ॥ मह
स्ते सतो महिमा पनिष्टम मन्हा देव महां असीति ॥ हे सूर्य त्वं महान् तेजसाधिकोसि ॥ बट् सत्यं नै
तन्मिथ्येत्यर्थः ॥ हे आदित्य आदितेः पुत्र त्वं महान् बलेनाप्यधिकोसि ॥ बट् सत्यमेव ॥ हे पनिष्टम अ
तिशयेन स्तोतृभिः स्तुत यद्वा अतिशयेन व्यवहारकुशल महो महतः सतो भवतस्ते तव महिमा
स्तोतृभिः स्तूयत इति शेषः ॥ अनिष्टम स्तोतृभिरस्माभिः स्तूयत इति वा ॥ हे देव द्योतनादिगुण
युक्त त्वं मन्हा महत्वेन महान् सर्वैः पूजनीयोसि भवति ॥ ७ ॥ अथ द्वितीया ॥ बट् सूर्य श्रवसा
महां असि सत्रा देव महां असि ॥ मन्हा देवानामसुर्य पुरोहितो विभु ज्योतिरदाभ्यमिति ॥ हे सूर्य त्वं
श्रवसा श्रवणेन महान् सर्वाधिकोसि ॥ यद्वा श्रवसान्नेन महान् दातासि ॥ स्तोतृभ्यो ददासीत्यर्थः ॥
बट् सत्यं हे देव द्योतमान सूर्य त्वं देवानां मध्ये मन्हा महत्वेन महानधिकोसि ॥ सत्रा सत्यमेव ॥ असु
र्यः असुराणां हन्तासि ॥ किंच देवानां कामयमानानां स्तोतॄणां वा पुरोहितोसि हितोपदेष्टासि
बहुहितकार्यसि च ॥ अथवा पुरोहितः पुरतो निहितोसि ॥ किंच तव ज्योतिस्तेजो विभु व्याप्तं सर्वतः
अदाभ्यं केनाप्यहिंस्यं च ॥ ७ ॥ ॥ इति विंशोध्याये द्वितीयः खंडः ॥ ७ ॥ ॥ अथ तृतीयखंडे उपनो ह
रिभिरिति त्र्यृचात्मकं प्रथमं सूक्तं तत्र प्रथमा ॥ उप नो हरिभिः सुतं याहि मदानां पते उप नो हरिभिः
सुतमिति ॥ हे मदानां पते मद्यंतेनेनेति मदाः सोमाः ॥ मदो उपसर्ग इति करणे अप्प्रत्ययः ॥ सोमा

© Dharmartha Trust J&K. Digitized by eGangotri

नांस्वामिनिंद्रः हरिभिरा। श्रितेन हरिभिरित्यादिषु बहूनामश्वानां श्रुतेरत्रापि शतसहस्रसंख्या
कैरश्वैः सह नोस्माकं यज्ञे सुतमभिषुतं सोमं सुपयो हितसानार्थं शीघ्रमागच्छ। पुनरुपनइत्या
दिराद्यर्था॥७॥ अथ द्वितीया॥ द्वितायोवृत्रहंतमो विद इंद्रः शतक्रतुः। उपनोहरिभिःसुत
मिति॥ वृत्रहंतमोऽतिशयेन वृत्रस्य हंता। शतक्रतुर्नानाविधकर्मा य इंद्रः द्विधाता द्विधा विदे॥
वृत्रवधादेरुग्रकर्म्मा जगद्रक्षणकाले शांतकर्मेति द्विप्रकारेण विदे सर्वैर्ज्ञायते। विदेर्ज्ञानेक
र्मणि विहितस्य प्रत्ययस्य लोपस्त्वात्मनेपदेष्विति तलोपः। सत्वं हरिभिः सह सुतं सोममुप
याहि॥७॥ अथ तृतीया॥ त्वं हि वृत्रहन्नेषां पाता सोमानामसि। उपनो हरिभिः सुतमिति॥ हे
वृत्रहन् वृत्रस्य पापस्य वा हंतरिंद्र हि यस्माद्धे हेत्वर्थे यस्मात्त्वं एषामस्मदीयानां सोमानां पाता पा
नकर्त्तासि भवसि। एषामिति इदमोन्वादेशे अशादेशः। अनुदात्तश्च। अतस्त्वमश्वैः सह सोमं
पातुमुपयाहि आगच्छ॥७॥ ॥अथ प्रवो मह इति तृचात्मकं द्वितीयं सूक्तं तत्र प्रथमा॥ प्रवो
महे महेवृधे भरध्वं प्रचेतसे प्रसुमतिं कृणुध्वं। विशः पूर्वीः प्रचर चर्षणिप्रा इति॥ हे मदीया जना
वो युयं महि वृधे महतां धनानां वर्द्धयित्रे अत एव महे महत इंद्राय प्रभरध्वं सोमास्रणायत। प्र
चेतसे प्रकृष्टमतये इंद्राय सुमतिं सुष्ठु मननीयं स्तोत्रं च प्रकृणुध्वं प्रकुरुत। अथ प्रत्यक्षस्तुतिः
। हे इंद्र चर्षणिप्राः चर्षणयो मनुष्याः कामैः प्रजानां पूरयिता त्वं पूर्वीर्हविर्भिः पूरयित्रीर्विशः प्रजाः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रचराभिग७॥ ७॥ अथ द्वितीया॥ उरुव्यचसे महिने सुवृक्तिमिमिंद्राय ब्रह्म जनयंत विप्राः।
तस्य व्रतानि न मिनंति धीरा इति॥ उरुव्यचसे पृथुव्याप्तये महिने महते यस्मा इंद्राय सुवृक्तिं शो
भनां स्तुतिं ब्रह्मान्नं ह विश्वे विप्राः प्राज्ञा जनयंत जनयंति। तस्येंद्रस्य व्रतानि दाक्षिण्यादीनि क
र्माणि धीराः प्राज्ञा देवा अपि न मिनंति न हिंसंति॥ ७॥ अथ तृतीया॥ इंद्रं वाणीरनुत्तमम
न्युमेव सत्रा राजानं दधिरे सहध्यै। हर्यश्वाय बर्हया समापीनिति॥ सत्रा राजानं सर्वस्य ज
ननमीश्वरं अनुत्तमन्युं केनाप्यनुत्तो मन्युः क्रोधो यस्य स तमेवेंद्रं वाणीः स्तुतयः सहध्यै
स्तोतृणां शत्रून् अभिभवितुं दधिरे पुरो दधिरे। अतो हे स्तोतस्त्वमपि हर्यश्वायेंद्राय हर्यश्व
मिंद्रं स्तोतुमिस्पर्धः। आपीन्बंधून्संबर्हय प्रवर्द्धय॥ ७॥ ॥ अथ यदिं॥ इति प्रगाथात्मकं तृ
तीयं सूक्तं तत्र प्रथमा॥ यदिंद्र यावतस्त्वमेतावदहमीशीय। स्तोतारमिद्दिधिषेय रदावसो न
पापत्वाय रंसिषमिति॥ हे इंद्र यावतो धनस्येशिषे एतावत्षेष्मा अनुकू। एतावतो धन
स्याहमीशीय ईश्वरो स्सर्वेयं हे रदद्वसो रदतिर्ददातिर्वसूनि तिरद्वसुः। ततो हमस्मदीयस्तो
तारमिद्दधिषे धनप्रधानेन धारयेयमेव किंच। पापत्वाय क्षीणत्वाय न रंसिषं न ददां॥ ७॥
अथ द्वितीया॥ शिक्षेयमस्मिन्महयते दिवे दिवे राय आ कुहचिद्विदे॥ कुहचिद्विदे कुत्र
चिद्विद्यमानः कुहचिद्विद्यमानः कुहचिद्विन्नस्मै यत्र क्वापि विद्यमानायेत्यर्थः। महयते पूजय

© Dharmartha Trust J&K. Digitized by eGangotri

ते जनाय दिवेदिवे प्रतिदिनं रायो धनानि शिक्षेयमिदं दयामेव आकारः पूरणः रे एवमिंद्रस्य वा
क्यं श्रुत्वा ऋषिर्वदति॥ हे मघवन् धनवन्निंद्र त्वत्तो अन्यत् अस्माकमाप्यं ज्ञायते यन्नह्य
स्ति वस्यः प्रशस्यः पिता च यन पालयिता च त्वदन्यो नास्तीत्यर्थः॥ ७॥ ॥ अथ श्रुधी
हवमिति तृचात्मकं चतुर्थं सूक्तं तत्र प्रथमा॥ ७॥ श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्र
स्यार्चतो मनीषां। कृष्वा दुवांस्यंतमा सयोमनि॥ हे इंद्र पिपानस्य विपीतवतो विपिबतो
वा मम आद्रे ग्राव्णो हवमाह्वानं श्रुधि श्रुणु॥ ग्रावभ्यो वोचं वदनाय वदद्भ्य इति निगमांतरं वि
197 प्रस्य प्राज्ञस्य वशिष्ठस्य अर्चतस्तुवतो मनीषां स्तुतिं। बोध बुध्यस्व च। इमा इमानि कृष्यमा
णानि दुवांसि परिचरणान्यंतमांतिकतमानि बुद्धिस्थानि सचा सहायभूतः सन् त्वा कृष्व
कुरुष्व॥ ७॥ अथ द्वितीया॥ न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान्। सदा
ते नाम स्वयशो विवक्मीति॥ हे इंद्र तुरस्य शत्रूणां हिंसकस्य ते तव गिरः स्तुतीरसुर्यस्य द्विती
यार्थे षष्ठी। त्वदीयमसुर्यं बलं विद्वान् जानन् अहं नापि मृष्ये। मृषिमर्जिनकर्मा। न मार्जया
मि न परेभ्य संजामीत्यर्थः। सुष्टुतिं शोभनां स्तुतिं च नापि मृष्ये मृषेमर्जिनकर्मत्वमन्यत्रापि दृ
श्यते तद्यथा। मनो अग्ने सहस्वा पि मर्माणि मम मर्षिष्टा इति किंतु हे स्वयशः असाधारणयश
स्क तव नाम स्तोत्रं सदैव विवक्मि ब्रवीमि॥ ७॥ अथ तृतीया॥ भूरि हि ते सवना मानुषेषु भूरिम

© Dharmartha Trust J&K. Digitized by eGangotri

नाषाह्वते त्वामित्। मारे अस्मन्मघवञ्ज्योक्कर् इति॥ हे मघवन्निन्द्र ते तव सवना सवनानि सोमा
भिषवणानि भूरि भूरीणि मानुषेष्वस्मासु वर्तन्त इति शेषः। मनीषी स्तोता त्वामित् त्वामे
व त्वामेव भूरि ह्वयते नितरां स्तौति स्तूयति वा अतोऽस्मत् अस्मत्तः आरे दूरे ज्योक् चिरकालं मा
कः आत्मानं माकार्षीः। क्षिप्रमात्मानं अस्मदासन्नं कुर्विति शेषः॥ ७॥ ॥ इति विंशोऽध्याये
तृतीयः खंडः॥ ७॥ ॥ अथ चतुर्थखंडे प्रोष्वस्मा इति दशर्चात्मकं प्रथमं सूक्तं तत्र प्रथमा॥
प्रोष्वस्मै पुरोरथमिंद्राय शूषमर्चत। अभीके चिदु लोककृत्संगे समत्सु वृत्रहा। अस्मा
कं बोधि चोदिता नभंतामन्यकेषां ज्याका अधि धन्वसु इति॥ अस्मा इंद्राय षष्ठ्यर्थे चतुर्थी।
अस्येंद्रस्य पुरोरथं रथस्य पुरः पुरस्तात् पुरोऽध्ययमिति गतेर्वा ऽगतिसमासः। रथस्या
ग्रतो वर्तमानं शूषं बलं सु प्रो अर्चत हे स्तोतारः सुष्ठु प्रपूजयत प्रउ इति निपातसमुदायः
प्रो इति उदिते प्रगृह्य संज्ञा। इंद्रो विशेष्यते। समत्सु समानं माद्यंत्यत्रेति समदः संग्रामः॥
अण्णादिको अधिकरणे क्विप्। समानस्य छंदसीति सभावः। समत्सु संग्रामेषु संगे संगम
नीये शत्रुबलेऽन्यत्रापि दृश्यत इति गमेर्डः। अभीके चित्। अभ्यर्णेपि निकटे प्राप्तेपि के
शाके शब्दवस्थायामपि लोककृत् स्थितिकृत् जनपालयिता स्थित्वा च वृत्रहा वृत्राणामावरका
णां शत्रूणां हंता एवं विधः स इंद्रः अस्माकं स्तोतॄणां चोदिता धनानां प्रेरिता सन् बोधि अस्माभिः

© Dharmartha Trust J&K. Digitized by eGangotri

कृतानि परिवरणानि बुध्यतां ॥ बुधेश्छन्दसि लुङि दिपजनबुधेत्यादिना कर्त्तरि च्लेः चिणादेशः

बहुलं छन्दस्यमाङ्योगेपीत्यडभावः । अपि च अन्यकेषां कुत्सितानां अन्ये अन्यके अव्ययस

र्वनाम्नामिति कुत्सनार्थे प्राक् टेरकच् । तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति सर्वनामसंज्ञा

यां आमि सुडागमः । अन्यकेषां कुत्सितानामन्येषां शत्रूणां धन्वसु धनुःषु अधिरोपिता ज्या

काः कुत्सिता ज्याः नभंतां नश्यंतु ज्याशब्दात्कुत्सायां प्रागिवात्कः । कतर्हि सायांको ऽस्यादिकः

ह्रस्वयेशपू ॥७॥ अथ द्वितीया ॥ त्वं सिंधूंरवासृजो धराचो अहन्नहिं । अशत्रुरिंद्र जज्ञिषे

विश्वं पुष्यसि वार्य्यं तं त्वा परिष्वजामहे नभंतामन्यकेषां ज्याका अधि धन्वसु इति ॥ हे इंद्र त्वं

सिंधून्स्यंदनशीलान् जलपूरान् धराचः अधरमधोमुखं वतो गंतॄन् अवासृजः मेघान्नि

रगमयः यत् त्वमहिं अंतरिक्षं गच्छंतं मेघमहन् हतयानसि । यद्वा अहिमागसं हंतारं सर्वस्य

जगत आवरकं वृत्रमसुरमहन् हतवानसि । अतो हे इंद्र त्वं अशत्रुः शत्रुरहितो जज्ञिषे जाय

से । नसंति शत्रवो ऽस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । तादृशं त्वां परिष्वजामहे ।

हविर्भिः स्तुतिभिश्चालिंगनं कुर्मः । वशीकुर्म इत्यर्थः । ष्वंज परिष्वंगे । दंशसंजष्वंजां शपि इति

सनुनासिकालोपः । सिद्धमन्यत् ॥७॥ अथ तृतीया ॥ विषु विश्वा अरातयो र्यो नशंत नयो

धियः । अस्तासि शत्रवे वधं यो न इंद्र जिघांसति ॥ या ते रातिर्ददिर्वसु नभंतामन्यकेषां ज्याका ।

198

© Dharmartha Trust J&K. Digitized by eGangotri

अधिधन्वस्त्विति॥ विश्वाः सर्वा अरातयः प्रदायः अर्यो भिगंतारो नोस्माकं शत्रुभूताः प्रजाः सु
षुविनश्यंत विनश्यंतु। हे इंद्र त्वं धियः कर्माणि स्तुतयो वान्ववर्त्तत। हे इंद्र यो नोस्मान् जिघांस
ति हंतुमिच्छति हे इंद्र तेः सनुः अत्र नगमासत्तीति दीर्घः। अभ्यासाच्चेति कुत्वं तस्मै शत्रवे वधं
हननसाधनमायुधं अस्तासि क्षेप्तासि भवसि। असु क्षेपणे ताच्छीलिकस्तृन्। तेन त्वं वाराति
धनप्रदानहेतुर्हस्ती रात्रिदानेकरणे क्तिन्। मंत्रे वृषेषपचमन। विदभूवीराउदात्त इति क्तिन उदा
त्तत्वं सारातिः। वसुधनं दधः अस्मभ्यं दाता भवतु। आदृगमहनजन इति दधातेः किप्रत्ययः। नलो
काव्ययेति वसुशब्दात्षष्ठ्या अभावः सिद्धमन्यत्॥७॥ ॥अथ रेवां इद्रेवत इति त्र्यृचात्मकं द्वि
तीयं सूक्तं तत्र प्रथमा॥ रेवां इद्रेवतः स्तोता स्यात्त्वावतो मघोनः। प्रेदु हरिवः सुतस्येति॥ हे ह
रिवो हरिन् मतुवसोरिति नकारस्य रुत्वं हरिनामकाश्ववन्निंद्र रेवतो रयिमतः बहुधनोपेत
स्य तव स्तोता रेवान्स्यात् रयिमान् भवेत्। इच्छब्दोवधारणे। रयिमान् भवेदेव न तु दरिद्रं प्रा
प्नोति। उक्तमेवार्थं कैमुतिकन्यायेन द्रढयति। त्वावतस्त्वत्सदृशस्य युष्मदस्मद्भ्यां छंदसि सादृ
श्य उपसंख्यानमिति वतुप्। माघोनो मघवत्तो धनाढ्यस्य सुतस्य प्रभुसवैश्वर्ययोः स्तोतव्यस्य
ऐश्वर्योपेतस्य अन्यस्यापि स्तोता प्रेदु स्यादित्यनुषंगः प्रस्यात्प्रभवेदेव न तु नि दीयते किमु
वक्तव्यं तव स्तोता धनवान्भवेदेवेति॥८॥ अथ द्वितीया॥ उक्थं च न शस्यमानं नागोरयिरा चिकेत॥

© Dharmartha Trust J&K. Digitized by eGangotri

नगायत्रंगीयमानमिति।धातोरितिशेषः।गायतेर्गीः।अगोरस्तोतुःरयिः।अशिशानुरिंद्रः
शास्यमानंहोत्रापठ्यमानंउक्थंचनशस्त्रमपि।आचिकेतअभिजानाति।किंतत्।श्वानेछं
दसो।लिट्।नेतिसंप्रत्यर्थेनिसंप्रतिप्रस्तोत्राद्भिः।गीयमानंगायत्रंगातव्यंसामयत्सामगा
यत्राख्यमेपि।आचिकेतेस्येव।अतःकारणाद्यममपितमिंद्रंस्तुमइत्यर्थः॥७॥अथतृतीया
॥उमानइंद्रपीयत्नवेमाशर्द्धतेपराद॥शिक्षाशचीवःशचीभिरिति॥हेइंद्रत्वंपीयत्नवेपीय
तिबंधकर्मविधशीलायहिंसाकारिणेशत्रवेनोअस्मान्मापरादाःमापरित्याक्षीःमावश
र्द्धतेअभिभवित्रेअस्मान्मापरादाः।शृधुसहनइतिधातुः।अपितुहेशचीवःशक्तिम
न्निंद्रशचीभिरात्मीयैःकर्मभिःशिक्षास्मानुशाधियद्वाशिक्षतिर्दानकर्मा।अभीष्टंधन
मस्मभ्यंदेहि।यद्वाशत्रून्जेतुंशिक्ष।उक्तानकर्तुमिच्छ।शाकेःसंतंतस्यसनिमीमेतिइसा
शेअभ्यासलोपेचकृतेलोटिरूपमेतत्॥७॥ ॥अर्वाङेंद्रयाहिहरिभिरितिद्वचात्मकंतृतीयं
सूक्तंतत्रप्रथमा॥ऐंद्रयाहिहरिभिरूपकएवस्यसुष्टुतिं।दिवोअमुष्यशासतोदिवंययदिवा
वसोइति॥हेइंद्रकिं एवस्यसुष्टुतिंशोभनांस्तुतिंहरिभिरश्वैरुपायाहि।आगच्छ।दिवोद्युलोकं
द्वितीयार्थेषष्ठी।अमुष्यामुष्मिंन्निंद्रशासतःशासतिसतिविभक्तिव्यत्ययः।तत्रवयंसुख
मास्महे।हेदिवावसोदीप्तहविष्कान्निंद्रदिवंस्वर्गंपिपययूयंगच्छत।बहुवचनंपूजार्थं।यद्वाहेदिवाव

© Dharmartha Trust J&K. Digitized by eGangotri

सोदिवो यद्वा नामकं अमुष्यामुं लोकं शासतः शासनं कुर्वतो यूयं दिवं स्वर्गं यियय गच्छत ॥ ७ ॥
अथ द्वितीया ॥ अत्रा वि नेमिरेषां उरां न धूनुते वृकः । दिवो अमुष्य शासतो दिवं यय दिवा
वसो इति ॥ अत्रास्मिन्या । एएषामभिषवया क्रनेमिः सोमलतां विधूनुते विशेषेण कंपय
ति तत्र दृष्टांतः ॥ उरां मेषीं वृको न वृक इव यथा वृकः तद्वत् सिद्धमन्यत् ॥ ७ ॥ अथ तृतीया
॥ आ त्वा ग्रावा वदन्निह सोमी घोषेण यक्षतु । दिवो अमुष्य शासतो दिवं यय दिवावसो इति ॥
हे इंद्र त्वा त्वामिह यज्ञे ग्रावा सोमाभिषवपाषाणः सोमी सोमवान् वदन् शब्दं कुर्वन् घोषेण
ध्वनिना सह आ वक्षतु त्वां प्रापयतु ॥ ७ ॥ ॥ अथ पवस्व सोम मंदयन्निति त्र्यात्मकं द्वेपंच
तुर्थं सूक्तं तत्र प्रथमा ॥ पवस्व सोम मंदयन्निंद्राय मधुमत्तम इति ॥ हे सोम मधुमत्तमोऽतिश
येन मधुररसान् त्वं मंदयन् मादयिता भवन् इंद्राय यष्टया ग्रहणं कर्तव्यमिति इंद्रस्य संप्र
दानसंज्ञा इंद्रं सोमपानः सन् पवस्व इंद्रार्थमागच्छ ॥ ७ ॥ अथ द्वितीया ॥ ते सुतासो विपश्चि
तः शुक्रा वायुमसृक्षतेति ॥ विपश्चितो मेधाविनः सुतासो अभिषुताः शुक्राः शुक्लवर्णाः अ
भिषवक्षणे निर्मलत्वाद्दीप्यमाना इत्यर्थः । एते सोमा वायुं उद्दिश्य मसृक्षत असृजन् अभिका
लैः । यद्वा वायुमेव सोमपानार्थमसृजत सोमेषु सुतेषु सत्सु वायुस्तत्पानार्थमागच्छति खलु
॥ ७ ॥ अथ तृतीया ॥ असृग्रन् देववीतये वाजयंतो रथा इवेति ॥ एते अभिषुताः सोमाः वाजयंतो य

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ मानानामन्नमिच्छंतः संतः देववीतये देवानां पानाय अस्मदग्नेन् विसृजंते ऋत्विग्भिः प्रदी
यंते। तत्र दृष्टांतः। रथा इव वाजयंतः शत्रुधनानि बलानि वा स्वामिनं इच्छंतो रथा देववीतये
देवानां गमनाय यथा विसृज्यंते तद्वत्॥७॥ ॥इति विंशोऽध्यायस्य चतुर्थः खंडः॥ अथ पंचम
खंडे अग्निं होतारमिति त्र्यृचात्मकं प्रथमं सूक्तं तत्र प्रथमा॥ अग्निं होतारं मन्ये दास्वंतं वसोः सू
नुं सहसो जातवेदसं। यज ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा। घृतस्य विभ्राष्टिमनु शुक्रशोचि
ष आजुह्वानस्य सर्पिष इति॥ अग्निं सर्वासां देवसेनानामग्रण्यं पक्षेऽस्य प्रणीयमानं वा हो
तारमस्य यागं प्रति देवानामाह्वातारं। यद्वा होमनिष्पादकं होतारं ह्वातारं जुहोतेर्होते
त्यौर्णवाभ इति यास्कः अग्निमद्य होतारमवृणीतेति श्रुतेः। अग्निमग्न आवहेति वा अ
ग्नेराह्वातृत्वं प्रसिद्धं। अग्निं होतारं मन्ये एवं प्रति विशेषणं मन्यत इति संबंधः॥ यद्वा यागः
निष्पत्तेरेवापेक्षितत्वात्। एतदेव विधेय विधेयविशेषणं। इतराणि वक्ष्यमाणविशेषणानि
स्तुतिरूपाणि। दास्वंतं अतिशयेन दानवंतं। वसुं सर्वेषां निवासहेतुं सहसः सूनुं बलस्य पुत्रं अ
ग्निमंथनकाले बलेन मथ्यमान उत्पद्यत इति पुत्रत्वमुपचर्यते। जातवेदसं जातानां वेदितारं। जात
प्रज्ञं जातधनं वा जातवेदः शब्दो यास्केन बहुधा निरुक्तः। अग्ने जातवेदस्त्वं दृष्टांतः। विप्रं न जा
तवेदसं जातविद्यं मेधाविनं ब्राह्मणमिव स्तुतं यथा बहु मन्यते तथा त्वामपि स्तो[illegible]र्थः। उक्त गु

© Dharmartha Trust J&K. Digitized by eGangotri

ण विशिष्टो यो देवः स्वध्वरः शोभनयज्ञवान् यज्ञं सम्यग्निर्वहन् ऊर्द्ध्वया उन्नतया कृ
पया देवाच्या देवान् पूजयंत्या देवान् प्रत्यक्तया वा कृपा कृपया सामर्थ्यलक्षणया देवान्
प्रत्यक्तया कृपयेति यास्कः। तेभ्यो हविर्वहनबुध्या युक्तः सन् शुक्रे शोचिषा दीप्ततेजस्क
स्य स्वात्मनस्तेजसा आसमंतात् हूयमानस्य सर्पिषः सरणशीलस्य घृतस्य विलापनेन दी
प्तस्याज्यस्य विभ्राष्टिं विशेषेण भ्राजमानमनु स्वयमपि तदाज्यं शोचिषा दाहज्वालया
। करो वष्टि कामयते स्वीकरोतीति शेषः॥१॥ अथ द्वितीया॥ यजिष्ठं त्वा यजमाना हुवेम ज्ये
ष्ठमंगिरसां विप्र मन्मभिः विप्रेभिः शुक्र मन्मभिः परिज्मानमिव द्यां होतारं चर्षणीनां शो
चिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विश इति॥ हे विप्र मेधाविन् शुक्र दीप्तज्वाला
ग्ने यजिष्ठं अतिशयेन यष्टृतमं त्वां त्वां यजमाना वयं हुवेम आह्वयाम। यतो वयं यजमा
नाः यतस्त्वं यजिष्ठः अतो हुवेमेत्यभिप्रायः। कीदृशं त्वां अंगिरसां अंगिरोगणा। सौम्यन्ना
नां मध्ये ज्येष्ठं अतिशयेन प्रशस्यं यद्वा अंगिरसां अंगाराणां मध्ये ज्येष्ठं ज्वालायुक्तत्वादं ना
गिराः अंगारा इति यास्कः। ये अंगारा आसंस्तेंगिरसोभवन्निति श्रुतेः। केन साधनेनेति उच्य
ते। मन्मभिर्मननसाधनैर्विप्रेभिर्विशेषेण प्रीणयितृभिः स्तवभिर्मंत्रैः यद्वा विप्रेभिः मे दै
धाविभिः ऋत्विग्भिर्मन्मभिर्मंत्रैश्च सहिता वयमिति संबंधः। त्वामाह्वानानंतरं परिज्मानं

© Dharmartha Trust J&K. Digitized by eGangotri

परितो गच्छंतं घर्मिव सूर्यमिव वहोतारं देवानामाह्वातारं केष्वामर्त्यैर्वर्षणीनां मनुष्याणां य
जमानानामर्थे यष्ठ्वा च र्षणीनां मनुष्याणां पूर्वं पश्चाद्वा गादि साधनेन देवत्वमापन्नानां
देवानामाह्वातारं यथा दशो विष्णुशंकेशवदसंता यत्नस्यालोपेतं त्वषणं कामानां वर्षितारं॥
एवं रूपं त्वां विशस्त्वामेव निविशमानाः प्राक्षाभूतये स्वग्नीघभिमतफलप्राप्तये प्रावं तु प्रक्ष
र्षेण प्रीणयंतु। तादृशं त्वाहुवेमेति संबंधः॥ ७०॥ अथतृतीया॥ सहि पुरु चिदोजसा विरु
क्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरं निः
सहमाणो यमते नायते धन्वासहा नायते इति॥ स हि स एव पूर्वं स्तुत एवाग्निर्विरुक्मता वि
शेषेण रोचनवता तुजसा स्वस्वेन रूपेण बलेन पुरु चित् अत्यधिकमेव दीद्यानः दीप्यमानः
द्रुहंतरः। प्राग्भूणां तरिता निस्तारयिता भवति। अस्मासु द्रोहं कुर्वतां शत्रूणां हिंसको भव
तीत्यर्थः॥ तत्र दृष्टांतः। द्रोग्धृणां छेत्ता परशुयुक्तः परशुना परशुरिव हिनस्ति। तथा यस्य किम
पि किंच यस्याग्नेः समृतौ संगतौ संयोगे वीळु चित् दृढमपि पाषाणादिकं श्रुवत् क्षरति शीर्यते।
तथा यत्स्थिरं यच्च पर्वतादि स्थिरमविचलितं तदपि स्रुवत्। तत्र दृष्टांतः। वनेव वृक्षमिवउदकं
यथाग्निसंयोगे शुष्यति तथेत्यर्थः। अयं तदृढं स्थिरमपि स्रुवत्। तत्र दृष्टांतः। वनेव उदकमि
व उदकं यथाग्निसंयोगे शुष्यति तथेत्यर्थः। अयं तदृढं स्थिरमपि हिनस्ति। अस्मद्रोग्धारं स

© Dharmartha Trust J&K. Digitized by eGangotri

त्रुं हि न स्तीति किमु वक्तव्यमित्यभिप्रायः। किंचायमग्निः निःषहमाणः शत्रून् निःशे
षेणाभिभवयमेत उपरमते शत्रुषु मध्ये क्रीडन्नितानेव नाशयन्निति यावत् कुर्वन्नायते नग
७ ति। शत्रोः सकाशान्न पलायते। तत्र दृष्टांतः। धन्वसहान् धनुषा शत्रून् अभिभवतीति
धन्वसहः धानुष्कः सहतेरसुन्। छंदसो ऽसुलोपः। स यथा शत्रोरभिमुखं विध्यति न प
लायते। यद्वा दृढधनुर्द्वहिनस्तमो धन्वसहः। अस्मिन्पक्षे पचाद्यच्। सुपां सुलुगित्या
कारः। दृढधन्वा सन्नायजेन चलतीति॥७॥ ॥अथाग्ने इति त्स्वासकं द्वितीयं सूक्तं तत्र प्र
थमा॥ अग्ने तव श्रवो वयो महि भ्राजंते अर्चयो विभावसो। बृहद्भानो शवसा वाजमुक्थ्यं
दधासि दाशुषे कव इति। हे अग्ने तव वयो ऽन्नं श्रवः श्रवणीयं प्रशस्यं। हविर्लक्षणस्य त
स्य मंत्रसंस्कृतत्वेन प्रशस्तत्वात् अन्नेषु मध्ये तवैवान्नं श्रेष्ठमित्यर्थः। हे विभावसो विशि
ष्टदीप्ति। विभा वसे वव वसु धनं यस्य तादृशाग्ने अर्चयो दीप्तयः महि महत् बहुलं भ्राजंते
दीप्यंते भ्राजृ दीप्तौ अनुदात्तेत् आदादिकः। हे बृहद्भानो प्रौढदीप्तिमर्क्के कवे क्रांतदर्शिन्नग्ने एवं म
हानु सा वस्त्वं शवसा बलेनोपेतं उक्थ्यं प्रशस्यं यद्वा उक्थाय शस्त्राय योग्यं वाजमन्नं दाशुषे
हवींषि दत्तवते यजमानाय दधासि प्रयच्छसि॥१॥ अथ द्वितीया॥ पावकवर्चाः शुक्रव
र्चा अनूनवर्चा उदियर्षि भानुना। पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे इति॥

© Dharmartha Trust J&K. Digitized by eGangotri

२०२

पावकवर्णाः शोधकदीप्तिः शुक्रवर्णाः निर्म्मलतेजस्काः अनूनवर्णाः संपूर्णतेजस्काः हे अ
ग्ने इद्दिशास्त्वं भानुना तेजसा तुरियर्षि उरुच्छसि स्क्रस्तगतो जो होसादिकं । अत्तेपि पर्सी
श्वेति अभ्यासस्येत्वं सत्वं पुत्रः सन् मातरा मातृभूते अरण्यौ विचरन् योगावसाने
विशेषणं प्राप्नुवन् अपावसि । उपगतान्यजमानान्रक्षसि । तथा उभे रोदसी द्यावापृ
थिव्यौ पृणक्षि संयोजयसि हविषा द्युलोकं वृष्ट्या इमं लोकं च पूरयसी त्यर्थः । पृथ्वी संप
द्भूरिशो धादिकः ॥७॥ अथ तृतीया ॥ ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभि
र्हितः । त्वे इषः संदधुर्भूरिवर्पसश्चित्रोतयो वामजाता इति । हे ऊर्जो नपात् अन्नस्य
पार्थिवस्य अरण्यादेः पुत्र हे जातवेदः जातानां वेदितरग्ने सुशस्तिभिः सुशंसनैः अ
स्माभिः क्रियमाणैः मन्दस्व मोदस्व । तथा धीतिभिरस्माभिः क्रियमाणैरग्निहोत्रादिभिः क
र्म्मभिर्हितः सुहितः तृप्तो भव । अपि च भूरिवर्पसः वर्प्प इति रूपनाम बहुविधरूपाः चित्रो
तयः चित्रविचित्राभूतिः स्तुतिर्याभिः इति क्रिस्तास्तथोक्ताः वामजाताः वामं वननीयं जा
तं जन्म यासां ताः इदृशीरिषोन्नानि हविर्लक्षणानि त्वे त्वय्येव संदधुः संदधति सम्यक् कु
र्वन्ति यजमानाः यद्वा भूरिवर्प्पस इत्यादिकं कर्तृविशेषणं तदानीं चित्रोतयः रक्षस्य विचि
त्ररक्षा इति योज्यं ॥७॥ अथ चतुर्थी ॥ इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ॥ स

© Dharmartha Trust J&K. Digitized by eGangotri

दर्शतस्य वपुषो विराजसि पृणक्षि दर्शतं क्रतुमिति ॥ हे अग्ने जंतुभिर्जातैः शत्रुभिः सह द्वंद्व
मनुष्येभ्यः स्पर्द्धां कुर्वन् ईरज ईश्वरः व्याप्यां कं वादिः। यद्वा ईरज्यतिरैश्वर्यकर्मा। जंतुभिर्जा
यमानैरासीयैस्तेजोभिः ईरज्यन् ईश्वरो भवन् हे अमर्त्य मरणरहिताग्ने अस्मे अस्मा
कं सुपां सुलुगिति षष्ठ्याः शे आदेशः। रायो धनानि प्रथयस्व विस्तारय। यारे शब्दश्छांदसः।
स्थाने व्यस्य येन जसा शास्ववव्यत्ययेन जेंऽदिरमिति विभक्तव्यत्ययः। त्वं न क्रियते स त्वं दर्शत
स्य दर्शनीयस्य वपुषस्तेजोमयस्य शरीरस्य विराजसि। तृतीयार्थे षष्ठी। ईदृशेन शरीरेण
विशेषेण दीप्यासे। यद्वा राजतिरैश्वर्यकर्मा। वपुरिति रूपनाम। दर्शनीयेन रूपेण विरा
जसि विशेषेण ईशिषे। अत एव दर्शतं दर्शनीयं क्रतुं कर्म पृणक्षि अस्माभिः संपर्चयसि
फलेन वा संयोजयसि ॥ ४ ॥ अथ पंचमी ॥ इष्कर्तारमध्वरस्य प्रचेतसं क्षयंतं राधसो म
हः। रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिमिति ॥ इष्कर्तारं निष्कर्तारं छांदसो
वर्णलोपः। अध्वरस्य यज्ञस्य निष्कर्तारं संस्कर्तारं प्रचेतसं प्रकृष्टज्ञानं महानमहतो राधसो ध
नस्य क्षयंतं ईश्वरं। क्षयतिरैश्वर्यकर्मा। वामस्य वननीयस्य धनस्य रातिं दातारं। रातेः कर्त्तरि
क्तिच्। ईदृशं त्वां सुभगामिति विशेषः। स त्वं सुभगां सौभाग्योपेतां महीं महतीमिषमन्नं सानसिं सं
भक्तव्यं रयिं धनं च दधासि स्तोतृभ्यो ददासि ॥ ५ ॥ अथ षष्ठी ॥ ऋतावानं महिषं विश्वदर्श

© Dharmartha Trust J&K. Digitized by eGangotri

नमग्निंसुम्नायदधिरेपुरोजनाः। अर्कैर्यंसुप्रथस्तमंत्वागिरादैव्यंमानुषायुगेति॥ ऋत्वानं
सस्वंतंयशस्वंतंवा छंदसीवनिपावितिमत्वर्थीयोवनिप्। महिषंमहांतंपूज्यंवाविश्वदर्शतंवि
श्वैः सर्वैर्दर्शनीयंयद्वा विश्वंदर्शनीयंयस्यबहुव्रीहौ विश्वंसंज्ञायामितिपूर्वपदांतोदात्तत्वं ईदृश
मग्निंसुम्नायसुखार्थंजनाऋत्विग्यजमानरूपाः पुरोदधिरेपुरोदधतेसर्वकर्मभ्यः पुरस्ता
द्धारयंति। यद्वापुरः पुरस्तात्पूर्वस्यांदिशि आहवनीयरूपेणधारयंति। परोऽर्द्धर्चः। अस्यार्क
तः। अपिवा हे अग्नेअर्कैः स्तुतः स्तुती। सम्यक्कृप्रएवन्कल्पैः श्रोत्रैः द्वियंयस्यतादृशंसु
प्रथस्तमं अतिशयेनप्रख्यातंयद्वासर्वतोविस्तार्यमाणंदैव्यंदेवानांहविर्वोढृत्वेनसंबंधिनं
ईदृशंत्वात्वं। मानुषामानुषाणिमनोरपत्यानियुगायुगानियुगलानिपत्नीयजमानरूपाणि
गिरास्तुसास्तुवंतीतिशेषः॥ ७॥ इतिविंशोऽध्यायेपंचमःखंडः॥ ७॥ ॥ अथषष्ठखंडेप्रसो।
अग्नेइतिप्रगाथात्मकंप्रथमंसूक्तं तत्रप्रथमा॥ प्रसो अग्नेतवोतिभिःसुवीराभिःस्तरतिवा
जकर्मभिः। यस्यत्वंसख्यमाविथेति॥ हे अग्नेतवोतिभिःरक्षाभिःसयजमानःप्रतरतिप्रवर्द्धते
।जयतोविशेष्यंते।सुवीराभिःशोभनवीराःपुत्रादयोयासुतास्तथोक्ताः वाजकर्मभिःवाजाना
मन्नानांबलानांवाकर्मकरणंयासुताद्दशीभिः हे अग्नेत्वंयस्ययजमानस्यसख्यंसखित्वमि
त्वमाविथप्राप्नोषि।सतरतीत्यन्वयः॥ ७॥ अथद्वितीया॥ तवद्रप्सोनीलवान्वाशऋत्वियः

© Dharmartha Trust J&K. Digitized by eGangotri

इध्मानः सिष्मवारेदेत्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसीति। हे शिष्मो शि-
षिः सेवनार्थः सोमाना सिच्यमानाग्नेः इध्मोद्रवणशीलः नीडवान् शाकटनीडवत्स्थानात्तद्वा
नूवा शाकां ताशाश्रयमानो वा ऋत्वियः कृतो वसंतादिकालविशेषभवः इध्मानः संदीपयन् ए-
वंभूतस्तव सोम आरदेतुभ्यं होमाया ध्वर्युणा आदीयते। अपि च त्वं महीनां महतीनां उष-
सां प्रियो मित्रभूतोसि उषसि हि अग्नयो होमाय प्रक्षाल्यंते तेन तथा क्षपः क्षप्पयाः रात्रेः संबंधि-
षु वस्तुषु आच्छादकेषु तमःसु सत्सु त्वं राजसि प्रकाशसे। यद्वा रात्रिसंबंधीनि वस्तूनि प-
दार्थजातानि त्वं प्रकाशयसि॥ ७॥ ॥ अथ तमोषधीर्दधिरर इति एकर्चं द्वितीयं सूक्तं।
सा ऋग् एषा॥ तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयंत मातरः। तमित्समानं
वनिनश्च वीरुधोन्तर्वतीश्च सुवते च विश्वहेति॥ ऋत्विय मृतौ प्राप्तं गर्भं गर्भभूतं तं प्रकृतमग्निं
तु ओषधीरोषध्या दधिरे धारयंति। तमेवाग्निं मातये धारकत्वेन माहस्थानीया आपश्च जनयं-
त जनयंति किंच। वनिनो वनस्पतयश्च समानं गर्भभावेन प्रवेशात्स्वतुल्यं त्वं तमित्तमेवाग्निं ज-
नयंति किंच। तमेवाग्निं अंतर्वती गर्भवत्यो वीरुधः तु ओषधयश्च विश्वहा सर्वदा सुवते जनयं-
ति॥ ७॥ ॥ अथाग्निरिंद्राय इति एकर्चं तृतीयं सूक्तं सा ऋग् एषा॥ अग्निरिंद्राय पवते दिवि शुक्रो
विराजति। महिषीव विजायत इति॥ अग्निः यज्ञेषु प्रथमं प्राणता अग्निः इंद्राय इंद्रार्थं पवते।

© Dharmartha Trust J&K. Digitized by eGangotri

अस्माभिर्दत्तेन चरुरूपवाच्चन पुरोडाशेन देवानामधिकः स्फरति। अग्निः शुक्रो दीप्तः सं दिवि स्व-
र्गे विराजति। विशेषेण प्रकाशयति। यद्वा दिवि अंतरिक्षादिलोकेषु स्थितेषु मध्ये शुक्रो दी-
प्तः स न विराजति। तत्र दृष्टांतः। महिषीव यथा महिषी तृणादिना विविधो निपयो घृतादीनि
जनयति तथा विजायते देवानामुपभोगार्थं विविधान्यन्नानि जनयति॥ छ॥ ॥ अथ यो
जागारेति एकर्चं चतुर्थं सूक्तं सारुगेषा॥ यो जागार तमृचः कामयंते यो जागार तमु सामा-
नि यंति। यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योका इति॥ यो देवो जागरः सर्वदा वि-
निद्रो जागरूको गृहे वर्त्तते तमृचः सर्वशास्त्रात्मिकाः कामयंते यश्च जागरस्तमृचः कामयंते
यो जागार तमु सामानि यंति। यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योका इति। यो
देवो जागरः सर्वदा विनिद्रो जागरूको गृहे वर्त्तते तमृचः सर्वशास्त्रात्मिकाः कामयंते यश्च जागर
(स्त)मु तमेव सामानि स्तोत्ररूपाणि यंति प्राप्नुवंति। यो जागार तमयं अभिषुतः सोम आह वक्ति
मा स्वीकुर्विति॥ हे अग्ने तावाहमस्य तव सख्ये समानख्याने हितकरणे न्योका नियतस्थानो हं
अस्मि भवामि॥ छ॥ ॥ अथाग्निर्जागारेति पंचमं सूक्तं सारुगेषा॥ अग्निर्जागार तमृचः का-
मयंते ग्निर्जागार तमु सामानि यंति। अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योका
इति॥ सा निगदव्याख्याता॥ छ॥ ॥ अथ नमः सखिभ्य इति त्र्यासकं चतुर्थं सूक्तं तत्र प्रथमा॥

© Dharmartha Trust J&K. Digitized by eGangotri

नमः सखिभ्यः पूर्वसद्भ्यो नमः साकंनिषेभ्यः। युंजे वाचं शतपदीमिति॥ पूर्वसद्भ्यः ये पक्षप्रारं
भात्पूर्वं सीदंति तिष्ठंतीति पूर्वसदनं। तेभ्यस्सखिभ्यस्समानख्यानेभ्यः सखिवन्मित्रभूते
भ्यो देवेभ्यो नमः वयं नमस्कारं कुर्म्मः किंच साकंनिषेभ्यः। यस्मिन्पक्षे सह निषत्तेभ्यो नमः
किंच शतपदीं अस्मभ्यं फलप्रदानाय अपरिमितमार्गां वाचं स्तुतिरूपामेवं युंजे अहं योजया
मि॥ ७॥ अथ द्वितीया॥ युंजे वाचं शतपदीं गाये सहस्रवर्त्तिनि। गायत्रं त्रैष्टुभं जगदिति॥ शत
पदीं अपरिमितसंख्याकामार्गां वाचं स्तोत्रं युंजे तेभ्यः प्रकृते। प्यावक्ष्यमाणेभ्यो हं योजये गायत्रं त्रै
ष्टुभं जगदिति। शतपदीं अपरिमितसंख्याकामार्गां वाचं स्तोत्रं युंजे तेभ्यः प्रकृतेभ्यो वक्ष्यमाणे
भ्योहं योजये गायत्रं गायत्र्याख्यं त्रैष्टुभाख्यं च जगज्जागतं च साम भूपां तान्स्वं साम वा सहस्रव
र्त्तिनि अपरिमितमार्गं यथा भवति तथा गाये अहं गानं करोमि॥ ७॥ अथ तृतीया॥ गायत्रं
त्रैष्टुभं जगत विश्वारूपाणि संभृता। देवा तुकांसि चक्रिरे इति॥ गायत्रं त्रैष्टुभं जगतमक्रुसपू
हं विश्वा विश्वानि रूपाणि उक्तानि संभृतानि नानारूपाणि कृतानि देवा अग्न्यादयश्च तुकांसि
अधिष्ठितानि स्थानानि चक्रिरे कुर्वंति॥ ७॥ अथ अग्निर्ज्योतिरिति त्र्यात्मकं पंचमं सूक्तं तत्र
प्रथमा॥ अग्निर्ज्योतिर्ज्योतिरग्निरिंद्रो ज्योतिर्ज्योतिरिंद्रः। सूर्यो ज्योतिर्ज्योतिः सूर्य इति॥
एषा स्पष्टा॥ ७॥ अथ द्वितीया॥ पुनरूर्ज्जा निवर्त्तस्व पुनरग्न इषायुषा। पुनर्नः पाह्यंहस इति॥

© Dharmartha Trust J&K. Digitized by eGangotri

हेअग्नेऊर्जाबलेनइषाअन्नेनआयुषाजीवनेनचपुनरस्मान्निवर्तस्व।अस्मान्प्रत्यागच्छ।किं
चत्वंनोस्मान्अंहसःपापात्पाहि।पालयीपुनःशश्वत्स्यावृत्तिरादरार्था॥छ॥अथतृतीया॥सह
रय्यानिवर्तस्वाग्नेपिन्वस्वधारया।विश्वप्स्न्याविश्वतस्परीति।हेअग्नेत्वंरय्यारमणीयेनध
नेनसहनिवर्तस्व।ततअस्मान्प्रापयेत्यर्थः।किंचविश्वतःसर्वतःपरितुपरिपरीतिसमन्म
र्थनिवास्कः।विश्वप्स्न्यासर्वाभक्षणे।विश्वस्यतुपतोआधारयापिन्वस्वअस्मान्सिंच॥छ॥
॥इतिविंशोऽध्यायेषष्ठःखंडः॥छ॥ ॥अथसप्तमखंडेयदिच्छाहंयथालंतसोमाभिषवंकुर्या अत्रैस्मात्रुटिश्चरमपत्रेसांकपृष्ठेद्रष्टव्या।
४०५ त्।यजमानायगामश्वंचउपलक्षणमेतत्।गवाश्वादिकंसर्वमभिलषितंदुहेदुग्धे।किंकुर्व
तीपिप्यक्षीतमेवयजमानंप्रवर्द्धयित्री॥छ॥ ॥आपोहिष्ठेतितृचात्मकंतृतीयंसूक्तंतत्रप्र
थमा॥आपोहिष्ठामयोभुवस्तानऊर्जेदधातन।महेरणायचक्षसइति॥हियस्मात्कारणा
त्आपःयायूयंमयोभुवःममसुखस्यभावयित्र्यःस्थभवथ।तास्ताहृश्यो यूयंनोऽस्मान्
ऊर्जेअन्नायदधातनधत्त।अन्नप्राप्तियोग्यानस्मान्कुरुत।अन्नमस्मभ्यंदत्तेत्यर्थः।महे
महतेरणायरमणीयायचक्षसेदर्शनायसम्यक्ज्ञानायचधत्त।अस्मान्सम्यक्ज्ञानंप्र
तियोग्यान्कुरुतेत्यर्थः॥छ॥अथद्वितीया॥योवःशिवतमोरसस्तस्यभाजयतेहनः।
उशतीरिवमातरइति॥हेआपःवोयुष्माकंस्वभूतोयोरसःशिवतमःसुखतमःइहास्मिन्

© Dharmartha Trust J&K. Digitized by eGangotri

लोकेनस्यतंरसंनोस्मान्भाजयतसेवयतउपयोजयतेत्यर्थः।तत्रदृष्टांतः।उशतीरिव
पुत्रसमृद्धिकामयमानामातरःस्तन्यरसंयथाभाजयंति।प्रापयंतितद्वत्॥छ॥अथतृ
तीया॥तस्माअरंगमामवोयस्यक्षयायजिन्वथ।आपोजनयथाचनइति।हेआपो
यूयंयस्ययायस्यक्षयायविनाशायजिन्वथअस्मान्प्रीणयथतस्मैतादृशायपापक्ष
याय।अरंक्षिप्रंवोयुष्मान्गमामगमयाम।वयंशिरसिप्रक्षिपामेत्यर्थः।यद्वायस्यान्न
स्यक्षयायनिवासार्थंयूयमोषधीर्जिन्वथतर्प्पयतस्मैतदन्नमुद्दिश्यवयमलंपर्याप्तं
यथाभवतियथावोयुष्मान्गमामगच्छामः।किंचहेआपः।नोस्मान्जनयथा।पुत्रपौत्रा
दिजननेप्रयोजयेत्॥तेत्यर्थः॥छ॥ ॥अथवातआवात्वितित्र्यृचात्मकंचतुर्थसूक्तंतत्रप्र
थमा॥वातआवातुभेषजंशंभुमयोभुनोहृदे।प्रनआयूंषितारिषदिति।।वातोवायुर्नो
स्माकंहृदेहृदयायभेषजमोषधंउरुकंवाअवातुआगमयतु।कीदृग्भूतंशंभुरोगशम
स्यभावयितृमयोभुमयःसुखस्यचभावयितृअपिचनोस्माकंआयूंषिअन्नानिवा
प्रतारिषत्प्रवर्द्धयतु॥छ॥अथद्वितीया।उतवातपितासिनउतभ्रातोतनःसखा।सनो
जीवातवेकृधीति।उतापिचहेवातत्वंनोस्माकंपितासिउत्पादकोसिपालयितावा।उतापि
वभ्रातासिउतापिचनोस्माकंसखासमानख्यानामित्रभूतश्चभवति।सत्वंनोस्मान्जीवा

© Dharmartha Trust J&K. Digitized by eGangotri

तवजीवनहेतवेयणायकृधिकुरु।करोतेश्छांदसोविकरणस्यलुक्।शृणुयुक्तविभ्वथः
छंदसीतिहेर्दीर्घश्छांदसः॥७॥ अथतृतीया॥ यद्दोवातनवेगृहेमृतंनिहितंगुहा।तस्यनोधे
हिजीवसइति।हेवातवायोतेतवगृहेस्थानेयद्दःयदिदंधनंअमृतंअमृतस्यकर्मणि
षष्ठी।अविनाशिगुहागुहायांअलभ्यत्वाद्धृदयेहितंनिहितंवर्त्तते।हेविभावसोविशिष्ट
प्रकाशधनवन्वायोतस्यतद्धनंकर्मणिषष्ठीनोस्माकंधेहिदेहि।प्रयच्छेत्यर्थः॥७॥ ॥अथ
अभिवाजीतितृचात्मकंचतुर्थंसूक्तंतत्रप्रथमा॥ अभिवाजीविश्वरूपोजनित्रंहिरण्ययंबि
भ्रदत्कंसुपर्णः।सूर्यस्यभानुंमृतुथावसानःपरिस्वयंमेधमृज्रोजजानेति॥सुपर्णःसु
पतनःशोभनपतनोगरुत्मान्।विवाजीवेगवान्बलवान्।अन्नवान्वा।विश्वरूपःनानाविधप्रका
शः।सहिचित्रभानुः।ऋज्रःऋजीभृजीभ्रजीनामस्त्रोपाके।ऋजतिभर्जतिथवतीतिऋ
ज्रोअग्निःसःस्वकीयंजनित्रंजननंस्थानंअरणिबिलंआत्कंस्वतेजसाव्याप्तमतमत
एवहिरण्ययंहिरण्मयमिवस्थितंअभितःसाकल्येनबिभ्रत्पुष्णन्सूर्यस्यभानुंसवितुः
प्रकाशंऋतुथाकालेकालेरात्रौवसानोवस्त्रवदावच्छादयन्।अग्निर्वाआदित्यःसायंप्र
विशति।तस्मादग्निर्दूरान्नक्तंददृशइतिश्रुतेः।मेधेपरियज्ञंलक्ष्मीकस्यस्वयंजजानुत्पद्य
त॥७॥ अथद्वितीया॥ अप्सुरेतःशिश्रियेविश्वरूपंतेजःपृथिव्यामधियत्संबभूव।अंत

रिक्षेस्वंमहिमानंमिमानःकनिक्रंतिवृष्णोअश्वस्यरेतइति॥रेतस्मादभूतंविश्वरूपंनाना
रूपंयदस्मात्सकंतेजःअःसुश्रियेआश्रयतेवनिलायतसोपःप्राविशदितिश्रुतेः॥यश्च
पृथिव्यामधिभूमौसंबभूवतितिष्ठति॥अग्निःपृथिवीस्थानइतिहिनिरुक्तंतथाविधःसो
ऽन्तरिक्षेआकाशेस्वंमहिमानंकिरणजालंमिमानोव्यापारयन्वृष्णेःअश्वस्यरेतःसोमा
हुतिंप्रतिसोमोवृष्णोअश्वस्यरेतःसोमाहुतिंप्रतिसोमोवृष्णोअश्वस्यरेतःसइति॥श्रु
तेः॥याचमानइवपुनःपुनःक्रंदतेशब्दंकरोति॥यद्वाआस्वयन्तिवभृशंशब्दायते॥छ॥अप
पतत्तीया॥अयंसहस्रापरियुक्तावसानःसूर्यस्यभानुंयज्ञोदाधार।सहस्रदाःशतदा
भूरिदावाधर्त्तादिवोभुवनस्यविश्पतिरिति॥दिवःस्वर्गस्यअपभुवनस्यभूतजातस्यलो
कस्यधर्त्ताधारयिताविश्पतिर्विशांप्रजानांपालयिता॥सहस्रदाःशतदाभूरिदावाषोया
वस्मार्पयतेसहस्रंशतंभूरिअपरिमितंवातस्मैतस्मैतावद्दाता॥यज्ञोपजनीयोयमग्निःयु
क्तायुक्तानिस्वासनासंबद्धानिसहस्रासहस्राणिस्वकीयकिरणजालानिपरिवसानःप
रितआच्छादयन्नूसूर्यस्यभानुंरात्रौसूर्यस्यापिप्रकाशंदाधारस्वयमेवधारयति॥छ॥ ॥
नाकेसुपर्णमितित्र्यात्मकंपंचमसूक्तंतत्रप्रथमा॥नाकेसुपर्णमुपयत्पतंतंहृदावेनंतो
अभ्यचक्षतत्वा॥हिरण्यपक्षंवरुणस्यदूतंयमस्ययोनौशकुनंभुरण्युमिति॥हृवेनंतात्वं

© Dharmartha Trust J&K. Digitized by eGangotri

हृदा हृदयेन मनसा वेनंतः कामयमानाः स्तोतारः नाके अंतरिक्षे अभ्यचक्षत अभिपश्यंत ततरा
नीलं त्वं उपागच्छसीति शेषः कथंभूतं सुपर्णं शोभनपतनं अंतरिक्षे गच्छंतं हिरण्यपक्षं हिरण्म
याभ्यां पक्षाभ्यां उपेतं वरुणस्य जलाभिमानिदेवस्य दूतं वारयितुर्यमस्य नियामकस्य वैद्युता॰
ग्नेर्योनौ स्थाने अंतरिक्षे शकुनं पक्षिरूपेण वर्त्तमानं भुरण्युं भर्त्तारं यद्वा वृष्टिप्रदानादिना सर्व
स्य जगतः पोषकं भुरण धारणपोषणयोः कण्ड्वादिः अस्मादौणादिक उप्रत्ययः ॥६॥ अथ
द्वितीया ॥ ऊर्ध्वो गंधर्वो अधि नाके अस्थात् प्रत्यङ् चित्रा बिभ्रदस्यायुधानि । वसानो अत्कं सुर
भिं दृशे कं स्वर्ण नाम जनत प्रियाणीति ॥ ऊर्ध्वः उपरि देशे वर्त्तमानः गंधर्वो गवामुदकानां ध॰
र्त्ता गवि गंधर्वो वा इति गोशब्दोपपदात् धृञ् आधारणे इत्यस्मात् प्रत्ययः उपपदस्य गंभा
वश्छांदसः वेनः प्रसरः अस्मान् प्रत्यंचन् अभिमुखः सन् नाके अधि अंतरिक्षे अस्थात् ति
ष्ठति किं कुर्वन् अस्य आत्मनः स्वभूतानि चित्राणि विचित्राणि वायनीयान्याश्चर्यभूतानि वा॰
आयुधानि बिभ्रत् धारयन् बिभर्त्तेः शतरि भृञामित् इत्यभ्यासस्य इत्वं नाभ्यस्ताच्छतुरिति
नुम्प्रतिषेधः ॥ अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥ तथा सुरभिं शोभनं अत्कं मालीयं व्या
प्तरूपं वसानः सर्वत्राच्छादयन् नु किमर्थं दृशे दर्शनाय दृशे विख्ये चेति के प्रत्ययांतो निपात्यते ॥
कमिति पूरकः ॥ तत्र दृष्टांतः ॥ स्वर्ण शोभनं रणं आदित्यः स यथा आलीयं रूपं दर्शनाय सर्व

© Dharmartha Trust J&K. Digitized by eGangotri

अघाद्यपनीतवत्तदनंतरंनामनामानिनमनशीलान्युदकानिप्रियाणिसर्वेषामनुकूलानि
जनयतजनयति॥वृष्टिमुत्पादयतीत्यर्थः॥छ॥अथतृतीया॥द्रप्सःसमुद्रमभियज्जिगाति
पश्यन्गृध्रस्यचक्षसाविधर्मन्॥भानुःशुक्रेणशोचिषाचकानस्तृतीयेचक्रेरजसिप्रिया
णि॥ति॥विधर्मन्विधर्मणिविधारकेंतरिक्षेस्थितःद्रप्सोद्रवणशीलःयद्वाद्रप्सोबिंदवःअ
1 द्धन्त्यस्मिन्नादित्येवाद्रप्सः।गृध्रस्यगृध्रोरसनाभिकांक्षतःसूर्यस्यचक्षसातेजसापश्यन्प्र
काशमानोवेनःयद्यदासमुद्रंसमुद्रनशीलंमेघमभिजिगातिअभिगच्छति॥तदानींभानुःसू
र्यःशुक्रेणशुभ्रेणशोचिषातेजसातृतीयेरजसिलोकेचकानोदीप्यमानःप्रियाणिसर्वेषा
मभीष्टानिउदकानिचक्रेःकरोति॥छ॥इतिविंशोऽध्यायेसप्तमःखंडः॥छ॥ ॥वेदार्थस्यप्रका
शेनतमोहार्दंनिवारयन्।पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥छ॥इतिश्रीमद्राजाधिरा
जपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविर
चितेमाधवीयेसामवेदार्थप्रकाशेउत्तराग्रंथेविंशोऽध्यायःसंपूर्णः॥छ॥ ॥यस्यनिश्वसितं
वेदायोवेदेभ्योखिलंजगत्।निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥छ॥ ॥अथैकविंशोध्या
यआरभ्यते॥तत्रआशुःशिशानइत्यारभ्यनवसूक्तात्मकएकएवखंडः॥तत्रप्रथमसूक्तेप्रथ
मा॥आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनां॥संक्रंदनोनिमिषएकवीरः

© Dharmartha Trust J&K. Digitized by eGangotri

शत्रुः सेना अजयत्साकमिंद्र इति ॥ अत्रेंद्रोऽप्रतिरथ ऋषिः त्रिष्टुप्छंदः इंद्रो देवता। साग्निवि
सेके अग्नौ प्रणीयमाने अयमध्वर्योर्ब्रह्मणः जाप्यः। अयमिंद्र आशुः शीघ्रकारी व्यापको
वा। शिशानो निशितः शत्रूणां भयजनक इत्यर्थः। कुद्रव। वृषभो न भीमः। बिभेत्यस्मादिति भी
मः। तादृशो वृषभ इव। स यथा तीक्ष्णाभ्यां शृंगाभ्यां भीमो न वर्तते तद्वत्। अथवा शिशानः तीक्ष्ण
मति। व्यत्ययेनात्मनेपदं। वृषभो न भीमः। वृषभो यथा शृंगाभ्यां भयजनकः। तद्वच्छत्रूणां भय
जनकश्च। घनाघनः घातकः शत्रूणां। हंतेः पचाद्यच् विहंतेर्घत्वं वितिद्विर्वचनं। अभ्यासस्य आ
ऽगमः घत्वमभ्यासयोः। चर्षणीनां वर्षणियो मनुष्याः मनुष्याणां। क्षोभणः क्षोभयि
ता। संक्रंदनः सम्यक्क्रंदयिता प्राणिनां आकर्षणेन प्रहारेण वा। अनिमिषः चक्षुर्मेर्निमेषर
हितः सर्वदा स्वयत्नमागमनात् बुध्यादिकार्येष्विनल इत्यर्थः। एकवीरः वीरयसमित्रामिति
वीरः। एकस्त्वसौ वीरश्च। अथवा एक एव विक्रांतः। असाहाय्येन कार्यक्षम इत्यर्थः। ईदृशोऽयं इंद्रः शतं
ध्रसंतं सेनाः साकं सह एको योगेनैव अजयत् जयति ॥ ७ ॥ अथ द्वितीया ॥ संक्रंदनेनानिमिषेण
जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिंद्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥
ष्टु अप्रतिरथस्त्रिष्टुबिंद्रः। अस्त्रनामेंद्र उक्तविधः। तथाप्यस्माकं किमिति चेत् तत्राह। संक्रंदनेन
अनिमिषेण वा कलस्रणन जिष्णुना जयशीलेन युत्कारेण योधनं युत्तयुद्धकारिणो कर्मण्य

208

© Dharmartha Trust J&K. Digitized by eGangotri

ण। दुश्च्यावनेन अन्यैरविचाल्येन। च्युङ् प्रुङ् गतौ। छंदसि गत्यर्थेभ्य इति युच्। धृष्णुना धर्ष
णकेन। इंद्रेणेंद्रेण तद्युद्धं जयत तत् शत्रुबलं सहध्वं अभिभवत हे युधो योद्धारो हे नरो न
रा नेतारः। विभाषितं विशेषवचने बहुवचनमिति पूर्वस्याविद्यमानवचनिषेधादुत्तरं नि
हन्यते। पुनः कीदृशेनेंद्रेणेति। इषुहस्तेन। वृष्णा वर्षित्रा च॥२॥ अथ तृतीया॥ स इषुह
स्तैः स निषंगिभिर्वशी सं स्रष्टा स युध इंद्रो गणेन संसृष्टजित्सोमपा बाहुशर्ध्युग्रध
न्वा प्रतिहिताभिरस्ता। अप्रतिरथ ऋषिः। पूर्वमंत्रे इंद्रेण जयतेत्युक्तं। अथेंद्रस्य ज
यसाधनसमर्थत्वं दर्शयति। स इंद्र इषुहस्तैर्भटैः मरुदादिभिर्वशी वश्यैः स्तब्धात्। तथा
निषंगिभिर्युक्तः। निषंग खड्गस्तद्वद्भिर्वशी। स चेंद्रो युद्धे युध्यमानः सनद्गुपधलक्षणः
कः। अपपायुधो युद्धे हंतृगणेन शत्रुसंघेन सहघं स्रष्टा एकीभवनशीलः एत एवं वि
धिः अनुः संसृष्टजिच्च। ये परस्परैकमत्येन समुद्घाय संसृष्टा भवंति तेषां जेता। तथा सोमपाः
सोमस्य पाता बाहुशर्द्धी शर्द्धे बलं बाबाहुबलेन द्यानभवयी यदिति। यद्वा अथ प्रहसने बाहुभ्यां
शर्द्धयस्य पिभिभवतीति बाहुशर्द्धी सुप्यजातौ णिनिस्ताच्छील्य इति णिनिः। उग्रधन्वा उग्रतध
न्वा प्रतिहिताभिः शत्रुसु प्रेरिताभिरिषुभिः अस्ता मारयिता। यत्रेषु भूत्तुवति तत्र पृष्यान भवंती
सर्वाः। इंद्रेणेंद्रेण जयतेति संबंधः॥३॥ ॥अथ द्वितीयसूक्ते प्रथमा॥ बृहस्पते परि दीया रथेन

© Dharmartha Trust J&K. Digitized by eGangotri

रक्षोहामित्रां अपबाधमानः। प्रभंजन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां॥
अप्रतिरथ ऋषिः त्रिष्टुप् बृहस्पतिः। हे बृहस्पते। बृहतां पाता पालयिता त्वं रथेन परिदीय परि
गच्छ॥ दीयतिर्गतिकर्मा आगत्य च रक्षोहा रक्षसां हंता अमित्रान् शत्रून् अपबाधमानः स
र्वतो नाशयन् तथा सेनाः शत्रुसंबंधिनीः प्रभंजन् प्रकर्षेण नाशयन्। प्रमृणः प्रकर्षेण हिं
सन्। मृण हिंसायां। इगुपधलक्षणः कः केन हिंसन युधा युधेन सा वेकाच्व इति विभक्ते रुद्रात्त
त्वं जयन्। एवं सर्वत्र जयं प्रतिपद्यमानः इदृशस्त्वं अस्माकं रथानामविता रक्षिता एधि भव
॥७॥ अथ द्वितीयसूक्ते द्वितीया। बलविज्ञायस्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः
। अभिवीरो अभिसत्वा सहोजा जैत्रमिंद्र रथमातिष्ठ गोवित्॥ अप्रतिरथ त्रिष्टुबिंद्रः। सर्वस्य
बलं विज्ञानातीति बलविज्ञायः। यद्वा बलं ममायमिति सर्वैर्बलिष्ठेन विज्ञायत इति बलविज्ञा
यः सर्वस्य बलभूत इत्यर्थः। स्थविरो महान् प्रवीरः प्रकर्षेण वीरः सहस्वान् पराभिभवसामर्थ्यवा
जी वेजनवान्। अन्नवान्वा सहमानः शत्रूणामभिभविता। उग्र उद्गूर्णबलः। अभिवीरः अभि
गता वीरा वीर्यवंतो नुचरा यस्य स तथोक्तः। अभिसत्वा अभिगतसत्वो। सहोजाः सहसो बलाज्जा
तः एवं महानुभावस्त्वं हे इंद्र जैत्रं जयशीलं रथं आतिष्ठ आस्व सहायार्थं आरोढुमर्हसि। त्वं च गो
वित् उदकस्य स्तुतेर्वा लब्धा वेदिता वा॥७॥ अथ द्वितीयसूक्ते तृतीया। गोत्रभिदं गोविदं वज्रबा

© Dharmartha Trust J&K. Digitized by eGangotri

हुं जयंतमज्म प्रमृणंतमोजसा। इमं सजाता अनुवीरयध्वमिंद्रं सखायो अनुसंरभध्वं
॥ अप्रतिरथस्त्रिष्टुबिंद्रः। गोत्रभिदं गातुदकानि त्रायंत इति गोत्रा मेघाः। यद्वा गोभूमिः तां त्रा
यंत इति गोत्राः पर्वताः तेषां भेत्तारं गोविदं उदकस्य लब्धारं। वज्रबाहुं वज्रहस्तं। प्रहरणार्थेभ्य
इति सप्तम्याः परनिपातः। जयंतं जयनशीलं। अज्म गमनशीलं शत्रुबलं ओजसा बलेन जयंतं।
यद्वा अज्म आजिं जयंतं ओजसा बलेन प्रमृणंतं शत्रून् अभिभवंतं। ईदृशं महानुभावमिममिंद्रं।
हे सजाताः सहोत्पन्ना योद्धारो यूयं अनुवीरयध्वं एनमग्रतः कृत्वा अनुपश्चाद्वीरयध्वं वीरकर्म
युद्धं कुरुध्वं। शूर वीर विक्रांतौ। वीरशब्दात्तत्करोति तदाचष्ट इति णिच्। हे सखायः परस्परं सखि
भूताः यूयमिममिंद्रं संरभमाणेन मनु संरभध्वं॥७॥ अथ तृतीयसूक्ते प्रथमा॥ अभि गोत्रा
णि सहसा गाहमानो दयो वीरः शतमन्युरिंद्रः। दुश्च्यवनः पृतनाषाडयुध्यो अस्माकं सेना अव
तु प्र युत्सु॥ अप्रतिरथस्त्रिष्टुबिंद्रः। अयमिंद्रो गोत्राणि अभ्राणि मेघान् सहसा बलेन अभि
गाहमानाः प्रविशन् अदयः निर्दयः वीरः विक्रांतः शतमन्युः बहुयज्ञः बहुक्रोधो वा दुश्च्यवनः
अन्यैः स्वाल्पैः स्वयं पृतनाषाट् शत्रुसेनानामभिभविता। छंदसि सह इति ण्विः सहेः साडः स
इति मूर्धन्यादेशः। अयुध्यः संप्रहर्तुमशक्यः। युध संप्रहारे॥ छांदसः क्यप्। ईदृगिंद्रोऽस्माकं सेना
युत्सु संग्रामेषु प्रावतु प्रकर्षेण रक्षतु॥७॥ अथ तृतीयसूक्ते द्वितीया॥ इंद्र आसां नेता बृहस्पति

© Dharmartha Trust J&K. Digitized by eGangotri

दक्षिणायज्ञः पुरएतु सोमः। देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रं॥ अप्रतिरथस्त्रि
ष्टुबिंद्रः। आसां अस्मत्सहायार्थमागतानां देवसेनानां अयमिंद्रो नेता नायको ऽस्तु। तथा ऽनस्य बृ
हस्पतिः पुरएतु। एवं दक्षिणा यज्ञः सोमश्च पुरएतु इति प्रत्येकं संबंधः। तथा देवसेनानां अभिभंज
तीनां अस्मद्दमित्रानाभिमुख्येन मर्दयंतीनां भंजतीनां। श्री छंदसीति नामः उदात्तत्वं। जयंतीना
मित्यबहुलवचनान्न भवति। तासामग्रं मरुतो यंतु गच्छंतु॥ ७॥ अथ तृतीयसूक्ते द्वितीया॥ इंद्र। त्रि
स्य वृष्णो वरुणस्य राज्ञः आदित्यानां मरुतां शर्ध उग्रं। महामनसां भुवनच्यवानां घोषो देवानां ज
यतामुदस्थात्। अप्रतिरथस्त्रिष्टुबिंद्रः। वृष्णो वर्षकस्येंद्रस्य राज्ञो वरुणस्य आदित्यानां म
रुतां च उग्रं उत्कृष्टं शर्धो बलं अस्माकं भवत्विति शेषः। किंच। महामनसां उदारमनसां भुवनच्यवानां
भुवनानां च्य। वयितॄणां देवानां योऽयं जयशब्दः उदस्थात् उत्तिष्ठति। अनूर्ध्वकर्मत्वात् आत्मनेपदाभा
वः॥ ७॥ ॥ अथ चतुर्थसूक्ते प्रथमा॥ उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि। उ
द्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यंतु घोषाः। अप्रतिरथस्त्रिष्टुबिंद्रः। हे मघवन् इंद्र अस्म
दीयान्यायुधानि उद्धर्षय उत्कृष्टं हर्षय। प्रहरणोपयुक्तानि भवंत्विति सर्वार्थः। मामकानां मदीयानां
सत्वनां प्राणिनां सैनिकानां मनांसि वोद्धर्षय। हे वृत्रहन् इंद्र वाजिनां अश्वानां वाजिनानि वेगा उद्यंतु
। तथा जयतां रथानां घोषा उद्यंतु॥ ७॥ अथ चतुर्थसूक्ते द्वितीया॥ अस्माकमिंद्रः समृतेषु ध्वजेष्वस्मा

210

© Dharmartha Trust J&K. Digitized by eGangotri

कंयाइषवस्ताजयंतु। अस्माकंवीराउत्तारभवंतु अस्मांउदेवा अवताहवेषु॥ अप्रतिरथस्त्रिष्टुबिं
द्रः॥ अस्माकंसंबंधिषुसेवसमृतेषुपरसेनांसंप्राप्तेषुध्वजेषुध्वजसंमुखेसैनिकेषुइंद्रो अविता
भवतु। तथास्माकंयाइषवःसंतिता एवजयंतुनशत्रूणां। तथास्माकंवीराभराउत्तरेउपरिभवंतु
।हेदेवा अस्मांतु। अस्मानेव अवत रक्षतहवेषुसंग्रामेषु॥७॥ अथचतुर्थसूक्तेतृतीया। असौ
यासेनामरुतःपरेषामभ्येतिनतुर्जसास्पर्द्धमाना। तांगूहततमसापव्रतेनयथैतेषामन्यो अन्यंन
जानात्॥ अप्रतिरथस्त्रिष्टुम्मरुतः। असौयासेनाहेमरुतःपरेषांशत्रूणां अभ्येति अभिमुखा
एतिनः अस्मान्प्रतिओजसाबलेलैनस्पर्द्धमानाः।तांसेनांगूहतव्याभुतातमसा अपव्रतेन।
व्रतमितिकर्मनाम। अपगतकर्मणा।येनतमसाव्यप्ताणांनश्यंतिकर्माणितदपव्रतंतमः।तेना
पव्रतेनतमसातथागूहतयथा एतेषांयोद्धा अन्यो अन्यंनजानात्।परस्परंनजानातीत्यर्थः॥७॥
अथपंचमेसूक्तेप्रथमा॥ अमीषांचित्तंप्रतिलोभयंतीगृहाणांगान्यप्वेपरेहि। अभिप्रेहिनिर्दह
हृत्सुशोकैरंधेनामित्रास्तमसासचंतां॥ अप्रतिरथस्त्रिष्टुबप्वा। हे अप्वेपापाभिमानिनिदेवते अ
मीषांयोद्धृणांचित्तंप्रतिलोभयंतीविमोहयंतीसती अंगानितेषामवयवान्गृहाण आश्लिष्टान्गृह
णस्वीकुरु। परेहि। अस्मत्तःदूरंगच्छ। अभिप्रेहि अभिगच्छ। तेषांसमीपंगत्वाचहृत्सुहृदयेषुशो
कैर्निर्दहनितरांभस्मीकुरु। ते अमित्रा अमित्रा अस्मच्छत्रवोंऽधेनतमसासचंतांगच्छंतां॥७॥॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ अथपंचमसूक्ते द्वितीया॥ प्रेताजयतानरइंद्रोवःशर्मयच्छतु। उग्रावःसंतुबाहवोनाधृष्याय
थासथ। अप्रतिरथोनुष्टुबिंद्रोमरुतोवा। हेनरोनेतारःसंग्रामस्यतितीर्षारोयोद्धारः प्रेतप्र
कर्षेणगच्छत। गत्वाचजयत। ततान् प्रतिभयान् तिष्ठ परत्वा तिष्ठंति इति निघाताभावः। वोयुष्मा
कमिंद्रःशर्मसुखंयच्छतु प्रयच्छतु। वोबाहवउग्राउद्गूर्णबलाःसंतुभवंतु। अनाधृष्याःअन्यैर
नभिभाव्याः। अथायूयमसथभविष्यथतथाउग्राःसंतुवोबाहवः॥ ७॥ अथपंचमसूक्तेतृ
तीया॥ अवसृष्टापरापतशरव्येब्रह्मसंशिते। गच्छामित्रान्प्रपद्यस्वमामीषांकंचनोच्छिषः॥
अप्रतिरथऋषिः। पायुर्वाभारद्वाजः। अनुष्टुप् छंदः। इषुर्देवता। ब्रह्मसंशितेमंत्रेणतीक्ष्णीकृते
शरव्येहिंसाकुशलेइषो। त्वंअवसृष्टाक्षिप्तापरापतपरागच्छइतोदेशात् गत्वाचअमित्रान्
हिंसकान् प्रपद्यस्वप्राप्नुहि। वा अमीषाममित्राणांमध्येकंचनकंचिदपिमाउच्छिषः॥ अवशि
ष्टंमाकुरु॥ ७॥ ॥ अथषष्ठेसूक्तेप्रथमा॥ कंकाःसुपर्णाअनुयंत्वेनान्गृध्राणामन्नमसाव
स्तुसेना। मैषांवाच्यघहारश्चानेंद्रवयांस्येनाननुसंयंतुसर्वान्॥ अप्रतिरथऋषिः। पायु[illegible]भार
द्वाजः त्रिष्टुप् छंदःइषुर्देवता। कंकानामपक्षिणःकंक्याताःसुपर्णाःशोभनपतनाःअनुयंतु
एतान्शत्रून्गृध्राणामन्नंपक्षिणांभक्ष्यभूता असौअस्तुसेना। माएषांमोचि। एतेषांमाकश्चि
न्मुच्यतां। अघहारश्चन। हेइंद्रयोपिनितरांपापीयान्। अतिप्रसवरःसोपिनमुच्यतां म्रत्योःवयां

© Dharmartha Trust J&K. Digitized by eGangotri

सेनानवयांसिपक्षिरूपाणिक्रव्यादानिअनुसंयंतुसर्वान्अनुपश्चात्यंतुसर्वान्शत्रून्॥
॥ ॥ अथषष्ठेसूक्तेद्वितीया। अमित्रसेनांमघवन्नस्मांछत्रुयतीमभि। उभौतामिंद्रवृत्रहन्
अग्निश्चदहतंप्रति॥ अप्रतिरथऋषिरग्निर्वा। अनुष्टुप्छंदः। इंद्राग्नीदेवते। अमित्रसेसेनां।
शत्रुसेनांहेमघवान्अस्मान्शत्रूयतीमभिशत्रुभिःपरिवारितां। उभौतांसेनांहेइंद्रवृत्रहन्त्वं
चाग्निश्चप्रतिदहतंभस्मीकुरुतमित्यर्थः॥ ॥ अथषष्ठेतृतीया॥ यत्रबाणाःसंपतंतिकुमाराविशि
खाइव। तत्रनोब्रह्मणस्पतिरदितिःशर्मयच्छतुविश्वाहाशर्मयच्छतु॥ अप्रतिरथऋषिः। पायु
भरिद्वाजः। पंक्तिःछंदः॥ ब्रह्मणस्पतिरदितिश्चदेवता॥ यत्रसंग्रामेकुमाराविशिखाइवमुंडिता
इवबाणाःसंपतंतितत्रनोस्मभ्यंब्रह्मणस्पतिःशर्मसुखंविश्वाहासर्वदायच्छतु। अदितिश्च
सर्वदाशर्मयच्छतुद्विरुक्तिरादरार्था॥ ॥ अथसप्तमेसूक्तेप्रथमा॥ विरक्षोविमृधोजहिविवृत्र
स्यहनूरुज। विमन्युमिंद्रवृत्रहन्अमित्रस्याभिदासतः॥ अप्रतिरथऋषिःशासोभारद्वाजोवा।
अनुष्टुप्छंदः। इंद्रोदेवता। हेइंद्ररक्षोराक्षसेजातंविजहिविनाशय। मृधःसंग्रामकारिणःशत्रूंश्च
विजहि। वृत्रस्यावरकस्यासुरस्यहनुकपोलप्रांतौविरुजविशेषेणभग्नौकुरु। हेवृत्रहन्निंद्रअ
भिदासतःअस्मानुपक्षपयतोऽमित्रस्यशत्रोर्मन्युंक्रोधमपिविनाशय॥ ॥ अथसप्तमसूक्ते
द्वितीया॥ विनइंद्रमृधोजहिनीचायच्छपृतन्यतः। योअस्मांअभिदासत्यधरंगमयातमः॥ अप्रति

© Dharmartha Trust J&K. Digitized by eGangotri

रथऋषिः। अनुष्टुप्छंदः। इंद्रो देवता। हे इंद्र नोऽस्माकं मृधः संग्रामकारिणः शत्रून् विजहि
विनाशाय। तथा पृतन्यतः पृतनाः सेनाः। सेना आत्मन इच्छतः युयुत्समानानपि नीचा यच्छ।।
नीचीनमवाङ्मुखं यच्छ गमय। यः शत्रुरस्मानभिदासति अभितः उपक्षपयति। तं अधरं
निकृष्टं तमोंधकारमरणलक्षणं गमय प्रापय।।छ।। अथ सप्तमे सूक्ते तृतीया।। इंद्रस्य
स्प बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ। तौ युंजीत प्रथमे। योग आगते याभ्यां जि
तमसुराणां सहो महत्।। अप्रतिरथऋषिः। इंद्रो देवता।। विराड्जगती छंदः। इंद्रस्य बाहू स्थवि
212 रौ स्थिरस्वरूपौ। अथवा स्थविरौ स्थूलौ। युवानौ जरया नग्रस्तौ। अनाधृष्यौ। न केन विधृष्येते
सुप्रतीकौ। स्वाकृती। हस्तिकराकारौ। असह्यौ न कश्चित् सोढुं शक्तः। तौ युंजीत प्रथमो योजे आ
गते। योगे संग्रामे प्रति युज्यं वे वाहवः याभ्यां जितं असुरस्वभूतं सहः बलं महत्।।छ।। ।।अ
थाष्टमे सूक्ते प्रथमा।। मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्तां। उरोर्वरीयो व
रुणस्ते कृणोतु जयंतं त्वानु देवा मदंतु।। अप्रतिरथऋषिः। पायुर्वभारद्वाजः। त्रिष्टुप्छंदः। सोमो
वरुणश्च देवता।। हे राजन् त्वदीयानि ते मर्माणि येषु स्थानेषु विद्धः सद्यो म्रियते तानि मर्माणि
वर्मणा कवचेन छादयामि। सोमो राजत्वा त्वां अनु मर्मच्छादनानंतरममृतेन वस्तां आछादय
तु। किंच वरुणोपि ते तुभ्यं उरोर्वरीयः उरु तुभ्यं सुखं कृणोतु करोतु। जयंतं त्वां देवाः सर्वेपि

© Dharmartha Trust J&K. Digitized by eGangotri

अनु मदंतु अनु हृष्यंतु ॥ छ ॥ अथाष्टमे सूक्ते द्वितीया ॥ अंधा अमित्रा भवताशीर्षाणो ऽह
य इव ॥ तेषां वो अग्निनुन्नानामिंद्रो हंतु वरंवरं ॥ अप्रतिरथ ऋषिः ॥ अनुष्टुप्छंदः ॥ इंद्रो देवता
हे अमित्राः शत्रवः यूयमंधा भवत ॥ कीदृशा अंधाः ॥ अशीर्षाणः ॥ अहयं इव ॥ यथा सर्पाः
शीर्षच्छिन्नाः अकिंचित्करा भवंति तथा भवत ॥ तेषां वः अग्निनुन्नानां अग्निदग्धानां शत्रूणां
इंद्रो हंतु वरंवरं ॥ यो यो वसिष्ठस्तं तं इंद्रो हंतु तान्नाशयतु ॥ छ ॥ अथाष्टमे सूक्ते तृतीया ॥ यो नः स्वो अ
रणो यश्च निष्ट्यो जिघांसति ॥ देवास्तं सर्वे धूर्वंतु ब्रह्म वर्म ममांतरं शर्म वर्म ममांतरं ॥ अप्रति
रथ ऋषिः ॥ पङ्क्तिश्छंदः ॥ देवा देवता ॥ स्वः स्वो ज्ञातिः ॥ अरणः अरममाणः ॥ यश्च निष्ट्यस्तिरोभू
तः दूरे स्थितः नो अस्मान् जिघांसति ॥ हंतुमिच्छति ॥ तं देवाः सर्वे देवाः ॥ धूर्वंतु हिंसंतु ब्रह्म मंत्रो म
म अंतरं नाराणां निवारकं वर्म विधत्ते ॥ नाम वर्म संनहनभूतेन ममांतरमस्तु ॥ छ ॥ ॥ अथ न
वमे सूक्ते प्रथमा ॥ मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगंथा परस्याः ॥ सृकं संशाय
पविमिंद्र तिग्मं वि शत्रून्ताढि वि मृधो नुदस्व ॥ अप्रतिरथ ऋषिः ॥ ऐंद्रो देवागयः ॥ त्रिष्टुप्छंदः ॥ इं
द्रो देवता ॥ कुचरः कुत्सितचरणः ॥ गिरिष्ठाः पर्वतनिवासी ॥ मृगो न सिंह इव ॥ हे इंद्र त्वं भीमो भयंकरो
ऽसि ॥ स त्वं परस्याः परावतः अतिशयेन दूरात् द्युलोकात् आजगंथ ॥ आगच्छ गमेश्छांदसे लिटि
क्रादिनियमप्राप्तस्येट उपदेशे ऽत्वत इति प्रतिषेधः ॥ आगत्य च सृकं सरं शीलं तिग्मं तीक्ष्णं पवि
ण

वज्रं संशाय सम्यक् तीक्ष्णीकृत्य शत्रून् अस्मदीयान् वैरिणान् हे इन्द्र तेन वज्रेण विताडि वि
शेषेण ताडय विनाशय इत्यर्थः ॥ तड आघाते । अस्माएवं तान् लोटि रूपमेतत् । यद्वा अधः सं
ग्रामोपक्रमान् युयुत्सून् अन्यानपि विनुदस्व विशेषेण अभिरस्य तिरस्कुरु ॥ ७ ॥ अथ नवमे सूक्ते
द्वितीया ॥ ८ ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवांस
स्तनूभिर्व्यशेम हि देवहितं यदायुः ॥ अप्रतिरथ ऋषिः । राहूगणपुत्रो गोतमो वा । त्रिष्टुप् छंदः ।
विश्वे देवा देवता ॥ हे देवाः दानादिगुणयुक्ताः सर्वे देवाः कर्णेभिरस्मदीयैः श्रोत्रैः भद्रं भजनीयं
कल्याणं वचनं शृणुयाम युष्मत्प्रसादात् श्रोतुं समर्थाः स्याम । अस्माकं बाधिर्यं कदाचिदपि
मा भूत् ॥ हे यजत्राः यागेषु च पुरोडाशादिभिः यष्टव्या देवाः अक्षभिरक्षिभिरात्मीयैश्चक्षुर्भि
र्भद्रं शोभनं भजनं पश्येम द्रष्टुं समर्थाः स्याम । अस्माकं दृष्टिप्रतिघातोपि मा भूत् ॥ स्थिरैर्दृढैरंगै
र्हस्तपादादिभिरवयवैः तनूभिः शरीरैश्च युक्ता वयं तुष्टुवांसः स्तुवंतः । यदायुः षोड
शाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा देवहितं देवेन प्रजापतिना स्थापितं तद्व्यशेम
हि प्राप्नुयाम । कर्णेभिः बहुलं छंदसीति भिस ऐस भावः । अक्षभिः छंदस्यपि दृश्यत इत्यनङ्
सर्वोदात्तः । यजत्राः अमितक्षीसादिना यजेरत्रन्प्रत्ययः । तुष्टुवांसः ष्टुञ् स्तुतौ । लिटः क्वसुः
। शापूर्वाः खयः इति तकारः शिष्यते । अशेमहि । अशूङ् व्याप्तौ लिङ्ग्यशिष्यद्दद् । यदिति तत्र परिग

213

२०३

© Dharmartha Trust J&K. Digitized by eGangotri

पानं। अस्य याचस्यर्थं ति दानी लिडि। प्रसयेन आपूर्देवहितं तृतीया कर्मणीति पूर्वपदप्रकृति
स्वरत्वं॥ ७॥ अथ नवमे सूक्ते तृतीया॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्व
स्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ अप्रतिरथ ऋषिः। राहूगणपुत्रो गो
तमो वा॥ स्विराट् त्रिष्टुप् छन्दः॥ विश्वे देवा देवता॥ वृद्धश्रवाः। वृद्धं प्रभूतं श्रवः श्रवणं स्तोत्रं हवि
र्लक्षणमन्नं वा यस्य तादृश इन्द्रो नोऽस्माकं स्वस्ति अविनाशनाम स्वस्ति अविनाशं दधातु। वि
दधातु। करोतु विश्ववेदाः। विश्वानि वेत्तीति विश्ववेदाः। यद्वा विश्वानि सर्वाणि वेदांसि ज्ञाना
नि धनानि वा यस्य तादृशाः। पूषा पोषको देवः नोऽस्माकं स्वस्ति विदधातु। अरिष्टनेमिः। नेमि
रित्यायुधनाम। अरिष्टो असिं हिंसितो नेमिर्यस्य। यद्वा रथचक्रस्य धारा नेमिः। यत्संबंधिनो
रथनेमिर्न हिंस्यते सोऽरिष्टनेमिः। एवंभूतस्ताक्ष्यः। तृक्षस्य पुत्रो गरुत्मान् नोऽस्माकं स्वस्ति
अविनाशं दधातु। तथा बृहस्पतिः। बृहतां देवानां पालयिता नोऽस्माकं स्वस्ति अविनाशं विदधा
तु। वृद्धश्रवाः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। विश्ववेदाः। विद ज्ञाने। विद्लृ लाभे। आभ्यामसुन्प्रस
यांतो वेदस्शब्दः। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। तार्क्ष्यः। तृक्षस्यापत्यं। गर्गादि
भ्यो यञ्। ञित्वादाद्युदात्तत्वं। अरिष्टनेमिः। न रिष्टा अरिष्टा। अव्ययपूर्वपदप्रकृतिस्वरत्वं।
अरिष्टनेमिर्यस्य स तथोक्तः। बृहस्पतिः। तद्बृहतोः। तद्बृहतोः करपत्योरिति सुट्तलोपो उभेव।

© Dharmartha Trust J&K. Digitized by eGangotri

नस्यसादिस्थिति पूर्वोत्तरपदयोर्युगपत्सक्कृतिस्वरत्वं ॥७॥ इत्येकविंशोऽध्याये प्रथमः खंडः ॥७॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥७॥ ॥इति
श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तरग्रंथे एकविंशोऽध्यायः संपू
र्णः ॥७॥ शुभं ॥ ॥स्वस्ति श्रीमत्संवत् १९२२ आषाढमासे कृष्ण्यां मंदवासरे ॥७॥ ॥७॥

एकवींश मितितृचात्मके प्रथमसूक्ते त्वप्रथमा ॥ यदिंद्राहं यथा त्वमीशीय वस्व एक इत् स्तोता मे गोसखा स्यात् ॥ हे इंद्र यथा त्वं ...
एकस्त्वं वसुनो धनस्य ईशिषे ईश्वरो भव ... स्तोता मे गोसखा
स्यात् गोभिः सहितो भवेत् ईश्वरस्य ... अथ यदि ...
शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे यदहं गोपतिः स्याम् इति हे शचीपते ...
... शिक्षेयं ... यदि अहं गोपतिः ...
... अश्वम् ॥ धेनुष्ट इंद्र सूनृता यजमानाय सुन्वते गामश्वं पिप्युषी दुहे ॥ हे
इंद्र ... धेनुर्दोग्ध्री ... सुन्वते ...

पृ॰ २६१ यस्यायं विश्व आर्यो दासः इत्यादि का मूर्द्धा

© Dharmartha Trust J&K. Digitized by eGangotri